सरस्वतीभवन-ग्रन्थमाला

([illegible])

[illegible]

[illegible]

[illegible]

रसगङ्गाधरः

[illegible] भागः

सम्पूर्णानन्द-संस्कृत-वि

SARASVATĪ BHAVANA GRANTHAMĀLĀ

(Vol. 112)

General Editor

DR. BHĀGĪRATHA PRASĀDA TRIPATHĪ 'VĀGĪSHA SHĀSTRĪ'
Director, Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi

RASAGANGĀDHARA

[PART 1]

With the Commentary

'RASACHANDRIKĀ'

By

PT. KEDĀRANĀTHA OJHĀ

VARANASI

1977

Published by—
Director, Research Institute,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi (U. P.)

Available At—
Publication Section,
Sampurnanand Sanskrit Vishvavidyalaya,
Varanasi-221002. (U. P.)

First Edition : 1100 Copies

Price Rs. 22-00

Printed by—
Ācharya Baṇdhu Mudraṇālaya,
A-1/12, Gaighat.
Machhodari,
Varanasi

सरस्वतीभवन-ग्रन्थमाला

(११२)

प्रधानसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थाननिदेशकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

पण्डितराजजगन्नाथविरचितः

रसगङ्गाधरः

[प्रथमो भागः]

श्रीकेदारनाथ-ओझा

विरचितया

रसचन्द्रिकाख्यया व्याख्यया विभूषितः

वाराणस्याम्

२०३३ तमे वैक्रमाब्दे   १८९८ तमे शकाब्दे   १९७७ तमे खैस्ताब्दे

प्रकाशकः

निदेशकः,
अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

प्राप्तिस्थानम्—

प्रकाशनविभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी–२२१००२ (उ० प्र०)

प्रथमं संस्करणम्: ११०० प्रतिरूपाणि

मूल्यम्—२२-०० रूप्यकाणि

मुद्रकः

आचार्यबन्धुमुद्रणालयः
ए—१।१२, गायघाट,
मच्छोदरी
वाराणसी ।

प्रास्ताविकम्

विस्तारिकासंवलितकाव्यप्रकाशप्रकाशनसमनन्तरमेवायमपरः काव्यशास्त्रग्रन्थः सरस्वतीभवनग्रन्थमालाया द्वादशोत्तरशततमपुष्पत्वेन प्रकाशमानीयते काव्यशास्त्रप्रणयिजन-मानसामोदी रसचन्द्रिकासमलंकृतो रसगङ्गाधरो नाम। रससिद्धकवीश्वरत्वेन साकमेव काव्यशास्त्रसमीक्षापारगामिता पण्डितराजस्यानितरसाधारणो महिमा। शास्त्रपाण्डित्येन सार्द्धमेव कवित्वपर्यवसायो विरल इति स्वयमेव पण्डितराजः प्रतिश्रृणोति 'पाषाणादपि पीयूषं स्यन्दते यस्य लीलया' इत्यभिदधानः। गुरुपरम्परागतोऽयं गुणः काव्यजगन्नाथेन जगन्नाथेन चरमोत्कर्षतामापादितः। यद्यपि शेषश्रीकृष्णे परमगुरौ फणिभाषितभाष्याब्धि-सन्तरणनदीष्णतायाः कोमलकान्तपदावलीसभाजितकाव्यविभावनचारुतायाश्चैकत्र संगमः सुप्रथामञ्चति, तथापि काव्यशास्त्रमधिकृत्य विरचितेन ग्रन्थेन नास्ति तदीयं तादृशं यशः। तत्पुत्रस्य शेषवीरेश्वरपण्डितस्य कवित्वशक्तिप्रख्यापकं नाकर्ण्यते किमपि काव्यम्, तन्निकषरूपं च काव्यशास्त्रम्। पण्डितराजजनकेन गुरुणा च महीसुरसत्तमेन पदवाक्य-पारावारीणेन पेरुभट्टेन नैकोऽपि ग्रन्थो रचितः।

पण्डितराजस्य यदिदमप्रधृष्यं प्रकाण्डपाण्डित्यं लेखनीसहायतया प्रकाशमुपेतम्, तत् तात्कालिकपण्डितमण्डलीकृतसमालोचनाविजृम्भितमेव सहृदयधुरीणैस्तद्ग्रन्थेषु प्रतिस्थलं साक्षात्करिष्यते। कवित्वेन काव्यशास्त्रेण च सार्धमेवास्य लेखनीविहारो व्याकरणशास्त्रसमीक्षणेऽप्यव्याहतः। पर्यन्ते भक्तिरससमुद्रेकेणास्य कविता पाविता।

कस्मिंश्चिदपि विद्याक्षेत्रे प्राक्तनीं ज्ञानधारामवगाह्य स्वोपज्ञज्ञानोदबिन्दूत्करो नामानुसन्धानम्। गङ्गाधारणसामर्थ्यं धूर्जटेरिव रसगङ्गाया धारणशक्तिरस्य रसगङ्गा-धरकाव्यशास्त्रस्याभ्युपेतव्या। इह पण्डितराजेन पूर्ववर्तीनि निखिलानि मतान्यालोड्य तदालोचनपूर्वकं स्वोपज्ञज्ञानविष्णुपादोदबिन्दवोऽपि संनिवेशिताः।

गीर्वाणवाण्या रचितानां ग्रन्थानां ग्रन्थिस्फोरणाय विषयपल्लवनाय च महती खलु परम्परा लभ्यते भाष्यव्याख्याटिप्पण्यादीनां भारते वर्षे। मूलग्रन्थकारापेक्षया विस्तृतं विशदं च पाण्डित्यमावश्यकं मन्यते भाष्यव्याख्याकारादीनाम्। शेषवंशावतंसश्रीकृष्ण-परम्पराकेण सर्वतन्त्रस्वतन्त्रेण वैयाकरणशिरोमणिनाऽष्टादशशततमख्रीस्ताब्दारम्भभवेन म० म० नागेशभट्टेन रसगङ्गाधरस्य महिमानं विभाव्य रसगङ्गाधरमर्मप्रकाशाख्यव्याख्यया समुद्भासितोऽयं ग्रन्थः। तस्य खरतरस्य प्रकाशस्य सारल्यसम्पादनाय यद्यपि भट्टश्रीमथुरा-नाथशास्त्रिणा सरलाख्यटिप्पण्या पाठसशोधनेन महानुपकारो विहितः काव्यशास्त्रविमर्शन-शील नाम्, हिन्दीभाषया संदृब्धाः कतिचन व्याख्या अपि रसगङ्गाधरस्य प्रकाशमुपेताः,

तथापि चन्द्रिकावदाह्लादकारिण्याः कस्याश्चन व्याख्याया अभावं चिरादन्वभवञ् जिज्ञासुजनाः ।

व्याकरणन्यायसाहित्याद्यनेकशास्त्रपारावारपारङ्गतैः पण्डितप्रवरैः ओझोपाख्यैः श्रीकेदारनाथमहोदयैः रसगङ्गाधरे रसचन्द्रिकाम् अवतार्य जिज्ञासूनां चिरोदया लिप्सा सम्पूरिता । तैः शास्त्रपारावारं निर्मथ्य टीकाष्टिप्पणीश्च पर्यालोच्य महता श्रमेण रसचन्द्रिकेयमाविर्भाविता । सा चेयं लक्षणानिरूपणपर्यन्तं प्रथमभागात्मिका सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेन प्रकाश्यमाना विद्वन्मनोमोदाय सम्पत्स्यत इति ध्रुवं विदवशिति ।

गङ्गादशहरापर्वणि
२०३४ वैक्रमाब्दे
(२८–५–७७ खीस्ताब्दे)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य

भूमिका

नव्यन्यायतत्त्वचिन्तामणिप्रभृतिग्रन्थानां समुदयानन्तरं शास्त्रेषु नव्यं युगमिव प्रावर्तत,वेदान्ते तत्त्वदीपिकाऽद्वैतसिद्धिप्रभृतयः,पूर्वमीमांसायां शास्त्रदीपिकाभाट्टदीपिकादयः, व्याकरणे शेखरादयश्च तस्यैव निदर्शनानि, तदानीन्तनावेव श्रीमदप्पय्यदीक्षितपण्डितराजजगन्नाथौ मनीषिणौ । तत्र पण्डितराजो दीधितिव्याख्यामपि अध्यैत, नानाशास्त्राणां सम्मेलनमिव अलङ्कारशास्त्रमिति न विदुषां तिरोहितम्। प्रारम्भेऽपि ऊहापोहाभ्यां दुरूहतया शास्त्रान्तराणि परिहरन्तो बुद्धिश्रमभीरवः कोमलानि काव्यानि अधीयानाः प्रतिभावशान्महान्तः पण्डिताः, अध्यापकाः प्राध्यापकाः कवयश्च भवन्ति, आलङ्कारिकग्रन्थान् अधीतवतामपि तेषाम् आलङ्कारिकग्रन्थेषु न तादृशी निरवरोधा व्युत्पत्तिरित्यपि नाविदितम् । तत्राप्ययं नव्ययुगस्य रसगङ्गाधरो ग्रन्थः, अत एव चिरान्नगाध्ययनसमयेऽयं परीक्षायां प्रवेशमलभत । तदानीं निर्णयसागरस्य द्वे काश्या एकं त्रीणि पुस्तकानि प्राप्यन्ते स्म, परं कुत्रापि महाविदुषोऽधिकारिणः संशोधने सम्पादने च श्रमः। न प्रतीतिपथमवतीर्णः,काश्याः समाचारोऽयं श्रुतो यन्महान्तः प्रतिष्ठिताः पण्डिताः संशोधने सम्पादने च श्रमं न सहन्ते, प्रकाशकाः साधारणपण्डितद्वारा संशोधनसम्पादने सम्पाद्य प्रतिष्ठायै महाविदुषां नाम मुद्रापयन्ति, ते च येन केनापि प्रकारेण नाम ददति ।

जयपुरे कतिभिश्चिदेव मासैरध्यापयन्नत्र प्रवृत्त आसम्, मम सविधेऽपि यदा कदा कश्चिच्छात्रोऽध्येतुम् आरभत । श्रुतं यदत्रत्यसाहित्यप्रधानाध्यापकानां कविशिरोमणिपण्डितप्रवरश्रीमथुरानाथभट्टमहोदयानां निर्णयसागरतो मुद्रिता रसगङ्गाधरसरला टीका विजृम्भते । तत्र भूमिकायां वैयाकरणश्रीनागोजीभट्टमहोदयानां वैदुष्योपरि महान्तो विविधा आक्षेपाः प्रकाशिताः सन्ति, परं तावद् दृष्टं नाभूत्, मूलस्थं रूपकलक्षणं संक्षिप्य मर्मप्रकाशे लघु प्रदर्शितं वर्तते. तदेव छात्रद्वारा मम सविधे कविशिरोमणिमहोदयः प्राहिणोत्, अपृच्छच्च किमिदं सम्यक् ? एतावदेव, साधारणतया दृष्ट्वा अवोचम्, अधुना तु सम्यगेव प्रतिभाति, कविशिरोमणिमहोदयाः स्वाभिप्रेतं प्रकटयेयुः, विचारयेयम, तदा यथा तथा वा भवेत् । परं नासौ स्वाभिप्रेतं प्रैषयत्, अहमेव तत्सविधेऽगच्छं प्राक्तौषञ्च, चर्चायां स्थूलदृष्टिरसौ, तस्य

बुद्धिः सूक्ष्मविचारं न सहते इत्यन्वभूवम्, म० म० पं० श्रीगिरिधरशर्ममहोदयानां सविधेऽस्य चर्चा करणीयेति न्यवेदयम्, श्रावयित्वाऽलिखमिति आगृह्य मम निवेदनं नाभ्यनन्दत, चतुर्वेदिमहोदयाः 'किं विचारितं श्रीमद्भिः? नागेशस्य तल्लक्षणम् अशुद्धम्?' इति मम वचः श्रुत्वा अब्रुवन्—न विचारितं न वाऽशुद्धम्, आलङ्कारिकशैल्या नास्ति लक्षणमिति भट्टमहोदयो वक्ति। व्यर्थानि बहूनि पदानि दोषं विनैव लक्षणे योजनीयानीति किम् आलङ्कारिकाणां शैली? इति प्रश्नमुपेक्ष्य मौनमालम्बन्त पुनर्विचारावसराय च न समनह्यन्त। ममासहनशक्तिर्मां तट्टीकाऽवलोकने प्रावर्तयत्। कविशिरोमणिभट्टमहोदया महावैदुष्यभाजो बहूनि महाकाव्यानि खण्डकाव्यानि प्राचीनार्वाचीनच्छन्दोभ्यो लोकप्रचलितगीतिच्छन्दोभ्यश्च विरचितवन्तः,व्याकरणस्य प्रचलितानि सर्वाणि पुस्तकानि प्रायोऽधीतवन्तः। भूषणमञ्जूषादिग्रन्थानां व्युत्पत्तिर्नासीत्। प्रायोगिकवैयाकरणता ममापेक्षया महत्तराऽभूत्, परं रसगङ्गाधरटीप्पणे तस्य अनधिकारचेष्टामेव अन्वभवम्, अयोध्याप्रचालितसंस्कृतं संस्कृतपत्रे लेखद्वयेन सोदाहरणं स्फुटं प्राकाशयञ्च।

आलङ्कारिकग्रन्थस्य दुर्दशा—संस्कृतं साप्ताहिकसंस्कृतपत्रे
२५।२।१९४७ ईशाब्दे प्रकाशिता।

रसगङ्गाधरटीकयोर्विमर्शः—,, ,, ,,
२५।३।४७ ईशाब्दे प्रकाशितः।

एवमेतद्द्वयानन्तरं गुरुमर्मप्रकाशं पण्डिता उपेक्षन्ते संशोधनं न भवतीति विषयमवलम्ब्य तत्र मम तृतीयोऽपि लेखः प्रकाशितः, किन्तु तं संग्रहीतुं नाशकम्। अस्य विशेषचर्चामत्र परित्यजामि। अन्यैरालङ्कारिकनिबन्धैः साकं हिन्दीभाषान्तरयुत पृथक् प्रकाशनप्रयासः प्रचलति।

ततः पण्डितप्रवरश्रीपुरुषोत्तमचतुर्वेदिकृतं काशीनगरीप्रचारिणीसभाद्वारा प्रकाशितं 'हिन्दीरसगङ्गाधरम्' आलोकयम्, यद्यप्यसौ भावार्थसंग्रही न सर्वविषयग्राही, तथाऽपि तत्रापि तथैवानधिकारचेष्टा बुद्धिपथमवतीर्णा फलत एतावताऽध्ययनेन मयैव व्याख्यातुं प्रयतनीयमिति समीहया व्याख्याने प्रावर्तिषि च।

सरलाया रसगङ्गाधरहिन्दयाश्च अशुद्धिस्थलानि रसचन्द्रिकायां सूचितानि पाठका उपलप्स्यन्ते, क्वचित् किञ्चिदुपपादनमपि विद्यते बहुषु स्थलेषु सूचनामात्रम्। व्याख्याने पाठसंयोजने च काठिन्ये आपतिते काशीस्थाः कविचक्रवर्तिनः श्रीमहादेवशास्त्रिपाण्डेयमहोदयाः पत्रद्वारा पृष्टा यथाऽ-

लिखन् तेन मानसं समवाबोधिषि। ते एव महोदयाः पश्चात् स्वामिश्रीमहेश्वरानन्दसरस्वतीशङ्कराचार्या आसन्, तेषां क्वचिन्नाम कुत्रचिच्च वाक्यानि रसचन्द्रिकायामुपलभ्येरन्। एवं कथमपि व्याख्यायां पूर्णायां काश्यामागत्य माध्वसम्प्रदायाचार्यश्रीदामोदरलालगोस्वामिमहोदयान् तेषां समीहानुसारं पञ्चषाणि स्थलानि अश्रावयम, ते महोदयाः श्रुत्वैव परं प्रासीदन्, यथा भवद्भ्यो रोचेत तथा विलिखतु, हस्ताक्षराणि विधास्यामि, मम पत्रे ममाक्षरेण च लिखितं समीहते चेत्, समयेन सम्पद्येत, द्वित्राणि दिनानि तिष्ठतु, सावधानः स्वासाधारणभाषया लिखित्वा दास्यामि, सङ्कुचितसमयेन मया सङ्कुचितं लिखितं तदुपरि तैर्महोदयैर्हस्ताक्षराणि कृत्वा मह्यमदायि, तदानीमेव चौखम्भाप्रकाशनस्वामिनं कमप्याहूय प्रकाशनाय आगृह्णन् गोस्वामिमहोदयाः, स च प्रकाशनस्वामी सर्वं स्वीचकार। परं मया साकमेव गन्तुमुत्थाय मार्गेऽब्रवीत्—अवश्यं प्रकाशयिष्यामि, किन्तु वर्षेण वर्षद्वयेन, वर्षत्रयेण वा हिन्दीभाषान्तरं विधाय शीघ्रं ददातु। ततश्च हिन्दीं कर्तुं समयाभावेन स्वयं प्रकाशने च अर्थाभावेन प्रकाशनमस्य नावसरमवापत्। लखनऊविश्वविद्यालये प्रत्यभिज्ञादर्शनस्य पाटलिपुत्रे बौद्धदर्शनस्य अध्ययनाध्यापने मम समयदारिद्र्यमपोषयताम्, अर्थदारिद्र्यं तु जन्मसहचरितं मम शरीरेण सहैव युवतां वधव् अध्ययनसमये एक काश्या बहिर्निरसारयत्। एवञ्चास्य प्रकाशनचर्चाऽपि व्यलीयत।

ततश्च कियता समयेन महाविदुषा दीर्घायुषा सहृदयेन ध्वन्यालोकविवृत्यादिना प्रथितसमज्ञेन त्रिंशद्वर्षाणि यावत् प्रतिवर्षं बहुशः साहित्याचार्यान् समुत्तारितवता श्रीबदरीनाथझामहोदयेन रचिता रसगङ्गाधरस्य चन्द्रिका टीका प्रकाशिता दृष्टिपथमसिञ्चत्, तत्राऽपि एवमेव अनधिकारचेष्टा जागर्ति, प्राथमिके काव्यलक्षणसमन्वयेऽपि शिथिलता, परिष्कारमार्गाद् बाल्यादेव दूरे व्रजतोऽस्य महाविदुषो जरायाम् अवच्छेदकावच्छिन्नादिशब्दप्रयोगे रुचिरुदियाय, अनावश्यकान् अपि जातित्वसाधकान् अनुमानप्रयोगान् चन्द्रिकायां लाञ्छितां विधातुमिव सन्निवेशयितुमवाञ्छत्, कमपि नैयायिकं पृष्टवान् भवेत्, सोऽपि नैयायिकोऽन्धपरम्परायां पतितो मुक्तावलीटीकादिषु प्रसिद्धसरण्या अनुमानप्रयोगान् व्यरचयत्, परमसौ आलङ्कारिको नासीत्, अनुमानप्रयोगा अशुद्धाः संजाताः, मुक्तावलीटीकादिष्वपि अन्धपरम्परा, अनेकान् अनुमानप्रयोगान् प्रदर्शयन्ति, परं कुत्रापि प्रयोगे जातित्वस्य साध्यता न स्फुरति, समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिरित्यादिमूलं न स्पृशन्ति। एवमेव सिद्धान्तकौमुद्याः पङ्क्तिपाठने फक्किकादिपुस्तकनिर्माणेऽप्यन्धपरम्परा, अस्तु तद नात्रावश्यकम्, फलतः 'रसगङ्गाधरस्य चन्द्रिका

टीका' इति शीर्षकं लेखं संस्कृतंपत्रे प्राहिणवम्, अनधिकारचेष्टाञ्च प्रादर्शयम्, तस्य प्रकाशनम् अयोध्यासंञ्चालितसाप्ताहिकसंस्कृतंपत्रे १६५७ ईशाब्दस्य ७।५ दिवसादारब्धेषु चतुर्षु अङ्केषु विद्यते, तस्यापि हिन्दी-भाषान्तरयुतं पृथक् पुनः प्रकाशनं समीहितमास्ते। एवं व्यतीते समये पाटलिपुत्रराजकीयसेवातो विरतो रसचन्द्रिकाया हिन्दीं करिष्यामीति समीहावान् विरसन्नेव पादव्रणेन पीडितो मासचतुष्टयं खट्वाशायी अभूवम्, तदानीमेव अवधानाभावेन अस्या अलङ्कारप्रकरणं पृथक् पोटलिकायामवस्थापितं दीवककीटकवलितं जातम्, तस्य सुधारो महता श्रमेण संभावितमभूत् खिन्नमनसा व्यचिन्तयम् चिरान्महता श्रमेण सम्पादितेयं टीका न प्रकाशनसौभाग्यमाञ्चत्, हिन्दी दूरे एव वर्तते, संस्कृतस्य पुनः सञ्जीकरण एव भूयान श्रमः, किमियता श्रमेण कुर्याम ? यदेयं लिखिता, तदा अवश्यमपेक्षिताप्येषा साम्प्रतं टीकान्तरस्य विस्तरस्य समुदये तामपेक्षां बिभर्ति व वा ? श्रीमदनमोहनझामनीषिणा सम्पादितां विस्तीर्णां द्वितीयाननस्य भागद्वयेन प्रकाशितां टीकां पश्येयं कदाचन अपेक्षितविषयपूर्णा भवेत्, महतः कष्टादस्याः सुधाराद् विरमेयम्। तादृशचिन्तनफलतया काश्यां वी० वी० पार्सलप्रेषणाय, पत्रं प्रादाम्, प्रत्यवायपरम्परायां प्रेषकप्रमादात् परावर्तनं पुनः प्रेषणञ्च, समापतत् भूयान् व्ययः सोढः, अवलोकिता चन्द्रिका समीचीना प्रतीता, इदानीं मम टीकालेखनसमये यदीयमुपास्थास्यद् नाहमत्र प्रावर्त्स्यमिति प्रत्यभात्, श्रीमदनमोहनमनीषिमहोदयश्च महाश्रमशीलः; अस्मिन् ग्रन्थे श्रमेण तस्य वैदुष्यं समैधत, प्रथमाननेऽपि तस्य हिन्दीटीका; द्वितीयाननस्य तस्य टीकादर्शनेन श्रमोऽनुमीयते, तत्फलञ्च वैदुष्यवृद्धिः प्रतीयते। मूलस्य स्फुटान् गद्यभागानपि स्वभाषया वर्णयन् अङ्गीकारे स्वीकारे इत्यादिरीत्या टीकयन् ग्रन्थं महाऽऽकारतामनयत्, तथापि स्वीयां टीकामावश्यकीं मन्ये, सुधाराय प्रावर्तिषि, सुधारावसरे उपपादनं विनैव अस्या अशुद्धिसूचना असकृत् प्रदत्ता, चन्द्रिका, अभिनवचन्द्रिका-मदनमोहन-नाम च मम रसचन्द्रिकापाठकैर्लप्स्यन्ते, अस्य विदुषो न्यायाचार्यपरीक्षा तु परीक्षैव, न नव्यन्यायशब्दखण्डस्य व्युत्पत्तिं प्रदर्शयति, विश्वासोत्पादाय समादृतोऽयं न्यायाचार्योपाधिर्विश्वासं विहन्ति। कियती सोदाहरणा पृथगालोचनाऽस्या अपेक्षिता, नाधुनाऽपि सज्जीकृता, कदाचन भविष्यति भवेत्, अधुना तु एकं निदर्शनं समुपस्थाप्य एनां त्यजामि—चन्द्रिकाटीकासहित-रसगङ्गाधरस्य द्वितीयभागे द्वितीयानने उपमायाः शाब्दबोधप्रकरणे ३४१ पृष्ठे निपातजन्योपस्थितिप्रयोज्यप्रकारतानिरूपितेत्यादिमूलव्याख्यानेऽशुद्धिप्रयोजिका निम्नलिखिता अव्युत्पत्तयः।

निपातजन्योपस्थितिप्रयोज्यप्रकारताशब्दस्य निपातार्थनिष्ठप्रकारता मर्थं करोति—

१. इवशब्दात् सादृश्यशब्दाच्चोपस्थितं सादृश्यं पदार्थो न भिद्यते, सर्वदैव असौ निपातार्थो निपातभिन्ननामार्थश्चेति न जानाति।

२. कार्यकारणभूतयोः शाब्दबोधोपस्थित्योर्भिन्नयोर्ज्ञानयोर्विषयतयोर्निरूप्य निरूपकभावो न भवतीति न जानाति।

३. अत्र प्रकारताविशेष्यते शाब्दबोधीये अपेक्षिते शाब्दबोधीया विषयता उपस्थितिप्रयोज्या भवति, अत एव मूले उपस्थितिप्रयोज्येत्युपात्तमिति न जानाति।

४. सादृश्यपदादुपस्थितोऽपि सादृश्यपदार्थो निपातार्थः ? अत एव निपात-जन्येत्युपात्तमित्यादिकं ज्ञातुं न शक्नोति।

५. निपातार्थनिष्ठप्रकारतानिरूपितविशेष्यतेति प्रवेशे सादृश्यपदघटितस्थले दूषणम् नावबुध्यते।

६. प्रकारतायां सबन्धावच्छिन्नत्वनिवेशेनैव निर्वहति। विशेष्यतायां सम्बन्धा-वच्छिन्नत्वस्य नावश्यकतेति न वेत्ति।

किमेवं विधाऽस्य ग्रन्थस्य व्याख्या ? किमेतादृशा महापण्डिता अत्र अधिकारिणः ? ग्रन्थस्य दुर्दशैव। न कस्यचिद्दोषः, संस्कृतपण्डिता विद्या-व्यसनिनो न जाताः, धनाय प्रतिष्ठायै च रात्रिन्दिवं व्यवस्यन्ति. प्रौढपाण्डित्य ह्रासः परमं सीमानमुपगतः, तस्यैवायं विलासः। एको गुणोऽत्र विदुषि येन निःसंकोचं स्थलमिदं व्याख्यत्, तेन चेमा अव्युत्पत्तयः स्फुटतां गता, अभिनवा मधुसूदनी टीका तु अत्र स्वस्वरूपं गोपयितुं यतमाना सूक्ष्मेक्षिका-निरीक्ष्यस्वरूपा व्याख्याने प्रगल्भाऽपि संकुचति।

एवं मम कीटकवलितस्य पूरणे वर्षद्वयं जातम्, मुमूर्षोर्मम कदा हिन्दी भवेत कदा च प्रकाशेत, परिवारश्च संस्कृतपण्डितस्य संस्कृतपोषितः संस्कृतविरोधीति प्रायः प्रसिद्धम्, क्वचिदेव अपवादः। मृतेऽप्यस्य संरक्षणं प्रकाशनञ्चदुर्लभमेवं, प्रकाशनं विना विनाश एवेति यथाकथमपि स्वव्ययेन कष्टेन प्रकाशनीयं रक्षणीयमिति बुद्धिरुदैत्, औरङ्गावादे ज्येष्ठपुत्रसविधे तिष्ठन्नेव काश्यां मुद्रापयितुं प्रायतिषि, सुदर्शनमुद्रकः सर्वं स्वीकृत्यापि एकस्मिन् स्फारे (फर्मा) मुद्रित एव संस्कृतप्रारूप (प्रूफ) शोधको न मिलतीति व्यरमत्, सर्वां सामग्रीं गृहीतं धनञ्च सर्वं परावर्तयन्तु इति निवेदने शीघ्रं न प्राहिणोत्, षट्सुमासेषु स्फारद्वयं मुद्रयित्वा प्राहिणोत्,

पुनरानन्दकाननमुद्रणालयेन सर्वं स्वीकृत्य सामग्रीम् अग्रिमं धनञ्च गृहीतम्, कथमपि पञ्चसु मासेषु एक एव स्फारो मुद्रितः,काश्यामागतश्चनासाभ्यन्तरे रुग्णः खट्वामारूढ एव पञ्चमासान् यापयन् मासत्रयं काश्या बहिर्जोधपुरे व्यतीयाय, काश्यामागतश्च मुद्रणालयसौविध्याय इतस्ततः पर्यटन् नैकान् प्रार्थयमानोऽपि अनुकम्पमानेन पण्डितपुङ्गव डाँ०श्रीविद्यानिवासमिश्रमहोदयेन प्रेरितः संस्कृतविश्वविद्यालयकुलपतिमहोदयानां सविधे प्रार्थनापत्रं प्रादाम्, संस्थाया बहूनि कार्याणि, कर्णदानि एव कार्यं समुपेक्ष्य चिरं प्रचलन्ति, अधिकारिणामवधानप्ररोहाय नास्ति मम सविधे किञ्चिन्मूलस्रोतः, कथमपि स्वीकृतं गृहीतमपि न शीघ्रं प्रकाशनेन मरणासन्नस्य मम नयने अनुरञ्जयेत्, मृते च मयि प्रकाशनं दुर्लभम्, न मिलन्ति परिश्रमप्रियाः पण्डिताः, अन्ये च परिश्रमं परित्यज्य अस्य दूषण एव तत्परा भवेयुः, प्रथमं मुद्रणं तु भूयःश्रमसाध्यमिति भिया नातुष्यत चेतः, सहृदयशिरोमणिविद्वद्वरस्य श्रीप्राणलालाचार्यस्य सौहार्देनानुगृहीतःस्वयं मुद्रापणं प्राचालयम्, सार्धमासद्वयेन विंशतिः स्फारा मुद्रिताः, तावत् संस्कृतविश्वविद्यालयस्वीकृतिः प्राप्तासर्वाणि वस्तूनि शीघ्रं मया तस्मै समर्पितानि, मया मुद्रापितानि अधिकारिभ्यो न ताहगरोचन्त, अत एव लक्षणानिरूपणान्तः प्रथमभागः प्रकाशताम्, अवशिष्टश्च अलङ्कारनिरूपणात्मको द्वितीयो भागो विश्वविद्यालयहशा मुद्राप्य प्रकाशयिष्यत इति विश्वविद्यालयनिर्णयानुसारं सार्धमासं व्यतिगमय्य प्रथमभागभूमिकालेखाय आज्ञप्तः साम्प्रतमपि रसगङ्गाधरस्य दशांदुर्दशानिरूपणानुसारं प्रदर्शयितुं प्रयते सापि च न मधुसूदनीटीकायाश्चर्चा विना पूर्यत इति तामपि मनाक् स्पृशामि ।

मयि सौहार्देन अनुगृह्णन्तः श्रीमधुसूदनमिश्रगौडमहोदया मम ज्येष्ठसतीर्थ्याः, चिरं व्यक्तिविवेकं ध्वन्यालोकं रसगङ्गाधरञ्च मम गुरोः सकाशादधीयानाः पाठञ्च संशोधयन्तो दृष्टाः श्रुताश्च, चिरादेषामेतद्विषयकवैदुष्यविषये संविहान आसम् । प्रारम्भतोऽधीतग्रन्थानां सम्यग्व्युत्पत्तिमन्तरा-महाविदुषोऽध्ययनेनैव महतां ग्रन्थानां कियतो ग्रन्थानधीयीत वैदुष्यञ्च सम्पादयेदिति मम दुर्भावनैव संशयदोलां सञ्चालयतिस्म, परं पाटलिपुत्रेऽकस्मादेव व्यक्तिविवेकटीकाया एषामवलोकनायबलादवसरो जातः, खेदश्च जातः, पूर्ववर्णिताया रसगङ्गाधरचन्द्रिकाया आलोचनाऽवसरे प्रथमं तेषां सुहृद्वराणां नामनिर्देशं विनैव टीकानामग्रहणपूर्वकं खेदं प्रदर्श्य चन्द्रिकाविषये लिखितुं प्रारभे, प्रकाशितञ्च तथैव विद्यते । रसगङ्गाधरमधुसूदनीप्रकाशं श्रुतवतोऽपि मम द्रुतदर्शिता न जजागार नवापुस्तकं सुलभम्, न रसगङ्गाधर-

ग्रन्थस्य वस्तुतोऽधिकारी इति दृढमानस आसम्, अत्रागतस्यापि मम द्रव्य-संकोचाच्च क्रयणेच्छा नौदैत, कथमपि अल्पसमयाय याचनया पुस्तकं प्राप्तम्, कार्यान्तररतस्य मे समयसंकोचोऽपि, प्रथमो भागो ग्रन्थोऽपि विशालः, निरवरोधाः कल्पनाधारा विविधप्रवाहा वास्तवं निमज्जयन्ति, असकृदवधानेनापि अध्ययनेन किमपि समीहितं प्राप्स्यते न वेति संशयो जागर्त्येव, आलोचनाऽस्य कठिना, गडुभूतत्वादिति मूलपाठस्थाने मधुसूदन्याः सोपपादनं गुरुभूतत्वादिति पाठकल्पनमनुचितं ग्रन्थसन्दर्भाभिप्रेतानवबोध-विजृम्भितमिति रसचन्द्रिकायां सूचितं मुद्रितञ्च। अग्रे च नावसरः सूचनायाः, प्रथमो भागो मुद्रितः, द्वितीयभागस्य पाण्डुलिपिः संस्कृतविश्व-विद्यालये कुत्रचित्, नापि पुस्तकं पार्श्वे, विश्वविद्यालयस्य ग्रन्थालयेऽपि न तस्य सुकरा प्राप्तिः, गतागतशक्तिविहीनस्य मम सर्वं दुष्करं जायते। तृतीयो भागस्तु नाधुनाऽपि दृष्टिपथं गतः, सकृदवलोकनेन यथाऽन्वभवं तथा किञ्चित् सूचयामि, रसगङ्गाधरग्रन्थस्य कश्चिदादिमो भाग एव मम गुरोः सकाशादधीतो लिखितश्च, यच्च गुरोः सम्मुखं लक्षणं लिखितं तदेव शुद्धम्, अन्यत्र न्यायशास्त्रव्युत्पत्तिहीनस्य अनल्पं जल्पतोऽशुद्धिः स्वाभाविकी, काकतालीयन्यायेन क्वचिच्छुद्धिरपि संभवति, संशयस्तु सर्वं ग्रसति। यथा काव्यलक्षणं गुरुनिर्दिष्टं शुद्धं लिखितम्, परं काव्यलक्षणावतरण-ग्रन्थस्य गुणालङ्कारादिभिर्निरूपणीयेऽस्मिन्नित्यादेर्व्याख्याने 'धर्मितावच्छे-दकविधया काव्यत्वज्ञानं कारणम्' इत्यभिप्रायकं किमपि वाक्यं गुरुचरणै-रुक्तं भवेत्, तच्च वाक्यं धर्मितावच्छेदकं काव्यत्वज्ञानमिति लिखन्त्या मधुसूदिन्या दुरुपयुक्तम्, व्यवहारचाञ्चल्यमिव अव्यवस्थितं किमपि लिखति। रसनिरूपणे नव्यमते अवच्छादकं दुष्यन्तत्वमप्यनिर्वचनीयमेवेति मूलम् अशुद्धं व्याख्याति। नैवं परिष्कारभाषायामेव, किन्तु आलङ्कारिक-पदार्थनिरूपणेऽपि न सम्यक् सावधाना मधुसूदनी—रसनिरूपणे अनल्पं जल्पति, परं रसस्वरूपं रसास्वादस्वरूपञ्च विविक्तं दर्शयितुं न क्षमते,। शान्तरसोदाहरणपद्यव्याख्यानविषये मूलम् 'तत्तादृरूप्यावगमादृरतेरप्रति-पत्तिः' तत्र कविनिष्ठाया रतेरप्रतिपत्तिं व्याख्याति, तेन पद्यभावार्थं मूलाभि-प्रेतञ्च नावबुद्ध्यते इति स्फुटमेव। अस्त्वेतावदेव, किमधिकेन विशेषस्तवेन? अतः परं मम रसचन्द्रिका उपतिष्ठते, कीदृशीति अन्ये ब्रुवन्तु लिखन्तु च। असहायस्य काश्या बहिरवस्थितस्य स्खलतिः सम्भवेदेव, स्खलनमपि मानव-सुलभेन प्रमादेन जन्यम् एकम्, तत्तु न ममासाधारणदोषनिबन्धनम्, परं द्वितीयं शास्त्राव्युत्पत्तिनिबन्धनं ममासाधारणदोषः,तद् यदि श्रमेण कश्चिद्

दर्शयेत् शुभमेव मन्येय, विद्याप्रीत्या वास्तवग्रन्थाभिप्रेतव्याचिख्यासया च तद् भवेत् ।

अशक्तस्य कथमपि मुद्रणेनैव कृतकृत्यस्य मम मुद्रणदोषा अपि संभवन्ति, यथाशक्ति शुद्धयशुद्धिसूचीनिर्माणायापि प्रयते । अग्रे च मम साफल्ये श्रीकाशीविश्वनाथः शरणम् । अन्यच्च किमपि द्वितीयभागप्रकाशनावसरे प्रदर्शयिष्यामि, विद्वद्भ्यो धृष्टतायाः क्षमां याचमानः मनसावचसाकर्मणाऽनुकम्पमानानामुपकृतिं स्मरमाणो विश्वविद्यालयकार्यकारिसदस्येभ्यः कृतज्ञतां प्रस्तुवानो विरमामि ।

अन्ये च यत्र कुत्रचित् संस्कृतपत्रिकायां यदा कदा प्रकाशिता आलङ्कारिकनिबन्धा हिन्दीभाषान्तरयुताः सज्जीकृता एतत्परिशिष्टरूपा यथाकथञ्चित् काशीविश्वनाथानुकम्पया विदुषाञ्च सहयोगेन पुनरेकत्र प्रकाशमुपेयुश्चेदभवेत् काचिदलङ्कारशास्त्रसेवा । यथा (१) अलङ्कारसामान्यलक्षणम्, (२) रसख्यातिः, (३) काव्यलक्षणं तत्समन्वयप्रकारश्च, (४) शब्दार्थौ शब्दो वा काव्यम्, (५) आलङ्कारिकाणां मल्लायितम्, (६) अभिनवगुप्तस्य रसस्वरूपम्, (७) आलङ्कारिकाणां कलहः, (८) आलङ्कारिकाणां प्रस्थानभेदाः, (९) संभावनम्, (१०) उपमोत्प्रेक्षाकलकलः, (११) रसगङ्गाधरविषयिणी वार्ता, (१२) अप्पय्यदीक्षितस्य अर्थचित्रम्, (१३) अलङ्कारव्यवस्था वस्तुतन्त्रा अनुशासनाधीना वा ? (१४) काव्यकारणविचार इत्यादय इति ।

वाराणस्यां	निवेदयते विदुषां विधेयः
निर्जला एकादशी	केदारनाथ ओझाः
वै० सं० २०३४	सम्मानितप्राध्यापकः
दि० २९-५-७७	सं० सं० वि० विद्यालयः

विषय-सूची

विषयः — पृष्ठम्

प्रथमाननम् १-२४०

मङ्गलाचरणम् — १
काव्यलक्षणम् — ६
त्रयोदशलक्षणपरिस्कारप्रक्रिया — १४
काव्यप्रकाशलक्षणव्याख्या — १६
मूलव्याख्या — १८
साहित्यदर्पणलक्षणदूषणम् — २४
काव्यकारणविचारः — २५
प्रतिभा — २५
विलक्षणव्युत्पत्तिः — २७
अभ्यासः — २७
दण्डिमहाभागाः — २८
रूद्रटमतम् — ३०
वामनमतम् — ३०
मम्मटाचार्यमतम् — ३१
वाग्भटमतम् — ३२
रसगङ्गाधरटिप्पणमतम् — ३३
पीयूषवर्षमतम् — ३४
मूलव्याख्या — ३५
काव्यभेदवर्णनम् — ४०
प्रथमकाव्यम् — ४०
चित्रमीमांसाऽऽलोचना — ४७
द्वितीयं काव्यम् — ५४

विषयः	पृष्ठम्
चित्रमीमांसाऽलोचना	५८
तृतीयं काव्यम्	६१
चतुर्थं काव्यम्	६२
रसस्वरूपनिरूपणम्	६५
वेदान्तप्रक्रिया	६५
रससूत्रव्याख्यानम्	६९
द्वितीयं भट्टनायकमतम्	७६
नव्यमतम्	८१
चतुर्थं मतम्	८६
पञ्चमं मतम्	८९
षष्ठं मतम्	९०
सप्तमं मतम्	९२
अष्टमं मतम्	९३
नवमं मतम्	९३
दशमैकादशे मते	९४
सूत्रव्याख्यानम्	९४
स्थायिभावनिरूपणम्	९८
रसविशेषवर्णनम्	१०५
विरोधिरससमावेशनिरूपणम्	१२४
रसदोषनिरूपणम्	१३१
रसविशेषे गुणविशेषवर्णनम्	१३६
गुणनिरूपणम्	१३७
तत्रप्राक्कथनम्	१३७
गुणसामान्यलक्षणम्	१३८
काव्यप्रकाशमते गुणलक्षणम्	१३९
साहित्यदर्पणमते गुणनिरूपणम्	१४०

विषयः	पृष्ठम्
रसगङ्गाधरमते गुणनिरूपणम्	१४१
अर्थगुणाः श्लेषः	१५२
सामान्यतो वर्जनीयरचनानिरूपणम्	१६२
भावध्वनिनिरूपणम्	१७७
रसाभासनिरूपणम्	२१८
भावशान्त्यादिनिरूपणम्	२२५
अलक्ष्यक्रमध्वनिनिरूपणम्	२३३
द्वितीयमानम् । २४१–३२७	
संलक्ष्यक्रमध्वनिनिरूपणम्	२४१
नानार्थकस्थले व्यञ्जनावादिमतम्	२४२
एकार्थविषयकोपस्थितिवादिमतम्	२४२
अभिधानियामकसंयोगादिवर्णनम्	२५५
शब्दशक्तिमूलध्वनिनिरूपणम्	२६८
अर्थशक्तिमूलध्वनिनिरूपणम्	२७८
लक्षणामूलध्वनिनिरूपणम्	२९१
अभिधानिरूपणम्	२९३
वृत्तिवार्त्तिकालोचनम्	२९५
लक्षणानिरूपणम्	३०५
उपमातो रूपकस्याभेदापादनम्	३०९
उपमारूपकभेदोपपादनम्	३१०
पूर्वविषये नव्यास्तुमतम्	३१३
नव्यमताऽऽलोचना	३१८

पण्डितराजश्रीजगन्नाथविरचितो

रसगङ्गाधरः

रसचन्द्रिकयाऽलङ्कृतः ।

प्रथममाननम् ।

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभंगुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दगिरि - नन्दिनीतट - सुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥

अथ रसचन्द्रिका

अलङ्कृत - वचोऽम्बरः कुतुक-चूर्ण - चित्रस्मरः ।
कला - विलसितोऽकलोऽसम - विषादशङ्कोत्तरः ॥
कवीन्द्रकृतिभामिनी सहचरोऽद्वितीयो वरः ।
मदीयमतिभास्करः स्फुरतु कोऽपि गङ्गाधरः ॥ १ ॥
गुरुप्रसादाद् गतिमच्चकोर मनो मदीयं श्रुतवाटिकासु ।
करोति सार - प्रचयैरुपेतमिदं सुरत्नं रसचन्द्रिकाह्वम् ॥ २ ॥
निर्दोषा बहुशास्त्रसारसुषमां संल्लोकयन्तां हृदा,
वादप्रौढिमिहार्जयन्तु विरतालङ्कारतच्चन्द्रिकाम् ।
म्लानिं प्राप यतश्च कौस्तुभयुतो मर्मप्रकाशोऽपि ताम्,
विद्वांसो रसचन्द्रिकां सहृदयाः कुर्वन्तु सार्थां मुदा ॥ ३ ॥
विद्वन्महेन्द्र - महिमान - मनुव्रजन्त्यां
नैवाक्षिपन्तु कलुषं रसचन्द्रिकायाम् ।
रत्नाकरस्य सरसां तरसा न किञ्चिद्
रूपं बिभर्ति गलितावयवं विनैव ॥ ४ ॥
मदीय दोषाङ्कितचारुवेषा गङ्गाधरीया रसचन्द्रिकैषा ।
प्राङ्नव्यसंन्व्याचंनदीपभासा स्वादाय सम्यग्विविधप्रकाशा ॥ ५ ॥

॥ श्रीगणेशाय नमः ॥

अथ मङ्गलपद्यव्याख्यानम्

शिष्टाचारानुमितकर्त्तव्यताकं प्रारिप्सितस्य ग्रन्थस्य समाप्ति - प्रतिद्वन्द्विनो दुरितस्य प्रशमाय प्रचाराय च मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृणां

श्रोतॄणाञ्चानेनैव मङ्गलवत्त्वसंपादनाय च ग्रन्थे निबध्नाति—स्मृताऽपि ० तञ्च नैकविधेषु मङ्गलेषु समुचितेष्टदेवप्रार्थनारूपम्। समुचितत्वञ्च श्रीकृष्णविष्णोः प्राधान्येन निरूपणीयरसशिरोमणेः शृङ्गारस्यान्यत्र वर्णितदेवतात्वेन, गोपाङ्गनानां श्रीराधाया वा रतेरालम्बनविभावतया शृङ्गारश्यामवर्णतया च। यद्यपि रसानां देवता-वर्णादि न वर्णितमत्र ग्रन्थे तथापि अप्रतिषिद्धमनुमतमिति न्यायेन तथोच्यते। तैरेव हेतुभिः शृङ्गारस्य निर्देशेन प्राधान्येन व्यपदेशा भवन्तीति न्यायं सहकृत्य रसस्वरूपवस्तुनिर्देशात्मकमपि। कापि कादम्बिनी मदीयमतिचुम्बिनी भवतु ० कापि विलक्षणा प्रसिद्धकादम्बिनी व्यतिरिक्तेति व्यतिरेको द्योत्यते, कादम्बिनीत्वेऽपि वैलक्ष्येण अतिशयो वा कादम्बिनी मेघमाला, श्रीकृष्णस्य पुंलिङ्गेनाऽपि मेघपर्यायेण निगरणं प्रतिपादयितुं शक्यते तथापि सुन्दरवर्णसन्निवेशचारुतया कादम्बिनीशब्दोपादानम्। मालात्वप्रयुक्तश्यामत्वातिशयद्योतनाय वा। अन्ये तु स्त्रीलिङ्ग-निर्देशेन श्रीमती काली राधा वाऽपि निर्दिष्टेति सूचनायेति व्याचक्षते, श्यामत्वेन मेघकार्यकारित्वेन च श्रीकृष्णमूर्त्तिः कादम्बिनीत्वेन निगीर्णेत्यतिशयोक्तिः। मतिर्ज्ञानं चुम्बनं विषयता, णिनि प्रत्ययेन ताच्छील्यम्। मम ज्ञानविषयताशीला भवतु। मम ज्ञानस्य अन्यविषयापहरणद्वारा विषयतां भजतु। तेन तैलधारा-वदविच्छिन्नचित्सन्ततिर्भक्तिः प्रार्थिता। मतिरिच्छा वा, तेनान्यविषयविरागपूर्वक-श्रीकृष्णरागस्य प्रार्थना। प्रार्थनायां लोट्। प्रधानो वाक्यार्थो ध्वन्यमानो भगवद्-रतिभावः। अन्यच्चाखिलं तमेवालंकुरुते। व्यतिरेकितया विशेषणानि स्मृतापि, प्रसिद्धा-तु-चक्षुषा त्वचा वा प्रत्यक्षीकृतैवातपं हरति इयन्तु स्मृतापि किमुतानुमिता प्रत्यक्षीकृता वा। सा तु आतपं निदाघमृतुम्, इयन्तु आसमन्तादन्तरतो बाह्यतश्च, किमु वक्तव्यं साधारणस्यातपस्यापि तु तरुणमपि हरति। सा तु अचेतना स्वभावेन बलात्प्रवर्त्तिता, इयन्त्वनुग्रहेण, सा च सर्वदेशव्यापित्वाभावात् केषाञ्चिदेव, इयञ्च विम्वी समेषां नृणाम्, सा च कादाचित्कत्वाद्धरणोपलक्षिता येन पुनरपि आतपस्योदयः, इयञ्च शश्वद्वर्तमानत्वोपलक्षिततया व्याप्त्याहरणविशिष्टा सर्वदैव हरणक्रियाविशिष्टेति भावः, येन न पुनरातपानुभवस्य संभावना। अभंगुरतनुत्विषां विद्युतां शतैर्वलयिता इत्यन्वयः। मेघमालाया विद्युतः क्षणप्रभा अल्पीयस्यश्च, क्षणिकस्य भंगुरस्वभाव इति क्षणभंगुरदर्शने प्रसिद्धम्। अस्यास्तु तनुकान्तयो-ऽभंगुराः वृद्धिह्रासादिषड्विधविकाररहिताः भंगुरस्वभावत्वेऽपि कारणानक्षेपभङ्गः ताहश - स्वभावाभावेऽपि कारणसापेक्षभंगः, नञा तु तदुभयविरुद्धस्वभावा, त्विड् विद्युतो रूपकम्, विद्युत्वेन गोपाङ्गना निगीर्णा इति वा, शतैरसंख्यैर्वेष्टिता कान्तिभिर्व्याप्ता वा, अथवा प्रकृत्यादिभ्य इत्युपसंख्याताभेदार्थकतृतीयावशाद् घान्येन घनवानिव पदार्थैकदेशवलयान्वयेन च ताहशविद्युच्छताभिन्नो वलयः संजातोऽस्या

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकल - ब्रह्म - विद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः ॥

इति तात्पर्येण तदस्य संजातं तारकादिभ्य इतजित्यनेन इतज्या । कलिन्दपर्वतस्य सुजाततया समृद्धिभूताया यमुनायास्तटे सुरद्रुमगुणयुक्ततया तत्त्वेनाध्यवसिताः सुरप्रिया वा द्रुमा नीपादयस्तदधिरूढा वर्णनीया, प्रसिद्धा तु अतिदूरं वियदालम्बना, केचन कालीपरतया श्रीराधापरतया वाऽपि योजयन्ति। तयोरपि अभंगुरकान्तिभिः स्वस्वतादृशपरिचारिकाभिश्च वलयः, तृतीयपादार्थस्य तयोरप्रसिद्धावपि कथमपि योजयितुं शक्यत्वात् । पर्यायेणापि राधागोविन्दयोरुपस्थितौ शृङ्गारः सम्यङ् निर्दिष्टो जायते । तथा च व्यतिरेक-रूपकातिशयोक्ति-संकरेण भगवद्विषयिणी कविरतिरलंकृता भवतीति शम् ।

पद्यव्याख्याने प्रायो मर्मप्रकाशमेवोद्धरामि ।

ग्रन्थोक्तविषयस्य स्वकल्पितत्व-मात्र-निरासाय सर्वशास्त्र-सम्बन्धत्वख्यापनाय च स्वविद्यायाः साम्प्रदायिकत्वं सूचयन् द्वाभ्यां गुरुनतिमाह—श्रीमज् ● श्रीः सरस्वती ब्रह्मवर्चसं वा, ज्ञानेन्द्रभिक्षोः सकाशादित्यर्थः । पूर्वार्धे य इत्युभयत्रान्वेति, उत्तरार्धे य इति त्रिषु, अधिगतः सकलो ब्रह्मविद्यायाः प्रपञ्चो येन, प्राप्तसकल-वेदान्तशास्त्रविस्तारः, प्रपञ्चे सकलत्वोक्त्या लेशतोऽपि तदत्यागः सूचितः । यो महेन्द्रविदुषः सकाशात् काणादीः आक्षपादीरपि गहनगिरः अवेदीत् । महेन्द्रेति नामोच्चारणं विशेषज्ञानैश्वर्यद्योतनाय, कणादेन प्रोक्ता वैशेषिक-शास्त्रविषयिण्यः, अक्षपादेन गौतमेन प्रोक्ता न्यायशास्त्रविषयिण्यः, गहनत्वेन नव्यन्याय-सरणि-प्रसारित-परिष्कार-प्रावीण्यं सूचितम् । दृश्यते चात्र ग्रन्थेऽपि । नाध्ययनमात्र-मपि तु तत्त्ववेदनमिति विद् धातुना सूच्यते । स्मरहरनगरे जैमिनीयं शासनं देवा-देवाध्यगीष्ट । स्मरहरनगरं काशी, जैमिनिना प्रोक्तं पूर्वमीमांसाशासनं शास्त्रम्, एवः प्रसिद्धो खण्डदेवादेवेत्यर्थः, अध्यगीष्ट अधि इङ् लुङ् । शेषः शेषकृष्णः इत्यङ्कश्चिह्नमुपनाम यस्य तस्माद् वीरेश्वरपण्डितात् प्राप्ता शेषस्य पतञ्जलेरमला महाभाष्यरूपा भणितिर्येन तादृशः उपसंहरति—सर्व ● एतेन तदितरशास्त्रवेदादि-ज्ञातृत्वं सूचितम् । ब्रह्मविद्याया हृदयंगमतायै अधिगत इति, न्यायादिशास्त्राणां ज्ञानमात्रफलकत्वाय विद् धातुः, पूर्वमीमांसाया वेदाधिकसम्बद्धत्वेन स्वाध्यायोऽध्येतव्य इति अध्ययन-विधिमनुसृत्य अध्ययनार्थक-प्रयोगः, व्याकरणस्य

पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥
निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलङ्कारान्सर्वानपि गलितगर्वान्रचयतु ॥

वाचो नैर्मल्यप्रयोजकतया अमलभणितिरिति प्रयोगाणां स्वारस्यं बोध्यम् । पाषाणाद् न शास्त्रपाण्डित्येनैव कवित्वं पर्यवसीयतेऽतः स्वकवित्वस्यापि सांप्रदायिकत्वं ध्वनयितुं वक्ति । यच्चेष्टाविशेषेण जडात्कठोरादपि अमृतस्रावः चेतनादिति तु किमु वाच्यम्, पाषाणस्याप्येवं वर्णनं करोति येन चन्द्रमस इवामृतं स्रवति, अथवा जडस्यापि तत्कृपावशादेव कविता सुधां वर्षति । इत्यनेन महामहिमशालिता वर्णिता । तेन तन्मुखश्रवणमात्रेण चेतनस्य मम सकल विद्यायाः कवित्वस्य चाविर्भावो नासम्भवं स्पृशति इति सूचितम् । लीलापदेनाल्पचेष्टयाऽपीति व्यज्यते, वर्णितमहामहिमतया तस्मिन् महत्त्वम्, प्राय एकस्मादेव गुरोः सकलविद्याप्राप्तिद्योतनायैकवचनम्, लक्ष्मीर्गुरुपत्नी अथवा गुरुर्ब्रह्मा गुरुर्विष्णुरिति न्यायेन विष्णुस्वरूपम्, पेरुभट्टस्तत्पितेत्यपि प्रसिद्धिस्तदापि विष्णुत्वाध्यासेनैव पूर्वोक्तन्यायेन लक्ष्मीकान्तमिति प्रतिपादितम् । जगन्नाथपण्डितस्य माता लक्ष्मीरित्यपि केचन मन्यते तदापि तदभिप्रायेण प्रयोगे लोकाचारविरोध आगच्छेदिति चिन्तनीयम् । एवं गुरुनत्या विद्यासमृद्धिं सूचयित्वा तासां विद्यानां मननं ततो ग्रन्थस्य प्रकाशः तस्यापि महत्त्वाशंसामाह—निमग्नेन मननजलधेरन्तरुदरं क्लेशैर्निमग्नेन मया लोके उन्नीतः ललितरसगंगाधरमणिः अन्तर्ध्वान्तं हरन् गुणवतां हृदयमधिरूढः सर्वानपि अलंकारान् गलितगर्वान् रचयतु इत्यन्वयः । युक्तिप्रमाणादिना अनुचिन्तन - रूपस्योदधेरुदरं मध्ये बहुक्लेशपूर्वकं नितरां मग्नेन मया भूलोके आलङ्कारिकसंसारे च प्रकटितः, ललितो रसगंगाधरनामा निबंध एव मणिः, हृदयस्थितमन्धकारम् आलङ्कारिकशास्त्रान्तर्गतमज्ञानञ्च हरन्नेवाधिरूढः अत्र अधिरोहण-हरणयो यौगपद्यातिशयो द्योत्यते, अपूर्वं पुण्यवतां सहृदयतागुणशालिनाञ्च उरस्थलं स्वान्तञ्च प्रविष्टः, जगन्नाथेन महता श्रमेण बलादुदधिकुक्षेर्निस्सारितत्वेनानुपमतया सर्वानेव न तु कांश्चिद् अलङ्कारान् भूषणानि आलङ्कारिकग्रन्थांश्च दूरादेव दर्शनमात्रेण स्वयमेव गलितो गर्वो येषान्तान् करोतु । मणिरूपकं पूर्णतया समर्थनीयम् । ननु

परिष्कुर्वन्त्वर्थान्सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्राः संक्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विफलो मन्दरगिरेः ॥

निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किंचित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ॥

प्राचीनाः काव्यप्रकाशादयो नूतन-शैल्या च चित्रमीमांसादयो जाग्रत्येव समानविषयकाः किमियता भगीरथप्रयासेनेत्याशङ्कां समाधातुम् न ते रसगङ्गा प्रवाहिता, वर्तमाना अपि परिचितसामर्थ्या न प्रभवन्तीति रसगङ्गाधरः प्रार्थ्यते इत्यभिप्रायवानाह—परिष्कुर्वन्त्व ● कतिपये प्राचीना निबन्धस्य वर्तमानत्वात्, नूतना वा यतः सहृदयधुरीणा "अत आलंकारिकानर्थान् परिष्कुर्वन्तु स्ववाचा भूषयन्तु, भूषणादि परिष्कार इव ऋषिप्रोक्तार्थानां स्फुटीकरण एव सामर्थ्यं न तु तत्त्वतो ज्ञाने नूतनस्य विद्योतने वा । तथापि तथा परिष्कारेऽपि मम रसगंगाधररचनारूपः क्लेशः कथमपि स्वल्पतोऽपि गतार्थश्चरितार्थो न भविता । भविष्यतीति वक्तव्ये भवितेत्यनेनेदं सूचितं यत्स्वग्रन्थप्रथनकाले स्वतुल्यपण्डितसत्त्वेन तेषां गतार्थत्वेऽपि अग्रिमाणामल्पबुद्धीनां न गतात्वर्थम् । अथवा प्राचीना इदानीन्तनाश्च परिचितवैदुष्या नासन्ने भविष्यति गतार्थयितुं प्रभविष्यन्ति तदनन्तरन्तु रसगंगाधरोपज्ञ एव संप्रदाय इति कथं गतार्थत्वशङ्का । उक्तमर्थमर्थान्तरोपन्यासेन द्रढयति तिमीन्द्राः श्रेष्ठा मत्स्यविशेषाः पुनर्भूयः सम्यङ् न तु यथाकथञ्चित् क्षोभमालोडनं कुर्वन्तु, एतेन तत्कर्तृकालोडनेन मन्दराचलस्य सुधामणिप्रभृतिफलकः प्रयासः किं विफलो निष्फलो भवति अपितु न । तिमीन्द्रालोडनेन रत्नाद्यलाभेऽपि मन्दराचलेन प्रापित्वात् । क्षुद्रफलक-प्रयासेन न महार्घफलकप्रयासस्य गतार्थतेति सामान्यं समर्थितम् । इतरग्रन्थतो विशेषान्तरमाह-निर्माय ● । यतो लक्षणं दृष्ट्वा नूतनं निर्मितमत एवानुरूपं तत्तदलङ्कारादिलक्षणलक्ष्यत्वयोग्यमुदाहरणम् । अन्य ग्रन्थे तु न जाने कया बुद्धया प्रसङ्गान्तरे कविना निर्मितं पद्यं बलादुदाह्रियते न सम्यक् समन्वयं भजते प्रदर्श्यते च दिगेषाऽप्यत्र ग्रन्थे । अतस्तदननुरूपम् । अत्र रसगंगाधरग्रन्थे लेशतोऽपि परकीयत्वाभावादाह—

मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥
रसगङ्गाधरनामा संदर्भोऽयं चिरं जयतु ।
किं च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥

तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालङ्कारादिभिर्निरूपणीये तस्मिन्विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनं च तल्लक्षणं तावन्निरूप्यते—

किंचिदिति, निह्नितमित्यस्यानुषङ्गः । अर्थान्तरोपन्यासेनैवाह—किं सेव्यते ● सुमनसां पुष्पाणां गन्ध आमोदः, कस्तूरिकावतेति वाच्ये जननशक्तीत्यनेनेदं सूचितं यत्कदापि परकीयग्रहणं न, तज्जननशक्तिसत्त्वेन यावदपेक्षितोत्पादनसंभवात् जननशक्तिविधुरेणैव परकीयः सेव्यत इति सामान्यं समर्थितम् । परकीयलक्ष्यासंग्रहरूपन्यूनतापरिहाराय तु अनुरूपपदमुपात्तमेवेति । कर्त्तव्यं प्रतिजानीते—मनन ● मननरूपया नौकया पारंगतो विद्यारूपउदधियेंन तादृशः जगन्नाथनामा पण्डितराजः, पण्डितो नरेन्द्रो येन वा नरेन्द्रस्य पण्डित इति वा, पण्डितश्चासौ नरेन्द्रश्च तत्तुल्यत्वादिति वा, वस्तुतस्तु जगन्नाथपण्डितराज इति पृथ्वीपतिदत्त नामाभिलापोऽयम् । कुतुकेनेत्यनेन स्वस्य ग्रन्थकरणे क्लेशाभावः सूचितः । मनने क्लेशेऽपि न विरोधमावहति । मानपूजायाम्, मानेर्जिज्ञासायामित्याभ्यां मीमांसाशब्दस्य विचारे प्रयोगः । मीमांसाशब्दः पूजितविचारवचन इति वाचस्पति मिश्रः प्राह । अनेन प्रवृत्तिप्रयोजकविषयादि सूचितम् । इति । शुभं ध्यायति—रसगंगा ● अयं बुद्धिस्थः, संदर्भः पञ्चाङ्गाकं वाक्यं चिरं चिरकालं जयतु सर्वोत्कर्षेण वर्तताम्, किञ्च स एव संदर्भो निसर्गतः स्वभावतो न तु कृत्रिमतया सम्यञ्चि रमणीयानि कवीनां सहृदयानां कुलानि समूहान् रञ्जयतु अनुरक्तान् करोतु । अथवा रसगंगाधराधिगतप्रावीण्येन सम्यक् काव्यनिर्माण-द्वारा सुखीनि करोतु । इति ।

अथ काव्यलक्षणविचारः

तत्रावतरण-व्याख्या

तत्र ● तस्मिन् संपादनीये काव्यमीमांसाप्रबन्धे निरूप्यते इत्यनेनान्वेति । काव्यं सफलमिति तत्तत्फलेप्सुभिः तत्तत्फलजनकतया काव्यं व्युत्पित्सितम्, तद्व्युत्पत्ति-

संपादकतया काव्यं निरूपणीयम् । तत्र काव्यनिरूपण-प्रयोजकीभूतफलानि काव्य-प्रकाशादौ प्रदर्शितानि प्रपञ्चितानि चेति तेषां दिक् प्रदिदर्शयिषया संक्षेपतः स्मारयति—कीर्ति ● परमः काव्येतरसामग्र्यसुलभोऽत एवालौकिकः, गुरुराजदेवतानां द्वन्द्वः, प्रसादशब्दस्य प्रत्येकमन्वयः, आदिना द्रव्यलाभादिः । कविसहृदय ● कविपदं काव्यकर्तृ परम्, सहृदयपदञ्च काव्यानुभवितृपरम्, तेन सहृदयत्वस्य कवौ सत्त्वेऽपि न कविपदवैयर्थ्यापत्तिः, कवेरपि अनुभवे कृत्यसमानकालिकोऽनुभवो ग्राह्यः, सहृदयशब्दाभिधेयार्थं सहृदयता च काव्यार्थभावना प्रयोजको वासनाविशेषः । वासनापि क्वचित् संस्काररूपा क्वचिच्चादृष्टरूपा । आवश्यकतयेति हेत्वर्थंतृतीयार्थ-प्रयोज्यत्वं निरूपणीयपदार्थनिरूपणविषयघटकनिरूपणेऽन्वेति । लंकारादिभिः ● आदिना चमत्काराधायका व्यङ्ग्यादयः, इत्थंभूतलक्षणे तृतीया । अयमत्राभिसंधिः । ज्ञानानुकूलशब्दप्रयोगोऽत्रनिरूपणम् । काव्यनिरूपणञ्च काव्यविषयकज्ञानानुकूलः शब्दप्रयोगः । तत्र न केवलस्य काव्यस्य निरूपणमपितु गुणालङ्कारादिविशिष्टस्य । तथा च गुणालङ्कारादिप्रकारककाव्यविशेष्यकं यज्ज्ञानं तदनुकूलः शब्दप्रयोगोऽत्र निरूपणमिति संपन्नम् । अतएव मर्मप्रकाशे गुणालङ्कारादिरित्यस्य विशेषणैरिति व्याख्यानं कृतम् । निरूपणीयेत्यत्र कर्मप्रत्ययार्थो विशेष्यत्वम् । तच्च शब्दप्रयोगरूप-निरूपणस्य ज्ञानद्वारा याचितमण्डनन्यायेन । अथवा प्रयोज्यज्ञानविशेष्यता कर्म-प्रत्ययार्थः । ज्ञाने शब्दप्रयोगे च खण्डशः शक्तिपक्षे ज्ञानस्य विशेष्यतया मानसंभवे विशेष्यतामात्रमवाऽनीयरर्थः । तत्र गुणालङ्कारादिनिष्ठप्रकारतानिरूपितविशेष्यता काव्ये विशेष्यतावच्छेदकं काव्यत्वम् । तस्मिन्नित्यत्र सप्तम्यर्थो निष्ठत्वं विशेष्यता-न्वयि । तथा च गुणालङ्कारादिप्रकारकनिरूपणविशेष्यतत्काव्यनिष्ठाविशेष्यताव-च्छेदकमिति अवच्छेदकान्तार्थः । गुणालंकारादेरुपलक्षणत्वं नतु विशेषणत्वम् । विद्यमानं सद्व्यावर्त्तकं विशेषणम्, अविद्यमानमपि व्यावर्तकमुपलक्षणम्, सूत्रे लक्षण-पदमुपलक्षणपरम्, एतत्तृतीयास्थले उपलक्षणस्यैव मानं भवति । जटाभिस्तापस इत्यत्र न सर्वस्मिन् तापसे जटा न च सर्वदा, इत्यादि व्युत्पत्तिवाददिशा अत्रापि तादृशतृतीयाया उपलक्षणार्थत्वेन न सर्वस्मिन् काव्ये गुणालङ्कारादय इत्यत्र तात्पर्यमुन्नेयम् । सिद्धान्तकौमुदी-पाठन-समये यथा लक्ष्यलक्षणत्वे अध्याप्येते तथा तु गुणालङ्कारादिज्ञानजन्यज्ञानविषयकाव्यत्ववति तस्मिन्नित्यादिरीत्याऽन्वयो बोध्यः । भवति च गुणालङ्कारादिज्ञानेन काव्यत्वज्ञानम्, काव्यत्वघटकचमत्कारस्य गुणालङ्कारादिज्ञानप्रयोज्यतयेत्यलं कोमलमतीनां दुरूहेण विषयेण । काव्यनिरूप-णात्मकेऽत्र ग्रन्थे गुणालङ्कारादीनां निरूपणमप्रासङ्गिकं स्यादिति प्रतिज्ञाशरीरे गुणालङ्कारादीनां प्रवेशः । किन्त्व विभिन्नाः प्राचीना आलङ्कारिकाचार्याः काव्यगतं चमत्कारित्वं जीवातुभूतेन विभिन्नेन प्रकारेण वर्णयन्ति । यथा

काव्यलक्षणम्

रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥

भामह्रोद्भटादयोऽलंकारमात्रेण, वामनो रीत्या, कुंतको वक्रोक्त्या, क्षेमेन्द्रश्च औचित्येन, परं चमत्कारः सर्वेषां समीहितः । तथा च काव्यत्वशरीरे चमत्कारित्वमात्रं निवेशनीयं न गुणालङ्कारादयः चमत्कारप्रयोजकतया च तेषां निरूपणमावश्यकीयम्, इत्यनुसन्धायोपलक्षणार्थकतृतीयोपात्ता । तथा चान्येषां काव्यत्वशरीरे गुणादीनां प्रवेशो न सम्यक् । विशेष्यतावच्छेदकं काव्यत्वमित्युक्तम् । तस्य तात्पर्यं रमणीयार्थप्रतिपादक-शब्दत्वमित्यत्र बोध्यम् । गुणालंकारादि-विशिष्टस्य रमणीयार्थप्रतिपादकशब्दस्य निरूपणाद् रमणीयार्थप्रतिपादकशब्दत्वं विशेष्यतावच्छेदकम् ।

तदितर● लक्षणस्य प्रयोजनं यद्यत्र व्यवहारः, इतरभेदसिद्धिश्च प्रसिद्धम् । तत्र यत्र यत्र रमणीयार्थप्रतिपादकशब्दत्वं तत्र तत्र काव्यपदव्यवहार इत्यस्य सुगमतया इतरभेदसिद्धिप्रयोजनं प्रदर्शयति । काव्येतरभेदानुमितेर्लिङ्गमिति साधनान्तस्यार्थः । स्मृतापि तरुणातपमित्यादिकाव्यं काव्येतरभिन्नं रमणीयार्थ-प्रतिपादकशब्दत्वात् सर्वसम्मतकिञ्चित्काव्यवत् । अथवा काव्यमात्रस्य पक्षत्वे यन्नैवं तन्नैवं यथा गौश्चलतीति वाक्यम् । अथवा न लक्षणप्रयोजनप्रदर्शनमात्र-समीहया इदमुक्तमपि तु काव्यत्वशरीरे गुणरसालङ्काराणां प्रवेशो न कार्यं इत्युपदेष्टुम् । अन्यथा उदितं मण्डलमिन्दोरित्यादेर्जलक्रीडादिवर्णनस्य च पक्षत्वेन तत्र तत्र अलङ्काररसघटितलक्षणरूपहेतोरवृत्तितया भागासिद्ध्या इतरभेदानु-मितेरनुदयापत्तेः । तल्लक्षणम्● काव्यलक्षणम् ।

॥ अथ लक्षणव्याख्या ॥

रमणीयार्थ● रमणीयो योऽर्थस्तस्य प्रतिपादकः शब्दः । कटाक्षादिचेष्टाविशेषेऽतिव्याप्तिवारणाय शब्द इति । न च प्रतिपत्तिः शाब्दबोधो न तज्जनकत्वं चेष्टादौ तेन प्रतिपादकशब्देनैव चेष्टादेर्व्यावृत्तिरिति वाच्यम् प्रतिपत्तिपदस्य तादृश-विशेषपरत्वे मानाभावात्, शब्दशब्दोपादाने च योग्यतावशाच्छाब्दपरत्वमिति त्वन्यत् । उद्बोधकतयोपस्थितिद्वारा चेष्टादेः क्वचिच्छाब्दजनकत्वाच्च । प्रयोजन-विरहाद् विशेषरूपेण वाक्यत्वादिना न निवेशः । प्रतिपादकपदं ज्ञानजनकत्वार्थकत्वेन वाचकलक्षकव्यञ्जकसाधारण्येन संग्राहकम् । रमणीयशब्दज्ञापके व्याकरणादावति-व्याप्तिवारणायार्थपदम् । तच्च चमत्कारजनकभावनाविषयत्वपरं न तु शब्देतरपरम् । शब्दस्यापि अर्थत्वेनेष्टत्वात् । यत्र शब्दरूपो धर्मउपमानिर्वाहकतया साधारणस्तत्रोपमया चमत्काराधाने शब्दस्यापि चमत्कारित्वम्, उपमाया

अर्थत्वे शब्दस्याप्यर्थत्वात्, उपमाया इव तद्घटकशब्दस्यापि चमत्कारजनकभावनाविषयत्वाच्च। किमेतावतैव? वक्ष्यमाणकारणमालाप्रकरणे मूल एव सर्वत्र शाब्दबुद्धौ शब्दभानस्य सोपपादनं वर्णिततया निखिलापि काव्यार्थभावना शब्दभावनेति चमत्कारिभावनाविषयत्वेन शब्दस्यापि रमणीयार्थत्वं समीहितमेव। अतएव अन्वयव्यतिरेकाभ्यां तत्तद्वर्णपदादीनां चमत्कारप्रयोजकत्वमभिप्रेत्य, अत्र वर्णस्य, पदस्य, प्रत्ययस्य प्रकृतेश्च चमत्कारित्वमित्यालङ्कारिकग्रन्थेषु बहुशो दृश्यते। अयं भावः—शब्दार्थयोर्भावना चमत्कारिणी, परं क्वचिच्छब्दचमत्कारमर्थचमत्कारोऽतिशेते तत्र शब्दमपेक्ष्यार्थस्य प्राधान्येन भावना, अर्थचित्रमित्यादिना च व्यवहारः। यत्र च विपरीतं तत्र पूर्वोक्तविपरीताऽर्थगुणकशब्दभावना, शब्दचित्रमित्यादिव्यवहारः। शब्दार्थौ काव्यस्य शरीरमित्यभियुक्तानामुक्तिरेवमेव संगच्छते। शब्दरूपस्य काव्यस्य शब्दार्थरूपं शरीरमित्यर्थः। अर्थस्यैकस्याधिकस्य प्रवेशेन भेदसंभवेन षष्ठ्युपपत्तेः। शब्दार्थरूपस्य काव्यस्य शब्दार्थौ शरीरमित्यत्रमतेऽभेदे षष्ठ्या क्लिष्टकल्पनापत्तेः। शब्दार्थयोरुभयोः काव्यशरीरभूतयोः प्रतिपादकः शब्दः काव्यमिति सिद्धान्तः। शब्दत्वस्यापि ग्राह्यत्वशक्तिनाम्ना प्रतिपाद्यत्वं हरिकारिकादावुक्तं व्याकरणभूषणादावुपपादितञ्च। अधिकञ्च शब्दार्थयुगलस्याऽकाव्यत्वे वक्ष्ये। शब्दार्थयोः शरीरत्वं नामालङ्काराश्रयतया भावनाविषयत्वं समेषामपि मते। पण्डितराजमते गुणाश्रयतयाऽपीत्यधिकम्, गुणानां शब्दार्थवृत्तित्वस्याप्यङ्गीकारात्। अर्थपदेन शब्दार्थयोरुभयोः संग्रहात् तत्प्रतिपादकः शब्दः काव्यमिति निष्कर्षः। एतेन शब्दमात्रस्य काव्यत्वे काव्यमनाश्रयतामर्थालङ्काराणां वर्णनमप्रासंगिकमिति केषाञ्चन व्याख्यातृणामाक्षेपो रहस्यानवबोधमूलक इति ध्येयम्। अन्ये तु व्याचक्षते—प्रतिपादकत्वसंबन्धेन रमणीयार्थवान् शब्दः काव्यम्। अर्थवच्छब्दः काव्यशरीरमिति तदभिप्रायः। एवमपि शब्दार्थशरीरं काव्यमित्याचार्यवचसो नासंगतिः। शब्दार्थयोः शरीरे प्रवेशेऽपि शब्दस्य प्राधान्ये कस्यचिद् वचसो विरोधाभावात्। तत्राप्यर्थशब्देन पूर्वव्याख्यावदेव शब्दस्यापि ग्रहणं भवत्येव। व्याकरणशास्त्रे स्वरूपमिति शास्त्रबलादर्थवत्परिभाषया च शब्दार्थोभयोपस्थितौ न कस्यचित्परित्यागः, परं शब्देऽर्थो विशेषणम् अतएवाग्नेर्ढगित्यादावर्थविशिष्ट एवाग्निशब्दो गृह्यते। तथैवार्थवच्छब्दस्य काव्यशरीरत्वेऽर्थशरीरस्यापि काव्यशरीरे प्रवेशो जात एव। लोमवल्लांगूलवान् पशु-शब्दार्थ इति व्यवहारे लांगूलस्यापि भवत्येव शरीरान्तर्भावः, लांगूले दूषिते दूषितः, अलंकृते च लांगूलेऽलंकृतः पशुरिति भवत्येव वस्तुनो व्यवहारः। एवमर्थवच्छब्दस्य काव्यत्वेऽर्थस्य दूषितत्वालंकृतत्वाभ्यां काव्यत्वस्यापि दूषितत्वमलंकृतत्वञ्च। तेन अर्थदोषगुणालंकाराणां निरूपणं भवति काव्याङ्गतया निरूपणम्। एवं च महामहोपाध्यायस्वर्गीयश्रीगङ्गाधर-

रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको

शास्त्रिमहाभागानामदसीयटीप्पणे-शब्दमात्रस्य काव्यत्वे तन्मात्रगतानां दोष-गुणालङ्कारध्वनीनां निरूपणौचित्येन अर्थगतानां तेषां निरूपणस्योन्मत्त-प्रलापत्वापत्तिः। ननु रसोपयोगितामात्रेण तेषामपि निरूपणमुपपद्यत एवेति चेत्, काव्याङ्गनिरूपणं प्रतिज्ञाय तेषां निरूपणस्यासंगतत्वम्, इत्याशयक आक्षेपः पण्डितराजं न स्पृशति तैः कुत्रापि शब्दमात्रस्य काव्यत्वानङ्गीकारात्। प्रतिज्ञापि न तादृशी कुत्रापि। यत्तु तैरेव महोदयैः कविसंरम्भगोचरत्वमर्थस्यापि न तु शब्दस्यैवेति उभयोरेव काव्यत्वमित्यभाषि तदपि तथैव अर्थवच्छब्दस्य कविसंरम्भ-गोचरत्वे विवादाभावात्। एवमेव ऋगादिपदस्य अर्थविशिष्टः शब्दविशेषः शक्यः। अत आद्यन्तवदेकस्मिन् सूत्रे भाष्ये एकवर्णं पदम्, एकपदा ऋक्, एकर्चं सूक्तम्, इत्यादेर्व्यवहारस्यामुख्यतया व्यपदेशिवद्वचनस्य फलत्वमाशंक्य "अत्राप्यर्थेन युक्तो व्यपदेशः, पदं नामार्थः, ऋङ् नामार्थः, सूक्तं नामार्थं इति" इत्युक्तं भाष्ये। अर्थेन निमित्तसद्भावेन, व्यपदेशो मुख्यो व्यवहारः। अत्र प्रदीपः—पदादीनां योऽर्थः सोऽन्यपदार्थ इत्यर्थः। अभेदोपचाराचार्थ एव पदादिभिरभिधीयते। इति व्याख्याति। तत्रत्यार्थशब्देन अर्थविशिष्टः शब्दोऽभिप्रेयते शब्दबोधकानां पदानामर्थविशिष्टे शब्दे शक्तिस्वीकारात्, वृत्तिविषयत्वरूपार्थत्वस्य अर्थवति शब्दे स्वीकारात् पूर्वोक्तरीत्या स्वरूपेऽपि शब्दानां शक्तिस्वीकारात्। तथा चार्थविशिष्टः शब्दोऽन्यपदार्थः शब्दमात्रञ्चावयवः—इति भावः। तथा च ऋक्सूक्तादिपदवत्काव्यपदस्यापि अर्थवति शब्द एव शक्तिर्युक्ता। यद्यप्युद्योते—"अर्थेन युक्तः" इत्यादि भाष्यस्य पदादिशब्दार्थस्यार्थेन युक्तत्वादित्यर्थं इति व्याख्यातं परं न तत्प्रतिकूलम्। मुख्यव्यवहारप्रदर्शने साक्षान्निमित्तसद्भाव-प्रदर्शनपरतया भाष्यस्य योजनं सम्यगित्यभिप्रायेण मया तथा व्याख्यायते। यत्तु तत्रैव शब्दार्थोभयवृत्तिपादत्वऋक्त्वादीत्युद्योते प्रतिपादितं तत्तु स्ववासनया न तु भाष्याक्षराणि तत्पराणि, मन्मतेऽपि भाष्यस्य सुयोजितत्वात्! शब्दार्थोभयस्य विशेष्यतया क्वचिदपि व्यवहार उपयोगाभावादर्थविशिष्टशब्दस्य च सर्वत्र व्यवहारसाधकत्वात्। पदादीनां योऽर्थः सोऽन्यपदार्थ इति प्रदीपस्य शब्दभिन्ने शुद्धेऽर्थेऽन्यपदार्थत्वतात्पर्यभ्रमेण तु कैयटमतं तत्रोद्योते खण्डितं तत्त्वन्यदित्य-लमधिकेन। पुनरपि काव्यप्रकाशलक्षणखण्डनावसरे प्रतिपादयिष्यत एवार्थ-वच्छब्दस्य काव्यत्वम्। रमणीयपदन्तु चमत्कृतिशून्यार्थकवाक्यवारणायेति स्फुटमेव। जनकज्ञान● लोकोत्तरसुखस्य जनकं यज्ज्ञानं तद्विषयत्वमर्थगतं

जातिविशेषः । कारणं च तदवच्छिन्ने भावनाविशेषः पुनः पुनरनुसंधानात्मा । 'पुत्रस्ते जातः', 'धनं ते दास्यामि' इति वाक्यार्थधीजन्यस्याह्लादस्य न लोकोत्तरत्वम् । अतो न तस्मिन्वाक्ये काव्यत्वप्रसक्तिः । इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्, यत्प्रतिपादितार्थविषयकभावनात्वम् चमत्कारजनकतावच्छेदकं तत्त्वम् । स्वविशिष्टजनकता-

---

रमणीयत्वम् । ननु लोकोत्तरत्वं यदि वैलक्षण्यमात्रं तदा घटमानयेत्यादिवाक्यादपि कुतश्चिद्विलक्षणाह्लादजननादतिव्याप्तिः, यदि लौकिकसुख-भिन्नत्वं तदा ब्रह्मस्वरूपाह्लादप्रयोजके तत्त्वज्ञानादावतिप्रसक्तमतमाह—लोकोत्तरत्वञ्च ● काव्यसामग्रीतरसामग्रीजन्यसुखभिन्नत्वं लोकोत्तरत्वं तस्य चमत्कारो नामान्तरम् इति भावः । अनुपदं वक्ष्यमाणकार्यकारणभावानुकूलतया कार्यतावच्छेदिकां चमत्कारत्वजातिं प्रमापयति— अनुभव ● सहृदयहृदयानुभवमात्रैक-प्रमाणगम्य इत्यर्थः । तदवच्छिन्ने चमत्कारत्वावच्छिन्ने, भावनेत्यस्य काव्यार्थविषयिकेति शेषः । न लोकोत्तरत्वं किन्तु काव्येतरसामग्रीजन्यत्वेन लौकिकत्वम् । ज्ञानगोचरतेत्यत्र ज्ञानपदं भावनापरमिति स्फोरयन् परिष्कृतलक्षणमाह—इत्थञ्च ● चमत्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावती या भावना तद्विषयप्रतिपादकशब्दत्वं काव्यत्वं फलितम् । ननु काव्यार्थस्य घटानयनस्य च समूहालम्बनात्मकं ज्ञानम्, तेन काव्यार्थविषयकत्ववशाच्चमत्कारो जन्यते, तथा च चमत्कारनिष्ठजन्यतानिरूपितजनकतावज्ज्ञानं जातम्, तद्विषयो घटानयनमपि इति तत्प्रतिपादके घटमानयेति वाक्येऽपि प्रसक्तमतो ज्ञानपदमपहाय भावनेति । तथा च कदाचन घटानयनस्य चमत्कारजनक-ज्ञानविषयत्वे तद् धाराप्रवाहे विषयत्वाभावान्नातिव्याप्तिः । भावनापदेन ज्ञान-प्रवाहस्य विवक्षितत्वात् । ननु काव्यार्थविषयकधारावाहिकज्ञानरूपभावनायामपि कदाचन घटानयनस्य विषयत्वसंभवे पूर्वोक्तरीत्याऽतिव्याप्तिस्तदवस्थैवेत्यत आह—यत्प्रतिपादितार्थ ● येन शब्देन प्रतिपादितस्य अर्थस्य सर्वाऽपि भावना चमत्कार-जनिका स शब्दः काव्यमिति सरलार्थः तेन न पूर्वोक्तातिव्याप्तिः । तथाहि घटानयनस्य कतिधा भावना, काचित् काव्यार्थेन साकं काव्यार्थविषयिणीति यावत् । कदाचित् घटानयनमात्रविषयिणी । काचिच्च घटानयनविषयिणी सती काव्यार्थभिन्नविषयिणी च । तत्र प्रथमा काव्यार्थविषयकत्वेन चमत्कारं जनयति परं द्वितीया तृतीया च न जनयतीति घटमानयेति वाक्यस्य न काव्यत्वम् । उचितं

मण्डलमिन्दोरित्यादिशब्दप्रतिपादितस्यार्थस्य सर्वाऽपि भावना तदर्थमात्रविषयिणी तादृशार्थविषयिणी सती उदासीनघटादिविषयिणी च चमत्कारं जनयतीति तादृशशब्दे काव्यत्वसमन्वयः। येन शब्देन प्रतिपादितार्थस्य सर्वापि भावना चमत्कारजनिका तासु सर्वासु चमत्कारजनकता। यथा उदितं मण्डलमिन्दो-रित्यादिशब्दप्रतिपादितार्थविषयकभावनायां सर्वस्यां जनकता, तथा च तादृश-शब्दप्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतासमनियतं सच्चमत्कार-जनकतावच्छेदकं भवतीति उदितमित्यादितादृशशब्दे काव्यत्वसमन्वयः। घटमानयेति शब्दप्रतिपादितार्थघटानयनविषयिणी त्रिविधाभावनाऽधुनैव प्रदर्शिता। तत्र प्रथमायां चमत्कारजनकता वर्त्तते परं द्वितीयतृतीययोर्नास्ति, तादृशशब्द-प्रतिपादिततादृशार्थविषयकभावनात्वन्तु तिसृष्वपि भावनासु वर्तते इति तादृशभावनात्वं चमत्कारजनकताधिकवृत्तिसत्वावच्छेदकमिति न घटमानयेति शब्दे काव्यत्वं प्रसक्तम्। इति मूलोक्तलक्षणसमन्वयः सम्यगूह्यः। यत्पदेन काव्यत्वेनाभिमतः शब्दो ग्राह्यः। तत्त्वमित्यस्य काव्यत्वमिति शेषः। उच्चारणभेदेन शब्दभेदपक्षे प्रत्युच्चारणमुदितमित्यादिकाव्यस्यापि भेदपक्षे यदानुपूर्वीमच्छब्द-प्रतिपादितेत्यादि निवेश्यम्। शब्दभेदेऽपि शब्दवृत्तिधर्मविशेषरूपाया आनुपूर्व्याः सर्वत्र तादृशशब्देषु विद्यमानतया संग्रहः। तदा यत्पदेनानुपूर्व्या ग्रहणे तत्त्वमित्यस्य तद्वत्त्वमर्थो वक्तव्यः। यद्यपि आनुपूर्वीपर्यन्तस्यानिवेशे अव्याप्त्यादिदोषो न प्रसरति तथाप्येकस्यैव काव्यस्योच्चारणभेदेन नैककाव्यत्वं प्रसज्ज्येतातस्तन्निवेश आहृतः।

इदमत्रावधेयम्—अर्थविषयकभावनात्वमवच्छेदकमुक्तं युक्तञ्च तत्, अर्थविषयकभावनायां चमत्कारजनकतायाः सत्त्वादर्थविषयकभावनात्वं चमत्कार-जनकतावच्छेदकं स्यात्तथापि भावनात्वावच्छेदकस्य लक्षणे प्रवेशे न तात्पर्यं सर्वार्थभावनायां भावनात्वस्य सत्त्वेन साधारण्येनाव्यावर्तकत्वात्। अर्थविशेष एव काव्यतदितरार्थभावना विशेषकः। अतएव अग्रिमे लक्षणे मूले भावनात्वं विहायार्थस्यैवावच्छेदकत्वेन प्रवेशः। अर्थविषयकभावनायां चमत्कारजनकता वर्तते तदा तादृशभावनानिष्ठेन धर्मेणावच्छेदकेन भाव्यम्, तादृशभावनायाञ्च भावनात्वमर्थविषयकत्वञ्च धर्मद्वयम्, उभयोरवच्छेदकत्वेऽपि भावनात्वस्य लक्षणघटकत्वे प्रयोजनाभावादर्थविषयकत्वस्यावच्छेदकत्वेन प्रवेशोऽवशिष्यते। विषयकत्वं विषयित्वञ्च नार्थान्तरम्, अर्थविषयित्वं स्वरूपेण भावनायां विषयिण्यां विद्यते, अर्थश्च विषयो विषयितासंबन्धेन विषयिभावनायाम्। अतस्तादृशविषयित्व-स्यार्थस्य वाऽवच्छेदकत्वेन प्रवेशे द्विधालक्षणविधानस्य प्रक्रिया तथापि अग्रिम-लक्षणे जनकतावच्छेदकार्थेत्यादिरीत्या प्रतिपादनादर्थमेवावच्छेदकत्वेन व्यवहरामि।

अर्थस्य विषयितासंबन्धेन भावनावृत्तित्वादर्थनिष्ठाऽवच्छेदकता विषयित्व-संबन्धावच्छिन्ना बोध्या। चमत्कारनिष्ठाजन्यता चमत्कारत्वावच्छिन्ना, भावना-निष्ठजनकताया अवच्छेदकोऽर्थः। तथा च चमत्कारत्वावच्छिन्नजन्यतानिरूपित-भावनानिष्ठाया जनकताया अवच्छेदकस्यार्थस्य प्रतिपादकशब्दत्वं काव्यत्वमिति फलितम्। इत्थमेव यत्तत्पदयोः परित्यागेन लक्षणकरणे प्रक्रिया। इदं प्रकारविषया प्रवेशेन लक्षणविधानमिति व्यवह्रियते। प्रकारविधया प्रवेशे गौरवं संसर्गविधया प्रवेशे च लाघवमित्यादि संसर्गता प्रकारतावादिमतविवेचनन्त्वतिक्लिष्टं परित्यज्यते। परं संसर्गो यदि पारम्परिको न भवेत्तदा संसर्गविधया प्रवेशेन लक्षणकरणं लघुभूतमित्येव भूयान् व्यवहारः। संसर्गस्य पारम्परिकत्वे तु परम्परायाः संसर्गत्वे मानाभावादिति वदन्तः प्रकारतया निवेशमधिकं रोचयन्ते नैयायिकसरणिप्रवीणाः। अत्र यत्प्रतिपादितार्थेत्यादितत्वमन्तेन प्रकारविधया प्रवेशेन लक्षणकरणं तस्य निष्कर्षस्तु चमत्कारत्वावच्छिन्नेत्यादि काव्यत्वमन्तेन मया प्रदर्शितः। प्रथमं विशेषणं तदनन्तरं विशेष्यं ततस्तस्य विशेष्यं पुनस्तस्य विशेष्यमित्यादि रीत्या निवेशः प्रकारतया निवेश उच्यते। अग्रिमलक्षणन्तु संसर्गविधया प्रवेशेन कृतमस्ति। पूर्वलक्षणे प्रतिपादकशब्दत्वमिति कथनेन प्रतिपादकताधर्मः काव्यत्वेनाभिमते शब्दे वर्तते इति तूक्तप्रायमेव। तथा च चमत्कारत्वावच्छिन्न-जन्यतानिरूपितभावनानिष्ठजनकताया अवच्छेदकस्यार्थस्य प्रतिपादकशब्दत्वमिति पूर्वोक्तलक्षणेऽव्यावर्तकत्वाद् भावनानिष्ठपदं निःसार्य स्वपदेन चमत्कारत्वं गृहीत्वा तदनन्तरवर्ति प्रतिपादकत्वान्तं संसर्गं विधाय चमत्कारत्ववत्वं काव्यत्वमिति लक्षणङ्करोति। चमत्कारत्वं यत्र वर्तते तत्काव्यमिति तस्य सरलार्थः। संबन्धश्च स्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकार्थप्रतिपादकत्वम्। स्वं चमत्कारत्वं तदवच्छिन्ना चमत्कारनिष्ठा या जन्यता तन्निरूपिता भावनानिष्ठा-जनकता तदवच्छेदको योऽर्थस्तस्य प्रतिपादकत्वं लक्ष्ये काव्यत्वेनाभिमते शब्दे। प्रथमं वर्णितं लक्षणमपेक्ष्यात्र कश्चिन्नूतनोऽर्थो नास्ति केवलः प्रकारभेदो लक्षणनिरूपणस्येति ध्येयम्। मूलस्थस्वविशिष्टजनकतेत्यस्य स्वावच्छिन्नजन्यता-निरूपितजनकतेति तात्पर्यार्थो बोध्यः। समन्वयोऽस्य पूर्वलक्षणप्रतिपादितार्थानां धारण एव संभवति। संसर्गे भावनानिष्ठेति पदं नोपात्तं परं समन्वयो भावनानिष्ठजनकतामादायैव। शब्दशब्दस्य निस्सारणेऽपि प्रतिपादकताशब्द एव यास्यति। यद्येतादृशपारम्परिकस्य संसर्गत्वे मानं स्यात्तदा भवेदिदं लक्षणमुत्कृष्टम्। न चास्ति तस्मात्प्राक्तनमेव लक्षणं सम्यक्। काव्यं चमत्कारत्ववत्, चमत्कारो वेति प्रामाणिको व्यवहार उपलभ्येत भवेदस्य पारम्परिकस्य संसर्गत्वं प्रामाणिकम्। काव्यं चमत्कारि चमत्कारजनकं वेति व्यवहारस्तु काव्ये चमत्कारजनकतावगाही

जायते । काव्ये तादृशजनकता च काव्यप्रतिपादितार्थ- द्वारेति स्वावच्छेदकार्थप्रतिपादकत्वसंबन्धेन चमत्कारजनकतावत्वं काव्यत्वमिति लक्षणं तु पारम्परिकस्य प्रामाणिकसंसर्गतया सुवचम् ।

एतावता यावता संक्षेपेण सारल्येन च संभवति मूलोक्तलक्षणव्याख्यानमेव लिखितम् । अतः परमस्यैव स्फुटतरपरिष्करणं साहित्याध्येतॄणां कृतेऽतिक्लिष्टमापतिष्यति । परं मम गुरवोऽध्यापयन्तिस्मातस्तस्य सर्वथा परित्यागो नोचितोऽध्ययनाध्यापनादौ प्रचारात् । तत्रापि गुरुमुखाच्छ्रुतमक्षरशो न स्मरामि परं शैली काचित् पुरः स्फुरति । तथा च यथासंभवं सारल्येन संक्षेपेण च वर्णयामि परं बहूनां स्वयमनुगमयोग्यं लेखातिविस्तरभयान्नैव कर्तुं पारयिष्यामीति सूचयाम्येव ।

क्लिष्टपरिष्कारप्रक्रिया प्रथमरीत्या—

भावनात्वस्यावच्छेदकत्वेन न प्रवेश इति तु प्रागुक्तम् । अर्थनिरूपितविषयित्वस्यावच्छेदकत्वेन प्रवेशं कृत्वा यत्तत्पदघटितं लक्षणम् ।

१. यत्प्रतिपादितार्थनिरूपितविषयिता चमत्कारत्वावच्छिन्नजन्यतानिरूपितजनकताया अवच्छेदिका तत्त्वम् । नार्थः कश्चिन्नूतनोऽत्र । जनकता च सर्वत्र भावनानिष्ठाऽवसेया, संक्षेपेणाग्रे चमत्कारजनकतामात्रोक्तौ अपि चमत्कारत्वावच्छिन्नजन्यतानिरूपिता जनकता ग्राह्या ।

२. प्रतिपादके प्रतिपादकता प्रतिपाद्ये प्रतिपाद्यता । प्रतिपादकता चानुपूर्व्यवच्छिन्ना तन्निवेशफलं प्रागुक्तमनेकाकाव्यत्ववारणम् । यदानुपूर्व्यवच्छिन्नप्रतिपादकतानिरूपितप्रतिपाद्यतावदर्थनिरूपितविषयित्वं चमत्कारजनकतावच्छेदकं तद्वत्त्वमिति लक्षणम् ।

३. आनुपूर्व्यवच्छिन्नेत्यस्य शब्दान्तरमेव आनुपूर्वीनिष्ठावच्छेदकतानिरूपिताऽवच्छेद्यतावदिति प्रतिपादकता विशेषणम् । विषयित्वं जनकतावच्छेदकमित्यस्य विषयित्वनिष्ठावच्छेदकता निरूपितेत्यपि शब्दान्तरमेव । विषयित्वं स्वरूपेणावच्छेदकमिति तु प्रागेवोक्तम् । विषयित्वेऽर्थो निरूपितत्वसंबन्धेन विशेषणम्, एवमर्थे प्रतिपाद्यत्वं स्वरूपेण, तत्र प्रतिपादकता निरूपितत्वेन, तत्राऽवच्छेदकताऽपि निरूपितत्वेन, अवच्छेदकतायामानुपूर्वी निष्ठत्वेन विशेषणम्, आनुपूर्वी च यद्रूपपदेन प्रवेश्यं—यद्रूपनिष्ठ-निष्ठत्वसंबन्धावच्छिन्नावच्छेदकतानिरूपिता या निरूपितत्वसंबन्धावच्छिन्ना प्रतिपादकता-निष्ठावच्छेदकता तन्निरूपिता या स्वरूपसंबन्धावच्छिन्ना प्रतिपाद्यतानिष्ठावच्छेदकता, तन्निरूपिता या निरूपितत्वसंबन्धावच्छिन्नार्थनिष्ठावच्छेदकता, तन्निरूपिता या स्वरूपसंबन्धावच्छिन्ना विषयित्वनिष्ठावच्छेदकता, तन्निरूपिता चमत्कारजनकता, तद्रूपवत्त्वं काव्यत्वम् । एषां समेषां फलानां प्रदर्शने विस्तृतं स्यात् ।

४. विषयताघटितलक्षणम्। यत्र यत्र विषयिताया निवेशस्तत्र तत्र विषयताया निवेशेनापि लक्षणं संभवति। न च वस्तुतोऽर्थभेदः। एतावानेव विशेषो यद्विषयितास्वरूपेण भावनायां वर्तते तेन विषयितानिष्ठावच्छेदकता स्वरूपसंबन्धावच्छिन्ना भवति, विषयता तु भावनायां निरूपकत्वसंबन्धेन वर्तते तेन विषयतानिष्ठावच्छेदकतानिरूपकत्वसंबन्धावच्छिन्ना जायते। अतोऽत्र भेदो लक्षणे न बोध्यः, केवलः प्रकारभेदः।

५. स्वरूपसंबन्धरूपावच्छेदकत्वकल्पे काव्यैकदेशार्थविषयिताया अपि चमत्कारजनकतावच्छेदकत्वात् काव्यैकदेशवृत्तिरूपमादाय काव्यैकदेशेऽतिव्याप्तिवारणाय—यत्प्रतिपादितार्थविषयितासामान्यं चमत्कारजनकतावच्छेदकं तत्त्वं लक्षणम्। यत्प्रतिपादितेत्यादेः पूर्ववदेवात्राग्रेऽपि च परिष्कारो बोध्यः। काव्यैकदेशार्थविषयितायाः काव्यार्थभावनातः पृथग्भावनायामपि सत्त्वात् तत्र तादृशजनकताया अभावान्न तादृशविषयतासामान्यं तादृशजनकतावच्छेदकमिति न काव्यैकदेशेऽतिव्याप्तिः।

६. एतादृश एवार्थे तादृशफलायैवसामान्यपदप्रक्षेपफलितस्य व्यापकत्वस्य निवेशे यत्प्रतिपादितार्थविषयितात्वव्यापकं चमत्कारजनकतावच्छेदकत्वं तत्त्वमिति लक्षणम्।

७. पूर्वप्रसक्तैकदेशाऽतिप्रसंगवारणायैव अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वपक्षे यत्प्रतिपादितार्थविषयित्वं चमत्कारजनकताऽतिरिक्तवृत्तितत्त्वं लक्षणम्। काव्यैकदेशार्थविषयिता तु चमत्कारजनकत्वाभाववत्यां काव्यार्थाविषयिण्यां भावनायामपि वर्तत इति नातिप्रसंगो काव्यैकदेशे।

८. प्राचां मते यत्तदोरननुगमादिति वदन्तः परिष्कारप्रवीणाः यत्तत्पदघटितं लक्षणमननुगतं मन्यन्ते। तत्र प्रथमलक्षणे यत्प्रतिपादितेत्यारभ्य जनकतावच्छेदकपर्यन्तमुपगच्छामः। अधुना तु जनकतावच्छेदकमारभ्य यत्पदार्थोऽन्ते निवेश्यते विशेषणविशेष्यभावे व्यत्यास इति भावः। एवमग्रेऽपि बोध्यम्। अर्थविषयित्वमित्यस्य अर्थनिरूपितविषयित्वमित्यनर्थान्तरम्। विशेष्यविशेषणभावव्यत्यासे तु विषयितानिरूपकोऽर्थ इति रीत्या प्रोच्यते। तथा च प्रथमलक्षणरीत्या लक्षणम्:—चमत्कारजनकतावच्छेदकविषयितानिरूपकार्थप्रतिपादकत्वं काव्यत्वमिति।

९. प्रागुक्तद्वितीयरीत्या—चमत्कारजनकतावच्छेदकविषयितानिरूपकार्थनिष्ठप्रतिपाद्यतानिरूपितप्रतिपादकतावच्छेदकानुपूर्वीमत्त्वम्।

१०. तृतीयरीत्या—चमत्कारजनकतानिरूपितस्वरूप संबन्धावच्छिन्नविषयित्वनिष्ठावच्छेदकतानिरूपितनिरूपितात्वसम्बन्धावच्छिन्नार्थनिष्ठावच्छेदकता -

निरूपितस्वरूपसम्बन्धावच्छिन्नप्रतिपाद्यतानिष्ठावच्छेदकतानिरूपितनिरूपिततत्व - संबन्धावच्छिन्न - प्रतिपादकता - निष्ठावच्छेदकतानिरूपितनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकतानिष्ठावच्छेदकतानिरूपित - निष्ठत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मावच्छिन्नत्वम् काव्यत्वम् ।

११. षष्ठरीत्या चमत्कारजनकतावच्छेदकत्वव्याप्यविषयितात्वावच्छिन्न-निरूपकतानिरूपितनिरूप्यतावदर्थप्रतिपादकत्वं काव्यत्वम् । अस्यैव व्यापकत्व-लक्षणान्तर्भावेण निर्वचने चमत्कारजनकतावच्छेदकत्वनिष्ठाभावीयप्रतियोगितानिरूपितपारम्परिकावच्छेदकतावत्वम् । अभावश्च यद्‌रूपावच्छिन्न-प्रतिपादकतानिरूपितप्रतिपाद्यतावदर्थनिरूपितविषयितानिष्ठावभावप्रतियोगित्वं नास्तीत्याकारकः । परम्परावच्छेदकत्वस्य बहुतरावच्छेदकता अन्तर्भाव्यनिर्वचनं जायत इति त्यज्यते ।

१२. सप्तमरीत्या चमत्कारजनकत्वाभाववदवृत्तिविषयितानिरूपकार्थप्रतिपादकत्वं काव्यत्वम् ।

१३. मूलोक्तस्वविशिष्टेत्यादि लक्षणवत्संसर्गतया प्रवेशं कृत्वा लक्षणान्तरं संभवति । सर्वेषां तथा प्रदर्शने पुनर्द्वादशलक्षणनिर्वचनापत्त्या भूयान् ग्रन्थः स्यादिति प्राक्तनस्य लक्षणस्य द्वादशस्यैव तथा रीतिं प्रदर्श्योपसंहरामि । द्वादशे लक्षणे स्वपदेन चमत्कारत्वं धृत्वा अन्यान् प्रतिपादकान्तान् संसर्गतया प्रवेश्य चमत्कारत्ववत्वं लक्षणम् । चमत्कारत्ववत्ता च स्वावच्छिन्नजन्यतानिरूपित-जनकत्वाभाववदवृत्तिविषयतानिरूपकार्थप्रतिपादकतासम्बन्धेन । एवं बहूनि लक्षणानि व्युत्पन्ना विधातुं प्रभवन्ति दिङ्मात्रन्तु दर्शितम् ।

॥ अथ काव्यप्रकाशलक्षण-व्याख्या ॥

तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ॥ अत्र वृत्तौ क्वापीत्यनेनैतदाह यत्सर्वत्र सालंकारौ क्वचित् स्फुटालंकारविरहेऽपि न काव्यत्वहानिः । इति काव्यप्रकाशमूलम् । बहून्यस्य व्याख्यानानि स्वकल्पितप्रक्रियया प्रथन्ते, तानुद्धृत्य न लेखवर्धनं समीहे । प्रकृतग्रन्थव्याचिख्यासया किंचिद् वक्ष्ये । उच्छृङ्खलकल्पनाप्रसरे चास्य लक्षणस्वरूपस्यैव स्फुटानभिधानेन दोषो महान् । न क्वचिदेतादृशलक्षणकरणं संस्कृतसाहित्ये प्राप्यते विरलमेव वा । एवं मूललक्षणानि प्राप्यन्ते यत्र दोषोद्भवे पदान्तरनिवेशेन निर्दोषतां नयन्ति लक्षणं व्याख्यातारः, परं मूलगृहीतपदनिस्सारणेनैव अव्याप्तिवारणं विधेयं व्याख्यातृभिरित्यस्य प्रधानं निदर्शनमयं ग्रन्थः । यथा मम्मटमहत्त्वमुग्धोऽपि उद्धरिष्यमाणो मर्मप्रकाशः । "काव्यप्रकाशोक्तं लक्षणमनुपहसनीयस्य काव्यस्य निर्दुष्टमिति व्याख्याति ।

परं तदपि स्वकल्पनाप्रसरेणैव। किमनुपहसनीयं काव्यम् उत्तममध्यमाधमेषु ग्रन्थनिर्दिष्टेषु अन्यतमद् अलौकिकम् वा किञ्चित्। स्वनिर्दिष्टस्य काव्यस्य लक्षणं न कृतमलौकिकस्य तु क्रियते इति किमिव स्यात्? उत्तममनुपहसनीयञ्चेदङ्गीक्रियते त्रिविधं लक्ष्यते चैकमिति इदमपि लक्षणकरणं स्यात्? किञ्चानुपहसनीयलक्षणमप्युपहसनीयमेव। अनुपहसनीयत्वमलंकारचमत्कृतौ सत्यामसत्यां वा भवति तदाऽलंकारपदप्रक्षेपस्य कावश्यकता? क्वचित् स्फुटालंकारः क्वचिच्चास्फुटालंकार इति व्याख्यानेन सर्वत्रालंकारोऽपेक्षित इति केषाञ्चन व्याख्यानमप्येवमेव चमत्कृत्याधानं विना किमन्यदस्फुटत्वम्? तादृशञ्चेदपेक्ष्यते द्रव्यत्वपृथिवीत्वघटत्वादीन्यप्यपेक्ष्यन्तां को निवारयिता? इदञ्चातिवैचित्र्यमस्य लक्षणविधानस्य यत्काव्यत्वं सदोषे निर्गुणे निरलङ्कारे स्वयमिष्यते निवेश्यते च तद्विपरीतं पदं लक्षणे। तस्मादिदं न लक्षणपरमिति मम प्रतिभाति। लक्षणस्य सुबोधतया ग्रन्थकृतोपेक्षितम्। यथा पण्डितराजः काव्यशरीराघटकैरपि उपलक्षकैर्गुणालङ्कारादिभिः काव्यनिरूपणं प्रतिजज्ञे तथा मम्मटोऽपि अदोषगुणालङ्कारैरुपलक्षितं काव्यनिरूपणमनेन ग्रन्थेन प्रतिजानीते। उपलक्षको रसोऽपि रसधर्मेण गुणेन सूच्यते। अन्यच्च तत्तद्व्याख्यातृप्रदर्शितमार्गेणावगन्तव्यम्। सर्वथा लक्षणपरत्वेनैवास्य व्याख्यानस्याग्रहे तु अनुगतप्रतीतिसिद्धं प्रागुक्तकारणभयकार्यतावच्छेदकतया वा सिद्धं काव्यत्वं जातिमखण्डोपाधिं वा मत्वा तद्घटितं लक्षणं कार्यम्। तादृशकाव्यत्वपरिचायकतया च अदोषादीनामुपयोगः कार्यः। यथा तत्र गंधवती पृथ्वीति भाषापरिच्छेदस्थलक्षणं गंधसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं पृथिवीत्वमिति व्याचक्षते, तत्र गंधसमानाधिकरणद्रव्यत्वव्याप्यपर्यन्तं पृथिवीत्वजातेः परिचायकतया निर्दोषगुणशब्दार्थवृत्तिनिरलङ्कारमात्रावृत्तिजातिमत्वं काव्यत्वमित्यभिधाने जातेः प्राक्तनमखिलं काव्यत्वजातेः परिचायकम् काव्यत्वं सालङ्कारे निरलङ्कारे च न तु निरलङ्कारमात्रवृत्तीति दर्शयितुं कारिकायां क्वापि पदम् तद्व्याख्यानपरो वृत्तिग्रन्थश्च। निर्दोषसगुणशब्दार्थ-वृत्तिजातिमत्वमित्यस्यैव लक्षणत्वे काव्यत्वव्यापकं शब्दत्वं वाक्यत्वं मतविशेषसिद्धभावत्वादिजातिमादायातिव्याप्तिरतो निरलङ्कारेत्यादि। अलङ्कारयोग्यतारहितावृत्ति इत्यर्थकम्। शब्दत्वादिकमलंकारयोग्यतारहिते साधारणेऽपि वाक्ये वर्तत इति तद्व्यावृत्तिः। स्फुटालंकारेऽस्फुटालङ्कारे च काव्यत्वमिष्यते। न त्वलंकारयोग्यतारहिते इति मतमिदम्। अलङ्कारगतं स्फुटत्वं च चमत्कृत्याधानं तद्विपरीतञ्चास्फुटत्वम्। अलंकारयोग्यतारहितावृत्तिजातिमत्वमित्यस्यैव लक्षणत्वे अस्फुटालङ्कारे नीरसे वर्तमानं कमप्यखण्डधर्ममादायातिव्याप्तिरतो विशेषणांशः। तादृशे काव्यत्वानङ्गीकारात्। रसस्यालङ्कारस्य वा चमत्कारिणोऽभावे काव्यत्वविरहस्य प्रदीप-

वच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितम् । यत्तु प्राञ्चः 'अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम्' इत्याहुः, तत्र विचार्यते—शब्दार्थयुगलं न काव्यशब्दवाच्यम् । मानाभावात् । काव्यमुच्चैः

सम्मतत्वात् । सदोषेषु कुत्रचित् कथं काव्यत्वमिति तु न नूतनः प्रश्नस्तट्टीकावो यथासमाहितमवधेयम् । केवलं कारिकोपात्तानां समेषां पदानां सन्निवेशपुरस्सरं काव्यसामान्यलक्षणविधानेऽभिनिविष्टं मया । तस्य नूतनत्वात् । अथवा सदोषे निर्गुणे निरलङ्कारे काव्यत्वं नाङ्गीक्रियते । सगुणे गुणोपलक्षितरसवति निरलङ्कारेऽपि विशिष्टस्य विशिष्टभिन्नत्वात्काव्यत्वमङ्गीक्रियते । तथा निर्गुणेऽपि सालङ्कारे । अदोषत्वेन काव्यशरीरप्रवेशी सदोषकाव्येऽपि यादृशदोषस्याभावेन काव्यत्वं तादृशदोषभिन्नदोषाणामकाव्यशरीरे प्रवेशः । इत्थमलक्ष्यप्रदर्शनद्वारा लक्ष्यव्यवस्थापनपरतया ग्रन्थव्याख्याने यथा मुक्तावल्याम् यां कांचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिः प्रत्यक्षावृत्तिर्या जातिस्तादृशजातिमत्त्वमनुमितित्वं परिष्कृतं तथा यां काञ्चित् काव्यव्यक्तिमादाय तद्व्यक्तिवृत्तिः सदोषनिर्गुणनिरलङ्कारशब्दार्थावृत्तिर्या जातिरखण्डो वा धर्मस्तद्वत्त्वं काव्यत्वमिति लक्षणीयम् ।

शब्दस्य काव्यत्वमभिप्रयन्तोऽपि काव्यशरीरेऽर्थं विशेषणतया निवेशयन्त्येवेति प्रागुपदर्शितदिशा शब्दस्य काव्यत्वमतेनापि यस्येति शेषं कृत्वा लक्षणमिदं योजनीयम् । यस्य वाक्यस्यैवंभूतौ शब्दार्थौ प्रतिपाद्यौ तत्काव्यमिति रीत्या व्याख्येयम् । शब्दस्याश्रयतया पूर्वंप्रयोग इति व्याचक्षाणष्टीकाकृतोऽपि न समानभावेन शब्दार्थयोः काव्यत्वमभिप्रयन्ति इति प्रतिभाति । गुणप्रधानभावेन शब्दार्थयुगलस्य काव्यत्वं न कश्चिदपि विरुणद्धि । इत्यलं ग्रन्थान्तरव्याख्यानाभिनिवेशेन ।

॥ अथ मूलव्याख्या ॥

प्राञ्चः ● काव्यप्रकाशकृतः । प्रकाशग्रन्थं पूर्वोक्तं लक्षणपरं मन्वानस्तमर्थतः पठति अदोषौ ● यद्यपि अनलंकृती पुनः क्वापीत्यनेन ग्रन्थेन न सर्वत्र सालङ्कारत्वमायाति तथापि अदोषौ सगुणौ विशेषणे अपि न काव्यत्वावच्छेदेनेति असंगतमेव भावयन्नुपेक्षादृष्ट्या सालङ्काराविित्याह । प्रधानं विवादविषयं प्रथमं स्पृशति शब्दार्थयुगलम् ● वाच्यमित्यनेन क्वचिल्लक्षणया भवतु नामेति सूचितम् । मानम् शक्तिग्राहकशिरोमणिव्यवहारः । विपरीतं व्यवहारमाह—काव्यमुच्चैः ● श्रुतमर्थो, नेत्यादिना शब्दमात्रेऽपि व्यवहारो दर्शितः । शक्तिसाधकव्यवहारान्वेषणं दूरमास्तां

पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः, इत्यादि-विश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्व-प्रतिपत्तेश्च। व्यवहारः शब्दमात्रे लक्षणयोपपादनीय इति चेत्, स्यादप्येवम्, यदि काव्यपदार्थतया पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात्। तदेव तु न पश्यामः। विमतवाक्यं त्वश्रद्धेयमेव। इत्थं चासति काव्यशब्दस्य शब्दार्थयुगलशक्तिग्राहके प्रमाणे प्रागुक्ताद् व्यवहारत शब्दविशेषे सिद्ध्यन्तीं शक्तिं को नाम निवारयितुमीष्टे। एतेन विनिगमनाभावादुभयत्र शक्तिरिति प्रत्युक्तम्। तदेवं शब्दविशेष-स्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम्, न तु

तद्बाधकव्यवहारस्यैव भूयस्त्वमिति प्रत्युत शब्देनोक्तम्, शब्दविशेषो रमणीयार्थ-प्रतिपादकः। यत्तु काव्यं ज्ञातं काव्यं बुद्धमित्यादिव्यवहाराः काव्यस्यार्थरूपत्व एव संभवेयुरिति वदन्ति तन्न सम्यगवच्छामः, कीदृशा नाम ज्ञातत्वबुद्धत्वादि पदार्था ये शब्दं न विषयीकुर्वन्ति? तथा च ज्ञानबोधशब्दा ज्ञानसामान्यार्थाः शब्दमपि लक्षणां विनैव विषयीकुर्वन्तीति ध्येयम्। यदपि शब्दस्य काव्यतानये शब्द-नित्यतावादे च काव्यं कुरु इति व्यवहारोच्छेदः, अर्थस्य काव्यत्वे च करणसंभवा-द्दुपपद्यत इत्युक्तिस्तदतिरभसात्, शब्दनित्यतावादे शब्दं कुरु इत्यस्य शब्द-मुच्चारयेति यथार्थस्तथा काव्यं कुरु इति शब्दस्यापि संभवात्। कथमन्यथा शब्दार्थयुगलनये शब्दस्यापि काव्यपदार्थतया तदनुपपत्तिं न पश्यन्ति? तथा च शब्दस्य काव्यत्वे न कश्चित् बाधको व्यवहारः। अप्येवम् व्यवहारस्य लक्षणयोप-पादनीयत्वम्, मुख्यार्थस्य निश्चये तद्बाधवशाल्लक्षणोदियात्। मुख्यार्थता च शब्दार्थयुगले शक्तिग्राहके प्रमाणे सति, तदेव प्रमाणमेव। ननु माभूद् व्यवहारः शक्तिग्राहकः, इदं वाक्यमेव शक्तिग्राहकमस्तु इत्यत्र आह— विमत आप्तवाक्यमेव शक्तिग्राहकत्वेन परिगणितं न तु यथा-कथञ्चित्, अतिप्रसंगात्। अस्य च व्यवहारविरोधेन विमतत्वात्। चासति प्रमाणेऽसति, शब्दार्थयुगले शक्तेः प्रामाणिकत्वे लक्षणाप्रसरः शब्दविशेषे शक्तिं निवारयेत्। शक्तेरसिद्धौ तु कुतो लक्षणाप्रसर इत्याह को नामेत्यादि न कश्चिदपीत्यर्थः। एतेन व्यवहारस्य विनिगमकस्य प्रदर्शनेन, तस्यैव शब्दविशेषस्यैव व्यवहारसिद्धस्यैव काव्यपदार्थस्य लक्षणं युक्तमित्याह न तु स्व।

स्वकल्पितस्य काव्यपदार्थस्य । एषैव च वेदपुराणादिलक्षणेष्वपि गतिः । अन्यथा तत्रापीयं दुरवस्था स्यात् । यत्त्वास्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकं तच्च शब्दे चार्थे चाविशिष्टमित्याहुः, तन्न । रागस्यापि रसव्यञ्जकताया ध्वनिकारादिसकलालङ्कारिकसंमतत्वेन प्रकृते लक्षणीयत्वापत्तेः । किं बहुना नाट्याङ्गानां सर्वेषामपि प्रायशस्तथात्वेन तत्त्वापत्तिर्दुर्वारैव । एतेन रसोद्बोधसमर्थस्यैवात्र लक्ष्यत्वमित्यपि परास्तम् । अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्, प्रत्येकपर्याप्तं वा ।

एषैव ● अर्थविशेषप्रतिपादकत्वमेव, स्वेतरप्रमाणानधिगताबाधितार्थपरः शब्दो वेदः, सर्गादिपञ्चलक्षणार्थप्रतिपादकः शब्दः पुराणम् 'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।' भूम्यादेश्च संस्थानं [illegible] : व्यास-प्रणीतस्यैव पुराणत्वे व्यास शब्द-इति योजनीयम् । आदिना इतिहासादिः । अन्यथा ● शब्दार्थोभयपरत्वे, मुख्यव्यवहारस्य विलोपो व्यवहारे वेदादिशब्दानां सर्वत्र लाक्षणिकत्वं दुरवस्था । यत्त्वास्वा ● आस्वादोद्बोधकत्वं रसव्यञ्जकत्वम् । रसव्यञ्जकः काव्यपदवान्, यथा "आद्गुणः" इति सूत्रेण न गुणशब्दो विधीयतेऽपितु गुणपदवानकारादिः, काव्यत्वं ● काव्यपदम्, यथा णत्वं णकार इति व्याकरणप्रक्रियायाम्, रसव्यञ्जकत्वं काव्यपदप्रयोजकमित्यर्थः । आस्वादोद्बोधकत्वञ्चाविशिष्टं समानभावेन, लक्षणीयत्वापत्तेः ● शब्दार्थवत्समानतया लक्षणवाक्येन संग्राह्यत्वापत्तेः । न च रागोऽपि अर्थत्वेन गृहीत एवेति वाच्यं शब्दार्थभूतस्यैवार्थस्य तत्र ग्रहणात्. तद्भिन्नस्य श्रोतुरन्तरङ्गसङ्गस्य काव्यार्थभिन्नस्यैव रागस्यातिव्यापनीयत्वात् । तथात्वेन रसव्यञ्जकत्वेन तथात्वं लक्षणीयत्वम् । एतेन ● रसास्वादोद्बोधकत्वस्य रागादिसाधारण्यवर्णनेन, समर्थस्य योग्यस्यातो न पुनरुक्तिः । काव्यपदप्र ● काव्यत्वम् व्यासक्तम् द्वित्वादिवद् व्यासज्यवृत्ति, यथा द्वित्वं प्रत्येकं न वर्तते अत एवायं द्वौ इति न प्रतीयते, द्वयोस्तु वर्तते अत एवेमौ द्वाविति प्रतीयते, तथैव काव्यत्वं यदि व्यासज्यवृत्ति प्रत्येकं शब्देऽर्थे वावर्तमानं शब्दार्थयोरुभयोरेव वर्तते, एकत्वानवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगि व्यासज्यवृत्ति । प्रत्येक ● घटत्वं यथा प्रत्येकं घटे वर्तमान

नाद्यः । एको न द्वावितिव्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तेः । न द्वितीयः । एकस्मिन्पद्ये काव्यद्वयव्यवहारापत्तेः । तस्माद्वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता । लक्षणे गुणालङ्कारादिनिवेशोऽपि न युक्तः । 'उदितं मण्डलं विधोः' इति काव्ये दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरणविधिनिषेधजीवनाभावादिपरे 'गतोऽस्तमर्कः' इत्यादौ चाव्याप्त्यापत्तेः । न चेदमकाव्यमिति

द्वयोर्बहुषु च वर्तते, अत एव अयं घट इमौ घटौ इमे घटा इत्यादयः प्रत्ययाः, तथा काव्यत्वं प्रत्येकं शब्दे अर्थे च वर्तमानं शब्दार्थयोरपि वर्तते । तेन शब्दः काव्यमर्थः काव्यं शब्दार्थौ काव्यमित्यादयः प्रत्ययाः प्रत्येक पर्याप्तत्वं नाम एकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वं, पर्याप्तिः सम्बन्धान्तरमिति केचिद् अनुयोगिताविशेषविशिष्टः समवायादिरेवेत्यपरे । नाद्यः व्यासक्तत्वं न, वाक्यं शब्दः, न वर्तते च शब्दमात्रेऽतस्तद्व्यवहारापत्तिः । श्लोकवाक्यगतैकत्वावच्छिन्नानुयोगिताकपर्याप्तिसंबन्धेन काव्यत्वं काव्ये नास्त्यतस्तत्संबन्धावच्छिन्नावच्छेदकताक प्रतियोगिताककाव्यभेदस्य सत्त्वाद् व्यवहारस्य प्रामाणिकत्वापत्तिः । काव्यद्वय शब्दमात्रवृत्ति काव्यत्वमेकम् अर्थमात्रवृत्ति च द्वितीयम् । प्रत्येकपर्याप्तत्वाच्छब्दार्थौ काव्यमिति न स्यादुभयत्रैकस्य काव्यत्वस्यासत्त्वात्, यथा प्रत्येकं पर्याप्तं घटत्वं न भवत्युभयोः पर्याप्तम् अत एवेमौ घट इतिन्न प्रत्ययः तदधीते तद्वेदेतिभाष्यमपि अर्थविशिष्टशब्दरूपं वेदं ख्यापयति न शब्दार्थयुगलं नवार्थविशेष्यकमिति ध्येयम् । वेदशास्त्र मन्त्रब्राह्मणात्मकः शब्दराशिरिति आपस्तम्बसूत्राधारेण वेदलक्षणं निर्णीतं सायणाचार्येण ऋग्वेदभाष्यानुक्रमणिकायाम्, तत्रैव च अपौरुषेयं वाक्यं वेद इत्यपि, तदेव च स्पष्टमनुक्तावपि मीमांसाभाष्यस्य सम्मतम् । अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीत-वाक्यत्वं वेदत्वमिति न्यायकुसुमाञ्जलौ पञ्चमस्तबके उदयनाचार्याः । तत्रैव च शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दाजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वमिति वर्धमानोपाध्यायाः । समयबलेनाबाधितपरोक्षानुभवसाधनम् आगमः स्मृतिरिति सायणभगवान् । पुराणलक्षणन्तूक्तमेव । तथा च शब्दपरत्वं एषां संप्रदाय इति सिद्धम् । न युक्तः गुणालंकारादिविरहिणि उदितमित्यादौ गतोऽस्तमित्यादौ चाव्याप्त्यापत्तेः, समुदीरिते परे द्वयं मध्यमणिन्यायेन काव्ये, इत्यादौ उभयत्रान्वेति दूत्या

शक्यं वदितुम्। काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात्। काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव। गुणत्वालंकारत्वादेरननुगमाच्च। दुष्टं काव्यमिति व्यवहारस्य बाधकं विना लाक्षणिकत्वा-योगाच्च। न च संयोगाभाववान्वृक्षः संयोगीतिवदंशभेदेन दोषरहितं दुष्टमिति व्यवहारे बाधकं नास्तीति वाच्यम्। 'मूले महीरुहो विहंगमसंयोगी न शाखायाम्' इति प्रतीतेरिवेदं पद्यम्

अभिसरणविधौ, अभिसारिकाया अभिसरणनिषेधे इति यथासंख्यमन्वयः, पूर्वादिशब्देन सखी उत्तरादिना च पतिप्राप्त्यादिः परिगृह्यते, वदितुं युक्तिमन्तरेणेति शेषः, पराभिमतस्य प्रकाशकृदभिमतस्य, चाविशिष्टमेव पराभिमते उदितमित्यादौ च न भेदकम्। किञ्च चमत्कारित्वेन काव्यत्वव्यवस्थापने तद्घटितस्यैव लक्षणत्वं युक्तं न तत्प्रयोजकगुणादिघटितस्येत्यतोऽप्याह-गुणत्वा सकलगुणवृत्तिगुणत्वस्यैकस्य निखिलालंकारवृत्त्येकस्यालंकारत्वस्याभावात् केन रूपेण लक्षणे प्रवेशः, समेषां प्रवेशे क्वचिदपि काव्ये तेषामसत्त्वादसंभवः, एकैकस्य प्रवेशे गुणालंकारान्तरयुक्तेऽव्याप्त्यापत्तेः, न च काव्यधर्मत्वं काव्यशोभाधायकत्वं वा अलंकारत्वम्, रसधर्मत्वं काव्यधर्मत्वं वा गुणत्वमिति मर्मप्रकाशोक्तोऽनुगमः स्थाने रीतिसंख्याशब्दत्वरसत्व-काव्यत्वादावतिप्रसक्तत्वेन तस्यापातरमणीयत्वात्। आदिनाऽदोषत्वस्य परिग्रहादाह-दुष्टं काव्यम् अयं व्यवहारः काव्ये दोषविधायकः, काव्यं चेददोषं तदा दोषाभाववति काव्ये दोषस्य विधानानुपपत्तेः काव्यमुख्यार्थस्य दोषाभावघटितस्य बाधात्, काव्यपदस्य काव्याभासवाक्यादौ त्वया लक्षणाङ्गीक्रियते, परं यदि रमणीयार्थप्रतिपादकः शब्दः काव्यं तदा तत्पदार्थस्य दोषाभावाघटिततया दोषविधानोपपत्तौ मुधैव त्वया अदुष्टपदं निवेश्य लक्षणक्लेशोऽनुस्रियते, मन्मते च बाधो नावतरतीति भावः। ननु दोषो दोषाभावश्चाव्याप्यवृत्ती अधिकरणं व्याप्य न वर्तेते न काव्यस्य कृत्स्नानंशान् व्याप्नुत इति यावत्, तथा च काव्यस्य कस्मिंश्चिदंशे दोषोऽन्यस्मिंश्च दोषाभाव इति काव्ये दोषस्य दोषाभावस्य च बाधाभावेन न लक्षणापत्तिर्मन्मतेऽपि इति सदृष्टान्तमुपपाद्य खण्डयति न च संयोग मूलावच्छेदेन संयोगः शाखावच्छेदेन संयोगाभावः। तत्र विश्वजनीनानुभवः, काव्यविषये च तवैवोक्तिमात्रमिति न तेन दोषाभावस्याव्याप्य-वृत्तिता सिद्ध्यतीत्युत्तराभिप्रायः। किञ्च सदोषेऽपि दोषाभावो लक्षणस्य समन्वेतीति चेत् किं फलमस्य निवेशस्य? न च निराकाङ्क्षत्वानात्म्यादिदोषाणामे-वाभावस्य काव्यशरीरे प्रवेश इति मर्मप्रकाशरीत्या शङ्कनीयं तथापि तादृशदोषस्यैव विधानस्थले लक्षणानुसरणापत्तेः, किञ्च तादृशदोषाणां बाध्यत्वनिवेशेनैव वारणसंभवे

पूर्वार्धे काव्यमुत्तरार्धे तु न काव्यमिति स्वरसवाहिनो विश्वजनीनानुभवस्य विरहादव्याप्यवृत्तिताया अपि तस्यायोगात्। शौर्यादिवदात्मधर्माणां गुणानाम्, हारादिवदुपस्कारकाणामलं-

---

दोषाभावत्वेन निवेशस्य क्लेशमात्रफलत्वापत्तेः। नापि प्रकाशटीकाकाररीत्या दोषत्वमुद्देश्यप्रतीतिप्रतिबन्धकत्वम्, उद्दिश्यते च चमत्कारस्तथा च चमत्कारिप्रतीतिविरहविशिष्टदोषाणामभावस्य लक्षणघटकतया चमत्कारिप्रतीतिसाधके काव्ये सदोषेऽपि विशेषणाभावप्रयुक्तविशिष्टाभावेन तादृशदोषाभावः समन्वेतीति वक्तव्यम् तथा सति चमत्कारिप्रतीतिसाधकत्वस्यैव काव्यलक्षणत्वापत्तौ मूलशैथिल्यापत्तेः। ननु मूलं तदेवोपलक्षयतीति चेत्सहृदयोऽसि शनकैर्मम शिष्यतामनुसर को विरोत्स्यति? लक्षणस्थपदार्थानां विशेष्यविशेषणभावोप्यनुपपन्न इत्याह-शौर्यादि आत्मधर्माणां न भवति शरीरेण संबन्धः, काव्यप्रकाशमतेनैवेदम् रसरूपकाव्यात्मगुणत्वात्, सिद्धान्तिमते तु शब्दार्थवृत्तित्वमिति वक्ष्यति गुणनिरूपणे। वस्तुतस्तु अव्यावर्तकत्वात् तेषां निवेशोऽनुपयोग इति भावः। एतद्विषयकममंप्रकाशस्य सर्वेऽशास्त्तत्तत्संदर्भे खण्डिता इति न पुनरुद्ध्रियत इदम्। 'अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः "तदधीते" इत्यादिसूत्रस्थो भगवान् पतञ्जलिः संगच्छते' तावत्परीक्ष्यत इदं हि तत्र महाभाष्यम—किमर्थमिमावुभावप्यर्थौ निर्दिश्येते, न योऽधीते वेत्त्यप्यसौ, यश्च वेत्त्यधीतेऽप्यसौ, नैतयोरावश्यकः सन्निवेशः, भवति हि कश्चित् संपाठं पठति न वेत्ति, तथा कश्चिद्वेत्ति न संपाठं पठति, इति। अत्र कैयटः—तद् इति—यो हि यं ग्रन्थमधीते तं स्वरूपतोऽवश्यं वेत्ति, यश्च स्वरूपतो वेत्ति सोऽवश्यमधीते इति भावः। नैतयोरिति—अर्थावबोधं वेदनमभिप्रेतं नतु स्वरूपमात्रवेदनम्, तत्र परस्परव्यभिचारदर्शनादुभयोरुपादानमित्यर्थः, संपाठमिति अर्थनिरपेक्षं स्वाध्यायं पठतीत्यर्थः, इति। अनेन भाष्येण वेदत्वं शब्दार्थोभयवृत्ति, अर्थवच्छब्दवृत्ति वेति सूच्यते। चिन्तनीयम्। कैयटग्रन्थेन पूर्वोत्तरपक्षयोरुभयोरपि वेदस्वरूपे नार्थस्य प्रवेश इति स्फुटमायाति। अर्थज्ञानं विनापि वेदस्वरूपवेदनस्य तेनाङ्गीकारात्, तच्च वेदस्य शब्दार्थोभयरूपत्वं स्फुटं विरुणद्धि, अर्थवेदनम् विना वेदार्थस्वरूपस्यावेदनात्। भाष्यविरोधोऽपि दृश्यताम् अर्थनिरपेक्षं शब्दमात्रपठनं वेदपठनम्, शब्दनिरपेक्षमर्थवेदनं वेदवेदनमिति मनुते भगवान्, वेदस्योभयस्वरूपत्वे न वेदपाठो न च वेदवदनमिति मर्मप्रकाशस्य कीदृशी भाष्यभक्तिः। वेदपाठादिशब्दो लक्षणयोपपाद्यत इति चेद् व्यवहारे कुत्र वेदशब्दस्तव मते मुख्यार्थ इत्यन्विष्यताम्, न कुत्रापि चेद्धन्येयं लक्षणासक्तिः। तस्मान्न कुत्रापि केनचिद् वेदत्वं शब्दार्थोभयव्यासक्तमभिप्रेतं मर्मप्रकाशतत्सहचरैर्विना। किंतु न शब्दमात्रं शब्दविशेषः, नापि तावानेव किं तु

काराणां च शरीरघटकत्वानुपपत्तेश्च । यत्तु 'रसवदेव काव्यम्' इति साहित्यदर्पणे निर्णीतम्, तन्न । वस्त्वलंकारप्रधानानां काव्यानामकाव्यत्वापत्तेः । न चेष्टापत्तिः । महाकविसंप्रदायस्याकुलीभावप्रसङ्गात् । तथा च जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि कविभिर्वर्णितानि । कपिवालादिविलसितानि च । न च तत्रापि यथाकथंचित्परम्परया रसस्पर्शोऽस्त्येवेति वाच्यम् । ईदृशरसस्पर्शस्य 'गौश्चलति', 'मृगो धावति' इत्यादावतिप्रसक्तत्वेनाप्रोजकत्वात् । अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वादिति दिक् ।

अर्थविशेषविशिष्टः शब्दो वेद इति समेषामभिमतम् । शब्दमात्रस्य न वेदत्वमपितु अर्थविशेषविशिष्टस्येति विषये इदं प्रमाणमन्यानि च भाष्याणि । "तेन प्रोक्तमि" ति सूत्रस्थं भाष्यमपि वेदत्वस्य शब्दार्थोभयवृत्तित्वे प्रमाणमिति मन्वते नागोजिभट्टमहोदयाः परं विवेचने अर्थविशेषस्य वेदस्वरूपे प्रवेश इत्येवायाति न तु समानभावेन शब्दार्थोभयोरिति सचार्थविशिष्टशब्दस्य वेदत्वेऽपि संगच्छते । षडंगो वेदोऽध्येयो ज्ञेयश्चेत्यादिश्रुतिरपि अर्थविशिष्टशब्दस्य वेदत्व एव संगच्छते । अध्ययनेन विशेष्यस्य शब्दस्य ग्रहणेऽपि अर्थज्ञानाय ज्ञेयपदोपादानात् । उभयस्वरूपत्वे तु अन्यतरेण वेदाध्ययनेन वेदज्ञानेन वा गतार्थत्वे उभयोरुपादानस्य व्यर्थत्वाद्शब्दांशस्यैवाध्ययनमिति रीत्या व्याख्याने तु न वेदस्याध्ययनं नापि ज्ञानमित्यापद्यत इति नेह वितन्यते ।

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥
वाग्रूपतां वदन् हरिरपि शब्दरूपतां वदति ।

॥ अथ साहित्यदर्पणलक्षणदूषणम् ॥

वाक्यं रसात्मकं काव्यमिति सूत्रम् । रस एवात्मा जीवनाधायको यस्य, तेन विना तस्य काव्यत्वानङ्गीकारात्, रस्यते इति रस इति व्युत्पत्तियोगाद्भावतदाभासादयोऽपि गृह्यन्त, इति तद्विवरणम् । सूत्रविवरणाभ्यां फलितमनुवदति रसवदेव । प्रधाना● द्वन्द्वान्तस्य प्रधानपदस्य प्रत्येकमन्वयेन वस्तुप्रधानानाम् अलंकारप्रधानानाञ्चेत्यर्थः आकुलीभावो विरुद्धत्वम्, संप्रदायमाह—तथा च ● कपिविलसितानि बालविलसितानि च वर्णितानि, ● यथाकथाञ्चदित्यस्य व्याख्यानं परम्परयेति क्वचिद्धास्यादिविभावत्वादिसंभवादितिभावः, ईदृशो रसःपारम्परिकः, अतिप्रसक्तिप्रकारमाह—अर्थमात्रस्य ● अर्थत्वव्यापकमन्यतमत्वमिति भावः । यत्तु न

सर्वे पदार्था रत्यादिसंस्कारोद्बोधकाः विशिष्टवाक्यार्थानां रसे तात्पर्याभावे संस्कारोद्बोधकताया असंभवात्, यत्र त्वस्ति तात्पर्यं तत्रान्यतरस्याक्षेपो भवत्येव, एवं च जलप्रवाहादिवर्णनेऽपि महावाक्यार्थघीद्वारा रसवत्त्वात्काव्यत्वमक्षतमित्य-भिप्रयन्ति श्री म० म० गंगाधरशास्त्रिणष्टिप्पणे। तत्रेदं चिन्त्यते—रत्यादि-संस्कारोद्बोधकत्वे तात्पर्यमेव तन्त्रमुतशब्दार्थसंनिवेशस्यापि किंचिद्वैचित्र्यमपेक्षते ? आद्ये रत्याद्युद्बोधतात्पर्येणापि गौश्चलति मृगो धावतीत्यादिवाक्यानां सन्निवेशे भवति चेदुद्बोधस्तदा काव्यत्वमेषामापतत्येव, न भवति चेत् तात्पर्यमात्रस्यो-द्बोधकत्वं पराहतम्। महावाक्यार्थे प्रवेशो नास्ति तत एव नैतैः संस्कारोद्बोध इति चेद् आद्यन्तसमीचीनरचनाचमत्कृतिमति काव्ये मध्ये एतादृशवाक्यानां सन्निवेशे किमेषां काव्यत्वमिष्यते ? नो चेत्त्यज्यतां तात्पर्यमात्रस्य प्रबन्धान्तर्गं-तत्वमात्रस्य वा संस्कारोद्बोधकत्वदुराग्रहोऽङ्गीक्रियताञ्च शब्दार्थोभयोरपि किञ्चिच्चारुत्वं संस्कारोद्बोधकत्वेनापि। तथा च प्रबन्धानन्तर्गतस्यापि पद्यस्य स्वतोऽपि चमत्काराधानं प्रबन्धसम्बन्धेन तु रससम्पर्के चमत्कारपर्यवसानम्। अन्यथा महाकाव्येषु मध्यस्थितपद्यानां नूतनार्थविहीनानामपि संनिवेश आपतेत्। यत्र तु न तादृशरसस्पर्शस्तत्र स्वतश्चारुत्वं द्योतत एव। यदपि कुत्रचिदन्यतरस्या-क्षेपेण चमत्कारपर्यवसानं भवतीति सत्यं परं कुत्रचिदन्यतरस्यानुपादानं दोषो मन्यते, तत्र कारणं मृग्यम् न तत्र कुत्रचित् कल्पितं तात्पर्यमेव निर्णायकमपि तु उपात्तशब्दार्थसन्निवेशस्य किञ्चिदलौकिकं साम्राज्यं येनानुपात्तमपि सहृदयहृदये बलादुपतिष्ठत एव नानाक्षेप्तुं सहृदयता तत्र प्रभवति। यत्र तु उपात्तस्य न तादृक् साम्राज्यं तत्रान्यतरानुपादानं दोष एव। तथा च जलप्रवाहादिवर्णनस्यापि सुकविकृतस्य स्वतश्चमत्कारित्वं नापह्नवयोग्यमिति दिक्।

—❀—

॥ अथ काव्यकारणविचारः ॥

प्रतिभायाः प्रायोऽखिलैरालङ्कारिकैर्विभिन्नशब्दैर्व्यवहरद्भिः काव्यकारणत्व-मङ्गीक्रियत एव। तत्र प्रतिभापदप्रयोगविषयान् कियतः समासेन वर्णयामि। तत्र काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभेति पण्डितराजो जगन्नाथः। प्रायः पदार्थानाम् स्फुटतया प्रतिपादनेऽद्यावधि अवतीर्णान् सर्वानपि आलंकारिकान-तिशेतेऽयं पण्डितराजः। साहित्यशास्त्रे च साहित्यमात्रे समुपयोगिनः पदार्थाः कतिपये परिभाषिताः बहुवश्चान्यत्र शास्त्रे व्यवहृता एव यथायथमुपयोजिताः। प्रतिभादिज्ञानार्थकपदानां स्थूलदृष्ट्या सर्वत्र समानेऽपि प्रयोगे सूक्ष्मदृष्ट्या

विवेचनेऽस्ति पदार्थभेदो दर्शनभेदेन । तत्र साहित्यशास्त्रशिरोमणय एकत्र कयापि दर्शनवासनयाऽन्यत्र चान्यथा प्रयुञ्जते पदानि । दर्शनेष्वपि विशकलितविवेचनशीलस्य नव्यन्यायस्य कतिपयाः शब्दा निःसंदेहार्थतया अधिकं प्रयुज्यमाना दृश्यन्ते नवीने शास्त्रे । एवञ्च नव्यनैयायिकानां सरणिमनुसृत्य स्मृतिमात्रे प्रसिद्धोऽप्युपस्थितिशब्दो नात्र तथा अपि तु, ज्ञानमात्रे मानसप्रत्यक्षे वा । स्मृतानां नूतनत्वासंभवात् । नूतनानामेव काव्यघटनानुकूलत्वात् ।

द्वितीयः प्रतिभापदप्रयोगविषयश्च 'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' इति प्रसिद्धः । क्वचिच्च प्रज्ञापदस्थाने बुद्धिरित्यपि पाठः । सांख्यदर्शने बुद्धिर्नामान्तःकरणतत्त्वम् । तस्यैव विषयाकारपरिणामो ज्ञानं धर्मः । शीघ्रतया नवनवविषयाकारपरिणतिर्नवनवोन्मेषशब्देन अभिहिता । नेयं काव्यघटनानुकूलैव अपि तु नीत्यादिसर्वविद्यानामनुकूला । एनामेवादाय बुद्धिबलमित्यादि व्यवह्रियते । तथा च बुद्धिबलमादाय मनुष्यः शक्तिशाली समर्थः । इत्यादि व्यवहारेषु प्रतिभाशक्तिसामर्थ्यादिपदैः व्यवह्रियते एवेति प्रतिभायाः शक्तिपदेन व्यवहार आचार्याणां न नूतनः ।

यद्यपि सांख्याभिमता बुद्धिः सर्वान् पुरुषानुपदधाति न च समेषां सा प्रतिभा अपि तु केषाञ्चिदेव । किञ्च प्रतिपुरुषमपि अनादिकालादामुक्ति उपदधाति न च सर्वस्मिन् जन्मनि प्रतिभा, अपि तु क्वचिदेव कादाचित्की च, तथा च कथं सा बुद्धिः प्रतिभा भवितुमर्हतीति शङ्का जायते । तथापि तद्दर्शने पुण्याद्यदृष्टमनुभववशा वासना च बुद्धिधर्म एव । तद्विशिष्टा च सा क्वचित्कदाचिच्च प्रतिभा सम्पद्यत इत्यदोषः ।

तथा च प्रतिभापदप्रवृत्तिनिमित्तभूतो बुद्धेर्नवनवोन्मेषो न स्वाभाविकोऽपि तु अदृष्टवासनानिमित्तकः । तदा च निमित्तवशाद् अदृष्टे वासनायाञ्च आलङ्कारिकाणां लाक्षणिकः प्रतिभापदप्रयोगो नापूर्व इति ध्येयम् । तत्रापि तारतम्यजिज्ञासायान्तु काव्यमार्गे इत्थमवधेयम् सत्यमदृष्टवशात् प्राचीनवासनावशाच्च नवनवोन्मेषो बुद्धेः, परमस्ति तत्रापि उन्मेषे कश्चिद्विशेषः । वासनासंस्कार इत्यनर्थान्तरम् । संस्कारश्चानुभवजन्यो अनुभवसमानविषयकः, स्वानुभवसमानविषयिण्याः स्मृतेर्जनकः, न भवति गजानुभवजन्यसंस्कारेण तुरगस्य स्मरणम् । तथा च यः प्राग् जन्मनि सुकविः सोऽत्र जन्मनि नाधिकेन श्रमेण साधारणोद्बोधकवशादेव विभूयात्काव्यनिर्माणनिपुणताम् । किञ्च निपुणताप्यैहिकी गतजन्मीयां तामनुहरेदेव नातिशयीत । संस्कारवशात् स्मृतानां विषयाणां नवनवताऽपि प्रागनुभूततया न साधु संगच्छते । अदृष्टन्तु स्वकारणापेक्षविलक्षणसामर्थ्यवत् न

प्राक्तनं कवित्वमनुभवं वाऽपेक्षमाणं साधु नवनवोन्मेषकारि इति विभाति। तथा च समीक्षाचक्रवर्ती श्रीमान् नागेशमहोदयः प्रदीपोद्योते काव्यप्रकाशस्थ शक्तिपदस्य प्रदीपकृताम् 'संस्कारविशेषः' इति व्याख्यामुपेक्ष्य 'देवताराधनादिजन्यं विलक्षणाऽदृष्टं शक्नोति काव्यनिर्माणायानयेति योगाच्छक्तिरित्युच्यते' इति साधु व्याख्यातवान्। किञ्चादृष्टेऽपि संस्कारशब्दप्रयोगः संभवति यथाऽनुभवेन बुद्धिः संस्क्रियते तथा कर्मणाऽपि। साधुसंस्कारोऽस्यासीद्येनानायासमरणमलभतेत्यादावदृष्टपरतया प्रयुज्यतेऽपि। एवञ्च प्रदीपस्थं संस्कारपदमपि नादृष्टं दर्शयतीति न साधयितुं शक्यते।

पूर्वोक्ता प्रतिभापरिभाषा तु न सम्यङ्न्यायसरणिमनुसरति, अत एव कदाचन पण्डितराजपरित्यक्ता भवेत्। तथाहि नैयायिकानां ज्ञानापरपर्याया बुद्धिर्न तादृक्स्थिरा। येन क्रमशः स्वभावेन सहकारिसाचिव्येन वा नवनवान् विषयान् अवगाहेत्। क्षणत्रयेण भङ्गुरा सा घटविषयिणी जाता न क्षणेन घटं परित्यज्य जातु पटविषयतां धत्ते। नापि तस्याः कश्चिदुन्मेषः संभवति व्यापारः, शब्दबुद्धिकर्मणां विरम्य व्यापारानङ्गीकारात्। धारावाहिकतया जायमाना नवनवविषयावगाहिनी बुद्धिः प्रतिभेति यथाकथमपि संगम्यतां नाम। यश्च सांख्यरीत्या व्याख्याने नवनवोन्मेषपदार्थः स एव प्रतिभापदार्थतयाऽभिमतः पण्डितराजानामिति तु निष्कर्षः प्रतिभातीति विवेचनीयं सुधीभिः।

॥ विलक्षणव्युत्पत्तिः ॥

लोकशास्त्रादिविमर्शाद् व्युत्पत्तिरिति काव्यप्रकाशादावुपलभ्यते। एषैव च व्युत्पत्तिनिपुणतापदेनाभिहिता कारिकायाम्। तत्र का नाम व्युत्पत्तिनिपुणता वा इति विचारे लोकशास्त्रादीनामनुभवश्चेत्क्षणद्वयस्थायी संस्कारमुत्पाद्य विनश्यतीति समयान्तरेऽव्युत्पन्नतया काव्यनिर्माणं न स्यात्। न चैतावदेव किन्तु कतिपय आलङ्कारिका जन्मान्तरीयामपि व्युत्पत्तिं जन्मान्तरे उपयोजयन्ति। तथा च केनचित्स्थिरेण व्युत्पत्तिपदार्थेन भाव्यम्। तत्र लोकशास्त्राद्यनुभवजन्यः संस्कारो वासनापरपर्यायो व्युत्पत्तिरित्यायाति। केचन च लोकशास्त्रादीनामनुभवपर्यवसायिश्रवणमेव कारणमित्यपि वदन्ति। तत्र श्रवणस्य संस्काररूपव्यापारद्वारा कारणत्वं बोध्यम्। अनुभवजन्यः संस्कारः कारणम् अनुभवो वा संस्कारद्वारा कारणमित्यत्र न फले विशेषः।

॥ अभ्यासः ॥

काव्यप्रकाशरीत्या काव्यज्ञशिक्षया करणे योजने च साभिनिवेशं प्रवृत्तिरित्येवाभ्यासः समेषां प्रायोऽभिमतः। तत्रापि व्युत्पत्तिपदार्थनिर्वचनवत् करणयोजना-

अनुभवजन्यः संस्कार एव स्थिरतां भजमानः काव्यकारणतापात्रमवशिष्यते। अत्रापि करणयोजनादिविषयकानुभवस्य संस्कारद्वारा तादृशानुभवजन्यसंस्कारस्य वा कारणत्वे फलाविशेषो बोध्यः, व्युत्पत्त्यभ्यासयोर्द्वयोः संस्कारत्वेऽपि लोकशास्त्रादिविषयकः संस्कारो व्युत्पत्तिः, करणयोजनादिविषयकश्चाभ्यास इति भेदो बोध्यः।

अथ प्राचीनमतस्य व्याख्यानं संक्षेपेण। कतिपये आचार्या आलङ्कारिकभाषया विषयममुं निबद्धवन्त इति पदार्थस्फोरणाय परस्परं मतानां साम्यवैषम्ये विवरितुं संक्षेपेण व्याख्यामि। यद्यपीदं भाषानुवादभूमिकायां सालोचनं समुद्धृतं दर्शनीयञ्च तथापि स्ववासनया किञ्चिदाख्यातुं प्रयते। तत्र च परमप्राचीनो दण्डिमहाभागः।

'नैसर्गिकी च प्रतिभा, श्रुतञ्च बहुनिर्मलम्।
अमन्दश्चाभियोगोऽस्याः, कारणं काव्यसंपदः॥'
न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥'

इति वदति। पूर्वोक्तप्रतिभापदार्थविवेचनरीत्या विलक्षणादृष्टसहकृता अन्तःकरणबुद्धिः प्रतिभानान्तोक्ता। नैसर्गिकत्वञ्च तस्यादृष्टव्युत्पत्त्यभ्यासभिन्नत्वमेव। यथा शक्तिर्निपुणतेत्यादिकारिकाव्याख्याने 'प्राक्ख्यातिरंकण्येव तद्धेतौ शक्तिव्यपदेशात्।' इति प्रदीपः। यद्यपि जन्मान्तरादृष्टवशादिह किञ्चिदनायासेन समुद्भूतं नैसर्गिकमिति व्यपदिश्यते तद्रीत्या च जन्मान्तरीयादृष्टसचिवा बुद्धिरिति व्याख्यानं प्रतिभानान्तस्य संभवति तथापि ऐहिकदेवप्रसादादिवशाज्जायमानकाव्यसंपन्न संगृहीता स्यादिति न्यूनतावारणाय तादृशमेव नैसर्गिकत्वं वर्णितम्। तादृशवर्णने च जन्मान्तरीयानुभवजन्या कवित्ववासनाऽपि संगृह्येतेति तु गुणान्तरमेव।

श्रुतञ्च शास्त्रम्, प्रकाशोक्तलोकादीनामप्युपलक्षणम्, सम्यगनुभवश्च तस्य नैर्मल्यम्। तथा च पूर्ववर्णिता व्युत्पत्तिरेवोक्ता।

अमन्दः साभिनिवेशः करणयोजनादिविषयिणी प्रवृत्तिः। तेनापि करणयोजनाद्यभ्यास एवोक्तः। तस्य च पर्यवसानं पूर्वोक्तेऽभ्यासपदार्थे।

तत्र पूर्वपद्येन प्रतिभाव्युत्पत्त्यभ्यासानां समुच्चयस्यानुपहसनीयकाव्यं प्रति कारणतां प्रदर्श्य व्युत्पत्त्यभ्यासयोः समुच्चयस्य मध्यमाधमकाव्यस्य कारणतां प्रदर्शयति द्वितीयेन पद्येनेति इतरेषां व्याख्या। द्वितीया मदीया तु सामान्यतः

काव्यसम्पत्प्रयोजकत्वं त्रयाणां प्रतिपाद्य प्रतिभया सह व्युत्पत्त्यभ्यासयोः समुच्चयशङ्कां व्यावर्तयितुं द्वितीयं पद्यमाह ।

पूर्वां व्युत्पत्त्यभ्यासाजन्या वासनागुणस्तस्य सम्बद्धिनी अद्भुता प्रतिभा यद्यपि न विद्यते इति पूर्वमतेनार्थः ।

पूर्वा वासना जन्मान्तरीयादृष्टं जन्मान्तरीयकाव्यकरणसंस्कारो वा गुणोऽनुबन्धी अनुकूलो यस्यैवं भूतम् अदृष्टाद्यजन्यं प्रतिभानं यद्यपि न विद्यते तथापि श्रुतयत्नौ काव्यप्रतिमानरूपमनुग्रहं कुरुत एव । तथा च पण्डितराजमते पर्यवसानम् । काव्यं प्रति प्रतिभा कारणम्, कुत्रचिरसा नैसर्गिकी अन्यत्र च व्युत्पत्त्यभ्यासजनितेति पर्यवसानात् ।

प्रतिभादित्रयसमुच्चयस्य कारणतावादिमते तु प्रतिभानस्याभावेऽपि श्रुतयत्नाभ्यां काव्यं सम्पद्यत इत्युक्ते पर्यवसाने प्रतिभानविशेषणस्य वैयर्थ्यापत्तेः । मन्मते तु पूर्ववासनागुणानुबन्धिनः प्रतिभानस्याभावेऽपि अन्यादृशप्रतिभानसत्त्वसूचनाद्वारा तत्सार्थक्यम् । सांख्यसरण्या बुद्धिरूपप्रतिभायाः स्वातन्त्र्येण कारणत्वे केषाञ्चिद् वैमत्येऽपि काव्यघटनानुकूलशब्दार्थोपस्थितिरूपायाः प्रतिभायाः काव्यमात्रं प्रति कारणत्वे न कस्यचिद् विप्रतिपत्तिः । केवला अदृष्टवासनादिरूपा श्रुतयत्नसहिता वा प्रतिभा तादृशोपस्थितिं जनयतु तां विना कस्यापि काव्यस्यासंभवात् सर्वेषां तादृशोपस्थितेरपेक्षितत्वात् ।

किञ्च पूर्वव्याख्यायां किमपि काव्यं प्रति त्रयाणां किमपि च द्वयोः कारणत्वेऽपि काव्यमात्रं प्रति किमपि कारणस्वरूपं न वर्णितमिति ग्रन्थस्य न्यूनता काव्यवैलक्षण्यस्य प्रतिभावैलक्षण्येनैवोपपत्तेः ।

नैसर्गिकीं प्रतिभां विना काव्यमेव न जायते एतत्त्रितयसमुच्चयस्य कारणता वक्तव्येति चेत् श्रुतेन यत्नेन चेत्यादेर्वैयर्थ्यमनुसन्धत्स्व । अकाव्यं प्रति तयोः कारणत्वञ्चेत् ? किमनुग्रहेण ?

अकाव्यस्य ताभ्यां विनापि सिद्धत्वात् । इति समुच्चयस्य कारणतावादित्वं दण्डिनो व्याख्यातृबुद्धिविजृम्भितमेव नाक्षराणि तदायत्तानीति प्रतिभाति । कारणमिति एकवचनन्तु आवृत्त्या प्रत्येकमभिसम्बन्धाभिप्रायेण । काव्यप्रकाशे तु हेतुरित्येकवचनं समुच्चयविरोधिवाक्यशेषस्याभावाद् भवतु नाम समुच्चयस्य कारणत्वे तात्पर्यबोधनाय । अत्र तु वर्तते तद्विरोधि न विद्यत इति वादिपक्षान्तरम् । कमपि अनुग्रहमिति उपासितेति च कवेः प्रयोगोऽपि पुष्णाति तादृशमित्यलं ग्रन्थवृद्ध्या ।

अथरुद्रटमतम् ॥

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ।

सहजोत्पाद्या च द्विधा सा भवति ।
उत्पाद्या च कथंचिद् व्युत्पत्त्या जन्यते परया ॥

इति रुद्रटो ब्रूते । विस्फुरणं विभान्तीत्याभ्यां प्रतिभैव निर्दिष्टा । सा च पण्डितराजपरिष्कृतैव न तु कापिलपद्धतिप्रसिद्धा बुद्धिः । शक्तिश्च संस्काररूपा अदृष्टरूपा च । जन्मान्तरीयानुभवजन्यसंस्काररूपा अदृष्टरूपा च सहजा । ऐहिकोत्कृष्टव्युत्पत्तिजन्या चोत्पाद्या । यद्यपि सहजशब्दस्वारस्यं जन्मान्तरीयादृष्टस्य परिग्रह एव तथापि ऐहिकदेवतादिप्रसादजन्यस्य संग्रहाय सामान्यतोऽदृष्टरूपतया परिगणितम् । सहजत्वन्तु दण्डिमते नैसर्गिकत्ववद् ऐहिकव्युत्पत्त्यजन्यत्वमात्रम् । अथवा सहजा अदृष्टमात्ररूपा, उत्पाद्या तु ऐहिकव्युत्पत्तिजन्या । यत्रैहिकव्युत्पत्तिर्न दृश्यते तत्र जन्मान्तरीयमदृष्टमेव बालकवेः कल्प्यते । जन्मान्तरीयव्युत्पत्तिकल्पने मानाभावादिति यथा पण्डितराजोऽभिप्रैति । पूर्वमते संस्काररूपताऽपि सहजाया अङ्गीकारे तु संस्कारोपपत्तये क्वचिद्बालकवेर्गतभवीयकवित्वकल्पना क्रियेत ।

अत्राभ्यासस्य गणना न दृश्यते तथापि तन्न न्यूनतामावहति व्युत्पत्तिपदेन लोकशास्त्रादेः करणयोजनादेश्च व्युत्पत्तेः संग्रहस्यौचित्यात्, व्युत्पत्त्यभ्यासयोरुभयोरपि संस्कारे पर्यवसानस्योक्तत्वाच्च । एवञ्च प्रतिभा कारणं प्रतिभा च क्वचिददृष्टजन्या क्वचिच्चैहिकव्युत्पत्तिकृतसंस्कारजन्येति प्रायः पण्डितराजमत एव पर्यवस्यति ।

॥ अथ वामनमतम् ॥

कवित्वबीजं प्रतिभानम्, कवित्वस्य बीजं संस्कारविशेषः कश्चित्, यस्माद्विना काव्यं न निष्पद्यते निष्पन्नं वा हास्यायतनं स्यात्, इति वामनवचः ।

प्रतिभानं प्रतिभाजनकम्, बीजं संस्कारविशेष इत्यत्र॰ प्रतिभाद्वारेति शेषः । किञ्चिदपि कारणं शब्दार्थोपस्थितिमन्तरा न काव्यं घटयितुं प्रभवतीति प्रतिभाद्वारकत्वं सर्वेषामिष्टमेव । संस्कारपदेन अदृष्टं व्युत्पत्तिप्रभृतिजन्यः संस्कारश्च सर्वोऽपि गृह्यते । बालस्य कवित्वे देवताप्रसादादिजन्यमदृष्टं जन्मान्तरीयव्युत्पत्त्यभ्यासजन्यः संस्कारो वा कारणम् । नेदं मतमपि विरुणद्धि पण्डितराजप्रक्रियामिति ध्येयम् ।

हास्यायतनं काव्याभासरूपम् । तथा च काव्यं प्रति प्रतिभैव कारणम् । केचन अनुपहसनीयकाव्यं प्रति प्रतिभाकारणम्, उपहसनीयञ्च प्रति अन्यद्व्युत्पत्त्यादीति व्याचक्षते परमुपहसनीयत्वस्य निर्वचनासम्भवान्न तत्स्फुटम् । अन्यच्च तथा व्याख्यानस्य खण्डनं दण्डिमतव्याख्याने प्रदर्शितदिशाऽवसेयम् ।

॥ अथ मम्मटाचार्यमतम् ॥

तदनन्तरं मम्मटाचार्यस्यापि मतमित्थमायाति ।

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यासः इति हेतुस्तदुद्भवे ॥

अस्य बहुभिर्व्याख्यातृभिर्व्याख्यातत्वात्तदुपपादनं विस्तारापत्त्या किञ्चिदेव प्रदर्श्य समापयिष्यामि । शक्तिः संस्कारविशेष इति तद्वृत्तौ प्रतिपादितम् ।

तस्यादृष्टपरत्वेन व्याख्यानं नागेशमहोदयस्य प्रागेव प्रदर्शितम् । निपुणता पूर्वोपदर्शितव्युत्पत्तिपदार्थ एव । अभ्यासोऽपि करणयोजनयोः प्रतिपादित एव । यद्यपि क्वचिच्छक्तिः क्वचिच्च काव्ये निपुणताभ्यासौ कारणमिति विधाऽपि व्याख्याऽस्य दृश्यते परं शक्त्यादित्रयसमुदायस्यैव काव्यं प्रति कारणत्वे बहवो व्याख्यातारः । व्युत्पत्तिवादादौ अत्र च ग्रन्थे समुदितस्य कारणत्वेनैवोद्धरणं दृश्यत इति समुदितत्रितयस्य कारणतावादित्वेनैव मतमिदं गृह्णामि । तत् खण्डनन्तु ग्रन्थ एव वर्तते । तत्रापि - काव्यं प्रति त्रितयस्य कारणत्वेन बह्व्यो व्याख्याः परं काव्यानुकूलप्रतिभां प्रति त्रितयस्य कारणत्वमस्याभिप्रेतम् अवकल्पयामि ।

• यतः काव्यानुकूलशब्दार्थोपस्थितिमजनयन्तः शक्त्यादयः किं करिष्यन्ति काव्यनिर्माणे !

संस्कारश्च शक्तिपदार्थः शब्दार्थस्मृतिमन्तरा किं करिष्यति काव्यस्य ? तथा च तदुद्भवे इत्यस्य प्रतिभाद्वारा काव्यनिर्माण इत्यादिरीत्या व्याख्या विधेया । नेयं ममैवकल्पनाऽपि तु सुधासागरोऽपि एवमारोहति । अनन्यपरतन्त्रामित्यस्य व्याख्याने कवेस्तत्प्रतिभायाश्चान्यः पर इति वदन्तो व्याख्यातारः प्रतिभायाः काव्यकारणत्वं नाङ्गीकुर्वन्तीति को वक्तुं पारयेत् ।

किञ्च पण्डितराजस्यापि प्रतिभां प्रत्येव समुदितत्रयस्य कारणतावादित्वेन काव्यप्रकाशमतमभिप्रेतम् । अत एव 'न तु त्रयमेव' इत्यनेन प्रतिभां प्रत्येव समुदितत्रयस्य कारणतां खण्डयति न तु काव्यं प्रति । व्याख्याति च नागेशमहोदयश्च रसगङ्गाधरमूलं तत्र तथैव । यद्यपि शक्त्यादित्रयहेतुतावादिनः, शक्तिमात्रहेतुतावादिनश्चेति रसगङ्गाधरमूलं विरोधमावहत्येतादृशेऽभिप्राये तथापि तत्र

संस्कार मात्रस्य हेतुतावादिनो वामनस्य शक्ति मात्रस्य हेतुतावादित्वेनोपग्रहे न विरोधः ।

यदपि विशिष्टं काव्यंप्रति त्रितयस्य अविशिष्टञ्च प्रति द्वयोरिति तन्मतं तद्व्याख्यानं वा तस्य परीक्षा तु गतया आगामिन्या च परीक्षया गतार्थनीया—

यद्यपि शक्तिपदार्थस्यैव प्रतिभात्वेन व्याख्यानं काव्यप्रदीपे उपलभ्यते परं न तत्समेषां सम्मतम् । यदिदपि शक्तिपदार्थः प्रतिभा, परं न पण्डितराज-परिष्कृता प्रतिभा, अपि तु नवनवोन्मेषेत्यादिना लक्षिता ।

समुदितत्रयस्य हेतुता घटचक्रकुलालादिन्यायेन व्याक्रियते । यथा घटं प्रति चक्रत्वेन कुलालत्वेन च चक्रकुलालकपालादेः कारणत्वेऽपि न केवलेन चक्रेण कुलालादिना वा प्रत्येकं घटफलजननम् अपितु चक्रकुलालादिसमुदायस्यैव फल जनकता । एवं काव्यप्रतिभां प्रति काव्यं वा प्रति शक्तिनिपुणताभ्याससमुदायस्यैव फलजनकता न तु प्रत्येकम् ।

पण्डितराजानां मतं यथा तादृङ्मतन्तु तृणारणिमणिन्यायेन व्याख्यायते । यथा वह्निं प्रति क्वचित्तृणं कारणं क्वचिदरणिमन्थनं क्वचिच्च सूर्यकान्तो मणिः. न तु त्रयः समुदिताः कमपि वह्निं समुत्पादयन्ति । तथा काव्यप्रतिभां प्रति काव्यं प्रति वा क्वचिच्छक्तिः कारणं क्वचिच्च व्युत्पत्त्यभ्यासौ, न तु त्रयः समुदिताः क्वचिदपि काव्यप्रतिभां काव्यं वा जनयन्ति ।। इति ।।

॥ अथ वाग्भटमतम् ॥

तदनन्तरञ्च वाग्भटो ब्रूते—

प्रतिभा कारणन्तस्य व्युत्पत्तिस्तु विभूषणम् ।
भृशोत्पत्तिकृदभ्यास इत्यादि कविसंकथा ।। इति

प्रतिभाव्युत्पत्ती सुन्दरं काव्यं जनयतः अभ्यासस्तु अधिककाव्यरचनायामुप-युज्यमानो न काव्यसामान्यकारणतायां गणनीयतामावहति इति तदभिप्रेतं प्रतिभाति । एवञ्च सुन्दरकाव्यं प्रति समुदितस्य कारणता वाद्येवेदमपि मतम् ।

एतन्मते प्रतिभा न काव्यघटनानुकूलशब्दार्थोपस्थितिः तयैव काव्यसम्पत्तौ व्युत्पत्त्यादीनां वैयर्थ्यापातात् । न च सैवोपस्थितिः प्रतिभा, परं व्युत्पत्तिसहकृता सुन्दरकाव्यघटनानुकूला भवतीति वाच्यम् प्रतिभासामर्थ्यविशेषाधायिकायाः व्युत्पत्तेः प्रतिभां प्रति कारणत्वापातेन काव्यं प्रति कारणत्वोक्तेरसंगत्यापत्तेः । किञ्च वाग्भटेन केनापि असुन्दरत्वघटितं काव्यत्वं लक्षितं येन काव्यघटनानुकूल-शब्दार्थोपस्थितिः सुन्दरकाव्यघटनानुकूला न भवेत् । किन्तु नवनवकल्पनाशालिनी

अन्तरिन्द्रियरूपा बुद्धिः प्रतिभाशब्देन विवक्षिता। सा च साधारणी शास्त्रान्तरेऽपि नवनवस्तूत्थापनशीला। सा च काव्यमार्गेऽपि नवनवान् शब्दार्थानुपस्थापयन्ती वाक्यस्य पद्यस्य वा कारणं भवन्त्यपि चमत्कृत्याधायकवाक्यस्य व्युत्पत्तिं विना नाधायिकेति व्युत्पत्तिस्तस्याः सहकारिणी अङ्गीक्रियते। प्रतिभाजन्यशब्दार्थो पस्थितौ काव्यघटनानुकूलत्वं व्युत्पत्तिसहकारसम्पादितमितिभावः। तथा च विभूषाविशिष्टमेव वाक्यादिकं काव्यं विभूषारहितं वाक्यमात्रं काव्याभासो वा। तादृशञ्च काव्यमुभाभ्यामेव प्रतिभाव्युत्पत्तिभ्यां क्रियते।

प्रतिभामात्रेण नवार्थशब्दघटितवाक्यसम्पादनं व्युत्पत्त्याचमत्काराधानम्। विभूषा च चमत्कारित्वमेव। एतेन किन्नाम व्युत्पत्तेर्विभूषणत्वम् ? चमत्कारित्वं गुणाधानं वा नाद्यस्तद्रहितस्य काव्यत्वानङ्गीकारात् प्रतिभया काव्यस्याजननात् किं विभूषितं स्यात् ?। नापि द्वितीयः प्रतिभया निर्गुणमेव काव्यं क्रियते, व्युत्पत्तेस्तु काव्यगुणान् प्रत्येव कारणत्वं, न तु काव्यं प्रतीतिपर्यवसानेन काव्यसामान्यं प्रति तयोः समुदायस्य किमपि न स्यात्। ननु निर्गुणस्य काव्यत्वाभावात्काव्यसामान्यं प्रत्येव कारणता आयाति चेत् न प्रतिभया काव्यस्याजननादशरीरस्यैव विभूषत्वापत्तेः। इत्यादयो विकल्पाः समाहिता बोध्याः। एषा च विवेचनप्रक्रियाऽन्यत्रापि समुदितकारणतावादिमते योजनीया।

इदन्त्ववधेयम्—एषा प्रतिभा व्युत्पत्तिसध्रीचीना पण्डितराजसम्मतां प्रतिभां द्वारीकृत्य काव्यं प्रयोजयतीति काव्यमात्रं प्रति प्रतिभैव कारणमित्यंशेन पण्डितराजस्य न विरोधः। परं प्रतिभां प्रति प्रतिभाशक्तेर्व्युत्पत्तेश्च समुच्चयस्य कारणत्वे विरोधः। स च बालकवेः प्रतिभायै पण्डितराजमते जन्मान्तरीया व्युत्पत्तिर्न कल्पनीया कल्प्येतेत्येतादृशरूपः। प्रागुक्तप्रतिभापदप्रयोगविषयान् अधिगत्य प्रतिभापदेनादृष्टं संस्कारो वा कथं ध्रियत इति स्फुटमवगन्तव्यम्।

आविर्भावसमयमनुरुध्य क्रमशो मतानां विवेचने १ दण्डिमतम्, २ रुद्रटमतम्, ३ वामनमतम्, ४ मम्मटमतम्, ५ वाग्भटमतम्, ६ पीयूषवर्षमतम्, ७ पण्डितराजजगन्नाथमतम्, ८ रसगङ्गाधरटिप्पणविधातुर्महामहोपाध्यायस्वर्गीयश्रीगङ्गाधरशास्त्रिमतम्, इति क्रम आयाति तथापि वाग्भटमतसदृशतया अनल्पप्रतिपादनभयात् अष्टममेव मतमुद्धरामि। विशिष्टकाव्यं प्रति प्रतिभाव्युत्पत्त्यभ्यासानां समुदायस्य कारणता।

विशिष्टं काव्यन्तु लोकोत्तरवर्णनानिपुणताविशिष्टं कविकर्म प्रतिभामात्रेण शब्दार्थयोजनायां सम्भवन्त्यामपि निपुणतारूपव्युत्पत्तिमन्तरा शब्दार्थयोर्वैलक्षण्यस्य काव्यत्वाधायकस्यासंभवात् निपुणता वैलक्षण्याधायिका, तथा

लोकोत्तरतायाः शब्दार्थयोः सम्पादकोऽभ्यासश्च प्रतिभासहकारितयाङ्गी क्रियते ।

प्रकारान्तरेणोपपादने शक्तिर्द्विधा उत्पादिका व्युत्पादिका च, आद्या प्रतिभा उत्पादिका, द्वितीया निपुणता नाम वैलक्षण्याधायिकेति तत्सारः प्रतिभाति । वाग्भटमतेऽभ्यासस्य भृशोत्पत्तिकारित्वमात्रमुक्तम्, अत्र तु लोकोत्तरताऽऽधायकत्वम् अतोऽस्य सामान्यकार्यकारणभावे प्रवेश इति विशिष्यते । परं वैलक्षण्यलोकोत्तरत्वयोः कियान् भेद इति न स्फुटं प्रतिभासते । अन्यच्च प्रायो वाग्भटवदेव प्रतिपादनवैचित्र्येऽपि प्रतिभाति ।

तत्र भाषानुवादःटीप्पणमित्थं खण्डयति—यद् भवतां मते विशिष्टं काव्यप्रकाशमते चानुपहसनीयं काव्यं तदेव काव्यसामान्यं न तु काव्यविशेषः, केवलच्छन्दोलयादिबन्धस्याद्यावधि केनापि काव्यत्वानङ्गीकारात् । यद्येतादृशं काव्यं नोत्पादयति प्रथमा शक्तिस्तदा न सा काव्योत्पादिकाऽभिधानमर्हति । यदि विशिष्टं काव्यमुत्पादयति तदा सैव काव्यकारणं निपुणताभ्यासौ तु प्रतिभाशक्तिविकाशायैवेति तत्संक्षिप्तः सारः ।

तत्रेदं वक्तव्यम्—यथा कारणान्तरसहकारं विना घटमजनयन् कारणान्तरसहकारेण च जनयन् कुलालो घटकारणं भवति तथा व्युत्पत्त्यादिसहकारं विना विशिष्टं काव्यमजनयन्ती तादृशसहकारेण च जनयन्ती प्रतिभाशक्तिः काव्योत्पादिका च कथन्न भवति ?

प्रतिभाशक्तिश्च काव्यमार्गे वाग्भटमतवदेव संकुचितेति समुदितस्य कारणत्वमप्यायाति । अन्ये चोपपादनत्रिविचने पूर्वमतवदेव बोध्ये । तथा च समुदितकारणतावादिमते प्रतिभासंकोचोऽप्रामाणिकः । अन्तरिन्द्रियबुद्धिरदृष्टादिसहकृतैव प्रतिभा भवति इति तु प्रागुक्तमेव । अदृष्टञ्चैतावन्तमेव काव्यस्यांशं साधयितुं प्रभवति नांशान्तरमिति कल्पना निष्प्रामाणिकी । तादृशकल्पनया च बालकवेः भवान्तरीयव्युत्पत्त्यभ्यासयोः कल्पनापत्तिरिति गौरवपरम्परैव दोषः । पण्डितराजप्रतिपादितप्रतिभायाः काव्यमात्रं प्रति कारणत्वन्तु न केनापि खंडनार्हमिति तु ध्येयमेव ।

॥ ६ अथ पीयूषवर्षमतम् ॥

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।
हेतुर्मृदम्बुसम्बन्धबीजोत्पत्तिर्लतामिव ॥

इति पीयूषवर्षो वर्षति । एव पदं प्रतिभायाः प्राधान्यस्य वैलक्षण्यस्य वा द्योतनाय न तु व्युत्पत्त्यभ्यासव्यावृत्तये, पण्डितराजमतापातात् मृदम्बुदृष्टान्ता-

तस्य च कारणं कविगता केवला प्रतिभा । सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः । तद्गतं च प्रतिभात्वं काव्यकारणतावच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वाखण्डम् ।

सङ्गतेश्च । नहि बीजं मृदम्बुसहकारं बिना लतां प्रति प्रभवति । प्राधान्यं वैलक्षण्यमित्थं दृष्टान्तबलादायाति । यवलतां प्रति यवबीजं गोधूमलतां प्रति गोधूमबीजमित्यादिरीत्या बीजमसाधारणम् । मृदम्बुनी तु लतान्तरं प्रत्यप्युपक्षिणे बीजान्तराणामपि सहकारिणी तथा प्रतिभा काव्यस्यासाधारणं कारणमिति ।

श्रुतशब्दस्य दण्डिमते इव व्युत्पत्तौ तात्पर्यमवसेयम् । उत्पत्तिपदन्तु प्रायः पादपूरकमेव । त्रयाणां समुदायस्य कारणतावादिमतमिदम् । अन्यच्चापेक्षितमुपपादनं वाग्भटमतप्रतिपादनादवसेयम् । अनन्तरोक्तञ्च गौरवपरम्परादूषणमनुवर्तनीयम् । एवपदमपि तादृक् सफलं न प्रतिभाति । अत्र व्युत्पत्यभ्यासयोरप्यसाधारणयोरेव काव्यमात्रप्रयोजकयोर्ग्रहणं न तु कार्यान्तरप्रयोजकयोः । तदनन्तरं सप्तमं पण्डितराजस्य मतं मूले एव स्फुटम् ।

(मूलव्याख्या)

तस्य अनुपदं लक्षितस्य काव्यसामान्यस्य केवलेत्यनेन निपुणताऽभ्यासयोः साक्षात्कारणत्वं व्यावर्त्यते । शब्दार्थौ शब्दार्थोभयेत्यर्थः । कारणता प्रतिभात्वेनैवेत्यनुपदमेव वक्ष्यति । तदपि प्रतिभात्वमखण्डमित्यपि । तथा च काव्यघटनानुकूलेत्यादि 'प्रतिभायाः परिचायकमात्रम् । न तु काव्यरचनानुकूलशब्दार्थोपस्थितित्वं कारणतावच्छेदकं नानात्वात् । काव्यघटनानुकूलत्वञ्च काव्यप्रयोज्यचमत्कृतेः परम्परया प्रयोजकत्वम् । एतेन काव्यघटनानुकूलशब्दार्थोपस्थितित्वेन कारणत्वे कार्यतावच्छेदककाव्यत्वस्य कारणतावच्छेदककोटौ प्रवेशापातेनान्योन्याश्रयग्रस्तत्वात्कारणताग्रहो न स्यात् । शब्दार्थोपस्थितित्वेन कारणत्वे प्रतिभयाऽकाव्यस्याप्युत्पादेन काव्यत्वप्रयोजकतया व्युत्पत्यादीनां सहकारित्वापात इत्यादि परास्तम् । काव्यघटनानुकूलत्वस्योपलक्षणत्वाच्च । कश्चित्सखण्डमिति पाठं मनुते, नैतद् युज्यते अनेककारणतावच्छेदकत्वापत्त्या अनुगतकारणत्वासिद्धेः ।

जातित्वपरिभाषायाः सकलतन्त्रसम्मतैकस्वरूपत्वाभावात् प्राह उपाधिर्वा उपाधिर्जातिसमशीलो धर्मविशेषः । स चाखण्ड एव सखण्डत्वे काव्यघटनादिधर्माणां

तस्याश्च हेतुः क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टम् । क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ । न तु त्रयमेव । बालादेस्तौ विनापि केवलान्महापुरुषप्रसादादपि प्रतिभोत्पत्तेः । न च

तच्छरीरप्रवेशे पूर्वोक्तदोषापत्तेः । सर्वत्र सामान्यकार्यकारणभावग्रहे कार्यतावच्छेदककारणतावच्छेदकयोरुपाधित्वं जातित्वं वाऽवश्यमपेक्ष्यते । तद्विना सामान्यकारणताया एवासंभवात् । तथाहि दण्डेन घटनिर्माणं पश्यन् प्रेक्षावान् सकले दण्डे कारणतां गृह्णाति नतु तद्दण्डव्यक्तावेव । अत एव तद्दण्डविनाशे नूतनं वृक्षादादातुं प्रवर्तते । न तु दण्डादीतरस्मिन् तादृशकारणतां प्रतिपद्यते, दण्डविनाशे दण्डकार्यसम्पादनाय इङ्गालादौ अप्रवर्तनात् । तथा च सकले दण्डे वर्तमानं दण्डादितरस्मिंश्चावर्तमानं किञ्चिदवश्यमवगच्छति । एवं दण्डस्य कार्यतां सकले घटे अवगच्छति न तु तद्घटव्यक्तावेव । अत एव घटान्तरोत्पादाय दण्डमादत्ते न तु पटोत्पादाय । तस्मात् सकले घटे वर्तमानं घटादितरस्मिंश्चावर्तमानं किञ्चिदवश्यं प्रतिपद्यते तदेव घटत्वं जातिः ।

एवं सकले दण्डे वर्तमानं दण्डादितरस्मिंश्चावर्तमानं दण्डत्वं जातिरिति । मर्मप्रकाशस्तु 'अखण्डम्' इति पाठं सम्यङ् न मनुते, तस्य कारणमिदं प्रतिभाति-यत्तत्सहोदरे वैयाकरणमञ्जूषाग्रन्थेऽखण्डानामुपाधीनां सर्वेषां जातित्वमङ्गीकृतम् आकाशत्वं सामान्यत्वं वा तन्मते जातिरेव । अतः सखण्डानामेवोपाधित्वमङ्गीकृत्य तथोक्तम् । तस्याश्च प्रतिभायाः, मुनिगुर्वादयो महापुरुषाः, आदिना तप आदयः क्वचिच्च ऐहिकव्युत्पत्त्यभ्यासानन्तरं जायमाने प्रतिभाकार्ये । व्युत्पत्तौ वैलक्षण्यञ्च काव्यानुकूलत्वम्, तदपि काव्यप्रयोज्यचमत्कृतिप्रयोजकत्वम् । त्रयमेव अदृष्टव्युत्पत्त्यभ्यासानां त्रयम्, एवकारेण व्युत्पत्त्यभ्यासयोर्मिलितयोः कारणत्वं सूच्यते, प्रतिभात्वावच्छिन्नं प्रति मिलितं त्रितयमेव कारणमिति नेत्यर्थः ।

अत्र मर्मप्रकाशः—एवकारेण क्वचित्त्रितयस्यापि कारणत्वमिति ध्वनयति । विलक्षणं त्रितयजन्यं प्रतिभा चातिविलक्षणा, तज्जन्यं काव्यञ्चातिविलक्षणमेवेति न दोष इति दिक् । इत्याह ।

तत्तु ग्रन्थान्तरवासनया अनुपहसनीयकाव्यं प्रति त्रितयसमुदायस्य कारणत्वाभिनिवेशेन न तु पण्डितराजमते तस्यावश्यकता । दृष्टकारणाभावस्थल एवादृष्टस्य कल्पनात् । व्युत्पत्त्यभ्यासस्थले ताभ्यामेव काव्यप्रतिभासम्पत्तौ

तत्र तयोर्जन्मान्तरीययोः कल्पनं वाच्यम् । गौरवान्मानाभावात्कार्यस्यान्यथाप्युपपत्तेश्च । लोके हि बलवता प्रमाणेनागमादिना सति कारणतानिर्णये पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्माधर्मादि कल्प्यते । अन्यथा तु व्यभिचारोपस्थित्या पूर्ववृत्तकारणतानिर्णये भ्रमत्व-

---

किमर्थमदृष्टं कल्प्यते । अन्यथा सर्वत्रादृष्टकल्पनाप्रसरे समुच्चितकारणतावादित्वमेव प्रसज्यते । नहि विलक्षणव्युत्पत्त्यभ्यासयोः सामर्थ्यं केनापि तोलितं येन ताभ्यामुपहसनीयमेव काव्यं जन्यत इति निर्णीयेत ।

तत्र तयोः● तत्र बालादेरित्यादौ, तयोः विलक्षणव्युत्पत्त्यभ्यासयोः, बालत्वञ्च ऐहिकविलक्षणव्युत्पत्त्यभ्यासशून्यत्वेन निश्चितत्वम् । ननु फलमुखगौरवं न दोषायेत्यत आह मानाभा● बालकवेः प्रतिभाया व्युत्पत्त्यभ्यासजन्यत्वे मानाभावादित्यर्थः । न च तयोः कारणत्वात्कार्यमेव मानमित्यत आह कार्यस्य● अन्यथा पूर्वोक्तादृष्टेन, तथा च सर्वत्र प्रतिभायां न तयोः कारणत्वमिति भावः । न च अदृष्टं जन्मान्तरीयौ तौ वेत्यत्र विनिगमकाभावः तत्र तयोः कारणत्वे मानाभावस्यैव विनिगमकत्वात् ।

न चादृष्टस्य कारणत्वानभ्युपगन्तृमते व्युत्पत्त्यभ्यासयोरेव प्रतिभाकारणत्वात् प्रतिभाकार्यमेव जन्मान्तरीययोस्तयोः कल्पकमिति वाच्यम् तादृशस्थले व्यभिचारादेव प्रतिभात्वावच्छिन्नं प्रति तयोः कारणत्वग्रहासंभवात् ।

तमेव च व्यभिचारं प्रदर्शयति लोके● लोकपदं काव्यप्रतिभेतरपरम् । बलवत्प्रमाणमागमः, आदिना गृहीता स्मृतिश्च । यथा सुखं प्रति विहितकर्मानुष्ठानं दुःखञ्च प्रति निषिद्धानुष्ठानं, जातमात्रस्य तादृशानुष्ठानाभावात् सुखे दुःखे च व्यभिचारः, तद्वारणाय जन्मान्तरीयस्य विहितानुष्ठानस्य व्यापारतया धर्मः, निषिद्धानुष्ठानस्य चाधर्मः कल्प्यते । न चात्र प्रतिभामात्रं प्रति व्युत्पत्त्यभ्यासयोः कारणत्वग्रहे तादृग्बलवत्किमपि प्रमाणं येन तयोर्व्यापारः संस्कारः कल्प्येत । किन्तु तादृशव्यभिचारात् प्रतिभाविशेषं प्रत्येव कारणता पर्यवसीयते । अन्यथा जन्मान्तरीयकल्पनामन्तरा, कारणत्वानुपपत्त्या । अन्यथा बलवत्प्रमाणाभावे, पूर्वं वृत्ते प्रतिभामात्रं प्रति तयोः कारणतानिश्चये । न च कार्यत्वावच्छिन्नं प्रति कारणमदृष्टं प्रतिभायांकार्यत्वमात्रं प्रयोजयेन्नतु प्रतिभात्वम् । अतस्तत्प्रयोजकतया तयोः कारणत्वमावश्यकम्, अत एव च काव्यप्रकाशादौ समुदितस्य कारणता प्रतिपादितेति वाच्यम्, अखिलानां मते साधारणादृष्ट-भिन्नस्य प्रतिभामात्रजनकस्यादृष्टान्तरस्यैव कल्पनीयत्वात् ।

प्रतिपत्तिरेव जायते। नापि केवलमदृष्टमेव कारणमित्यपि शक्यं वदितुम्। कियन्तंचित्कालं काव्यं कर्तुमशक्नुवतः कथमपि संजातयोर्व्युत्पत्त्यभ्यासयोः प्रतिभायाः प्रादुर्भावस्य दर्शनात्। तत्राप्यदृष्टस्याङ्गीकारे प्रागपि ताभ्यां तस्याः प्रसक्तेः। न च तत्र प्रतिभायाः प्रतिबन्धकमदृष्टान्तरं कल्प्यमिति वाच्यम्। तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षया क्लृप्तव्युत्पत्त्यभ्यासयोरेव प्रतिभाहेतुत्वकल्पने लाघवात्। अतः प्रागुक्तसरणिरेव ज्यायसी। तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च

तस्यैव 'चान्यत्र' शक्तिपदार्थत्वेनाभिलषितत्वात्। नापि केवलम● दृष्टव्युत्पत्त्यादिस्थलेऽपीति शेषः। दर्शनात् तथा च दृष्टकारणस्थलेऽपि अदृष्टविशेषेण कार्योपपादने दृष्टकारणसम्पत्तये प्रवृत्तिः प्रेक्षावतां व्यर्था स्यात् तत्रापि● दृष्टव्युत्पत्यादिस्थलेऽपि, ताभ्यां व्युत्पत्यभ्यासाभ्यां, तस्याः प्रतिभायाः, जन्मान्तरीयकर्मजन्यादृष्टस्य 'जन्मसमयेऽपि' सत्त्वादित्यभिसन्धिः। न च तत्र● यत्र व्युत्पत्यभ्यसानन्तरं प्रतिभाया दर्शनं तत्र, प्रतिभाजनकाददृष्टादन्यद् व्युत्पत्यादितः प्राक्प्रतिभायाः प्रतिबन्धकमदृष्टमदृष्टान्तरम्, तथा च तद्वशात्प्राक् प्रतिभा न जायते, प्रतिबन्धके विनष्टे तु जायते। जनकं प्रतिबन्धकञ्चादृष्टद्वयम्। क्लृप्तव्युत्पत्ति● मम मते प्रतिभा जनकतया तव तु प्रतिबन्धकादृष्टनाशकतया क्लृप्तयोः। प्रागुक्ता सरणिः क्वचित्प्रतिभाविशेषं प्रति अदृष्टं, क्वचिच्च व्युत्पत्यभ्यासौ कारणमिति। जन्मान्तरीयव्युत्पत्यभ्यासयोः कल्पनाद् व्यभिचारवारणेन समुच्चितकारणतावादिनामपि सरणिः प्रशस्या परं ततोऽपि लाघवगुणापेक्षिततया इयं सरणि रतिशयेन प्रशस्येति ज्यायसीपदेन सूचितम्। ननु कारणाभावेऽपि कार्योत्पत्तिर्व्यतिरेकव्यभिचार एतादृशकारणताग्रह प्रतिबन्धकः स्यात्, दृष्टविलक्षणव्युत्पत्यभ्यासयोः स्थलेऽदृष्टरूपकारणाभावेऽपि प्रतिभोत्पत्तेः। एवं बालकवेर्व्युत्पत्यभ्यासस्वरूपकारणाभावेऽपि प्रतिभा दर्शनाच्चेत्यत आह तादृशादृष्टस्य● प्रतिभाजनकस्य विशेषादृष्टस्य तादृशो-विलक्षणा व्युत्पत्तिः। अत्र बहव एतादृश-व्यभिचारवारणाय अव्यवहितोत्तरत्व-सम्बन्धेन अदृष्टविशिष्टां प्रतिभां प्रत्यदृष्टम्, एवं तादृशसम्बन्धेन स्वविशिष्टां प्रतिभां प्रति तादृशव्युत्पत्त्यभ्यासयोः कारणत्वमिति व्याचक्षते परं कार्योत्पत्यादिकं न कार्यतावच्छेदकमिति पक्षतादीधितौ एतादृशकार्यकारणभावस्यावहेलना-

प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम्, अतो न व्यभिचारः। प्रतिभात्वं च कवितायाः कारणतावच्छेदकं प्रतिभागतवैलक्षण्यमेव वा विलक्षणकाव्यं प्रति इति नात्रापि सः। न च सतोरपि व्युत्पत्त्य-भ्यासयोर्यत्र न प्रतिभोत्पत्तिस्तत्रान्वयव्यभिचार इति वाच्यम्। तत्र तयोस्तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानव-

---

त्प्रकारान्तरमाह प्रतिभागतं वैलक्षण्यम् ● अयं भावः प्रत्येकं तृणारणिमणीनां वह्निजननादेतादृशव्यभिचारवारणाय वह्नित्वव्याप्यं तार्णत्वादिकं जातित्रयं कल्प्यते तेन वह्नित्वावच्छिन्नं प्रति न त्रयाणामन्यतमस्य वा कारणत्वमपि तु तार्णत्वादिव्याप्यजात्यवच्छिन्नं प्रत्येव ततश्च न व्यभिचारः, एवं प्रतिभात्वभिन्नं प्रतिभात्वव्याप्यं जातिद्वयं कल्पनीयम्, तादृशव्याप्यजात्यवच्छिन्नां प्रति अदृष्ट-विशेषस्य, तदन्यव्याप्यजात्यवच्छिन्नां प्रति व्युत्पत्त्यभ्यासयोः कारणत्वं वाच्यम्, न कस्यापि कारणस्य कार्यतावच्छेदकं प्रतिभात्वमपि तु प्रतिभात्वव्याप्यो जाति-विशेष इति यावत्। तत्र जातित्वमखण्डोपाधित्वंवा प्रतिभात्ववदेवावसेयम्। प्रतिभात्वं सामान्यम्, कविताऽपि सामान्यतः काव्यम्, काव्यत्वावच्छिन्नं प्रति प्रतिभात्वेन कारणतेति भावः। ननु प्रतिभागतं वैलक्षण्यम् अनुपदमेवाङ्गी-कृतम्, अनुपदमेव च वर्णयिष्यन्ते काव्यगता उत्तमोत्तमत्वोत्तमत्वादयो विशेषाः, तथा च उत्तमकाव्यनिष्पत्तिस्थले प्रतिभारूपकारणसत्त्वेऽपि अधमकाव्यस्वरूपकार्य-विशेषस्याभावाद् व्यभिचारः।

इदन्तु हृदयम् 'काव्यरूपे' कार्ये' 'काव्यत्वप्रयोजकं' प्रतिभागतं प्रतिभात्वं वर्णितम्, काव्यगतोत्तमत्वमध्यमत्वादिप्रयोजकं प्रतिभागतमपि उत्तमत्वादिकं कल्पनीयमिति। इत्यत आह प्रतिभागत ● उत्तमोत्तमकाव्यं प्रति उत्तमोत्तमप्रतिभा कारणमित्यादिप्रकारेण कार्यकारणभावविशेषान्तरमपि कल्प्यते इति भावः। अत्रापि विशेषकार्यस्थलेऽपि सः व्यभिचारः, उत्तमप्रतिभास्थले न मध्यमकाव्य-सामग्रीति तात्पर्यम् तत्राह्वय ● व्युत्पत्त्यादिकारणसत्त्वेऽपि प्रतिभारूपकार्या-नुत्पत्तेः, तयोर्व्युत्पत्त्यभ्यासयोः, प्रतिभारूपकार्यादर्शनाच्च विलक्षणौ व्युत्पत्त्यभ्यास-विति भावः। मानं प्रतिभोत्पत्तिः, कारणतावच्छेदकं वैलक्षण्यं तेन व्युत्पत्त्यभ्यास योरनवच्छिन्नत्वात्। कारणतावच्छेदकावच्छिन्नकारणसत्त्वे एव व्यभिचारोऽत्र तु न तादृशं कारणमिति यावत्। नन्वनेनोपपादनेन प्रतिभाऽव्यवहितपूर्वत्वमेव वैलक्षण्यं समागतं तथा च कार्यस्यापि कारणतावच्छेदककोटौ प्रवेशापत्तिः इत्यत आह

च्छिन्नत्वात्। पापविशेषस्य तत्र प्रतिबन्धकत्वकल्पनाद्वा न दोषः। प्रतिबन्धकाभावस्य च कारणता समुदितशक्त्यादित्रय-हेतुतावादिनः, शक्तिमात्रहेतुतावादिनश्चाविशिष्टा। प्रतिवादिना मन्त्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तम्भे विहितानेक-प्रबन्धस्यापि कवेः काव्यानुदयस्य दर्शनात्।

काव्य-भेद-वर्णनम्

तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा।

शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्।

पापविशेषस्य ● ननु वैलक्षण्यमदृष्टासहकृतत्वरूपमेवोक्तं तच्च तवास्त्येवेत्यत आहेति मर्मप्रकाशस्यावतरणम्। प्रतिबन्धकत्वं प्रतिभोत्पत्तेः। प्रतिबन्धकाभावस्य नूतनकारणत्वाङ्गीकाराभावं प्रदर्शयति प्रतिबन्धका ● कार्यमात्रं प्रति सर्वैः प्रति-बन्धकाभावस्य कारणताङ्गीक्रियते। शक्तिनिपुणताऽभ्यासश्चेति त्रयम्, हेतुता काव्यं प्रति काव्यप्रतिभां प्रति चेति व्याख्यानभेदेन। व्याख्यानञ्च प्राक् प्रदर्शितम् शक्तिपदार्थश्चादृष्टादिः प्रतिभापदार्थनिरूपणावसरे प्रतिपादितः। शक्तिमात्र-मित्यत्र शक्तिपदं काव्यपक्षे प्रतिभापरम्, प्रतिभापक्षे चादृष्टपरम्। वामनमतमेव वा शक्तिमात्रहेतुतावादित्वेन निर्दिष्टम्। अविशिष्टा नूतनत्वानाधायिका अनूतना वा समुदितकारणतावादिनयेऽपि प्रतिबन्धकाभावस्य कारणतां दर्शयति ● प्रतिवादिना प्रबन्धस्य काव्यप्रबन्धस्य तेन व्युत्पत्त्यभ्यासयोरपि शक्त्या साकं सत्ता सूचिता।

अथ काव्यभेदविचारः

लक्षितं काव्यं चतुर्धेत्यन्वयः। चमत्कारिणो व्यङ्ग्यस्य सर्वथा प्राधान्ये प्रथममुत्तमोत्तमम्, तादृशस्य व्यङ्ग्यस्य अप्राधान्ये द्वितीयमुत्तमम्, वाच्य-स्यैव चमत्कारित्वे तृतीयं मध्यमम्, वाचकस्यैव प्राधान्येन चमत्कारित्वे चतुर्थ-मधममिति सामान्येन विभागः। भेदत्रयवादिनां प्रकाशादिकृतां मतन्तु अस्य प्रकरणस्योपसंहारे स्वयमेव ग्रन्थकृदालोचयिष्यति। तत्र प्रथममुत्तमोत्तमं लक्षयति शब्दार्थौ ● सप्तम्यर्थो घटकत्वम्, अर्थपदेन यथासंभवं वाच्यो लक्ष्यश्च, शब्दार्थाभ्यां तत्कृता चमत्कृतिर्लक्ष्यते, शब्दार्थचमत्कृत्योर्व्यङ्ग्यार्थचमत्कृतौ गुणीभाव इति भावः। यत्काव्यघटकशब्दार्थचमत्कृतिस्तद्व्यङ्ग्यार्थचमत्कृतेः गुणस्तत् काव्यम् आद्यमुत्तमोत्तममित्यर्थः। स्वविशिष्टार्थस्य व्यञ्जको योऽर्थस्त-त्प्रतिपादकशब्दत्वमुत्तमोत्तमत्वम्। वैशिष्ट्यं च स्वापेक्षया प्राधान्यचमत्कारित्वा-भ्याम् इति फलति।

कमपीति चमत्कृतिभूमिम् । तेनातिगूढस्फुटव्यङ्ग्ययोर्निरासः । अपराङ्गवाच्यसिद्ध्यङ्गव्यङ्ग्यस्यापि चमत्कारितया तद्वारणाय गुणीभावितात्मानाविति स्वापेक्षया व्यङ्ग्यप्राधान्याभिप्रायकम् ।

भूमिम् ● चमत्कारकारणम्, अतिगूढव्यङ्ग्यस्य अतिस्फुटव्यङ्ग्यस्य चेत्यर्थः । व्यङ्ग्यस्यातिगूढत्वं नाम सहृदयैरपि कष्टेन वेद्यत्वम् । एवमसहृदयैरपि झटिति-वेद्यत्वम् अतिस्फुटत्वं बोध्यम् । गूढत्वस्फुटत्वाभ्यां व्यङ्ग्यस्य चमत्कारिता नश्यतीति सहृदयानामनुभवः । तथाह--

नान्ध्रीपयोधर इवातितरां प्रकाशो
नो गुर्जरीस्तन इवातितरां निगूढः ॥
अर्थो गिरामपिहितः पिहितश्च कश्चित्
सौभाग्यमेति मरहट्टवधूकुचाभः ॥

एवमसुन्दर व्यङ्ग्यस्यापि चमत्कारित्वाभावादेव निरासः । इदमत्रावधेयम् ।

ग्रन्थकारो व्यङ्ग्यस्य चमत्कारित्वनिवेशेन अतिगूढस्फुटासुन्दराणि व्यङ्ग्यानि, शब्दार्थयोर्गुणीभावनिवेशेन अपरांगादीनि च अपाकरोति । तेनाति गूढादिषु त्रिषु व्यङ्ग्यस्य प्राधान्यमस्ति परं चमत्कारित्वं नास्तीति आयाति । परं मर्मप्रकाशो गुणीभावितात्मानावित्यनेनापि अतिगूढादीनां निरासमङ्गीकुरुते, तन्मते अतिगूढादीनां प्राधान्यमपि नास्तीति प्रतीयते । तत्रेत्थं मम प्रतिभाति अतिगूढादिषु अंगित्वरूपं प्राधान्यमस्ति तदभिप्रायेण मूलम्, प्रदीपादिषु अतिशय-चमत्कारित्वस्यैव प्राधान्येनासकृद्वर्णनात् चमत्कारापकर्षे प्राधान्यमपि नास्तीत्यभि-प्रायेण मर्मप्रकाश इति । तद्वारणाय ● उत्तमोत्तमत्वरूप ध्वनित्ववारणाय, स्वापेक्षया ● शब्दार्थापेक्षया ।

ग्रन्थान्तरेषु गुणीभूतव्यङ्ग्यभेदतया प्रतिपादिता अष्टावनेन लक्षणेन व्यावर्त्याः । १ अतिगूढम्, २ अतिस्फुटम्, ३, असुन्दरम्, व्यङ्ग्यस्याचमत्कारित्वम्, अपरांगम्, अपरस्य कस्यचिदंगं व्यङ्ग्यं न सर्वथा प्रधानमिति यावत्, ५ वाच्य-सिद्ध्यङ्गं वाच्यार्थोपपादकम्, ६ संदिग्धप्राधान्यम्, यत्र वाच्यार्थव्यङ्ग्यार्थयोः प्राधान्ये संदेहः, ७ तुल्य प्राधान्यम् वाच्यार्थ व्यङ्ग्यार्थयोरेव, काक्वा क्षिप्तम् । तेषामुदाहरणानि यथा अतिगूढस्य दर्पणे—

सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अल्लाऽवदीन-नृपतौ न संधिर्न च विग्रहः ॥

अत्र नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपाय इति व्यङ्ग्यं श्वपचानामपि झटित्यस्फुटम् । अतिस्फुटस्य काव्यप्रकाशे यथा—

यस्याऽसुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीवधव्यतिकरेण युनक्ति कर्णौ ।
काञ्ची - गुणग्रथनभाजनमेष सोऽस्मि
जीवन्न संप्रति भवामि किमावहामि ॥

कीचककृतमपराधं निवेदयन्तीं द्रौपदीं प्रति बृहन्नलारूपस्यार्जुनस्योक्ति-रियम् । जीवन्नित्यस्य अभिमतकार्याशक्तत्वे लक्षणा । मरणमेव श्रेय इति व्यङ्ग्यम् असहृदयानामपि वाच्यवत्प्रतीयत इति अतिस्फुटम् । असुन्दरस्य दर्पणे—

वाणीर-कुञ्जोड्डीन-शकुनि-कोलाहलं शृण्वन्त्याः ।
गृहकर्मव्यापृताया बध्वाः सीदन्त्यङ्गानि ॥

अत्र दत्तसंकेतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानि इति वाच्यस्यैव चमत्कार इति व्यङ्ग्यस्यासौन्दर्यम् ।

अपराङ्गस्योदाहरणम् 'अयं स रशनोत्कर्षीत्यादि' उत्तमकाव्यनिरूपणावसरे सोपपादनं व्याख्यास्यते तत्रैव द्रष्टव्यम् ।

वाच्यसिद्ध्यङ्गम् 'राघवविरहेत्यादि' द्वितीयकाव्यस्योदाहरणं मूलस्थमग्रे-तनम् । अन्येषां दर्पणस्थमित्थमुदाहरणम् ।

हरस्तु किंचित्परिलुप्त - धैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥

अत्र विलोचनव्यापार-चुम्बनाभिलाषयो र्वाच्यव्यङ्ग्ययोः प्राधान्ये संदेहः ।

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥

महावीरचरिते नाटके रावणं प्रति पत्रद्वारा परशुरामोक्तिः । परशुरामो रक्षः-कुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

मथ्नामि कौरवशतं समरे न कोपात्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः ।
संचूर्णयामि गदया न सुयोधनोरू
संधिं करोतु नृपति र्भवतां पणेन ॥

वेणीसंहारे सहदेवं प्रति भीमोक्तिः । मथ्नाम्येवेति व्यङ्ग्यम् ।

उदाहरणम्—

'शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान् ।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते ॥'

अत्रालम्बनस्य नायकस्य, सविधशयनाक्षिप्तस्य रहःस्थानादेरुद्दीपनस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य, त्रपौत्सुक्यादेश्च व्यभिचारिणः, संयोगाद्रतिरभिव्यज्यते । आलम्बनादीनां स्वरूपं वक्ष्यते । न च यद्ययं शयितः स्यात्तदास्याननाम्बुजं चुम्बेयमिति नायिकेच्छाया एव व्यङ्ग्यत्वमत्रेति वाच्यम् । मनोरथान्सफलीकर्तुमसमर्थेत्यनेन मनोरथाः सर्वेऽस्या हृदि तिष्ठन्तीति प्रतीतेः,स्वशब्देन मनोरथपदेन सामान्याकारेण तादृशेच्छाया अपि निवेदनात् । न च मनोरथपदेन मनोरथत्वाकारेण

शयिता सविधे● दयितस्य सविधे सुप्ता अपि अहो आश्चर्यं लज्जावशाच्चुम्बनादिमनोरथान्, सफली कर्तुम् असमर्था प्रिया इषद्यथास्यात्तथा मीलन्ती नयने यस्या सा औत्सुक्यवशात् प्रियस्य मुखकमलं निरीक्षते । शयितेति शीङ्धातोः कर्तरि भूते क्तः । ईशऐश्वर्ये इत्यतः स्थेशभासपिसकसोवरजित्यनेन वरचि टाप्, वनिपि वरटिवा प्रत्यये ईश्वरीत्यपि । रहःसमागमस्वरूप कारणस्य सत्त्वेऽपि मनोरथं - साफल्यरूप - कार्यस्याभावात् अहो इति । दरपदेन त्रपा निरीक्षत इत्यनेनौत्सुक्यञ्च व्यज्यते । संयोगात्● संबन्धात् नायिकानिष्ठा नायकविषयिणी रतिः । न च एव पदेन तादृशरति र्व्यवच्छिद्यते, तादृशीच्छाद्वारा रतेरभिव्यक्तिरस्तु नाम । स्वशब्देन● वाचक-शब्देन । स्वशब्दत्वाद् वाच्यवृत्त्याश्रयणम्, स्वशब्दस्य व्याख्यानं मनोरथशब्देन, सामान्याकारेण मनोरथत्वरूपेण, तादृशेच्छा चुम्बनेच्छा, तथाचेच्छात्वेन चुम्बनेच्छावाच्यतामुपजाता न व्यङ्ग्येति भावः ।

ननु यदेवोच्यते तदेव व्यङ्ग्यं यथा तु व्यङ्ग्यं न तथोच्यत इत्यभिप्रायक पर्यायोक्त प्रकरणदिशा व्यंग्यस्यापि प्रकारान्तरेण वाच्यत्वे न क्षतिरित्याशयेनाशंकते न च मनो● इच्छाया विषयविशेषश्चुम्बनं तद्विषयकेच्छात्वेन ।

सामान्येच्छाया अभिधानेऽपि चुम्बेयमिति विषयविशेषविशिष्टेच्छात्वेन व्यङ्ग्यत्वे किं बाधकमिति वाच्यम्। चमत्कारो न स्यादित्यस्यैव बाधकत्वात्। न हि विशेषाकारेण व्यङ्ग्योऽपि सामान्याकारेणाभिहितोऽर्थः सहृदयानां चमत्कृतिमुत्पादयितुमीष्टे। कथमपि वाच्यवृत्त्यनालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वेनालङ्कारिकैः स्वीकारात्। चुम्बनेच्छाया रत्यनुभावतयैव सुन्दरत्वेन तदव्यञ्जने चुम्बामीति शब्दबलाच्चुम्बनेच्छावद-

---

उत्तरमाह—चमत्कार● व्यङ्ग्यता भवतु नाम विशेषरूपेण वाच्यस्थापि परं वाच्यवृत्तिस्पर्शाच्चमत्कारातिशयाभावेन चुम्बनेच्छाया ध्वनित्वासंभवेन न तदादाय काव्यस्योत्तमोत्तमत्वमपि तु संभोगरतिमादायैव। पर्यायोक्तादि गुणीभूतव्यङ्ग्यकोत्तमकाव्यव्यवहारस्तु सहते कथमपि प्रकारान्तरेण व्यङ्ग्यस्य वाच्यत्वम्। कोमलतरस्तु ध्वनिव्यवहारो मनागपि न सहते व्यङ्ग्यस्य वाच्यस्पर्शम्। चमत्काराभावमेव दर्शयति न हि● कथमपि● सामान्येन विशेषेण वा। अत्रत्यमर्मप्रकाशलेखात् क्वचित्प्रकारान्तरेण वाच्यस्यापि व्यङ्ग्यतामादाय भवति ध्वनित्वमित्यायाति। तथा च ध्वनिविशेष एव सर्वथा वाच्यवृत्तेः परित्याग इति तन्मतं प्रतीयते। पण्डितराजस्तु संशयालंकारप्रकरणे चित्रमीमांसोदाहृत संशयध्वनित्वखंडनावसरे ध्वन्यालोक - लोचनयोः संवादपुरस्सरं साधु न्यरूपयद् ध्वनित्वोपयोगि व्यङ्ग्यस्य वाच्यवृत्त्यसहत्वम्। एवमपि अर्थशक्तिमूलक - ध्वनिप्रकरणे कविप्रौढोक्तिसिद्धवस्तुना भ्रान्त्यलंकारस्य व्यञ्जनोदाहरणे साहंकारेत्यादिपद्ये यथोपपादितं ग्रन्थकृता तथातु पूर्वापरविरोध आयात्येव किं कर्तव्यम्। तत्र चाक्षुष - प्रत्यक्षत्वरूपसानन्दाव लोकनत्वेन सामान्येन वाच्याया अपि चाक्षुषभ्रान्ते भ्रान्तित्वेन विशेषका रेण व्यङ्ग्यता सोपपादनमङ्गीकृता। यद्यपि तत्र मर्मप्रकाशो विरोधपरिहाराय तत्र व्यङ्ग्यवाच्यतावच्छेदकयोः सामान्यविशेषभावेन भेदः, अत्र तु इच्छात्वरूप - जातेरेव व्यङ्ग्यवाच्यतावच्छेदकत्वमिति लिखति तथापि तल्लेखेन व्यङ्ग्यस्यावाच्यता न कथमपि अपाक्रियते। तत्र केचित् साहङ्कारेत्यादौ भूमीभूषणविषयककविनिष्ठ - रतिमादायैव ध्वनित्वं न तु भ्रान्तिमादाय। इति वदन्ति। अन्येतु आलोकनं चाक्षुणं भ्रान्तिस्तु मानसीति कृत्वा विरोधं परिहरन्ति। अभिव्यक्ताया अपि चुम्बनेच्छाया रत्यङ्गतयैव चमत्कारित्वमित्याह चुम्बने●

चमत्कारित्वाच्च । एवं त्रपाया अपि न प्राधान्येन व्यङ्ग्यत्वम् । अनुवाद्यतावच्छेदकतया प्रतीतायां तस्यां मुख्यवाक्यार्थत्वायोगात् । न च दरमीलन्नयनात्वविशिष्टनिरीक्षणं विधेयमिति नानुवाद्यतावच्छेदकत्वं तस्या इति वाच्यम् । एवमपि नयनगतदरमीलनस्य तत्कार्यत्वेऽपि दरमीलन्नयनात्वविशिष्टनिरीक्षणस्य रतिमात्रकार्यत्वात् । त्रपाया एव मुख्यत्वेन व्यङ्ग्यत्वे निरीक्षणोक्तेरनतिप्रयोजनकत्वापत्तेः । वाच्यवृत्त्या रतेरनुभावे निरीक्षणे त्रपाया अनुभावस्य दरमीलनस्येव व्यञ्जनया तस्यां तस्या अपि गुणीभावप्रत्ययौचित्यात् । यथा वा—

तदव्यञ्जने रत्यव्यञ्जने । एवम् ● चुम्बनेच्छाया यथाऽप्राधान्यं तथा । शृङ्गारसंचारितयैव चमत्कारित्वात् । प्राधान्यस्य शाब्दिकस्याप्यसंभवं दर्शयति अनुवाद्य ● नायिकामुद्दिश्य तत्कर्तृकं निरीक्षणम् आख्यातोपस्थापितं प्राधान्येन भासमानं विधीयते, अनुवाद्यायाश्च नायिकायां दरमीलन्नेत्रयादि विशेषणम्, तत्रत्यदरपदाभिव्यङ्ग्यत्रपाया अनुवाद्यनायिकाविशेषणत्वेन अनुवाद्यतावच्छेदकत्वं न तु विधेयत्वम्, त्रपावती दयिता निरीक्षते इत्येतादृश-वाक्यार्थ प्रसंगात् । तथा च न तस्याः प्राधान्यमिति भावः । दरेत्यादेर्विधेयविशेषणत्वं कृत्वा विधेयतावच्छेदकत्वमेवाशङ्कते न च दर ● तस्यास्त्रपाया व्यञ्जनेऽपि रतेरभिव्यक्ति मन्तरा न वाक्यार्थपर्यवसानमतो रतेरेव प्राधान्यमित्याशयेन समाधत्ते एवमपि ● तत्कार्यत्वेत्रपाकार्यत्वे रतिमात्रेत्यत्र मात्र पदेन त्रपा व्यावर्त्यते । त्रपा एवेत्यत्रैवकारेण रतेर्व्यवच्छेदः । अनति ● । निरीक्षणमात्रस्य त्रपायामनन्वयात्स्वयञ्चाचमत्कारितया रतेरभिव्यक्तिमन्तरा संचारितयाऽपि चमत्काराभावात् । वाच्यवृत्या ● रतेरनुभावो निरीक्षणं भावप्रधान माख्यातमिति नियमेन वाच्यार्थेषु प्रधानमिति निर्विवादं वाच्यवृत्या अभिधया प्रकाशते तत्र निरीक्षणे दरमीलन्नयनस्यापि विशेषणत्वं शब्दायातमेव । तदेव व्यङ्ग्ययोरपि गुणगुणीभावे विनिगमकं भविष्यति । यस्यास्त्रपाया अनुभावो दरमीलन्नयनात्वं यस्या रतेरनुभावे निरीक्षणे गुणः, तस्यां रतौ तस्यास्त्रपाया गुणीभाव उचित इति भावः । अमर्षभावस्य प्राधान्येन ध्वनिमुदाहरति ।

"गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम् ॥
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ॥"

अत्र घूर्णितासीदित्यनेनासमीक्ष्यकारिन् किमिदमनुचितं कृतवानसीत्यर्थसंवलितोऽमर्षश्चर्वणाविश्रान्तिधामत्वात् प्राधान्येन व्यज्यते । तत्र शब्दोऽर्थश्च गुणः । यथा वा—

तल्पगताऽपि च सुतनुः श्वासासङ्गं न या सेहे ।
सम्प्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति ॥

इदं च पद्यं मन्निर्मित-प्रबन्ध-गतत्वेन पूर्वसाकाङ्क्षमिति दिङ्मात्रेण व्याख्यायते—या नववधूः पल्यङ्कशयिता श्वासस्यासङ्गमात्रेणापि संकुचदङ्गलतिकाऽभूत् सा सम्प्रति प्रस्थानपूर्वरजन्यां प्रवत्स्यत्पतिका प्रियेण सशङ्केन समर्पितं हृदि पाणिं नववधू-जातिस्वाभाव्यादाक्षिपति, परंतु मन्दम् । अत्र शनैः स्वस्थान-प्रापणात्मना मन्दाक्षेपेण रत्याख्यः

गुरुमध्य● श्वश्रूप्रभृतिमध्यगततया लज्जावशात् नतं संकुचितमङ्गं यस्याः सा मया कमलकोरकेण मन्दं स्पृष्टा सती मम असमीक्ष्यकारित्वं ज्ञापयन्ती मामवलोक्य किञ्चिदमर्षवशाद् दरमिषत्कुण्डलयोस्ताण्डवं यस्मिंस्तत्तथा कृते भ्रुवौ लतिके यस्मिंस्तत्तथा घूर्णितमासीदिति तादृशं घूर्णितं नायिकायामिति सा घूर्णिता । कश्चित्स्वमित्रं वक्ति । अर्थसंवलित● इति व्यङ्ग्येन अर्थेन परिपोषितः, चर्वणा-विश्रान्तिधामत्वं प्राधान्येनास्वादविषयत्वम् । तत्र अमर्षे । विप्रलम्भरतेर्ध्वनिमुदाहरति तल्पगता● पूर्वत्र गत्तशब्दस्य अत्र गतशब्दस्य च द्विरूपादानस्वारस्यं चिन्त्यम् । तल्पं शय्या, असहने सुतानवं हेतुः, मन्दं शनैः स्वोरस्स्थितं प्रियपाणिमाक्षिपति स्वस्थानं प्रापयति । प्रबन्धो भामिनीविलासः - नवोढा प्रकरणान्नव-वधूरिति । तत एव क्रमस्य संल्लक्ष्यता । पल्यङ्कं शय्या, आसंगोऽल्पीयान् संस्पर्शः मात्रपदेन करादिना स्पर्शस्य सर्वथाऽसह्यत्वं प्रतीयते, प्रवत्स्यन् परदेशं गमिष्यन्, सशङ्कत्वं सुतानववशादसह्यत्वेन, हृदि नायिकायाः, पाणिं प्रियस्य,

स्थायी संलक्ष्यक्रमतया व्यज्यते। उपपादयिष्यते च स्थाय्यादीनामपि संलक्ष्यक्रमव्यङ्ग्यत्वम्। अमुमेव प्रभेदं ध्वनिमामनन्ति।

यत्तु चित्रमीमांसायामप्यय्यदीक्षितैः 'निश्शेषच्युत चंदनम्' इतिपद्यं ध्वन्युदाहरणप्रसङ्गे व्याख्यातम्—उत्तरीयाकर्षणेन चन्दनच्युतिरित्यन्यथासिद्धिपरिहाराय निःशेषग्रहणम्। ततश्चन्दनच्युतेः स्नानसाधारण्यव्यावर्तनेन संभोगचिन्होद्घाटनाय तटग्रहणम्। स्नाने हि सर्वत्रचन्दनच्युतिः स्यात्, तव तु स्तनयोस्तट उपरिभागे एव दृश्यते। इयमाश्लेषकृतैव। तथा निर्मृष्टरागोऽधर इत्यत्र ताम्बूलग्रहणबिलम्बात्प्राचीनरागस्य किञ्चिन्मृष्टतेत्यन्यथासिद्धिपरिहाराय

भाविविरहशङ्कया मन्दम् विप्रलम्भोदयात्। संलक्ष्यक्रम● या पूर्वं न सेहे, संप्रति, मंदम् इति कतिपयक्रमिकपदार्थाभिव्यक्तिपरम्परया सम्यग् लक्ष्यते हेतुफलयोः क्रमो यत्र तथाभूतत्वेन ननु स्थाय्यादीनामलक्ष्यक्रमव्यङ्ग्यत्वमेव प्राचीनतन्त्रेषु प्रसिद्धमित्यत आह उपपाद● वस्तुतः सर्वत्रैव व्यङ्ग्यव्यञ्जकयोः कार्यकारणभावमापन्नयोः पौर्वापर्यं नापह्नूयतेऽपितु कार्यकारणान्तरालकालस्य सूक्ष्मतरत्वेनालक्ष्यतया असंलक्ष्यक्रमेति व्यवहारः। यत्र तु प्रकरणादीनां विचारवेद्यतया प्रतीतौ मान्थर्यन्तत्र संलक्ष्यक्रमताऽपीति भावशान्त्यादीनां निरूपणानन्तरं प्रथमाननावसाने विनिरूपयिष्यति तथा च नवीनानां सिद्धान्तः। अमुमेव● उत्तमोत्तममेव। काचिन्नायिका स्वीयनायकं प्रति अनुनयाय दूतीं प्रेषितवती दूती च तेन नायकेन संभुक्ता संभोगचिह्नानि च स्नानकार्यत्वेनापन्हुवाना समागता। ताञ्च विदग्ध-नायिका रमणमभिव्यञ्जिजिषू रमणनिषेधपुरस्सरं वापीस्नान-मुखेनैव वक्ति—

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोधरो,
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे,
वापीं स्नातु मितो गतासि न पुनस्तस्याधमस्यान्तिकम्।

पद्यमिदं ध्वन्युदाहरणतया प्रायः सर्वैरालंकारिकैः व्याख्यातम्। अत्रापि ग्रन्थे तत्तत्प्रसंगे बहुकृत्व उद्धृतम्। स्नान-व्यावृतिद्वारा संभोगासाधारण्यमुखेन तदीयव्याख्यानमेवाह उत्तरीया● निश्शेषपदेन उत्तरीयाकर्षणस्य तटपदेन

निर्मृष्ट - राग इति रागस्य निश्शेषमृष्टतोक्ता। पुनःस्नान-साधारण्यव्यावर्तनेन संभोगचिन्होद्घाटनायाधर इति विशिष्य ग्रहणम्। उत्तरोष्ठे सरागेऽधरोष्ठमात्रस्य निर्मृष्टरागता चुम्बन कृतैव, इत्यादिना 'इदमपि ध्वनेरुदाहरण' इत्यन्तेन संदर्भेण तटादिघटिता वाक्यार्थाः स्नानव्यावृतिद्वारा संभोगाङ्गना-माश्लेष-चुम्वनादीनां प्रतिपादनेन प्रधानव्यंग्यव्यञ्जने सहाय-कमाचरन्ति इति, तदेतदलङ्कारशास्त्रतत्वानवबोधनिबन्धनम्। प्राचीनसकलग्रन्थविरुद्धत्वादुपपत्तिविरोधाच्च। तथाहि पञ्च-मोल्लासशेषे निश्शेषेत्यादौ गमकतया यानि चन्दनच्यवनादी-न्युपात्तानि तानि कारणान्तरतोऽपि भवन्ति, यतश्चात्रैव स्नानकार्यत्वेनोपात्तानीति नोपभोग एव प्रतिबद्धानीत्यनै-कान्तिकानि, इतिकाव्यप्रकाशकृतोक्तम्। तथा तत्रैव तेन—

स्नानस्य च व्यावृत्तिः। इयं स्तनतटभाग एव चन्दनच्युतिः, किञ्चिन्मृष्टता, किञ्चिच्छुद्धता ताम्बूलग्रहणविलम्वेनापि संभवतीति कालविलम्बव्यावृत्तये निरुपसर्गस्य, स्नानव्यावृत्तये चाधरस्योपादानम्, अन्यथा संभोगं विना काल-विलम्बादिना मृष्टरागतासिद्धेः परिहारायेत्यर्थः। चुम्बनकृतैव● अधरोष्ठ चुम्बनस्यैव संप्रदायात्। इत्यादिना● प्रातर्दत्तमञ्जनं कालविलम्बेन किंचिद्विलुप्तमित्यन्यथा - सिद्धि - परिहाराय दूरमिति अत्यर्थमित्यापाततोऽर्थः एतेन कालान्यथासिद्धिनिरासः। पुनः स्नानसाधारण्य - व्यावर्तनेन संभोग चिह्नोद्घाटनाय दूरे प्रान्त इति हृदयस्थितोऽर्थः। कालतः स्नानेन च सर्वतोऽञ्ज-नलोपः स्यात्तव तु लोचनयोः क्वचित्प्रान्त एवानञ्जनत्वमिदं चुम्वन कृतमेवे-त्यादि गृह्यते। व्यंग्यव्यञ्जने● रमणाभिव्यक्तौ। शास्त्रतत्त्व● ध्वन्यमानस्य अर्थापत्ते रनुमितेर्वाऽविषयत्वम् अलंकार-शास्त्रस्य तत्त्वम्, अनेन तु असा-धारण्य-संपादनेन तद्विषयत्वं संपादितमित्यर्थः। प्राचीन-ग्रन्थविरोधं दर्शयति तथाहि प्रभृति विरोधः स्फुट इत्यन्तेन। ततः परं किंचेत्यादिनोपपत्ति-विरोधः। गमकतया● संभोग-व्यञ्जकतया, च्यवनं च्युतिः चात्रैव अस्मिन्नु-दाहरण एव, नोपभोगे एव● संभोग एव जन्यजनकभावेन न संबद्धानि किन्तु स्नानादिनापि जन्यजनकभावेन संबद्धानि अत एव नोपभोगरूपसाध्यस्य व्याप्तानि अपितु उपभोगाभावेऽपि स्नानस्थले सत्वादुपभोगस्य अनेकान्तानि

भम धम्मिअ वीसत्थो स सुणओ अज्ज मालिदो तेण ।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ॥

इत्यादौ लिङ्गजलिङ्गिज्ञानरूपेणानुमानेन व्यक्ति गतार्थयतो व्यक्तिविवेककृतो मतं प्रत्याचक्षाणेन व्यभिचारित्वेना-सिद्धत्वेन च संदिह्यमानादपि लिङ्गाद् व्यञ्जनमभ्युपगतम्। इत्थमेव च ध्वनिकृताऽपि प्रथमोद्द्योते। एवं च व्यञ्ज-कानां साधारण्यं प्रतिपादयतां प्रामाणिकानां ग्रन्थैः सहा-

---

व्यभिचारीणि। साध्यस्याभावस्थले हेतुसत्त्वे व्यभिचारो दोषः। तत्रैव पञ्च-मोल्लास एव तेन काव्यप्रकाशकृता अभ्युपगतमित्यत्रान्वेति। भमेत्यादेः ● संस्कृतच्छाया—

भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन ।
गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन ॥

काचिद् गोदावरीतीरनिकुञ्जे कृतसंकेता तत्रैव कुसुमावचयाय भ्रमता भीरुणा केनचित्साधुना कृतान्तराया वसतौ शुनोऽपि बिभ्यतस्तस्य भीरुत्वमव-गम्य दृप्तसिंहभीत्या गोदावरीतीरे तस्य भ्रमणावरोधमभिव्यञ्जिजिषन्ती विश्रब्धभ्रमणमुखेनैव तं व्याहरति। अत्र वक्तृबोद्धव्यादिवैशिष्ट्यवशाद् भ्रमण-निषेधो व्यज्यते। विपरीतलक्षणया तु न गतार्थता, वक्तृबोद्धव्यप्रकरणाद्यना-लोचयतोऽसहृदयस्य च तादृशभ्रमणनिषेधाप्रतीतेः। लिङ्गज ● लिङ्गं हेतुः लिङ्गि साध्यम्, ज्ञायमानेन लिङ्गेन जन्यं यल्लिङ्गिनो ज्ञानं तदनुमानमिति। व्यक्तिर्व्यञ्जना, यद् व्यञ्जकं तल्लिङ्गम्, व्यङ्ग्यं लिङ्गि साध्यम्, व्यञ्जना अनुमितिः, व्यङ्ग्यस्य ज्ञानमनुमितिरूपमिति वदतः। प्रत्याचक्षाणेन ● खण्डयता, अनुमितिरव्यभिचारिणा व्याप्येन पक्षे वृत्तितया सिद्धेन च हेतुना जायते, व्यञ्जनन्तु व्यभिचारिणा पक्षावृत्तिनापि हेतुनेति व्यञ्जना नानुमितिः। तथाहि अत्रैव भीरुर्धार्मिको वक्तृनायिकोपलब्धसिंहकगोदावरीतीराभ्रमणवान् गृहसमीपभ्रमणात्, इत्यादिरूपेण अनुमातव्यम्। तत्र गृहसमीपभ्रमिणो भीरोरपि गुरोराज्ञया प्रियानुरागादिना च गोदावरीतीरभ्रमणसम्भवेन हेतुर्व्यभिचारी। एवं भीरुत्वे सति सिंहपरिज्ञानवत्त्वहेतुना तादृशतीरभ्रमणावरोधसाधनेऽपि दोषः, नायिकायाः पुंश्चलीत्वज्ञाने तादृशहेतोरप्यसिद्धत्वमित्यलं विस्तरेण। इत्थमेव ● प्रतिपादितमभ्युपगतञ्च। लोचनकृता च सम्यक् तत्रैव विवेचितम्।

साधारण्यं प्रतिपादयतस्तव ग्रन्थस्य विरोधः स्फुटः। किं च यदिदं निश्शेषेत्याद्यवान्तरवाक्यार्थानां वापीस्नान-व्यावृत्तिद्वारेण व्यङ्ग्यासाधारण्य संपाद्यते तत्किमर्थमिति पृच्छामः। व्यङ्ग्यस्य व्यञ्जनार्थमिति चेन्न, व्यञ्जकगता-साधारण्यस्य व्यञ्जनानुपायत्वात्।

औणिद्दं दोब्बल्लं चिन्ता अलसन्तणं सणीससिअम्।
मह मन्दभाअणीए केरं सहि तुह वि परभवइ॥

इत्यादौ साधारणानामेवौन्निद्र्यादीनां वक्त्रादिवैशिष्ट्य-वशादर्थविशेषव्यञ्जकताया अभ्युपगतेः। प्रत्युतासाधा-रण्यस्य व्याप्त्यपरपर्यायस्यानुमानानुकूलतया व्यक्तिप्रति-कूलत्वाच्च।

अथ तटादिघटितत्वेऽपि न निश्शेषेत्यादिवाक्यार्था-नामसाधारण्यम्। सलिलार्द्रवसनकरणकप्रोञ्छनादिनाऽपि तत्संभवादिति चेत्तर्हि वापीस्नानव्यावर्तनेन कः पुरुषार्थः? एकत्रानैकान्तिकत्वस्येव बहुष्वनैकान्तिकताया अपि ज्ञाताया अनुमितिप्रतिकूलत्वाद् व्यक्त्यप्रतिकूलत्वाच्च।

औणिद्दम् ● औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम्। मम मन्दभागिन्याः कृते सखि त्वामपि परिभवति॥ औन्निद्र्यादयः संभोगेन वियोगे कारणान्तरेणापि संभवन्ति इत्यत आह साधारणानामेव ● एवकारेणासाधारण्यस्य व्यावृत्तिः। त्वामपीत्यनेनोभयसाधारण्यस्य स्फुटं प्रतिपत्तेः। वक्तृबोधव्यादिवैशिष्ट्येन कृतसंभोगा दूती इति व्यज्यते। व्याप्त्यपर ● असाधारण्यं व्याप्तिः, व्यक्ति-र्व्यञ्जना, प्रतिकूलशब्देन असाधारणव्यञ्जनास्थले व्यञ्जनैव नोदेतीति सूचितम्। किञ्च व्यञ्जना न केवलमर्थविशेषस्योपस्थानायैवापितु चमत्कारित्वाय असा-धारण्येन अनुमितिविषयत्वापत्तौ चमत्कारापकर्षोऽपि दोषः। वापीस्नानव्यावृत्ता-वपि साधारण्यमाशङ्कते अथ ● तत्संभवात् स्तनतटस्य निश्शेषचन्दनच्युति-मत्त्वात्, कः पुरुषार्थः ● किं प्रयोजनमित्यर्थः। तथा च व्यावृत्तेर्वैयर्थ्यं दोषः, अनैकान्तिकता व्यभिचारः। ज्ञाताया इत्यत्र जाताया इत्यपि पाठः। व्यक्त्य-प्रतिकूलत्वाद् व्यञ्जनाया अविरोधित्वात्। त्वदीयव्याख्यानरीत्या व्यञ्जना-

अपि चात्र हि तदन्तिकमेव रन्तुं गतासीति व्यङ्ग्यशरीरे तदन्तिकगमनं रमणरूपफलांशश्चेति द्वयं घटकम्। तत्र तावत्तदन्तिकं गतासीत्यंशस्य त्वन्मते व्यङ्ग्यत्वं दुरुपपादम्। त्वदुक्तरीत्या विशेषणवाक्यार्थानां निश्शेषेति प्रतिपाद्यानां वाच्यार्थे वापीस्नाने बाधितत्वाद्वाच्यकक्षागतप्रधानवाक्यार्थीभूतविधिनिषेधप्रतिपादकाभ्यां गता न गतेति शब्दाभ्यां विरोधिलक्षणया निषेधस्य विधेश्च प्रतीतेरुपपत्तेः। नहि मुख्यार्थबाधेनोन्मीलितेऽर्थे व्यक्तिवेद्यतोचिता।

यथा 'अहो पूर्णं सरो यत्र लुठन्तः स्नान्ति मानवाः' इत्यत्र कर्तृविशेषणानुपपत्त्यधीनोल्लासे पूर्णत्वाभावे। अथ तदन्तिकगमनस्य लक्षणावेद्यत्वेऽपि रमणस्य फलांशस्य लक्ष्यशक्तिमूलध्वननवेद्यत्वमव्याहतमेवेति चेत्, अधमत्वमप्रकृष्टत्वं तच्च जात्या कर्मणा वा भवति। तत्र जात्यापकर्षे नोत्तमनायिका नायकस्य वक्ति, इत्यादिना सन्दर्भेण भवते-

---

विषयस्यासंभवाद् ध्वनित्वं दूरापास्तमित्याशयेन वचनादित्यन्तेनाह अपि चात्र ● त्वन्मते इति तु अन्येषां मते न दोष इति सूचनाय, दुरुपपादम् मुख्यार्थबाधेन विपरीतलक्षणया गतार्थत्वात्, बाधितत्वादित्यन्तेन मुख्यार्थबाध एव स्मारितः। वाच्यकक्षा ● वाच्यकक्षागतो वाच्यतां गतः, इतो वापीं स्नातुं गतासीति प्रधानीभूतो वाक्यार्थो वाच्यपदार्थसंवलितो विधिरूपो बाधित इति तादृशविध्युपस्थापकगतासीति शब्देन वापीं स्नातुं न गतासीति निषेधस्य लक्षणया प्रतीतिः, एवं विशेषणानां संभोगासाधारण्ये तस्याधमस्यान्तिकं न गतासीति निषेधरूपो वाक्यार्थो बाधित इति तादृशनिषेधोपस्थापकं न गतासीति वाक्यं विपरीतलक्षणया तस्यान्तिकमेव गतासीति विधिरूपं लक्ष्यार्थं प्रत्याययति। वाक्येऽभिधाया अनङ्गीकारदिशा कक्षागत इत्युक्तम्। यथा ● पूर्णत्वाभावे न व्यञ्जनोचिता तथा। पूर्णे सरोवरे कर्तृ विशेषणं लुण्ठनं मुख्यार्थो नोपपद्यते बाधितं भवति तेन पूर्णत्वाभावे लक्ष्यतैव न व्यङ्ग्यतेति सिद्धम्। अधुना रमणरूपफलांशस्यापि अर्थापत्तिगम्यस्य न व्यक्तिवेद्यतेति वक्तुमुपक्रमते अथ ● लक्ष्यस्य विधिरूपस्य तस्याधमस्यान्तिकमेव गतासीत्याकारकस्य व्यञ्जकत्वशक्तिमूलकया व्यञ्जनया

वार्थापत्तिवेद्यतायाः स्फुटं वचनात्। अन्यलभ्यस्य च शब्दार्थतायां अस्वीकृतेः। अन्यच्च यथाकथञ्चिदङ्गीकुरु वात्र व्यञ्जन व्यापारं तथापि न तवेष्टसिद्धिः। वाच्यानां निश्शेषच्युतचन्दनस्तनतटत्वादीनामधमत्वस्य च त्वदुक्तरीत्या प्रकारान्तरेणानुपपद्यमानतया दूतीसंभोगमात्रनिष्पाद्यत्वेन गुणीभूतव्यङ्गत्वप्रसङ्गात्। एवं च उपपत्तिविरोधोऽपि स्फुटतर एव। तस्माद्वाच्यार्थसाधारण्यमेवोचितमति विदग्ध-नायिकानिरूपितानां विशेषणवाक्यार्थानाम्। तथा हि अयि बान्धवजनस्याज्ञातपीडागमे स्वार्थपरायणे स्नानकालातिक्रम-भयवशेन नदीमदीयप्रिययोरन्तिकमगत्वैव वापीं स्नातुमितो ममान्तिकाद् गतासि न पुनस्तस्य परवेदनानभिज्ञतया दुःख-

---

वेद्यत्वमित्यर्थः। इत्यादिना ● नापि स्वापराधपर्यवसायिदूतीसंभोगादिहीनकर्मातिरिक्तेन कर्मणा तादृशं दूतीप्रेषणात् प्राचीन सर्वं सोढमेवेति नोद्घाटनार्हम् अन्यथा स्वयं दूतीसंप्रेषणानुपपत्तेरित्यादय आदिपदेन ग्राह्याः। संदर्भेणेत्यस्यानन्तरं तस्यापीत्यधिकः पाठो मर्मप्रकाशादायाति। रमणस्यापीति तदर्थः। अर्थादापाद्यमानस्य न शब्दार्थतेत्याह अन्यलभ्य ● अनन्यलभ्यो हि शब्दार्थ इति न्यायात्। तुष्यतु दुर्जन इति न्यायेनाप्याह अन्यच्च यथाकथञ्चित् ● न चार्थापत्तेः प्रमाणान्तरत्वानभ्युपगन्तृमते तद्विषये युज्यत एव व्यञ्जनेति वाच्यम् तेषां मते तदर्थस्यानुमेयत्वेन लक्ष्यत्वेन वाऽभ्युपगमात्, लक्ष्यानुमेययोश्च व्यञ्जनाऽविषयत्वात्। इष्टं ध्वनित्वम्, प्रकारान्तरेण संभोगजन्यत्वमन्तरा, मात्रपदेन वापीस्नानादिर्व्यवच्छिद्यते, व्यङ्ग्यस्य रमणस्य वाच्यार्थोपपादकतया वाच्यसिद्धयङ्गत्वम्। निरूपितानां बोधितानाम्। बान्धव ● तस्यैवार्थः स्वार्थेत्यादि, स्वार्थः स्नानकालानतिक्रमणं रमणश्च, इत इत्यस्य ममान्तिकादित्यर्थः। परवेदना मम दुःखम्, अन्तिकं गतासीति अनुवर्तते, कूर्परपार्श्वभागेन स्तनयोराच्छादनेच्छया भुजयोरग्रभागोंऽसद्वये लग्नः। अत एव स्वस्तिकीकृतं भुजलतायुगलम्, मुहुरामर्शाद् असकृत्स्पर्शात्, तथा निर्मृष्टरागः तनुशब्दार्थस्तानवं कार्श्यम्, वक्त्रृ ● वक्त्री विदग्धनायिका बोद्धव्या तादृशी दुश्शीला नीचकर्मा दूती, नायकश्च लम्पटः, स्वमधमपदं प्रवृत्तिस्तस्य, तस्य प्रयोगस्तस्य प्रयोजको दुःखदातृत्वधर्मः, दुःखस्य

दातृत्वेनाधमस्यान्तिकम् । यतो निश्शेषच्युतचन्दनं स्तनयोस्तटमेव नोरःस्थलम् । वापीगतबहुलयुवजनत्रपापारवश्याद्दंसद्वयलग्नाग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहुरामर्शात् । एवं त्वरया सम्यगक्षालनेनोत्तरोष्ठो न निर्मृष्टरागोऽधरस्तु तदपेक्षया गण्डूषजलरदनशोधनाङ्गुल्यादीनामधिकसंमर्दमावहतीति तथा ।

किं च सम्यगक्षालनेन नेत्रे जलमात्रसंसर्गाद् दूरमुपरिभाग एवानञ्जने । शीतवशात्तानवाच्च तव तनुः पुलकितेति । एवं तस्या विदग्धाया गूढतात्पर्यैवोक्तिरुचिता, अन्यथा वैदग्ध्यभङ्गापत्तेः । एवं साधारणेष्वेषु वाक्यार्थेषु मुख्यार्थे बाधाभावात्तात्पर्यार्थस्य झटित्यनाकलनात्कुतोऽत्र लक्षणावकाशोऽनन्तरं च वाच्यार्थप्रतिपत्तेर्वक्तृबोद्धव्यनायकादीनां वैशिष्ट्यस्य प्रतीतौ सत्यामधमपदेन स्वप्रवृत्तिप्रयोजको दुःखदातृत्वरूपो धर्मः साधारणात्मा वाच्यार्थदशायामपराधान्तरनिमित्तकदुःखदातृत्वरूपेण स्थितो व्यञ्जनाव्यापारेण दूतीसंभोगनिमित्तकदुःखदातृत्वाकारेण पर्यवस्यतीत्यालङ्कारिकसिद्धान्तनिष्कर्षः । एतेन 'अधमत्वमपकृष्टत्वं तच्च जात्या कर्मणा वा भवति । तत्र जात्यापकर्षं नोत्तमनायिका नायकस्य वक्ति । नापि स्वापराधपर्यवसायिदूतीसंभोगादिहीनकर्मातिरिक्तेन कर्मणा । तादृशं च

---

१ साधारणस्य ग्रहणात्साधारणात्मा, तत्साधारणस्यैवोपादानम् वाच्यार्थेत्यादि, दुःखस्य साधारण्यं दूतीसंभोगतदतिरिक्तसाधारणनिमित्तकत्वम्, स्थितो वाच्यार्थदशायाम्, दूतीसंभोगो विशेषनिमित्तम्, तन्निमित्तकं दुःखं विशेषः, तादृशदुःखदातृत्वं विशेषो धर्मः स्फुटं प्रकाशयितुम् अनुचितम्, गूढतात्पर्येण चोचितमेव । प्रतिपिपा • प्रतिपादयितुमिष्टं प्रतिपिपादयिषितम् । मनसि दूतीसंभोगप्रयुक्ताधमत्वस्य सत्त्वेऽपि तस्य प्रतिपादनेच्छा नास्तीति भावः ।

दूतीसंप्रेषणात्प्राचीनं सोढमेवेति नोद्घाटनार्हमितीतरव्यावृत्त्या संभोगरूपमेव पर्यवस्यति' इति यदुक्तम्, तदपि निरस्ततरम्। विदग्धोत्तमनायिकायाः सखीसमक्षं तदुपभोगरूपस्य स्वनायकापराधस्य स्फुटं प्रकाशयितुमतितमामनौचित्येन प्राचीनानामेव सोढानामप्यपराधानामसह्यतया दूतीं प्रति प्रतिपिपादयिषितत्वादिति दिक्।

यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम्॥

वाच्यापेक्षया प्रधानीभूतं व्यङ्ग्यान्तरमादाय गुणीभूतं व्यङ्ग्यमादायातिव्याप्तिवारणायावधारणम्। तेन तस्य

॥ अथोत्तमकाव्यनिरूपणम् ॥

उत्तमकाव्यं लक्षयति यत्र व्यङ्ग्यम् ● तत्काव्यं द्वितीयमुत्तमनामकम्। प्रधानत्वरहितस्य चमत्कारिणोऽर्थस्याभिव्यञ्जकं काव्यं द्वितीयमित्यर्थः। एव पदकृत्यं वर्णयति ● वाच्यापेक्षया ● अत्रापि वाच्यपदं लक्ष्यसाधारणबोधकम्, वाच्यापेक्षया=तस्याधमस्यान्तिकमेव गतासीति लक्ष्यार्थापेक्षया प्रधानीभूतम्। स्वातिरिक्तस्य परमप्रधानीभूतस्य विदग्धनायिकाविप्रलम्भरूपस्य व्यङ्ग्यस्य पोषकतया गुणीभूतं यद् व्यङ्ग्यं दूतीसंभोगरूपं तदादाय निश्शेषेत्याद्युत्तमोत्तमकाव्ये उत्तमत्वलक्षणातिव्याप्तिवारणाय अवधारणार्थमेवपदमिति भावः। अत्र मर्मप्रकाशः—वाच्यार्थतः प्रधानमन्यव्यङ्ग्यादप्रधानं यद् व्यङ्ग्यं तदादायेत्यर्थः। अपराङ्गोदाहरणे—

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

इत्यत्रापि वाच्यापेक्षया शृङ्गारस्य न प्राधान्यम्, शोकोत्कर्षकतया शृङ्गाररूपव्यङ्ग्यापेक्षया वाच्यस्यैव चमत्कारित्वात्। एवं सर्वत्रापराङ्गोदाहरणेषूह्यम् इति वदति। पद्यमिदं भारतयुद्धे हतस्य भूरिश्रवसश्छिन्नं पतितं करमादाय तद्वध्वा विलापोक्तिः। परं मर्मप्रकाशस्य एवपदव्यावर्त्यत्वेन, उत्तमकाव्यलक्षणलक्ष्यत्वेन, ध्वनित्वं गुणीभूतव्यङ्ग्यत्वं वाऽभिमतम्? इति स्फोरणीयमेवास्ते। वाच्यापेक्षया शृङ्गारस्य प्राधान्यनिराकरणेन गुणीभूतव्यङ्ग्यत्वस्य प्रतीतेः, परं शृङ्गारस्य तथात्वेऽपि अङ्गिनं करुणमादाय ध्वनित्वस्याखण्डनात्तस्यापि अभिमतत्वमायाति। करुणमादाय ध्वनित्वमस्य साहित्यदर्पणटीकायां,

ध्वनित्वमेव। लीनव्यङ्ग्यवाच्यचित्रातिप्रसङ्गवारणाय चम-

काव्यप्रकाशस्यापराङ्गोदाहरणतयाऽस्य व्याख्याने सुधासागरे प्रदीपोद्योते च शृङ्गारमादाय गुणीभूतत्वं करुणमादाय ध्वनित्वमिति स्फुटं प्रतीयते। तादृश-प्रकाशटीकावासनया अत्र मर्मप्रकाशस्य गुणीभूतव्यङ्ग्यत्वे तात्पर्यमवगच्छन्ती सरला इत्थं वर्णयति यद्यत्र व्यङ्ग्यमप्रधानमेव सदित्यवधारणं न दीयेत तर्हि व्यङ्ग्यमप्रधानं सत् चमत्कारकारणम् इत्यर्थो भवेत्। ततश्च अयं स रशनो-त्कर्षीत्याद्यपराङ्गोदाहरणेषु करुणापेक्षया अप्रधानं शृङ्गारश्चमत्कारकारण-मस्तीति ध्वनित्वस्थानेऽस्याप्युत्तमकाव्यत्वं प्रसज्येत। एवकारनिवेशे तु वाच्यार्था-पेक्षया शृङ्गारस्य प्राधान्यमस्तीति ध्वनिकाव्यत्वमस्याव्याहतम्। अत्र वाच्या-पेक्षया शृङ्गारस्य न प्राधान्यम्, वाच्यस्यैव शोकोत्कर्षकतया चमत्कारित्वादिति नागेशोक्तिस्तु मूलविरुद्धा भ्रमापादिकैव। पूर्ववृत्तशृङ्गारस्य करुणप्रसङ्गे शोकोत्कर्षकतया चमत्कारित्वस्य प्रदीपाद्यङ्गीकृतत्वात् इति। अहं तु मर्म-प्रकाशस्याभिप्रायं सरलेव गुणीभूतत्वेऽवकलयामि समर्थयामि च मर्मप्रकाशोक्तिम्। तथाहि अत्र वाच्यस्य चमत्कारित्वं काव्यप्रकाशटीकादीनामपि अभिमतम्। अत एव प्रदीपे सुधासागरे च शृङ्गारोचितरशनाकर्षित्वादिविलासस्मरणं विगलद्-हृदयत्वाच्छोकावेगमधिकमुपजनयति इत्याद्युपलभ्यते। शृङ्गारस्य चमत्कारित्वे कर्षित्वादिविलासेत्यादेरुपादानं व्यर्थं स्यात्, नहि शृङ्गारो रशनाकर्षित्वेत्यादि-रूपोऽपितु तेन व्यज्यते। शृङ्गारस्तु विभावविनाशान्नाधुना स्वरूपं बिभर्तुमर्हति, अत एव कतिपये शृङ्गारपदस्य खण्डरसे रतौ वा तात्पर्यं वर्णयन्ति। क्वचिच्च शृङ्गारस्य शोकोत्कर्षकत्वम्। उक्तं तत्र शृङ्गारपदं शृङ्गारव्यञ्जकरशनो-त्कर्षादिपरम्। ननु तथापि अङ्गानि वाच्यार्थरूपाण्यपेक्ष्य अङ्गिनः शृङ्गारस्य तदापि प्राधान्यमित्यपि न वाच्यम्। नहि अङ्गित्वं प्राधान्यप्रयोजकमपितु चमत्कारातिशयवत्त्वम्। अतएव काव्यप्रकाशस्य पञ्चमोल्लासव्याख्यातारः "वाच्यापेक्षयाऽचमत्कारित्वमेव व्यङ्ग्यस्य गुणीभूतत्वम्" इति वदन्ति। एवं प्राधान्येन व्यपदेशा भवन्तीत्यस्यापि व्याख्याने "प्राधान्यन्तु चमत्कारप्रयोजकत्वम्" प्रकाशटीकासु असकृदुपलभ्यते। पूर्वोद्धृतं प्रकाशटीकानां करुणमादाय ध्वनित्व-मिति तु करुणमादाय न गुणीभूतव्यङ्ग्यत्वमित्यत्रैव तात्पर्यबोधकमसंगतं वा। अत एव पञ्चमोल्लासे प्राधान्येन व्यपदेशा भवन्तीत्यस्य व्याख्याने शृङ्गारमुखेनैव करुणस्य चमत्कारित्वाद् गुणीभूतव्यङ्ग्यत्वमेव न ध्वनित्वमिति प्रदीपोद्योत-सुधासागरादिषु स्फुटमुक्तम्। सरलायाः शृङ्गारध्वनित्वेनास्य वर्णनं सर्वथा-ऽशुद्धम् न केऽपि तथाऽङ्गीकुर्वते। इति दिक्। लीनव्यङ्ग्य ● लीनमन्तः-प्रविष्टं व्यङ्ग्यं यत्र तादृशे वाच्यचित्रे मध्यमकाव्ये तनयमैनाकगवेषणेत्यादौ

त्कारेत्यादि। यत्तु 'अतादृशि गुणीभूतव्यङ्ग्यम्' इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्वं टीकाकारैर्दत्तम्, तन्न। पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येष्वव्याप्त्यापत्तेः। तेषां गुणीभूतव्यङ्ग्यतायाश्चित्रतायाश्च सर्वालङ्कारिकसंमतत्वात्।

उदाहरणम्—

'राघवविरहज्वालासंतापितसह्यशैलशिखरेषु।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥

वक्ष्यमाणोदाहरणे। तत्र वाच्यचमत्कृतौ व्यङ्ग्यचमत्कृतिर्लीनेति वदयति। अतादृशि ● अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्। इति काव्यप्रकाशकारिका। वाच्यार्थापेक्षया अप्रधाने व्यङ्ग्ये सति गुणीभूतव्यङ्ग्यनामकं मध्यमं काव्यमिति तदर्थः। यच्च प्रकाशादौ मध्यमं तदेवात्रोत्तममिति विवेकः। शब्दचित्रं वाच्यचित्रमिति द्विधा भिन्नं चित्रकाव्यमधमतया परिगणितं काव्यप्रकाशे। तत्र तृतीये अधमकाव्ये व्यङ्ग्यस्याप्रधानतया द्वितीयकाव्यलक्षणातिव्याप्तिवारणाय सारबोधिनीप्रभृतिकतिपयटीकाकाराश्चित्रान्यत्वे सतीति विशेषणमुपाददते। तदनुचितं भवति, यतो वाच्यचित्रं द्विधोपलभ्यते, प्रथमे व्यङ्ग्यं गुणीभूतं वर्तते परं चमत्कारि, यथा पर्यायोक्तसमासोक्तिप्रभृत्युदाहरणानि, तत्र द्वितीयं गुणीभूतव्यङ्ग्यत्वमेव सर्वेषामालङ्कारिकाणामभिमतम्। द्वितीयं यत्र व्यङ्ग्यस्य चमत्कारिता नास्ति तदेव प्रकाशकृतामधमत्वेनाभिमतम्, चित्रान्यत्वनिवेशे उभयविधस्याप्यर्थचित्रस्य व्यावृत्त्याऽव्याप्तिर्जायते। ग्रन्थकारस्तु व्यङ्ग्यस्य चमत्कारित्वविवक्षया अचमत्कारिव्यङ्ग्यकवाच्यचित्रमेव व्यावर्तयति ननु चमत्कारि-व्यङ्ग्यकं तेन न दोषः।

न विस्मर्तव्योऽयमभिसन्धिरस्य ग्रन्थस्य योजने यत् प्रकाशकृतां मते त्रीणि काव्यानि, तत्र यत् प्रथमं द्वितीयश्च तत्तथैवात्र, परं नाममात्रे भेदः। यत् प्रकाशकृतां तृतीयं चित्रनामकं तदेव द्विधा विभज्य तृतीयचतुर्थभेदाभ्यामत्र वर्णितम्।

पूर्ववर्णितां कारिकां प्रदीपादयस्त्वेवं व्याचक्षते—तत्र व्यङ्ग्यपदम् अस्फुटतरातिरिक्तव्यङ्ग्यपरम्। अस्फुटनामके गुणीभूतव्यङ्ग्ये तु अस्फुटमात्रं व्यङ्ग्यं ननु अस्फुटतरम्। अधमकाव्ये तु कुत्रचिद् व्यङ्ग्यं चेदस्फुटतरम्, क्वचिच्च सर्वथैव व्यङ्ग्यविरहः। उदाहरणम् ● उत्तमनामकद्वितीयकाव्यस्येति शेषः। श्रीरामस्य सीताविरहरूपया ज्वालया सन्तापितेषु सह्यनामकपर्वतस्य शिखरेषु शिशिरतौ

अत्र जानकीकुशलावेदनेन राघवः शिशिरीकृत इति व्यङ्ग्यमाकस्मिककपिकर्तृकहनूमद्विषयककोपोपपादकतया गुणीभूतमपि दुर्दैववशतो दास्यमनुभवद्राजकलत्रमिव काममपि कमनीयतामावहति। नन्वेवं प्रागुक्तमाक्षेपगतं मान्द्यमपि नववधूप्रकृतिविरोधादनुपपद्यमानं व्यङ्ग्येनैवोपपाद्यत इति कथमुत्तमोत्तमता तस्य काव्यस्येति चेत्, न। यतो ह्यनुदिनसख्युपदेशादिभिरनतिचमत्कारिभिरप्युपपद्यमानं मान्द्यमिदं प्रथमचित्तचुम्बिनीं विप्रलम्भरतिमप्रकाशयन्न प्रभवति

सुखं शयानाः कपयः श्रीजानकीकुशलमावेदयमानाय हनुमते कुप्यन्ति। क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोप इत्यनेन संप्रदानसंज्ञा। आकस्मिक ● अवाच्यकारणकत्वमाकस्मिकत्वमत्र। कोपोप ● कुप्यन्तीत्यनेन वाच्यस्य कोपस्य साधकतया। यथा दुर्बलस्यापि स्वामिनः पुष्टोऽपि दासो न स्वार्थोऽपितु स्वामिकार्यार्थः स्वामिनो गुणीभूत एवं चमत्कारि अपि व्यङ्ग्यं न स्वपर्यवसायि अपितु वाच्यकोपसाधकतया वाच्यस्य गुणीभूतम्। व्यङ्ग्यं विना कोपकारणानुपस्थितेर्वाच्यार्थस्यापर्यवसानात्। व्यङ्ग्यप्रतीतौ तु राघवशिशिरीकरणद्वारा सह्यशैलस्यापि शिशिरतरत्वप्रतीतौ कपीनामतिशयशीतबाधैव कोपकारणमिति स्फुटं प्रतीयते। इदमेव वाच्यसिद्ध्यङ्गनामकं गुणीभूतव्यङ्ग्यस्य भेदविशेष उच्यते। अत्र व्यङ्ग्यस्य अप्राधान्यं वाच्यापेक्षया वाच्याङ्गत्वमूलकं न तु अपकृष्टचमत्कारेणेति स्फोरयति दुर्दैववशत इत्यादिना। गते ध्वन्युदाहरणे नववधूस्वभावाद् मन्दमेव आक्षेपो युक्तः। उक्तश्च तत्राक्षेपगतं मान्द्यं व्यङ्ग्येन विप्रलम्भेनैवोपपादयितुं शक्यते वियोगकालिकप्रेमातिशयवशान्मन्दमाक्षिपतीति। तथा च तस्यापि व्यङ्ग्यस्याप्राधान्याद् द्वितीयकाव्यत्वमेवापद्यते। यत्र वाच्यं व्यङ्ग्यातिरिक्तेनार्थेनोपपादयितुं शक्यते तत्र न व्यङ्ग्यस्य वाच्याङ्गता तत्र तल्पगताऽपीत्यादौ तु वाच्यमान्द्यस्य अचमत्कारिणाऽपि प्रतिदिनं जायमानेन सख्युपदेशादिनोपपत्तिरिति न व्यङ्ग्यस्य वाच्याङ्गतेत्याशयेनोत्तरयति यतो ह्यनु ●। ननु यदि वाच्यं मान्द्यं सख्युपदेशादिनोपपन्नम्, तदा स्वार्थे पर्यवसन्नं न किंचिदपेक्षत इति व्यङ्ग्यस्यानपेक्षणाद आक्षेपगतमान्द्येन विप्रलम्भरतिर्ध्वन्यत इति प्रागुपपादितो राद्धान्तः पुनरपि नोपपन्न इत्याशङ्कां समाधातुम् "अनतिचमत्कारिभिः" "अप्रकाशयन्" परनिवृतीत्यादि उक्तम्। अयं भावः नह्यनुपपद्यमान एवार्थो व्यञ्जकोऽन्यथाऽसहृदयानामपि

स्वातन्त्र्येण परनिर्वृतिचर्वणागोचरतामाधातुम् । इत्थमेव निःशेषच्युतचन्दनमित्यादिपद्येष्वधमत्वादीनि वाच्यानि व्यङ्ग्यातिरिक्तेनार्थेनापाततो निष्पन्नशरीराणि व्यञ्जकानीति न तत्रापि गुणीभावः शङ्कनीयः । अनयोर्भेदयोरनपह्नवनीयचमत्कारयोरपि प्राधान्याप्राधान्याभ्यामस्ति कश्चित्सहृदयवेद्यो विशेषः । यत्तु चित्रमीमांसाकृतोक्तम्--

'प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा
किमुत सकले याते वाह्नि प्रिय त्वमिहैष्यसि ।

व्यङ्ग्यप्रतीत्यापत्तेरिति चित्रमीमांसाखण्डने सम्यगुपपादितम् । वाच्यार्थस्योपपत्त्यनुपपत्ती तु सहृदयासहृदयासाधारणे । व्यङ्ग्यार्थप्रतीतिस्तु सहृदयताऽऽयत्ता । सहृदयता च चमत्कारिणमेवार्थमनुधावति । तथा वाच्यस्य मान्द्यस्य अन्यदृष्ट्या सख्युपदेशादिनोपपत्तिः सहृदयदृष्ट्या तु यथा चमत्कारोत्कर्षस्तथैव । सख्युपदेशादि नातिशयचमत्कारि, मान्द्यमपि स्वार्थपर्यवसन्नं तथा, किन्तु विप्रलम्भरत्यनुभावतामापन्नं मान्द्यं परमाह्लादमनुभावयति । विप्रलम्भरतिव्यक्तौ मान्द्यमनुभावो विप्रलम्भस्याङ्गतामेव भजमानः कुतः प्राधान्यमावहेत् । प्रथममेव चित्तं चुम्बयन्तीं संबध्नन्तीम् उदयावस्थामापन्नामिति यावत् । परा या निर्वृत्तिराह्लादस्तस्य स्वादश्चर्वणा तद्गोचरतां तद्विषयताम् । यदि प्रकारान्तरेणोपपद्यमानस्यापि वाच्यस्योपपादने व्यङ्ग्यस्याङ्गताऽङ्गीक्रियते तदा सर्वसम्मतं निश्शेषच्युतेत्यादेरपि ध्वनित्वं नोपपद्येतेति प्रतिपादयति इत्थमेव ● व्यङ्ग्यातिरिक्तेन अपराधान्तरकृतदुःखदातृत्वेन, आपाततो यथाकथञ्चिदुपस्थितेन नतु सहृदयतावक्तृवोद्धव्यादिवैशिष्ट्यसहकृतया व्यञ्जनया, अचमत्कारिणा च अर्थेन । निष्पन्नशरीराणि उपपन्नानि वाच्यानीत्यर्थः । प्रथमद्वितीययोः, काव्ययोः साधर्म्यवैधर्म्ये आह अनयोः ● अनपह्नवनीयोऽनपलपनीयः उभयत्रापि व्यङ्ग्ययोश्चमत्कारित्वं साधर्म्यम्, प्रथमे प्राधान्यं द्वितीयेऽप्राधान्यमिति वैधर्म्यं तद्वशाच्च भिन्नत्वेनोपादानम् ।

काचिद् बाला दूरदेशं गन्तुमुद्यतं पतिं गमननिवारणसमीहया वक्ति प्रहरविरतौ ● अप्पय्यदीक्षितस्य गुणीभूतव्यङ्ग्यत्वमत्रेष्टम् । ◦ पण्डितराजस्य तु ध्वनित्वम् । हे प्रिय ! त्वमद्य प्रहरसमाप्तावेव इह मम निकटे आगमिष्यसि वा अह्नो मध्ये मध्याह्ने, वा ततोऽपि मध्याह्नात्परतरेण कालेन यातेन, वा किं सकले दिने समाप्ते उत निश्चयेन । इति इत्थं वाष्पेन सहितानि गलन्ति जलानि येषु तैरालापैः, दिनशतेनासंख्येन दिनेन गम्यं दूरदेशं यातुमिच्छतः प्रियस्य

इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥

इत्यत्र सकलमहः परमावधिस्ततः परं प्राणान्धारयितुं न शक्नोमीति व्यङ्ग्यं प्रियगमननिवारणरूपवाच्यसिद्ध्यङ्गमतो गुणीभूतव्यङ्ग्यम् इति । तन्न । सबाष्पगलज्जलानां प्रहरविरतावित्याद्यालापानामेव प्रियगमननिवारणरूपवाच्यसिद्ध्यङ्गतया व्यङ्ग्यस्य गुणीभावाभावात् । आलापैरिति तृतीयया प्रकृत्यर्थस्य हरणक्रियाकरणतायाः स्फुटं प्रतिपत्तेः । न च व्यङ्ग्यस्यापि वाच्यसिद्ध्यङ्गतात्र संभवतीति तथोक्तमिति वाच्यम् । निःशेषच्युतचन्दनमित्यादावविवाधमत्वरूपवाच्यसिद्ध्यङ्गताया दूतीसंभोगादौ संभवाद् गुणी-

---

गमनम् अवरुणद्धि या धातोः सन्नन्ताच्छतरि यियासत इति षष्ठ्यन्तम् । यत्र वाच्यस्य प्रकारान्तरेणापि सिद्धिर्न तत्र वाच्योपपादकत्वेन संभावितस्यापि व्यङ्ग्यस्य गुणीभूततेति द्विरुक्तम्. वक्ष्यते च अभिधामूलव्यञ्जनाप्रकरणे मृद्वीका रसितेत्यादिपद्योपपादनावसरे । तथा चात्र प्रकारान्तरेणापि गमनहरणवाच्यस्योपपत्तौ न व्यङ्ग्यस्य वाच्योपपादकतया गुणीभूतत्वमित्याशयेनाह तन्न ● सवाष्पेत्यादेः श्रुतानामेवेति शेषः, एवेन उक्तव्यङ्ग्यस्य व्यवच्छेदः । स्फुटं प्रतिपत्तेः ● तथा च वाच्ये वाच्यार्थस्यान्वयोपपत्तौ व्यङ्ग्यस्य वाच्यार्थे हरणे करणतयाऽन्वयोपपादनमनुचितमिति भावः । सम्भावनामात्रेण शङ्कते न च ● । सम्भावनामात्रेण वाच्यसिद्ध्यङ्गताव्यवस्थापने अनिष्टापत्तिमाह निःशेष ● अस्य सम्यगुपपादनं प्रागेव कृतमस्ति । इदमुपलक्षणम्—तदप्राप्तिमहादुःखेत्यादि प्रकाशोद्धृतातिशयोक्तिध्वन्युदाहरणस्यापि गुणीभूतव्यङ्ग्यतापत्तेरिति मृद्वीका रसितेति पद्ये विवेचयिष्यते मूलकृता, उपपादयिष्यते च मया । न च सवाष्पगलज्जलतदुक्तालापानां गमनोत्तरचिरकालावस्थितिनिवारकतयाऽप्युपपत्तेर्व्यङ्ग्यसहितानामेव गमननिवारणसामर्थ्यमिति वाच्यम्, गमनहरणकारणतयोपात्तानाम् उपात्तं गमनहरणं प्रति न सामर्थ्यम् अनुपात्तं चिरस्थितिनिवारणञ्च प्रति सामर्थ्यमिति पक्षपातरहितेन हृदयेन वक्तुमशक्यत्वात् । अन्यथा अपराधान्तराण्युपेक्षात्मकानि नायिकां प्रति नायकस्य निर्दयत्वाद्युपपादकत्वेनापि चरितार्थानीति नीचजात्या

भावापत्तेः। अस्तु वा ततः परं प्राणान्धारयितुं न शक्नोमीति व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गतया गुणीभावस्तथापि नायकादेर्विभावस्य वाष्पादेरनुभावस्य चित्तावेगादेश्च संचारिणः संयोगादभिव्यज्यमानेन विप्रलम्भेन ध्वनित्वं को निवारयेत्।

दूत्या सह सम्भोग एव नीचतरकर्मतया नायकस्याधमत्वोपपादक इति निश्शेषच्युतेत्यादावपि कथन्न वक्तुं शक्यते? तुष्यतु दुर्जन इति न्यायेनाभ्युगम्यापि प्रकारान्तरेण काव्यस्य विप्रलम्भरतिध्वनित्वं व्यवस्थापयति अस्तु वा ० किञ्च गुणीभूतव्यङ्ग्येऽपि चमत्कारित्वमपेक्ष्यते अन्यथाऽधमकाव्यत्वापत्तेः। प्राणधारणाशक्तेः कारणान्तरपूर्वकत्वे तथा न चमत्कारित्वं यथा विप्रलम्भप्रयोज्यतयेति विप्रलम्भस्यैव मुख्यं वाक्यार्थत्वम्, तथा चान्तरालिकव्यङ्ग्यमात्रे तात्पर्यवर्णनं मर्मप्रकाशस्य न शोभते। इत्याशयेन को निवारयेत् ० निवारणे व्यङ्ग्यस्याचमत्कारितया गुणीभूतत्वमपि न स्यादिति भावः। अत्र मर्मप्रकाशश्चेत्थम्—आन्तरालिकव्यङ्ग्यमादायैव ध्वनिगुणीभूतव्यङ्ग्यादिव्यवहारस्योपपद्यमानतया विप्रलम्भेन ध्वनित्वं को निवारयेदिति चिन्त्यम्। अन्यथा "ग्रामतरुणम्" इत्यादिगुणीभूतव्यङ्ग्यीयप्रकाशाद्युक्तोदाहरणानामप्यसंगत्यापत्तौ व्याकुली स्यात्। तत्रापि व्यङ्ग्यसंकेतभङ्गेन वाच्यमुखमालिन्यातिशयरूपानुभावमुखेनैव विप्रलम्भाभासपोषणं न केवलेन संकेतभङ्गेन। तस्याकर्तव्यत्वबुद्ध्यापि सम्भवादिति बोध्यम्। इति इमञ्च मर्मप्रकाशं भाषानुवादोऽप्यनुवदन् दीक्षितमतमेव पुष्णाति।

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥

इदं मध्यमकाव्योदाहरणं काव्यप्रकाशस्य प्रथमोल्लासे। अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वादिति वृत्तिग्रन्थः। अत्रोद्योतः—अत्र व्यङ्ग्येन संकेतभङ्गेन वाच्यमुखमालिन्यातिशयरूपानुभावमुखेनैव विप्रलम्भाभासपोषणं न केवलेन, संकेतभङ्गस्याकर्त्तव्यत्वबुद्ध्यापि संभवादिति तदनतिशायित्वं व्यङ्ग्यस्येति भावः। निःशेषेत्यत्र तु बोध्यदूतीवैशिष्ट्येनाधमपदेन च व्यक्तसंभोगेनैव निर्वेदद्वारा विप्रलम्भपोषकत्वमिति बोध्यम्। पर्यन्तव्यङ्ग्यविप्रलम्भाभासेन तु ग्रामतरुणमित्यस्यापि ध्वनित्वमेव। वाक्यार्थरसयोरन्तरालभवव्यङ्ग्योत्कर्षाऽपकर्षाभ्यामेव ध्वनिगुणीभूतव्यङ्ग्यत्वव्यवस्थितेः। पार्यन्तिकरसादिमादाय ध्वनित्वन्तु सर्वत्रेष्टमेवेति प्राह॥ तत्रेदमवधेयम्—ग्रामतरुणमित्यत्र संकेतभङ्गस्याकर्तव्यत्वबुद्ध्यापि जायमानत्वान्न स्वातन्त्र्येण संकेतभङ्गो विप्रलम्भस्यानुभावोऽपि तु वाच्यमुखेनैवेति तत्र वाच्य-

यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत् तृतीयम् ॥

यथा यमुनावर्णने—'तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी' इति। अत्रोत्प्रेक्षा वाच्यैव चमत्कृतिहेतुः। श्वैत्यपातालतलचुम्बित्वादीनां चमत्कारो लेशतया सन्नप्युत्प्रेक्षा-

---

गुणता व्यङ्ग्यस्य युक्ता। प्रहरविरताविल्यादौ तु प्राणधारणाऽशक्तिरूपं व्यङ्ग्यन्तु स्वातन्त्र्येणापि विप्रलम्भानुभावतां दधत् किमनुरोधेन संदिग्धानुभावभावस्य गमनहरणस्य गुणतां भजेतेति प्रथमव्यङ्ग्यमादायैव ध्वनित्वमस्य निर्वहति। आन्तरालिकव्यङ्ग्येत्यादिमर्मप्रकाशः, पार्यन्तिकेत्याद्युद्योतश्च मतविशेषेण न तु समेषामालङ्कारिकाणां निर्विवादं सिद्धान्तमनुसरति। अन्यथा अलङ्कारध्वनौ अलङ्कारस्यान्तरालिकत्वे तदपेक्षया प्रधानस्य पार्यन्तिकस्य कस्यचिच्चमत्कारिणोऽवश्यं मुख्यवाक्यार्थत्वे तदलङ्करणान्मुख्यालङ्कारत्वोपपत्तौ ब्राह्मणश्रमणादिन्यायेन भूतपूर्वगत्या भाक्तालङ्कारत्वव्यपदेशसंपादनक्लेशोऽभियुक्तानामालङ्कारिकाणां मुधैव स्यात्। तस्मात्तत्र प्रमाणान्तरविषयोऽपि अलङ्कार्यो न प्रकृतवाक्यार्थोऽपितु अलङ्कार एव मुख्यतया वाक्यार्थं इति तेषां सिद्धान्तोऽभ्युपेयस्तथा च पार्यन्तिकस्य ध्वनित्वव्यवहारप्रयोजकत्वमभ्युपेतमेव। तथा च ग्रामतरुणमित्यत्र प्रतीयमानस्यापि विप्रलम्भाभासस्य वाच्यानुभावमुखेनैव चमत्कारित्वमित्यत्रैव प्रकाशकृतां तात्पर्यम्। प्रहरविरताविल्यादौ प्रतीयमाना अनुभावादयो न स्वतश्चमत्कारिणोऽपितु व्यङ्ग्यविप्रलम्भमुखेनैवेति तत्र विप्रलम्भस्य मुख्यवाक्यार्थत्वम्। तदादाय च ध्वनित्वम्। अत एव सर्वथा प्राधान्ये ध्वनित्वमिति प्रथमः कल्पः। वाच्याप्राधान्ये व्यङ्ग्यान्तराङ्गत्वेऽपीत्यनुकल्पः। निःशेषेत्यादौ प्रतीयमानोऽपि विप्रलम्भो न वाक्यार्थं इत्यलं विस्तरेण।

॥ अथ मध्यमकाव्यनिरूपणम् ॥

यत्र व्यङ्ग्यचमत्कारासमानाधिकरण्यं नाम वाच्यचमत्कृतिमपेक्ष्य अस्फुटत्वादिना व्यङ्ग्यचमत्कारस्यापकर्षः। चमत्कारं विना काव्यत्वमेव नाङ्गीक्रियत इति चमत्कारवत्त्वमात्रस्य लक्षणत्वे सर्वत्र काव्येऽतिव्याप्तिः। वाच्यचमत्कारवत्त्वस्यापि तत्त्वे तथैव अन्यत्रापि गुणतया वाच्यचमत्कृतेः सत्त्वात्। व्यङ्ग्यासमानाधिकरणवाच्यचमत्कारवत्त्वस्य लक्षणत्वेऽसम्भव इति न तादृशोऽस्ति

चमत्कृतिजठरनिलीनो नागरिकेतरनायिकाकल्पितकाश्मीर-द्रवाङ्गरागनिगीर्णो निजाङ्गगौरिमेव प्रतीयते। न तादृशोऽस्ति कोऽपि वाच्यार्थो यो मनागनामृष्टप्रतीयमान एव स्वतो रमणीयतामाधातुं प्रभवति। अनयोरेव द्वितीयतृतीय-भेदयोर्जागरूकाजागरूकगुणीभूतव्यङ्ग्ययोः प्रविष्टं निखिल-मलङ्कारप्रधानं काव्यम्।

यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम् ॥

कोऽपि वाच्यार्थ इत्यादिनाऽनुपदमेव वक्ष्यति। परं व्यङ्ग्यस्य यश्चमत्कारस्तद-सामानाधिकरण्यं निवेशितम्। यत्र वाच्यस्य चमत्कृतिमपेक्ष्य व्यङ्ग्यस्य चम-त्कृतिरपकृष्टा तत्तृतीयं काव्यमित्यर्थः। प्रथमद्वितीययोर्व्यङ्ग्यचमत्कृतिरुत्कृष्टा। तृतीये व्यङ्ग्यचमत्कृतिरपकृष्टा। चतुर्थे व्यङ्ग्यचमत्कृतिरेव नास्ति। तनयमैनाक ● हिमालयपुत्रो मैनाकपर्वत इन्द्रकृतपक्षच्छेदनभिया जलधौ प्रविष्ट इति पौराणिकी प्रसिद्धिः। श्वेताद्धिमालयाच्छ्वेता गङ्गा समुद्रे पतति। अतो हिमालयभुजात्वं गङ्गाया उत्प्रेक्ष्यते। तादृशगङ्गाया जलधिप्रवेशप्रयोजनत्वेन तनयमैनाकगवेषणमुत्प्रेक्ष्यते। गवेषणाय लम्बीकृतो जलधिजठरे प्रविष्टो हिम-गिरिभुज इवाचरन्त्याः। उपमानादाचार इति विहितक्यङा वाच्यत्वाद् वाच्योत्प्रेक्षा। अत्र श्वेतपातालतलगामिनी भागीरथी तादृशविशिष्टभुजत्वेनो-त्प्रेक्ष्यत इति मर्मप्रकाशः। त्वादीनाम् ● व्यङ्ग्यानामिति शेषः। हिमालयस्य श्वेतत्वाच्छ्वेतत्वं मैनाकगवेषणेन पातालतलगामित्वञ्च भागीरथ्यां प्रतीयते व्यञ्जनया। जठरे निलीन उत्प्रेक्षाचमत्कृत्या क्रोडीकृतो न पृथक्त्वेनावभासमानः। नागरिकेतरा ग्रामीणा, ग्रामीणत्वेनाधिकलेपनम्, काश्मीरद्रवः केसररसः। स्वतो व्यङ्ग्यस्पर्शं विना। जागरूका ● द्वितीये गुणीभूतस्यापि व्यङ्ग्यस्योत्कृष्टचमत्का-रित्वं जागरूकत्वम्, तृतीये व्यङ्ग्यस्यापकृष्टचमत्कारित्वम् अजागरूकत्वम्। अलंकारगतचमत्कारित्ववत्काव्यमलंकारप्रधानं न तु अलंकारध्वनित्वरूपम्।

॥ अथाधमकाव्यनिरूपणम् ॥

यत्रार्थ ● यत्र प्रधानाया वाचकचमत्कृतेर्वाच्यचमत्कृतिः पोषिका तदधमं

यथा—

'मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ॥'

अत्रार्थचमत्कृतिः शब्दचमत्कृतौ लीना । यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत्पञ्चममधमाधममपि काव्यविधासु गणयितुमुचितम् । यथैकाक्षरपद्यार्धवृत्तियमकपद्मबन्धादि । तथापि रमणीयार्थप्रतिपादकशब्दतारूपकाव्यसामान्यलक्षणानाक्रान्ततया वस्तुतः काव्यत्वाभावेन महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम्, वस्तुस्थितेरेवानुरोध्यत्वात् । केचिदिमानपि चतुरो भेदानगणयन्त उत्तममध्यमाधमभावेन त्रिविधमेव काव्यमाचक्षते । तत्रार्थचित्रशब्दचित्रयोरविशेषेणाधमत्वमयुक्तं वक्तुम् । तारतम्यस्य स्फुटमुपलब्धेः । को ह्येवं सहृदयः सन् 'विनिर्गतं मानदमात्ममन्दिरात्,' 'स

चतुर्थमित्यर्थः । मित्रात्रि ● मित्रः सूर्यः, अत्रिपुत्रश्चन्द्रो नेत्रे यस्य, ऋक्सामयजुर्भिः सह शत्रुता येषां दुष्टानां दैत्यानां तेषां शत्रुभूताय, गोत्रारेरिन्द्रस्य गोत्रजानां देवानां त्राय रक्षकाय, गोत्रात्रे गोपालकाय तुभ्यं शिवाय विष्णवे वा नमो नमः । त्रैङ् पालने धातोः कर्तरि कप्रत्ययेन त्रेति । तृच्प्रत्ययेन त्रातृ इति । लीना ● अभिभूततया पृथक्त्वेन अनवभासमाना, न्यूनतां परिहरति यद्यपि ● एकमेवाक्षरं समानान्येवाक्षराणि यस्मिंस्तद्, एकाक्षरपद्यम्, अर्धवृत्तियमकम्, पद्मबन्धप्रभृतयः । ग्रन्थान्तरेभ्योऽस्योदाहरणानि परिज्ञेयानि । रमणीयार्थ ● रमणीयार्थप्रतिपादकशब्दतारूपं यत्काव्यसामान्यलक्षणं तेनानाक्रान्ततया रमणीयार्थाभावात्काव्यत्वसामान्यविरहेण काव्यभेदस्य दूराऽऽपास्तत्वात् । परम्पराम् अन्धपरम्पराप्रायाम्, वस्तुस्थितेर्वास्तविकस्य । केचित्काव्यप्रकाशकारादयः । रसगङ्गाधरस्य तृतीयम् अर्थचित्रम्, चतुर्थं शब्दचित्रम् ।

विनिर्गतं मानदमात्ममन्दिराद्
भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससंभ्रमेन्द्रद्रुतपातितार्गला
निमीलिताक्षीव भियाऽमरावती ॥

च्छिन्नमूलः क्षतजेन रेणुः' इत्यादिभिः काव्यैः 'स्वच्छन्दोच्छलद्' इत्यादीनां पामरश्लाध्यानामविशेषं ब्रूयात् । सत्यपि तारतम्ये यद्येकभेदत्वं कस्तर्हि ध्वनिगुणीभूतव्यङ्ग्ययोरीषदन्तरयोर्विभिन्नभेदत्वे दुराग्रहः । यत्र च शब्दार्थचमत्कृत्योरैकाधिकरण्यं तत्र तयोर्गुणप्रधानभावं पर्यालोच्य यथालक्षणं व्यवहर्तव्यम् । समप्राधान्ये तु मध्यमतैव ।

इति अर्थचित्रस्य काव्यप्रकाशस्थमुदाहरणम् । यं मानदं हयग्रीवं यदृच्छयाऽपि आत्मगृहाद् विनिर्गतम् अमरावती इन्द्रनगरी उपश्रुत्य ससंभ्रमम् इन्द्रेण पातितमर्गलं यस्याः सा तादृशी सती भिया निर्मीलिताक्षी इव भवति । अत्रापि व्यङ्ग्याया हयग्रीवविषयकरतेश्चमत्कारित्वमाशङ्क्य चित्रमीमांसास्थमुदाहरति ।

स च्छिन्नमूलः क्षतजेन रेणु-
स्तस्योपरिष्टात्पवनावधूतः ।
अङ्गारशेषस्य हुताशनस्य
पूर्वोत्थितो धूम इवावभासे ॥

रणोत्थितो रेणू रुधिरेणाधस्तान्निर्वापितः उपरितनश्च पवनावधूतो धूम इवाभाति, अधोभागे चाङ्गारशेषो वह्निरिव । अत्रार्थवैचित्र्यं स्फुटमेव । शब्दचित्रं काव्यप्रकाशस्थमुदाहरति—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्भश्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिन्द्यादुद्यदुदारदर्दुरदरीदैर्घ्यादरिद्रद्रुम-
द्रोहोद्रेकमयोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥

ऐकाधिकरण्यम् ● एककाव्यवृत्तित्वम् ।

उल्लासः ● रविवर्णनमिदम् अस्य व्याख्यानं रूपकप्रकरणे द्रष्टव्यम् । वृत्त्यनुप्रासप्राचुर्येण ओजोगुणेन प्रसादगुणेन च शब्दस्य चमत्कारिता, रूपकेण हेतुना नाऽलङ्कारेण वाच्यस्य चमत्कारिता । गुणयोः शब्दार्थवृत्तिताया अपि स्वयमङ्गीकाराद् उभयचमत्कृत्याधायकत्वमायाति, शब्दालङ्कारेण शब्दस्य अर्थालङ्कारेण चार्थस्य चमत्कारित्वमित्यत्र तात्पर्यमवसेयम् । वृत्त्यनुप्रासः साहित्यदर्पणे—

अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते ॥

वर्णानां साम्यं वृत्त्यनुप्रासलक्षणम् । ओजोव्यञ्जकवर्णाः प्रसादव्यञ्जकाश्च

यथा—

उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयानां
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
संघातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥

अत्र वृत्त्यनुप्रासप्राचुर्यादोजोगुणप्रकाशकत्वाच्च शब्दस्य प्रसाद-गुणयोगादनन्तरमेवाधिगतस्य रूपकस्य हेत्वलङ्कारस्य वा वाच्यस्य चमत्कृत्योस्तुल्यस्कन्धत्वात्सममेव प्राधान्यम् ।

गुणनिरूपणे मूलकृता वक्ष्यन्ते । प्राचीना उपमेयउपमानारोपं रूपकं मन्वाना नात्र रूपक-मिति वदन्ति । तदा सूर्यरूपे कारणे तत्कार्योल्लासादीनामारोपाद्धेतुरलङ्कारः । साहित्य-दर्पणे—अभेदेनाभिधाहेतुर्हेतोर्हेतुमता सह । इति तल्लक्षणम् । आरोपमात्रं रूपकं ब्रुवाणास्तु रूपकमेवाङ्गीकुर्वन्ति ।

॥ अथ रसस्वरूपनिरूपणम् ॥

तत्र तावद् ग्रन्थसंयोजनोपयोगिनी वेदान्तप्रक्रिया । आत्मा आनन्दस्वरूपः । परमप्रीत्यास्पदत्वात् । यद्यपि साधारणे व्यवहारे अहमानन्द इति नानुभूयते परं जगति यत्रापि प्रीतिर्दृश्यते तत्र सर्वत्र आत्मसम्बन्धादेव जायते यथा स्वीये धने सन्ताने वा न तु परस्य, गुणवत्यपि शत्रावात्मीयत्वाभावाद् विद्वेष एव, अभीष्यते च दुर्गुणस्यापि स्वबालस्य जीवनम् । परमात्मन्यप्यात्मीय एव न तु यवनस्य, प्रीतिर्दृश्यते । तथा च यस्य संपर्कमात्रादन्यत्रानन्दः सोऽवश्यं परमानन्द इत्यवसीयते । एवं स एव स्वयंप्रकाश-स्तत्संबन्धादेवान्यत् प्रकाशते । इदन्त्वनुभूयत एव यन्नेत्रविहीनस्य दीनस्य शतं विद्युतः सूर्यो वा न किमपि करोति तेन च सूर्यादिप्रकाशस्य नेत्रप्रकाशमनुरुध्यैव किंचित्प्रकाशता इत्यवसाय, अन्धस्याप्यन्तःप्रकाशानुभवात् नेत्रादि विहायापि कस्यचित् प्रकाशस्य सिद्धिः, तदात्मप्रकाशेनैव नेत्रादीनां प्रकाशताऽवगमश्च जायते । स च ज्ञानस्वरूप इति कतिपय-प्रमाणैः साधयन्ति वेदान्तिनः । सामाजिकानां तादृशात्मसम्बन्धादेव रत्यादयः परस्था अपि प्रकाश्यन्ते, तदीयानन्दसंवलनाच्च शोकादयोऽपि आह्लादयन्तीति ग्रन्थकारो निरूपयिष्यति ।

एवं युक्त्या विविच्यमाने सिद्धोऽप्यानन्दस्वरूप आत्मा 'अहमानन्दः' इत्याद्य-नुभवपथन्नायातीति आनन्दांशस्यावरकं किमप्यज्ञानं कल्प्यते तदभिप्रायेण सूत्रे वक्ष्यति

आनन्दांशावरणाज्ञानेत्यादि। स चात्मा लाघवादेक एवात एव विभुश्चाङ्गीक्रियते स एव परमात्मा अन्तःकरणादिभिः परिमितवस्तुभिः परिच्छिद्यमानो नानात्वं दधत् परस्पर-सुखदुःखादिभेदेन भिन्नतां गतो जीवरूपतां बिभर्ति। जीवश्च परमानन्दस्वप्रकाशोऽपि आनन्दभिन्नपरिमितजडरूपान्तःकरणविशेषणेन प्रभावितो दुःखी लघुर्जडश्च जायते येन स्वयं किमपि प्रकाशयितुं न प्रभवति। विशेषणस्य कार्येऽपि प्रभावः पतति। स एव च जीवः प्रमाता। प्रमातृत्वं परिमितो धर्म इति वक्ष्यति सूत्रे प्रमुष्टपरिमितप्रमातृत्वादि-निजधर्मेणेत्यनेन। अन्तःकरणं तैजसं परिणामि वस्तु, तेन च प्रभावितस्य जीवस्यापि एकाऽवस्था न संभवति तथा च सुखित्वावस्थायां प्रागतस्य दुःखित्वस्यानुसन्धानं न स्यात्। अनुसंधीयते च पूर्वमहं दुःखी आसम् इत्यादि। किञ्च स्वयं विशेषणेन जडतां नीतः स्वयं जडतरान् विषयान् कथं प्रकाशयेदतो जीवसाक्षी नामाऽपरोऽङ्गीक्रियते। सोऽपि स्वप्रकाशानन्दस्वरूपोऽन्तःकरणोपाधिवशाज्जीवभेदेन नाना। तथापि तत्रान्तःकरणं न विशेषणमपि तु उपाधिः। उपाधिश्च साक्ष्यन्तराद् व्यावृतिमात्रं करोति न तूपधेयस्य कार्येऽन्वेति। तथाचासावन्तःकरणस्य परिणामान्न भिद्यते पूर्वापरौ चानुसन्दधानोऽपरिण-मश्च साक्षी भवति। तस्य स्वयंप्रकाशस्यातिरोधानात् स्वसम्बन्धादन्यः न प्रकाशते। जीवस्य प्रमातुरन्तःकरणस्य प्रभावनिरासे उपाधिमात्रतयाऽवस्थाने जीव एव साक्षी भवति। अत एव सूत्रे वक्ष्यति प्रमुष्टपरिमितेत्यादि। प्रमोषश्च विशेषणनिरासेन साक्षितयोदयः। साक्षिणि आनन्दः प्रकाशते अत एव तत्र तथा वर्णितम्। प्रत्यक्षप्रक्रिया। यथा तडागोदकं प्रणालिकाद्वारा क्षेत्रे नीयमानं चतुष्कोणादिक्षेत्राकृतिं धत्ते तथैव परिणामि अन्तः-करणमिन्द्रियद्वारा प्रवहत् विषयाकृतिं भजते। तदानीमन्तःकरणस्य तिस्रोऽवस्था भवन्ति। एकान्तर्गता यस्याः प्रमाता, अन्या मध्ये दण्डाकारा यस्याः प्रमाणम्, अपरा विषयाकारता यस्याः प्रमितिः प्रमा वेति नामकरणम्। तत्तदन्तःकरणावस्थाभिः परिच्छिन्नं चैतन्यमपि क्रमशस्त्रिधाऽभिधीयते प्रमातृचैतन्यं प्रमाणचैतन्यं विषयचैतन्यञ्चेति। यत्र प्रमाणचैतन्यं विषयचैतन्यञ्चैकदेशकालस्थितं सदभेदमापद्यते तत्र प्रत्यक्षं ज्ञानमिति व्यवहारः। तथाहि अग्निसमक्षे वह्नौ अन्तःकरणस्य परिणामो वह्निदेशं यावज्जायते तेन प्रमाणचैतन्यं वह्निचैतन्यञ्चैकस्मिन् देशे सम्पन्नं तेन वह्निज्ञानं प्रत्यक्षम्। वह्निना चक्षुःसन्निकर्षाभावे तु धूमदर्शनाद् व्याप्तिज्ञानाच्चान्तरेव वह्न्याकारोऽन्तःकरणपरिणामो न तु वह्निदेशे-ऽन्तःकरणस्य गमनम्। तेन प्रमाणचैतन्यमन्तर्वर्तते वह्निचैतन्यन्तु पर्वत इति तयोर्भेदात् परोक्षं वह्निज्ञानम्। सर्वदान्तर्वसताम् अन्तःकरणवृत्तिरूपाणां सुखदुःखादीनां विषयाणां तदाकारपरिणतेश्च सदैव एकदेशस्थतया प्रमाणचैतन्यविषयचैतन्ययोरभेदात् शब्दादिनापि सर्वदा प्रत्यक्षत्वमेव ज्ञानस्य। एते चान्तःकरणधर्माः साक्षिभास्याः कथ्यन्ते। यद्यपि प्रमातुर्जडप्रायत्वात्साक्षिणैव सर्वे विषया अवभास्यन्त इत्यनुपदमेवोक्तम्, तथापि अभक्ष-न्यायेन साक्षिणैव भास्या न तु प्रमाणापेक्षेति तदर्थः। अत एव केचन केवलसाक्षिवेद्यमिति

व्यवहरन्ति। अतः सुखादयो यावत्सत्त्वं प्रत्यक्षा एव न तु कदाचन परोक्षाः। क्वचिच्च शब्दादिना तेषां वृत्तिर्भवन्ती न वार्यते परं तदपेक्षा वार्यते। अत एव 'अन्तःकरणधर्माणां साक्षिभास्यत्वाभ्युपगतेरित्यादि विवरणे वक्ष्यति। सुखादेरिवान्तःकरणधर्मस्य इत्यादेः प्रत्यक्षे प्रमाणापेक्षा नास्तीति तद्भावः। एवमेव स्वप्नतुरगादीनां रङ्गरजतादीनां प्रातिभासिकानां साक्षिवेद्यत्वमवसेयम्। स्वप्नतुरगादयश्च अन्तःकरणस्य परिणामा अन्तःकरणावच्छिन्ने प्रमातृचैतन्य एवाध्यस्ताः प्रमाणमन्तरेणैव प्रमातृचैतन्याऽभिन्नेन साक्षिणैव चैतन्येनावभास्यन्ते। सुखादिप्रत्यक्षमपेक्ष्यैतावानेव विशेषोऽत्र यत् सुखादीनां वस्तुतया विद्यमानत्वेन प्रमाणसंबन्धसंभवात् प्रमाणवृत्तिरपि संभवति, प्रत्यक्षे तस्या अपेक्षा नास्तीति त्वन्यत्। स्वप्नतुरगादयस्तु प्रातिभासिकाः प्रतिभासकालमेवावतिष्ठमानाः प्रत्यक्षात्प्रागसत्त्वेन प्रमाणसंबन्धाभावेन प्रमाणवृत्तेरसंभवः। स्वप्नतुरगादीनां लोकप्रसिद्ध-कारणाभावेऽपि प्रतिभासवशात् कल्प्यमानोत्पत्तिः प्रतिभासान्यकाले कथं तत्सत्त्वं साधयेत्। अतः प्रतिभासकालमात्रसत्त्वं तेषामङ्गीक्रियते तेन च प्रमाणस्पर्शासंभवः। तथा च प्रमाणमन्तरा साक्षिणा भास्यमानस्वरूपं केवलसाक्षिवेद्यत्वमेषां निर्वहत्येव। एवं रङ्ग-रजतमपि। तथाहि शुक्तिशकलमिदन्त्वेनावभासते त्रिकोणनीलपृष्ठादेरभासनात् शुक्तित्वेन न भासते तदा शुक्तित्वप्रकारकाज्ञानवशाद् रजतगतचाकचिक्यादिदर्शनोद्बुद्धसंस्कारसध्रीचीनरजतलोभादिदोषान् अपेक्ष्य शुक्तौ रजतस्य भ्रमात्मकं प्रत्यक्षम्। प्रत्यक्षे च विषय-स्यावश्यंभावाद् रजतोत्पत्तिः कल्प्यते। सा च लोकप्रसिद्धावयवोपादानामभावात् प्रागुक्त-दोषसहकृतशुक्तित्वप्रकारकाज्ञानोपादानकैव। इदमाकारा चक्षुर्द्वाराऽन्तःकरणवृत्तिर्बहिर्वर्तत एव, तद् द्वारान्तःकरणमपि बहिः, तेन च प्रमातृचैतन्यमपि तथा। तदभिन्नं साक्षिचैतन्य-मपि इदमवच्छिन्नचैतन्यनिष्ठशुक्तित्वप्रकारकाज्ञानोपादानकञ्च रजतं साक्षिण्येवाध्यस्तं सत् साक्षात्साक्षिसम्बद्धं प्रत्यक्षं भवति। तथा च तस्यापि केवलसाक्षिवेद्यत्वं स्फुटमेव। अस्यापि प्रातिभासिकस्य शुक्तिरजतस्य प्रत्यक्षात्प्राक् प्रमाणसंबन्धासंभवो ज्ञेयः। एषा प्रक्रिया अलौकिकविभावादीनां सामाजिकैः साक्षात्कृतये ग्रन्थकृद्भिरुद्धरिष्यते। तत्त्वं वाक्यजबुद्धिः। 'तत्त्वमसि श्वेतकेतो' इत्युपनिषद्वाक्यम् प्राग् 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इत्यादिनेश्वरनिरूपणानन्तरं प्रावर्तत। तथा च सर्वज्ञत्वविशिष्टं चैतन्यं तत्पदशक्यार्थः, संबोध्यस्तु श्वेतकेतुरल्पज्ञत्व-विशिष्टचैतन्यरूपस्त्वम्पदार्थः। उभयोः समानविभक्तिकपदेनोपस्थिततया भेदेनान्वयो न संभवतीति जहदजहल्लक्षणया विरुद्धयोर्विशेषणयोः परित्यागेन शुद्धयोश्चैतन्ययोरन्वयबोधो जायते। अन्ये तु विशिष्टान्वयबोधे विशेष्यमात्रस्य लक्षणां विनैवान्वयबोधं मन्वत इति त्वन्यत्। अत्र विशेष्यचैतन्याकारा वृत्तिः शब्दाज्जायमाना शाब्दी एव परं न परोक्षा, यदि स्वयंप्रकाशः साक्षी स्वसम्बन्धमात्रादन्यान् प्रकाशयति तदाऽत्र शुद्धं चैतन्यं साक्षि

तत्र ध्वनेरुत्तमोत्तमस्यासंख्यभेदस्यापि सामान्यतः केऽपि भेदा निरूप्यन्ते—द्विविधो ध्वनिः, अभिधामूलो लक्षणामूलश्च। तत्राद्यस्त्रिविधिः। रसवस्त्वलंकारध्वनिभेदात्। रसध्वनिरित्यलक्ष्यक्रमोपलक्षणाद्रसभावतदाभासभावशान्तिभावोदयभावशबलत्वानां ग्रहणम्। द्वितीयश्च द्विविधः। अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च। एवं पञ्चात्मके ध्वनौ परमरमणीयतया रसध्वनेस्तदात्मा रसस्तावदभिधीयते—

स्वप्रकाशे कथमन्यदपेक्षेत। विषयस्य चैतन्यस्य प्रत्यक्षस्वाभाव्यात्तज्ज्ञानमप्यपरोक्षमिति भावः। जडस्वभावानां तदाकारिता वृत्तिरपि जडेति तत्प्रकाशाय फलव्याप्तिनामा चैतन्यप्रतिविम्बोऽपेक्ष्यते नाम परं स्वयंप्रकाशस्य प्रत्यक्षे न तस्यापेक्षा। वृत्तिव्याप्तिनाम्नी अन्तःकरणस्य वृत्तिस्तु भवतु तेन न स्वप्रकाशत्वं हीयते। तथा च तादृशवाक्यजन्यज्ञानस्य शाब्दत्वं प्रत्यक्षत्वञ्च, एवमेव आनन्दाकारवृत्तेः काव्याज्जायमानाया बोध्यमित्यादि ग्रन्थकृदुदाहरिष्यति। अवतरणव्याख्यानम्।

असंख्य • किञ्चिद्वैचित्र्यमादाय भेदगणनायामनन्ता भेदाः। सामान्यतः • कमपि अनुगमकं सामान्यधर्ममादाय पञ्च भेदाः। तत्राद्यः • अभिधामूलः। नन्वेवं भावादिध्वनीनामसंग्रहात् कथं त्रैविध्यमित्यत आह रसध्वनि • रसवस्तु इत्यादौ अलक्ष्यक्रमस्तु इति पाठे यथा तात्पर्यं तथा ज्ञेयम्, रसध्वनित्वेन तेषामसंग्रहणेऽपि अलक्ष्यक्रमव्यङ्ग्यत्वेन तेषां संग्रह इति भावः। तदाभासपदेन रसाभासभावाभासौ ग्राह्यौ। यत्र व्यङ्ग्यव्यञ्जकयोर्विद्यमानोऽपि क्रमः सूक्ष्मतरत्वेन न लक्ष्यते तत्रालक्ष्यक्रमव्यङ्ग्येत्यादिव्यवहारो भवति। सर्वमिदं सोपपादनं सोदाहरणञ्च मूले व्यक्तीभविष्यति परं साङ्गोपाङ्गरसनिरूपणानन्तरमिति तु ध्येयम्। अर्थान्तरसंक्रमित • शक्यादन्यस्मिन्नर्थे संक्रान्तं वाच्यं यत्र, लक्ष्यतावच्छेदकरूपेण काकस्य शक्यस्य विडालादेरशक्यस्य च यथा लक्षणया काकेभ्यो दधि रक्ष्यतामित्यादौ बोधस्तस्या लक्षणाया नाम। उपादानलक्षणा अजहत्स्वार्था वा नामान्तरम्। इदं लक्षणामूलकध्वनिप्रकरणे अजहत्स्वार्था नाम्नोदाहरिष्यति तत्रैव च जहत्स्वार्था नाम्ना अत्यन्ततिरस्कृतवाच्यापि। लक्ष्यार्थान्वयिनि अन्वयाय अत्यन्तं तिरस्क्रियते वाच्यं यत्र। ध्वनौ • पञ्चप्रकारध्वनिघटको रसध्वनीतिव्यवहारबीजभूतः रसः। प्रथममभिधाने रसगता परमरमणीयता हेतुः।

समुचितललितसंनिवेशचारुणा काव्येन समर्पितैः सहृदयहृदयं प्रविष्टैस्तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलितदुष्यन्तरमणीत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैश्चन्द्रिकादिभिरुद्दीपनकारणैरश्रुपातादिभिःकार्यैश्चिन्तादिभिः सहकारिभिश्च संभूय प्रादुर्भावितेनालौकिकेन

रसमूत्रव्याख्यानम् ।

समुचित ० तत्तद्रसाभिव्यक्त्यनुकूलतया ललितो यः सन्निवेशस्तेन चारुणा। समर्पितैरुपस्थापितैः, ज्ञानद्वारा प्रविष्टैः सहृदयेन सुन्दरकाव्यद्वारा ज्ञातैरित्यर्थः, तस्य शकुन्तलाभिरित्यादावन्वयः। **सहृदयता** ० काव्यार्थभावनानुकूला वासना, तदभावादेव जरन्मीमांसकानां न रसास्वादः। तदुक्तमभियुक्तैः—

सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।
निर्वासनास्तु रङ्गान्तःकाष्ठकुड्यश्मसंनिभाः॥

भावना पुनःपुनरनुसन्धानम्। विगलितं तिरोहितं दुष्यन्तकान्तात्वं येषान्तानि काव्येन तु दुष्यन्तरमणीत्वेनैव शकुन्तला उपस्थाप्यते परं वासनासहितभावनया दुष्यन्तसम्बन्धं तिरोधाय कान्तात्वेनैव शकुन्तला सामाजिकानां हृदि विभाव्यते। लौकिकशकुन्तला तु दुष्यन्तरतेर्विभावः, कान्तात्वमात्रेण विभाव्यमाना शकुन्तला अलौकिकी सामाजिकरतेरपि योग्या विभावत्वस्य। अत एव काव्यसमर्पिता लौकिका विभावादयो भावनया अलौकिकाः क्रियन्ते। कार्यैरनुभावैः सहकारिणो व्यभिचारिणः। **संभूय** ० विभावानुभावसञ्चारिणो मिलिताः सन्तोऽलौकिकं व्यापारं प्रादुर्भावयन्ति। अलौकिकश्च व्यापारः काव्यमात्रे दृष्टोऽन्यत्रानुपलब्धो विलक्षण आनन्दांशावरणस्यापसारकः। केचनैनं चर्वणेति व्यवहरन्ति। अहन्तु प्रत्येमि—भावनैवालौकिको व्यापारः। पूर्वं पृथक् पृथग् विभावादीनां भावनया तेषामलौकिकत्वसंपादनं फलम्, मिलितानां त्रयाणां भावना तु आनन्दांशावरणमज्ञानमपाकरोति। अलौकिकत्वञ्चास्य भावनाव्यापारस्य कारणेन कार्येण च। कारणमस्य अलौकिकं काव्यम्। कार्यञ्च आनन्दांशाज्ञानस्यापाकरणं तदप्यलौकिकमेव। तथाहि अन्येषां वस्तूनां भावनान्तःकरणवृत्तिरूपा विषयांशचैतन्यस्यावरणमवश्यमपाकरोति तेन विषयावच्छिन्नचैतन्यरूपतां गतं साक्षिचैतन्यं विषयं प्रकाशयतीति वेदान्तप्रक्रियायां प्रादर्शि, परं प्रकाशांशस्यैवावरणमपाकरोति न तु आनन्दांशस्यापि अत एव दुःखप्रत्यक्षे चित्प्रकाशाभिव्यक्त्या दुःखं प्रकाशतां नाम परं नानन्दः प्रकाशते। इयन्तु काव्यार्थभावना अलौकिकी चित्प्रकाशेन सहानन्दांशमपि आवरण-

व्यापारेण तत्कालनिवर्तितानन्दांशावरणाज्ञानेनात एव प्रमुष्टपरिमित-प्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपा-नन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः ॥

तथा चाहुः—'व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः' इति । व्यक्तो व्यक्तिविषयीकृतः । व्यक्तिश्च भग्नावरणा चित् । यथाहि

निवारणद्वारा अभिव्यनक्ति, अत एव नियमेन सहृदयानां प्रवृत्तिः । तत्काल ॰ भावनोत्तरकाले भावनया निर्वर्तितम् आनन्दांशस्य आवरणमज्ञानं यस्य प्रमातुः। अज्ञानज्ञानन्तु प्रागुक्तवेदान्त-प्रक्रियातः संपादनीयम् । अज्ञाननाशे विषयचैतन्यावभासे विषयचैतन्ये साक्षिरूपतां गते अन्तःकरणावच्छिन्नचैतन्यरूपः प्रमाताऽपि साक्षिरूपः सम्पद्यते । साक्षिचैतन्यं व्यापकम्, अतः प्रमाताऽपि विशेषणस्यान्तःकरणस्य परिमितत्वप्रभावमुत्सार्य साक्षिरूपतया व्यापकतां भजते अत आह **प्रमृष्ट** ॰ प्रमातृत्वमन्तःकरणेन परिच्छेदः, अत एव अन्तःकरणपरि-माणतया परिमितः, प्रमुष्टः परित्यक्तः परिमितः प्रमातृत्वरूपो निजधर्मो येन प्रमात्रा तादृशेन साक्षिभावमुपगतेन प्रमात्रा । अन्तःकरणेन परिच्छेदावस्थायां विशेषण-जडप्रभावेण जडतां नीत आसीत् परं विशेषणपरित्यागे तु साक्षी स्वप्रकाश एव अत उक्तं **स्वप्रकाशतया** ॰ आत्मनः स्वप्रकाशत्वं वेदान्तप्रक्रियायां प्रदर्शितं न विस्मर्तव्यम् । **वास्तवेन** ॰ सामान्यतस्त्रिधा सुखानि विभाजयितुं शक्यन्ते । वेदान्तप्रक्रियया प्रदर्शित-दिशा आत्मसंबन्धवशात्पुत्रधनादयः प्रथमम्, द्वितीयं प्रियवस्तुप्राप्त्या सुखाकारान्तः-करणवृत्तिर्यदधीनोऽहं सुखी अस्मि इत्याद्यनुव्यवसायः । तदुभयमवास्तवम्, प्रथममात्म-संबन्धोपाधिकतया स्फटिकस्य जपाकुसुमलौहित्यमिव । द्वितीयं वृत्तिरूपमपि जडस्वरूप-मात्माधीनप्रकाशम् । अत आत्मानन्द एव वस्तु आनन्द इत्यभिप्रेत्य वास्तवपदम् । **गोचरीक्रियमाणः** ॰ स्वप्रतिबिम्बितवृत्त्याकारितः पूर्ववर्णितसामग्र्या रत्याकारा वृत्तिरुदेति तत्र स्वच्छायां वृत्तौ आनन्दांशस्य प्रकाशांशस्य च प्रतिबिम्बः । केषाञ्चिन्मते रतिरेव वृत्तिर्न वृत्त्यन्तरमिति त्वन्यत् । **प्राग्विनिविष्ट** ॰ सामाजिकानां हृदि सहृदयता-वशात्प्रागेव वासनारूपेण विद्यमानो रत्यादिरानन्दसंबन्धदशायां रस इति सूचयति । काव्यसमर्पिता शकुन्तलाविषयिणी दुष्यन्तनिष्ठा रतिस्तु सामाजिकरतेरुद्बोधनाय । तथा च सामाजिकरतेरेव सामाजिकैरास्वादः ।

तथाचाहुः ॰ मम्मटभट्टादय इत्यर्थः । **विषयीकृतः** ॰ इत्यस्य गोचरीक्रियमाण इति तदर्थः । आवरणं पूर्वोक्तमज्ञानम्, चित् स्वप्रकाशानन्दरूपमात्मचैतन्यम्, तन्निवृत्तौ, पिधान-निवृत्तौ रत्यादीन् प्रकाशयति स्वयञ्च प्रकाशत इत्यनुवर्तते । ननु केन प्रमाणेन रत्यादीनां

शरावादिना पिहितो दीपस्तन्निवृत्तौ संनिहितान् पदार्थान् प्रकाशयति, स्वयं च प्रकाशते। एवमात्मचैतन्यं विभावादिसंवलितान् रत्यादीन्। अन्तःकरणधर्माणां साक्षिभास्यत्वाभ्युपगतेः। विभावादीनामपि स्वप्नतुरगादीनामिव रङ्गरजतादीनामिव साक्षिभास्यत्वमविरुद्धम्। व्यञ्जकविभावादिचर्वणाया आवरणभङ्गस्य वोत्पत्ति-

---

प्रत्यक्षम्, न च स्वप्रकाशस्वभावस्य साक्षिणः संबन्धमात्रादिति वाच्यम्, विभोस्तस्य सर्वत्र सौलभ्येन जन्मान्धस्यापि चन्द्रप्रभासाक्षात्कारापत्तेरित्यत आह **अन्तःकरण॰** अयमभिसन्धिः मलिनानां बहिस्स्थानां विषयाणां तैजसेनान्तःकरणेन मालिन्यापनोदाय बहिर्विषयदेशे विषयाकारवृत्तय चक्षुरादीनामपेक्षा। मलिने विषये चैतन्यं न प्रतिबिम्बते; स्वच्छायां वृत्तौ च प्रतिबिम्बते तेन साक्षिसंबन्धः। अथवा परिमितस्य प्रमातुर्जीवस्य विषयचैतन्याभेदाय बहिर्वृत्तेरपेक्षा, अन्तःकरणावच्छिन्नो जीवोऽन्तःकरणद्वारैव बहिर्गन्तुं प्रभवेत्। अन्तःकरणधर्मास्तु स्वच्छेऽन्तःकरणे समुत्पन्नास्तादृशप्रमातृचैतन्य एवाध्यस्ताः साक्षात्साक्षिसम्बद्धाः कथङ्कारं स्वप्रत्यक्षाय प्रमाणानि अपेक्षेरन्? तथा च प्रमाणमन्तरा साक्षिणा भास्यत्वमेवैषामिति प्रागुक्ता वेदान्तप्रक्रिया अनुगमनीया। नन्वास्तां सामाजिकान्तःकरणनिष्ठा वासनारूपा रतिः साक्षिभास्या परं मृता शकुन्तला विभावस्तच्चेष्टादयोऽनुभावाः, शकुन्तलादुष्यन्तनिष्ठा व्यभिचारिणोऽपि तयोरन्तःकरणसंबद्धा न तु सामाजिकान्तःकरणसंबद्धाः, सर्वे चैतेऽविद्यमानाः कथं साक्षिणाऽपि भास्यन्ताम्, न चैषां भावनारूपमलौकिकव्यापारमन्तरा अज्ञानावरणाऽपाकरणम् इत्यत आह—**स्वप्नतुरगादीनां॰** स्वप्नतुरगादयोऽन्तःकरणे एव समुत्पद्यन्त इति वेदान्तप्रक्रियायामभिहितमेव। तथा चान्तःकरणधर्मा इव साक्षात्साक्षिणा सबद्धाः साक्षिभास्या इत्यपि प्रतिपादितप्रायम्। दार्ष्टान्तिका विभावादयोऽपि अलौकिकाः सामाजिकान्तःकरणधर्मा एव तेषामन्तःकरणरूपाः स्वप्नतुरगादय इव साक्षात्साक्षिसंबन्धः। लौकिका एव विभावादयो विनष्टा अविद्यमाना असंबद्धा वा, भावनावशादन्तःकरणे समुत्पादिता अलौकिकाः साक्षात्संबद्धा एव अत्र तथा च परम्परासंबन्ध इति भाव इति मर्मप्रकाशे उपलभ्यते परं स्वाप्निकपदार्थप्रक्रियया वेदान्तशास्त्रप्रसिद्धया न कश्चित्परम्परासम्बन्धोऽवभासते। कथञ्चिदेवं स्यात् वैयाकरणसिद्धान्तलघुमञ्जूषायां यया दोषादिघटितया सामग्र्या वेदान्तिनोऽनिर्वचनीयस्योत्पादं मन्वते तयैव सामग्र्या वस्तुनोऽभावेऽपि वस्तुनो ज्ञानमिति बौद्धानुसारिप्रक्रिया प्रदर्शिता तद्रीत्या ज्ञानद्वारकः सम्बन्धः परम्परासंबन्धो वक्तुं शक्यते। यथा स्वप्नादिदोषसहकृतया वासनया स्वप्ने पदार्थानां प्रत्यक्षं तथा भावनासंबन्धद्वारक

विभावादीनां प्रत्यक्षमिति मतविशेषः। परं ग्रन्थकाराभिप्रेतं साधयितुं न प्रभूयते। अन्तःकरणधर्माणां साक्षिभास्यत्वमपेक्ष्य स्वप्नतुरगादीनां रङ्गरजतादीनाञ्च साक्षिभास्यत्वे को विशेषः, रङ्गरजतोत्पत्तिप्रत्यक्षप्रक्रियादिकं च वेदान्तप्रक्रियायामेव निर्दिष्टमवगन्तव्यम्। बहिःस्थस्य साक्षिभास्यस्य दृष्टान्ताय रङ्गरजतस्योदाहरणम्। साक्षिभास्यत्वमात्रेण दृष्टान्तीकरणम्। यथा रङ्गरजतं प्रातिभासिकं प्रतिभासकालमात्रं विद्यते प्रत्यक्षात्प्रागसत्त्वात् प्रमाणसम्बन्धासम्भवात् साक्षिभास्यं तथा विभावादयोऽप्यलौकिका भावनाकालमात्रं ारा भावनातः प्रागसत्त्वेन प्रमाणसम्बन्धासम्भवात् साक्षादन्तःकरणवृत्तयः साक्षात्साक्षिसम्बद्धाः साक्षिभास्या इत्यर्थः। बहिस्स्थसाक्षिभास्यत्वेन दृष्टान्तीकरणे तु अभिप्रायान्तरं ग्रन्थकारस्य समुपजृम्भेत। तथाहि काव्यसमर्पिता शकुन्तला दुष्यन्तरमणीत्वेन विभावो लौकिकः, तच्चेष्टादयश्चित्तवृत्तयश्च लौकिकानुभावव्यभिचारिणः, भावनाबलाच्च साधारणीकृता अलौकिकाः सन्तो नट एव शकुन्तला तस्य चेष्टादयोऽनुभावादयोऽलौकिकव्यापारभावनया सम्भूय भाव्यन्ते इति प्रक्रियायाम् अभिनेतरि शकुन्तलायाः अभिनेतृचेष्टादौ कथं शकुन्तलादिचेष्टानां प्रत्यक्षमिति प्रश्ने रङ्गरजतस्य साक्षिभास्यत्वं दृष्टान्ततां भजेत्। यथा रङ्गस्याज्ञानात् रजतसंस्कारलोभादिदोषवशाद् रङ्गावच्छिन्नचैतन्येऽध्यस्तं रजतं तथा अभिनयपाटवविशेषान्नटत्वस्य तिरोधाने नटावच्छिन्नचैतन्ये तत्तद्विभावानुभावादयोऽध्यस्ताः। यथा च इदमाकारवृत्तिद्वारा इदमवच्छिन्नचैतन्यस्य साक्षिणाऽभेदे सम्पन्ने साक्षिण्येवाध्यस्तस्य रजतस्य प्रत्यक्षम् इदं रजतमित्याकारकम् तथा नटस्येदमाकारवृत्तिद्वारा साक्षिरूपचैतन्य एवाध्यस्तानां विभावादीनाम् इयं शकुन्तला इयं तच्चेष्टेत्याद्याकारकं प्रत्यक्षमित्याभाति। अन्ये तु मतद्वयस्यापि सूचनाय दृष्टान्तद्वयोपादानमिति वदन्ति।

ननु प्राग्विनिविष्टः सामाजिकानां स्थायिभावः पूर्वत एव पश्चाच्च स्थास्यति निजस्वरूपानन्दस्तु सर्वथा नित्य एवेति किमनुरुध्य उत्पन्नो रसो नष्टो वेति व्यवहार इत्याशङ्कायामन्योपाधिनिमित्तारोपमूलक इत्याह = व्यञ्जकविभावा ० अयं भावः—सत्यं पूर्वोक्तौ स्थिरौ न तयोरुत्पत्तिविनाशावभिप्रेक्ष्य तथा व्यवहारः किन्तु स्वप्रकाशानन्दचिदात्मना कदाचिद् रत्यादिर्गोचरीक्रियते तदोत्पन्नो रस इति व्यवहारः। कदाचिच्च न क्रियते तदा नष्टो रस इति व्यवहारः। कदाचिद् गोचरीकरणन्तु आवरणाज्ञानभङ्गस्य कादाचित्कत्वात्, तस्य कादाचित्कत्वन्तु अलौकिक्या व्यञ्जिकायाः सम्मिलितविभावादिचर्वणाया उत्पत्तिविनाशाभ्याम्। तथाच ० स्वाश्रयजन्योत्तरत्वसम्बन्धेन अलौकिकभावनानिष्ठोत्पत्तिविनाशयो रस उपचारः। स्वं भावनानिष्ठावुत्पत्तिविनाशौ तदाश्रयो भावना तज्जन्य आवरणभङ्गस्तदुत्तरत्वं रसस्वरूपस्य। अथवा स्वाश्रयोत्तरत्वसम्बन्धेन आवरणभङ्गनिष्ठोत्पत्तिविनाशयो रस आरोपः। स्वम् आवरणभङ्गनिष्ठावुत्पत्तिविनाशौ तदाश्रय आवरणभङ्गस्तदुत्तरत्वं रसस्य। एतादृशपरम्परासम्बन्धस्य वृत्तिनियामकत्वं दर्शयति।

विनाशाभ्यामुत्पत्तिविनाशौ रसे उपचर्येते। वर्णनित्यतायामिव व्यञ्जकताल्वादिव्यापारस्य गकारादौ; विभावादिचर्वणावधित्वादावरणभङ्गस्य निवृत्तायां तस्यां प्रकाशस्यावृतत्वाद्विद्यमानोऽपि स्थायी न प्रकाशते। यद्वा विभावादिचर्वणामहिम्ना सहृदयस्य निजसहृदयतावशोन्मिषितेन तत्तत्स्थाय्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनः

वर्णनित्यता • येषां मते वर्णा नित्यास्तदा न साक्षादुत्पत्तिविनाशौ तत्र, किञ्च तेषां मते वर्णा एके विभवश्च। एक एव ककारोऽकारो वा तत्र तत्राभिव्यज्यते। परं कश्चित्ककारो मन्दः कश्चित्तारः कश्चिदुत्पन्नो विनष्टो वेति स्वारसिको व्यवहारः। तत्र व्यञ्जकाः कण्ठताल्वादीनां तारा मन्दा उत्पत्तिविनाशशालिनोऽभिघातादिव्यापाराः तादृशव्यापारनिष्ठस्य तारत्वमन्दत्वोत्पत्त्यादेर्वर्णेषु व्यवहारसिद्धये आरोपः। तत्र स्वाश्रयाभिव्यञ्जकत्वं परम्परासम्बन्धः, स्वमुत्पत्तिविनाशौ तदाश्रयस्ताल्वादिव्यापारस्तद्व्यञ्जकत्वं वर्णेषु। ननु आवरणाज्ञाने विनष्टे स्वप्रकाशानन्दस्य सामाजिकवासनारूपस्थायिभावैः सह सर्वदा सम्बन्धसम्भवात् तदवधि सदैव प्रकाशतां रस इत्याशङ्कायामाह विभावादि • विभावादीनां सम्मिलितानां भावनारूपोऽलौकिको व्यापारश्चर्वणा। यावच्चर्वणा तावदेवावरणभङ्गस्तिष्ठति चर्वणायां विनष्टायां पुनरावृणोत्यज्ञानमानन्दांशं स्वप्रकाशश्चातो न स्थायी प्रकाशते। अत्रायमभिसन्धिः—मूलाविद्याया विनाश एव सर्वदा स्वप्रकाशोऽवभासते। मूलाविद्याया विनाशस्तु ब्रह्मसाक्षात्कारोत्तरमेव, न चालौकिकेन काव्यसमर्पितेन व्यापारेण शुद्धब्रह्मसाक्षात्कारोदयोऽन्यथा सर्वथा मुक्तत्वापत्तेः, अपितु मूलाविद्याया अवस्थारूपा अनन्तास्तूलाविद्या अज्ञ नानाम्यस्तत्तद्विभावादिचर्वणया विनश्यन्ति अपरा च आवृणोति स्वप्रकाशानन्दमिति। अस्याः प्रक्रियाया इत्थं निष्कर्षः। दुष्यन्तरमणीत्वादीनां निवृत्तिपुरस्सरं साधारणकान्तात्वेनोपस्थानाय प्रथमा विभावादीनां पृथक्-पृथग् भावना, तदनन्तरम् आवरणापनोदाय समुदितानामलौकिकी द्वितीया भावना। परमत्र प्रक्रियायामानन्दांशावरणविनाशनमपूर्वं नान्यत्र दृश्यते। आनन्दांशावरणविनाशोऽहमानन्द इति प्रभृति प्रमाणजन्यानन्दाकारवृत्त्यैवोचितः। घटाकारवृत्त्या चैतन्यांशस्य प्रकाशेऽपि आनन्दांशस्य प्रकाशो न भवति अन्यथा यत्र यत्र वस्तु प्रकाशेत तत्र तत्र सर्वत्रापि मानन्दः स्फुरेत् न च स्फुरति। यत्र कुत्रापि घटस्य प्रियत्वेन मानं तत्रापि प्रियताकारवृत्त्यैव न तु घटाकारवृत्तिमात्रात्। तथा च विभावाद्याकारकवृत्तिस्वरूपभावनात आनन्दाकारवृत्तिमन्तरा आनन्दांशस्यावरणविनाशमरोचयन्नानन्दाकारवृत्तिमङ्गीकुर्वन् कल्पान्तरमुपस्थापयति। यद्वा • मध्ये व्यापारकल्पनजलाधवायाह यद्वेति मर्मप्रकाशोऽवतारयति तत्र स्फुटं

चित्तवृत्तिरुपजायते। तन्मयीभवनमिति यावत्। आनन्दो ह्ययं न लौकिकसुखान्तरसाधारणः। अनन्तःकरणवृत्तिरूपत्वात्। इत्थं चाभिनवगुप्तमम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादिः स्थायीभावो रस इति स्थितम्। वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्य-

---

समन्वयमेति इति ध्येयम्। अत्रापि इदमवश्यं कल्पनीयं भवति यदानन्दाकारावृत्तिः कुतो जायेत आनन्दरसशब्दादेरभावादतो महिमपदोपादानम्, काव्योत्थविभावादिचर्वणाया एवं माहात्म्यं यत् तादृशपदाभावेऽपि आनन्दाकारां वृत्तिं जनयति, तादृशमाहात्म्ये प्रमाणन्तु आनन्दानुभव एव। सा च चित्तवृत्तिः काव्यव्यञ्जनामूलेति बोध्यमिति मर्मप्रकाशलेखेन तत्सामर्थ्यं व्यञ्जनाया इति प्रतिभाति। भवतु नाम साऽलङ्कारिकैरलौकिकशक्तिरङ्गीक्रियते। व्यञ्जनासहायेन तादृशी चर्वणा आनन्दाकारां चित्तवृत्तिं जनयतीत्यभिप्रायो वा भवेत्। स्वं स्वं सामाजिकानामात्मा। समाधिः सविकल्पकस्तत्र विषयावभासाङ्गीकारात्। निर्विकल्पकसमाधौ आत्ममात्रस्फुरणाङ्गीकारात्। **तन्मयी** ● आनन्दप्रचुराकारा वृत्तिः। अन्यत्रापि तन्मयीभाव आनन्दप्रचुरताप्रयोज्यो दृष्टः। अथवाऽऽलम्बनमयी वृत्तिस्तत्राप्यानन्दप्रचुरत्वं विद्यत एव। अत्र विभावादिचर्वणोत्तरं तत्तत्स्थाय्युपहितानन्दाकारवृत्त्युदयाद् रसास्वादसमये स्थायिन एव वृत्तिविषयता नतु विभावादीनामिति तु ध्येयम्। ननु आनन्दाकारवृत्तिमात्रेण काव्यस्य किं वैशिष्ट्यम्? लौकिकसुखप्रत्यक्षायामपि सुखाकारवृत्तेः समुदयादित्यत आह। **आनन्दो** ● लौकिकसुखाकारवृत्तेर्विषयीभूतं सुखम् अन्तःकरणस्य परिणामरूपवृत्तिरूपम् अयन्त्वानन्दः स्वस्वरूपानन्दो न तु अन्तःकरणवृत्तिरूपः। अनन्त इत्यत्र नञो वृत्त्यान्वयः। अत्रत्यो मर्मप्रकाशो लेखकप्रमादपरिभ्रष्टो न कमप्यर्थं साधयतीति नोद्ध्रियते। तदशुद्धिवशाच्च भाषानुवादस्यापि अपथगामिता तदा तदनुचरन्त्याः सरलायाः किमु वक्तव्यम्, कविशेखरस्यापि नात्र गतिः। संशोधितमर्मप्रकाशविवरणं विस्तरभिया परित्यज्यते। **स्थितम्** ● स्थायिभावो रस इत्यंशे वैमत्यम्। अभिनवगुप्तपादाचार्यो ध्वन्यालोकलोचनकारो यः प्रथमं काव्यरसास्वादपद्धतिं वेदान्तप्रक्रियया अवतारयत् तदनुयायी मम्मटः काव्यप्रकाशकारः। अस्मिन् मते रसः स्थायी भावस्तस्यास्वादस्तु भग्नावरणायाश्चितः सम्बन्ध इति विवेक्तुं शक्यते। अग्रिमपण्डितराजमते स्थायिभावोपहित आत्मानन्दो रसः स एव तदाकारा वृत्तिर्वा आस्वादः। मतान्तरकरणे श्रुतिस्वारस्यमेव। स्वमतमाह—**वस्तुतस्तु** ● वक्ष्यमाणा श्रुतिः "रसो वै सः" इत्यादिः। स्थायिभावस्य विशेष्यत्वं परित्यज्य चितो विशेष्यत्वं सम्पादनीयम् एतावन्मात्रं विशेषः। सर्वथैवेत्यादिस्तूभयमतसाधारण्येन रसस्य नित्यत्वं स्वप्रकाशत्वम् अनित्यत्वमितरभास्यत्वञ्च व्यवह्रियते। प्रथमतृतीययोर्द्वितीयचतुर्थयोस्त्वत्यन्तं विरोधः; विशिष्टस्य रसत्वे परिह्रियते

वच्छिन्ना भग्नावरणा चिदेव रसः। सर्वथैव चास्या विशिष्टात्मनो विशेषणं विशेष्यं वा चिदंशमादाय नित्यत्वं स्वप्रकाशत्वं च सिद्धम्। रत्याद्यंशमादाय त्वनित्यत्वमितरभास्यत्वं च। चर्वणा चास्य चिद्गतावरणभङ्ग एव प्रागुक्ता तदाकारान्तःकरणवृत्तिर्वा। इयं च परमब्रह्मास्वादात् समाधेर्विलक्षणा, विभावादिविषयसंवलितचिदानन्दालम्बनत्वात्। भाव्या च काव्यव्यापारमात्रात्। अथास्यां सुखांशभाने किं मानमिति चेत्समाधावपि तद्भाने किं मानमिति पर्यनुयोगस्य तुल्यत्वात्। 'सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्' इत्यादिः शब्दोऽस्ति तत्र मानमिति चेदस्त्यत्रापि 'रसो वै सः', 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतिः, सकलसहृदयप्रत्यक्षं चेति प्रमाणद्वयम्। येयं द्वितीयपक्षे तदाकारचित्तवृत्त्यात्मिका रसचर्वणोपन्यस्ता सा शब्दव्यापारभाव्यत्वाच्छाब्दी। अपरोक्षसुखालम्बनत्वाच्चा-

---

पूर्वमते विशेषणमादाय स्वमते विशेष्यमादाय। रत्याद्यंश • विशेष्यं विशेषणं वेत्यादिः शेषः। चर्वणा आस्वादः, अस्य रसस्य, आनन्दांशावरणभङ्ग आनन्द एव अभावस्याधिकरणानतिरेकात्। तदाकारा रसाकारा। इयञ्च • रसचर्वणा च परब्रह्मणः साक्षात्कारो यत्र तादृशान्निर्विकल्पकसमाधेः, निर्विकल्पकसमाधिमध्ये निरुपहितस्य ब्रह्मणः साक्षात्कारः, अत्र तु विभावाद्युपहितस्य, संवलितम् उपहितम्। ननु युगपद्वृत्तिद्वयविरोधः, सम्भूय विभावादिभावनारूपवृत्तेरनन्तरमानन्दाकारवृत्तेरुदयात्प्राक्तनविभावादिवृत्तिनाशात् कथं रसाकारवृत्तिदशायां विभावादेर्विषयतेति चेत्सत्यम्, अत्र केचित्—विभावादिवृत्तेरभावेऽपि विभावादिवासनासत्त्वात्तत्संवलितत्वमुक्तम्। समाधौ तु वासनाया अपि तिरोधानं नाशो वेत्याहुः। अन्ये तु विभावोपलक्षिता विभावानुभावसञ्चारिण आदौ यस्य स्थायिभावस्य तादृशस्य विषयस्य संवलनमिति योजयन्ति। अपरे तु विभावादिवृत्त्युत्तरत्वमेव विभावादिविषयसंवलितत्वम्, समाधेः प्राक्क्षणेऽपि न विषयवृत्तिः किन्तु तन्नाश इति व्यवस्थापयन्ति। भाव्या • उत्पाद्या चर्वणा रसस्य, काव्यव्यापारो काव्यार्थभावना अचिन्त्यशक्तिर्व्यञ्जना वा व्यञ्जनेति मर्मप्रकाशो मनुते। अथास्याम् • रसचर्वणायाम्, पर्यनुयोगः प्रश्नः, तैत्तिरीयश्रुतिमुदाहरति 'रसो वै सः', 'स आत्मा रसः', अयं जीवः परमात्मस्वरूपमानन्दं प्राप्यैव आनन्दी भवति, प्रापणमभेदः, आनन्दी आनन्दाकारवृत्तिमान्। तदाकार • स्थाय्युपहितानन्दाकारा। शब्दव्यापार • काव्यव्यापारः

परोक्षात्मिका। तत्त्वं वाक्यजबुद्धिवत्। इत्याहुरभिनवगुप्ताचार्यपादाः। भट्टनायकास्तु—ताटस्थ्येन रसप्रतीतावनास्वाद्यत्वम्। आत्मगतत्वेन तु प्रत्ययो दुर्घटः। शकुन्तलादीनां सामाजिकान्प्रत्यविभावत्वात्। विना विभावमनालम्बनस्य रसादेरप्रतिपत्तेः। न च कान्तात्वं साधारण-

---

काव्यार्थभावना व्यञ्जना वा। सुखालम्बना सुखाकारा, परोक्षाया अपि वृत्तेरपरोक्ष-विषयाकारत्वात् प्रत्यक्षत्वम्, अपरोक्षविषयाणां ज्ञानमप्यपरोक्षमिति प्रागुपपादितं वेदान्त-प्रक्रियायाम्। ननु शब्दव्यापारभाव्यत्वात् परोक्षत्वमेव युज्यते कथं प्रत्यक्षत्वमित्या-शङ्कायामाह। **तत्त्वं** ० प्रत्यक्षत्वञ्च। तत्वं वाक्यजबुद्धेर्यथा प्रत्यक्षत्वं तथा वेदान्त-प्रक्रियायां प्रादर्शि। अत्रापि विभावादीनामनिर्वचनीयोत्पत्तिस्तेषां प्रत्यक्षायावश्यकीति ध्येयम् इति प्रथममतम्।

अथ द्वितीयमतम्

भट्टनायकास्तु ० एते रसविषयकभरतमुनिसूत्रस्य तृतीयाव्याख्यातारो यस्य व्याख्या सांख्यदर्शनानुसारिणीति चिरादालङ्कारिककुले कोलाहलः परं न कश्चिदपि अस्फोरयद्यदस्य का प्रक्रिया सांख्यशास्त्रमनुसरति। न च विचारेऽप्यायाति, कदाचिद-प्रामाणिक एवायं कलहः संभवेत्? कथमपि कल्पनायां मीमांसकमतप्रवेशोऽपि जायेत। भोगपदार्थविचारे कश्चित् सांख्यस्पर्शो विवेचयिष्यते। पूर्वमतात्सामान्यविशेषांशौ ग्रन्थकार एव वक्ष्यति। **ताटस्थ्येन** ० रसस्तावत्स्थायीभावः, ताटस्थ्यमसंबन्धित्वम्, नाहं शकुन्तलाविषयकरतिमान् इति प्रतीतौ रतिः सामाजिकैः कथमास्वाद्यते? ननु भवतु नाम कथमपि शकुन्तलाविषयकरतिमानिति प्रत्यय इत्यत आह। **दुर्घटः** ० दुर्घटत्वं प्रतिबन्धक-प्रतिबद्धत्वम्। शकुन्तला—दुष्यन्तनिष्ठरतेर्विषयो न तु ममेति प्रतिबन्धकेन पराहत-तत्वात्तादृशप्रत्ययो न सम्भवतीति भावः। अविभावत्वमत्र रत्यविषयत्वम्। ननु रति-रेवास्वाद्यतां सा एव रस इत्यत आह। **विना विभावम्** ० निर्विषयस्य रतित्वे प्रमाणाभावः। रसादे रत्यादेः। ननु यथा स्वीयाऽपि कान्ता बालतरुणस्थविरभावैरुपचयाप-चयाभ्याञ्च भिन्नेन शरीरेण विभिन्नापि सती कान्तात्वेन विभावो भवति तथा शकुन्तलाऽपि कान्तात्वेन सामाजिकरतेर्विभाव आस्तामित्याशङ्कते **न च कान्तात्वं** ० विभावः कान्ता, विभावता कान्तायां विभावतावच्छेदकं कान्तात्वम्। दुष्यन्तरतेर्विशेष-विभावतावच्छेदकं दुष्यन्तरमणीत्वं शकुन्तलात्वं वा, सामान्यविभावताया अन्यास्वपि कान्तासु सत्त्वात् साधारणविभावतावच्छेदकं कान्तात्वमित्यभिप्रायेण साधारणेति विभाव-ताया विशेषणम्। वस्तुतस्तु विशेषविभावतैवानुभवसिद्धा न तु अप्रामाणिकी साधारण-विभावता अफला च। किञ्च "अन्यथा स्वस्त्रादेरपि" इत्यादिना भ्रातृरतेर्विशेषभूताया

विभावताच्छेदकमत्राप्यस्तीति वाच्यम् । अप्रामाण्यनिश्चयानालिङ्गितागम्यात्वप्रकारकज्ञानविरहस्य विशेष्यतासंबन्धावच्छिन्न-

विभावताया स्वसरि आपादनं सन्दर्भविरुद्धं स्यात्साधारणविभावतायाः कल्पिताया इष्टापत्तौ बाधकाभावात् । तस्मात्कान्तात्वं साधारणं विभावतावच्छेदकमित्याद्यनुस्वारघटित एव पाठः, अनुस्वारस्तु लेखकप्रमादपरम्परया परिभ्रष्ट इत्यनुमीयते । अत्रापि ● शकुन्तलायामपि । उत्तरमाह—अप्रामाण्य ● या कान्ता इयमगम्येति ज्ञानस्य विशेष्यभूता न भवति सैव विभावः, केवलस्य कान्तात्वस्य विभावतावच्छेदकत्वे तस्य स्वसरि अपि विभावत्वमापद्येत । तस्मादियमगम्येति ज्ञानं यस्यां विशेष्यतासम्बन्धेन नास्ति तद्वृत्तिकान्तात्वं तादृशज्ञानाभावविशिष्टं कान्तात्वमिति यावत्, विभावतावच्छेदकं वक्तव्यम्, तथा च तादृशज्ञानस्यैव विशेष्यतासम्बन्धेन स्वसरि सत्त्वात्तादृशज्ञानाभावविशिष्टस्य कान्तात्वस्यासत्त्वात् स्वसुर्विभावत्ववारणेपि शकुन्तलायामपि तादृशज्ञानस्य तेन सम्बन्धेन सत्त्वाद् विभावत्वानापत्तिः । स्वकान्तायान्तु इयमगम्येति ज्ञानस्य विशेष्यतासम्बन्धेनाभावादिष्टं विभावत्वं समन्वेति । अत्रत्यविशेष्यतासम्बन्धस्य समवायसम्बन्धत्वेन वर्णनं मर्मप्रकाशे समुपलभ्यते परन्तदनर्थापादकं न नागेशमहोदयस्य लेखनीस्पृष्टं भवेदपि तु केनचिदनधिकारिणा पण्डितम्मन्येन कल्पितम् अनुकरोति च तदनधिकारिणो सरलाऽपि अप्रामाण्यनिश्चयानालिङ्गितेत्यस्य प्रामाणिक इत्यत्र तात्पर्यवर्णनं भाषानुवादस्य सरलायाश्च सर्वथाऽशुद्धम्, इयमगम्येति भ्रमात्मकज्ञानस्याप्यत्र ग्राह्यत्वात्, स्वसर्यपि इयमगम्येति ज्ञानविरहदशायाम् इयं गम्येति भ्रमसत्त्वे विभावत्वस्येष्टत्वात्, एवमियमगम्येतिभ्रमदशायां स्वनायिकाया अपि विभावत्वस्यानेष्टव्यत्वाच्च । सर्वत्रैव प्रवृत्तौ निवृत्तौ प्रतिबन्धके प्रतिबन्ध्ये च भ्रमप्रमासाधारणज्ञानत्वस्यैव निवेश इति ध्येयं वाचकैः । अप्राण्यमप्रमात्वं तस्य निश्चय इदं ज्ञानमप्रमेत्याकारकः, तदनालिङ्गितत्वमगम्यात्वप्रकारकज्ञानस्य विशेषणम्, इदं ज्ञानमप्रमेत्याकारकनिश्चये इदम्पदेनाभिलप्यमानं ज्ञानं तादृशनिश्चयेनालिङ्गितं तद्भिन्नं ज्ञानमनालिङ्गितम् । अप्रमात्वनिश्चयाविशेष्यं तादृशनिश्चयविशेष्यत्वाभाववद्वा अगम्यात्वप्रकारकं ज्ञानमित्यर्थः । शकुन्तला अगम्येति ज्ञाने शकुन्तला विशेष्यभूता अगम्यात्वं विशेषणम् अगम्यात्वं प्रकारो यस्मिन् ज्ञाने । तज्ज्ञानगम्यात्वप्रकारकमियमगम्येत्याकारकम्॰ विरहोऽभावः । इयमगम्येति ज्ञानस्य विशेष्यता यत्र वर्तते तत्र विशेष्यतासंबन्धेन तज्ज्ञानं वर्तते, यत्र विशेष्यता नास्ति तत्र विशेष्यतासंबन्धेनावच्छिन्ना प्रतियोगिता यस्यैवंभूतस्तादृशज्ञानाभावो वर्तते । अत्र ज्ञानमस्ति, अत्र च नास्तीत्यादिव्यवहारबलाद् विशेष्यतासम्बन्धस्य वृत्तिनियामकत्वं प्रतियोगितावच्छेदकत्वञ्चाङ्गीकृत्यैवमुक्तम् । विशेष्यतासंबन्धस्य वृत्त्यनियामकत्वे प्रतियोगितानवच्छेदकत्वे च अगम्यात्वप्रकारक-

प्रतियोगिताकस्य विभावतावच्छेदककोटाववश्यं निवेश्यत्वात्। अन्यथा स्वस्रादेरपि कान्तात्वादिना तत्त्वापत्तेः। एवमशोच्यत्वकापुरुषत्वादिज्ञानविरहस्य तथाविधस्य करुणरसादौ। तादृशज्ञानानुत्पादस्तु तत्प्रतिबन्धकान्तरनिर्वचनमन्तरेण दुरुपपादः। स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरेव तथेति चेत्, न। नायके धराधौरेयत्वधीरत्वादेरात्मनि चाधुनिकत्वकापुरुषत्वादेर्वैधर्म्यस्य स्फुटं प्रतिपत्तेरभेदबोधस्यैव दुर्लभत्वात्। किं च केयं प्रतीतिः। प्रमाणान्तरानुपस्थानाच्छाब्दीति चेत्

ज्ञानविशेष्यत्वाभावे तात्पर्यमवसेयम्। अगम्यात्वप्रकारकस्य संशयस्य निश्चयस्य च सत्त्वे विभावत्वस्यानिष्टत्वात्संशयनिश्चयसाधारणज्ञानत्वेन विशेष्यज्ञानस्य निवेशः। स्वकान्तायामिग्मगम्येतिज्ञाने कुतश्चिज्जायमानेऽपि इदं ज्ञानमप्रमेतिनिश्चयदशायामिष्टस्य विभावत्वस्य संपत्तयेऽनालिङ्गितान्तेन ज्ञानं विशेषितम्। इदं ज्ञानं प्रमा न वेति संशयोऽपि इयमगम्येति ज्ञानस्य विभावताप्रतिबन्धकत्वं नापाकरोत्यतो ज्ञानस्य निश्चयत्वेन निवेशः। **अवच्छेदककोटाव०** तादृशज्ञानविरहविशिष्टं कान्तात्वं विभावतावच्छेदकं तद्घटककान्तात्वे तादृशज्ञानविरहो विशेषणम्, विभावतावच्छेदकतावच्छेदकमित्यर्थः। अन्यथा निवेशाभावे। **एवमशोच्यत्व०** करुणरसस्थायिशोको यस्य विनाशादिमुपजीव्य जायमान इष्यते स यदि अतिवृद्धत्वात् संसारविरक्तत्वाद्वा अशोच्यः कुत्सितः पुरुषो वा न स शोकस्य आलम्बनम्, तथा च शोकविभावतावच्छेदकन्तत्र अप्रामाण्यनिश्चयानालिङ्गितं यदशोच्यत्वकापुरुषत्वप्रकारकं ज्ञानं तस्य विशेष्यतासंबन्धावच्छिन्नप्रतियोगिताकेन विरहेण विशिष्टं पुरुषत्वं वाच्यम्, एवमन्यरसादावपि बोध्यम्। **तादृशज्ञान०** अगम्यात्वप्रकारकं ज्ञानम्। **दुष्यन्ता०** अहं दुष्यन्त इत्याकारकज्ञानदशायां दुष्यन्तगम्यायां शकुन्तलायां तादृशज्ञानानुत्पत्तेः। **तथेति०** इयमगम्येति बुद्धेः प्रतिबन्धिका। सामाजिकेषु दुष्यन्ताभेदबुद्धिरेव दुष्यन्तभेदबुद्धया प्रतिबद्धा न प्ररोहेदित्याह **नायके०** दुष्यन्ते पृथ्वीभारवाहकत्वं धीरत्वञ्च, सामाजिकात्मनि आधुनिकत्वं कापुरुषत्वञ्चेति वैधर्म्यमूलकभेदबुद्धिः प्रतिबन्धिका। भाषानुवाददर्शनेन आधुनिककापुरुषत्वादेरिति पूर्वत्वरहितः पाठः प्रतीयते, युक्तश्च तद् आधुनिकत्वविरुद्धस्य चिरन्तनत्वस्य दुष्यन्तेऽप्रतिपादनात् परं मुद्रितपुस्तके त्वसहित एव पाठो दृश्यते। **केयं प्रतीतिः०** सम्पादनीया प्रतीतिर्लौकिकी अलौकिकी वा, आद्ये अहृद्यत्वमिति प्रागननुभवादित्यन्तेन प्रतिपादयति द्वितीये अलौकिकं व्यापारमङ्गीकारयति। प्रतीतिपदेन रसप्रतीतिः, शकुन्तलायाः सामाजिकविभावत्वप्रतीतिः, दुष्यन्ताभेदप्रतीतिर्वा आद्या भाषानुवादेन गृहीता, उपक्रमस्तदनुकूलः। सन्निहितत्वाद्

न। व्यावहारिकशब्दान्तरजन्यनायकमिथुनवृत्तान्तवित्तीनामिवास्या अप्यहृद्यत्वापत्तेः। नापि मानसी, चिन्तोपनीतानां तेषामेव पदार्थानां मानस्याः प्रतीतेरस्या वैलक्षण्योपलम्भात्। न च स्मृतिः, तथा प्रागननुभवात्। तस्मादभिधया निवेदिताः पदार्था भावकत्व-व्यापारेणागम्यात्वादिरसविरोधिज्ञानप्रतिबन्धद्वारा कान्तात्वादिरसानु-कूलधर्मपुरस्कारेणावस्थाप्यन्ते। एवं साधारणीकृतेषु दुष्यन्त-

---

द्वितीया ग्रहीतुं शक्यते, भावकत्वव्यापारेण तस्या अग्रे साधनाद् व्यञ्जनया शाब्दत्व-संभवाच्च। तृतीया तु न ग्रहीतुं योग्या। तस्या अग्रेऽसाधनात्। प्रमाणान्तराणि शब्दातिरिक्तानि। वित्तीनां ज्ञानानाम्, अलौकिकव्यापारमन्तरा अन्यशब्दकाव्यशब्दयो-र्विशेषाभावात् प्रमाणजन्यायाः शाब्द्या बाधिततादृशविभावत्वगोचरत्वासंभवेऽपि प्रमाणा-जन्यया मानस्या शकुन्तला विभावत्वेन गोचरीक्रियतामित्याशङ्कायामाह **नापि मानसी** • तस्या अपि लौकिकत्वादेव। तेषां काव्यप्रतिपादितानाम्, अस्याः शकुन्तलाया विभावत्व-प्रतीतेः, वैलक्षण्यं हृद्यत्वम्। **अननुभवात्** • वैलक्षण्योपलम्भस्याप्युपलक्षणमिदम्। **तस्मात्** • अलौकिकी एषा प्रतीतिस्तदुपायं वर्णयति। अभिधा लक्षणाया अपि उपलक्षिका। भावकत्वं भावनाविशेषः। अगम्यत्वादिप्रकारकं यद् रसप्रतीत्यनुकूल-विभावत्वप्रतीतेर्विरोधि ज्ञानं तस्य प्रतिबन्धोऽनुत्पादस्तद्द्वारा कान्तात्वादिमात्रं रस-प्रतीत्यनुकूलो धर्मस्तेन रूपेण अवस्थाप्यन्ते। पूर्वमतवद् दुष्यन्तरमणीत्वशकुन्तलात्वादि-धर्मास्तिरोहिता भवन्ति शकुन्तला च कान्तात्वमात्रेण सामाजिकानां पुरो भवति तथा च सामाजिकानां विभावतां गच्छति। एतत्सर्वं भावकत्वव्यापारमाहात्म्यम्। **एवं साधारणी** • दुष्यन्तस्य नायकत्वमात्रेण स्वसाधारण्येन, शकुन्तलायाः कान्तात्व-मात्रेण स्वविभावसाधारण्येन, दुष्यन्तशकुन्तलादेशस्य दूरतरस्य देशत्वेन स्वदेश-साधारण्येन, भूतस्य दुष्यन्तादिकालस्य कालत्वेन स्वकालसाधारण्येन, एवं वयोऽवस्थ-योरपि बोध्यम्। अवस्थाने पङ्क्तौ विरते सति भावकत्वव्यापारे अत्र साधारणीकृतानां द्विधोपयोगो दर्शनप्रक्रियाभेदेन। प्रथमं मीमांसकाना भ्रमानङ्गीकारिमतम्। तेषां मते यथा इदम्विशेष्यकरजतत्वप्रकारकं विशिष्टभ्रमं विनापि इदंरजतपदार्थयोर्भेदाग्रह इदं प्रत्यक्षरजतस्मृतिभ्यां सहकृतौ रङ्गरजते रजतार्थिनं प्रवर्तयति, तथा भावकत्वव्यापारेण इयमगम्येति ज्ञानानुत्पादसहकृतया कान्तात्वेन शकुन्तलाभावनया ममेयं विभाव इति ज्ञानं विनैव सामाजिकानां वक्ष्यमाणस्वरूपो भोगः। भ्रमाङ्गीकर्तॄणामन्येषां द्वितीये प्रकारे यथा पूर्ववर्णितसामग्र्या जायमानं रजतत्वप्रकारकेदंविशेष्यकं विशिष्टभ्रमज्ञानमेव रङ्ग-रजते रजतार्थिनः प्रवर्तकं तथा भावकत्वमहिम्ना इयमगम्येति ज्ञान प्रतिबद्धे कान्तात्वेन

शकुन्तलादेशकालवयोवस्थादिषु पङ्गौ पूर्वव्यापारमहिमनि तृतीयस्य भोगकृत्त्वव्यापारस्य महिम्ना निगीर्णयो रजस्तमसोरुद्रिक्तसत्त्वजनितेन निजचित्स्वभावनिर्वृतिविश्रातिलक्षणेन साक्षात्कारेण विषयीकृतो भावनोपनीतः साधारणात्मा रत्यादिः स्थायी रसः । तत्र भुज्यमानो

शकुन्तलाभावना ममेयं विभाव इति विभावत्वप्रतीतिं समुत्पाद्यैव भोगं संपादयति इति । भोगकृत्त्व० भोगं करोतीति भोगकृत् तत्त्वं भोगजनकत्वम् । सांख्यमते आत्मचैतन्यातिरेकेण सर्वे पदार्थाः क्रमशः सत्वरजस्तमसां सुखदुःखमोहात्मकानां सामान्यरूपायाः प्रकृतेः परिणामाः । एकैव नायिका कमपि प्रति रजस्तमसी अभिभूय सत्त्वमात्रोद्रेकेण सुखम् अन्यं प्रति सत्त्वतमसी अभिभूय रजोमात्रोद्रेकेण दुःखम्, कतरच्च प्रतिमोहश्च परिणता भवति । एषा तु प्रकृतिपरिणतिः । असङ्गस्य पुरुषस्य भोगश्च तथा परिणताया बुद्धेर्भेदाग्रहनिबन्धनः स्वस्मिन् प्रतिबिम्बः । प्रकृते तु सत्कर्ममूलकस्य सहृदयतावशोन्मिषितस्य वा सुखसाक्षात्काररूपभोगस्य सम्पादकेन काव्योत्थेन भोगकृत्वव्यापारेण सामाजिकान्तःकरणं रजस्तमसी अभिभूय उद्रिक्तसत्वरूपं सुखाकारेण परिणमते, तादृशे सुखाकारेऽन्तःकरणे तदात्मकृतः पुरुष सुखी अस्मि इति साक्षात्करोति । स एव रसास्वादः । अन्यत्र तु सत्कर्मवशाद् रजस्तमसोरभिभवः सत्त्वस्य चोद्रेकोऽत्र तु काव्यमहिम्नेति विशेषः । तादृशं काव्यमाहात्म्यन्तु सुखानुभवमूलकतया कल्प्यते । अनया रीत्या व्याख्याते एतदभिप्रायेणैव पदयोजनायां काचिन्सांख्यसरणिर्भट्टनायकस्य वर्णितुं शक्यते परं पण्डितराजाक्षराणि वेदान्तप्रक्रियामपि अत्रोपस्थापयन्ति । कतिपयसांख्यदर्शनपुस्तकेषु सुखसाक्षात्काराय वस्तुनामेव सत्त्वसुखाकारेण परिणतिः प्रतिपादिता अन्तःकरणस्य तु न सा निषिद्धा न वा प्रतिपादिता परं पुरुषभोगसंपादनाय बहिर्वस्तुनः सत्वोद्रेकवशादन्तःकरणस्यापि तथा परिणतिरवश्यमपेक्ष्यते पुरुषस्य तेषां मतेऽन्तःकरणेनैव तादात्म्याध्यासो न तु येन केनापि वस्तुना, अतः शकुन्तलायाः सत्त्वसमुद्रेकेऽन्तःकरणस्यापि तथा वर्णितम् । किञ्च नास्ति शकुन्तला किन्तु रसस्वादस्थले कान्तात्वेन तस्या अन्तःकरणपरिणाम एवेति ध्येयम् । **निगीर्णयोः** ० अभिभूतयोः रजस्तमसोः सतोः, जनितेन साक्षात्कारेण, निजस्य सामाजिकात्मनः स्वप्रकाशस्वभावस्य निर्वृत्तिः प्राकट्यम्, तस्य सुखरूपतया विश्रान्तिरवस्थानं तद्रूपेण साक्षात्कारे, भावनोपनीतः साधारणविभावना भावनावशादुद्भूतः नायिकाविशेषानालिङ्गितत्वेन साधारणः सामाजिकानां वासनारूपो रत्यादिः । तथा च स्थायिभाव एव स्वाद्यमानो रसो भवति । आस्वादश्च तादृशसुखाकारसाक्षात्कारसंबन्ध इति निष्कर्षोऽवधेयः । तथा च तादृशभोगरूपसाक्षात्कारस्थायिभावयोर्विशेष्यविशेषणभावे विनिगमनाविरहाद् विविक्तत्वमाह तत्र ० भुज्यमानो

रत्यादिभोगो वेत्युभयमेव रसः। सोऽयं भोगो विषयसंवलनाद् ब्रह्मास्वादसविधवर्तीत्युच्यते। एवं च त्रयोंऽशाः काव्यस्य। 'अभिधा भावना चैव तद्भोगी कृतिरेव च' इत्याहुः। मतस्यैतस्य पूर्वस्मान्मताद्भावकत्वव्यापारान्तरस्वीकार एव विशेषः। भोगस्तु व्यक्तिः। भोगकृत्त्वं तु व्यञ्जनादविशिष्टम्। अन्या तु सैव सरणिः।

भोगरूपसाक्षात्कारेण विषयीक्रियमाणः, रत्यादिविषयको भोगरूपसाक्षात्कारो रत्यादिभोगः। सहृदयप्रवृत्तिप्रयोजकस्वरूपमाह **सोयं भोगः** ० सविधवर्तित्वं सादृश्यम्, तद्घटके भेदेऽन्वयि प्रयोज्यत्वं पञ्चम्यर्थः। निष्कर्षप्रतिपादनमुपक्रमते **एवञ्च** ० अंशा व्यापाराः। **तद्भोगी कृतिः** ० तस्य साधारणविभावत्वेन भावितस्य अभोगस्यापि भोगसंपादनम् अभूततद्भावे च्विः। **विशेषः** ० पूर्वस्मिन्नभिनवगुप्तपादाचार्यमते दुष्यन्तशकुन्तलादीनां विभावादीनां स्वप्नतुरगादिन्यायेन सामाजिकान्तःकरणे अनिर्वचनीयोत्पत्तिं मत्वा आस्वादः कल्पितः, अस्मिंस्तु मते तादृशोत्पत्त्यादिकल्पनामन्तरेणैव भावकत्वव्यापारमहिम्ना विभावास्वादः कल्पितः। ननु कथमेतावानेव विशेषो भोगकृत्वस्यापि अतिरिक्तस्य कल्पनादित्याशङ्कायां तस्या विशेषतां दर्शयति **भोगस्तु** ० व्यक्तिरन्तःकरणवृत्तौ चिदभिव्यक्तिः, व्यञ्जनाद् चिदभिव्यक्तिकरणात् अविशिष्टम् अभिन्नम्। व्यञ्जनादिति पदस्य व्यञ्जनावृत्त्यभिप्रायेण भाषानुवादो दृश्यते अस्ति चेत्सा चैतन्याभिव्यक्तयेऽचिन्त्यशक्तिस्तदा तदपि सम्यक्। यदि तु शब्दद्वारैव नवनवार्थस्योपस्थितये नतु चैतन्याभिव्यक्तये, अतएवानलङ्कारिकास्तां नाङ्गीकुर्वन्ति तदा मम व्याख्यानम्। ग्रन्थस्याभिप्रायस्तु पूर्वमतेऽपि कयाचित्प्रक्रियया चिदभिव्यक्तिः क्रियतेऽनेनापि भोगकृत्वव्यापारेण तदुभयोः समानमिति। **अन्या तु** ० विभावस्य साधारणीकरणम्। चित्संबन्धः, स्थायिनोरसत्वप्रभृतिः।

अथ नव्यमतम्।

अस्य मतस्येत्थमुत्थानम्। काव्यनाटकाभ्यां रसास्वादोऽवश्यं भवति रसश्च स्थायिभावः। दुष्यन्तनिष्ठा शकुन्तलाविषयिणी रतिः स्थायी, तस्य स्थायिनः सामाजिकान्तःकरणसंबन्धाभावात्कथं सामाजिकैरास्वाद्येत येन रसतां यायादित्यनुपपत्तौ सत्यां काव्ये काव्यार्थभावनायाम्वा कमप्यतिशयं मन्वानाः अभिनवगुप्तभट्टनायकादयः शकुन्तलायाः साधारण्यसंपादनपुरस्सरं सामाजिकविभावत्वं संपाद्य सामाजिकैः स्वनिष्ठरत्यादेरेवास्वाद इति योजयन्ति। सर्वा चैषा कल्पना तेषां काव्यार्थभावनामहिमानमालम्ब्यैव। तदा स एव भगवान् काव्यार्थभावनामहिमा एवंकारित्वेन तैरङ्गीक्रियमाणः शकुन्तलाविषयिणीं

दुष्यन्तरतिमेव साक्षात्सामाजिकान्तःकरणैः कथन्नास्वादयेत्, कथं च साधारणसंपादने एव आग्रहीता भवेदिति तेन महिम्ना दुष्यन्तनिष्ठरतिरेव सामाजिकैरास्वाद इत्येव वरं मुधैव साधारण्यवर्णनक्लेश इति मतस्यास्य सारः। अस्य मतस्यासारतायां भाषानुवाद-भूमिकायां कारणचतुष्टयं प्रतिपाद्यते। प्रथममस्य मतस्याप्रचारोऽन्यैरपरिगृहीतत्वादिकम्, द्वितीयं शकुन्तलाविषयकदुष्यन्तनिष्ठरतेरास्वादे सामाजिकैः स्वनिष्ठरतेरनास्वादे निर्वास-नानामपि सभसदां रसास्वादप्रसङ्गः, स्वनिष्ठवासनारूपरत्यादेरास्वादनये तु वासना-रहितानां सुतरां रसास्वादानधिकारिता सिद्धयति। तृतीयं रङ्गरजतवद् रसप्रतीतेर-निर्वचनीयत्वं सहृदयानुभवबाधितम्। नहि रङ्गरजतवद् रसप्रतीतेः कदाचिदपि बाधः, अबाधितस्य कथं रङ्गरजतवदनिर्वचनीयोत्पत्तिः। चतुर्थन्तु रसप्रतीतेर्भ्रमरूपत्वं प्रमाण-शून्यम्, नहि भ्रमज्ञानस्य आनन्दरूपता शास्त्रेण विधीयते नवा कैश्चिदनुभूयते, भवति च रसास्वाद आनन्दसंवलित इत्यभिप्रायकम्। परं सर्वमिदं दर्शनास्वादशून्यत्व-विजृम्भणम्। तथाहि नूतनमिदं कथं प्राचीनग्रन्थेषु प्रचरेत् कथं वा प्राचीनैः परि-गृह्येत? नच कश्चिद् रसगंगाधर इव नूतन आलङ्कारिकग्रन्थ उपलभ्यते यत्रास्या-परिग्रहो दोषः समुत्तिष्ठेत्। समासां व्याख्यानामनन्तरं पण्डितराजेन परिस्फोरित एष पन्थाः केषां कल्पनाप्रौढिपूर्णानां हृदयहारी न भवेत्? द्वितीयन्तु असूयामात्रम्, शकुन्तला-रतेरास्वादजननी सहृयतोल्लासिता काव्यार्थभावना निर्वासनानां कथं संभवेत्? किं निर्वासना अपि सहृदयाः? स्फुटञ्चोक्तं ग्रन्थकृता सहृदयतोल्लासितत्वं भावनायाः। तृतीयमपि अभिनवगुप्तपादादिदर्शनानभिज्ञतावशादेव, तथाहि अभिनवगुप्तमते साधारण्य-संपादनद्वारा शकुन्तलाविषयकरतेः कथञ्चित्सामाजिकान्तःकरणसंबन्धसंपत्तेरपि विभावा-नुभावादीनां सामाजिकान्तःकरणेषु स्वप्नतुरगादीनामिवानिर्वचनीयोत्पत्तिमङ्गीकृत्यैव साक्षात्कारः संपादितः। किंच रङ्गरजतादयः स्वप्नतुरगादयश्च सत्यं बाध्यन्ते परं रङ्ग-रजतस्य स्वप्नतुरगादीनाञ्च प्रतीतिस्तत्रापि न बाध्यते, स्वप्ने तुरगो मया दृष्ट इत्याद्यनु-व्यवसायस्य निद्रानाशेऽप्यनुभवात्, विभावादिचर्वणावधी रसास्वाद इति ग्रन्थकृतोक्त-त्वाच्च। चतुर्थमप्येवमेव आचार्यमतेऽपि विभावादिसंवलितस्यैव स्थायिनः प्रतीती रसप्रतीतिस्तदा तस्या अपि भ्रमत्वं तेषां मतेऽपि। भ्रमज्ञानमानन्द इति कुत्रचिन्नोक्त-ञ्चेत् प्रमाज्ञानमानन्द इत्यपि नोक्तम्, ज्ञानमानन्द इत्युक्तं तदा भ्रमज्ञानस्याप्यानन्दता आगतैव। एकमेव चैतन्यं भ्रमत्वसंपादकवृत्तौ प्रमावृत्तौ चाभिव्यक्तं भवति तच्चानन्द इत्यलं विशेषविवेचनेन। इदमप्यवधेयं भाषानुवादभूमिकामधीयानेन यत्पण्डितराजो-द्धृतानामेकादशरसास्वादमतानां विकासक्रमं परिकल्प्य क्रमशः प्राकट्यमुपवर्णितं भूमिकायाम्, परमाधुनिकप्रचलितलेखशैलीमनुरुध्य रोचकमात्रं तन्नतु प्रामाणिकम्, न क्रमशः आवि-र्भूतेषु आलङ्कारिकग्रन्थेषु तेन क्रमेण तेषां मतानां प्रतिपादनमुपलभ्यते किन्तु कतिपय-मतानि कल्पनाप्रकारभेदेन ग्रन्थकृतैवोद्भावितानि। अस्त्वेतत्।

नव्यास्तु—काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना कल्पित-दुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादि-विषयकरत्यादिरेव रसः। अयं च कार्यो दोषविशेषस्य। नाश्यश्च तन्नाशस्य। स्वोत्तरभाविना लोकोत्तराह्लादेन भेदाग्रहात्सुखपद-

---

रस इत्येतत्पर्यन्तस्य संक्षिप्तः सारांशः। रसस्यास्वादः सहृदयसामाजिकः काव्य-श्रवणेन अभिनयदर्शनेन वा यथावृत्ति विभावानुभावादीन् व्यञ्जनया दुष्यन्तनिष्ठां शकुन्तला-रतिञ्च जानाति, ज्ञात्वा भावयति, सहृदयतावशाद् भावना चैवं परिपक्वा भवति येन रङ्गे रजतज्ञानमिव अहं दुष्यन्तः शकुन्तलाविषयकरतिमान् इति साक्षात्कारो जायते स एव साक्षात्कारो रसास्वादः, वेदान्तप्रक्रियायां प्राक्प्रदर्शितदिशा अनिर्वचनीयरजतो-त्पत्तिरिव तस्य चित्ते शकुन्तलाविषयकरतिरुत्पद्यते सा एव नूतना जायमाना रती रसः। यथा रजतोत्पत्तौ चाकचिक्यलोभादयो दोषा वर्णितास्तथा च भावनाविशेष एव दोषः। इति। गृहीतायामित्यस्य सामाजिकैरिति शेषः। ननु रङ्गस्य रङ्गत्वेन ज्ञान-दशायां यथा तत्र रजतावभासो न जायते तथा नाहं दुष्यन्त इति सामाजिकानां ज्ञान-सत्त्वात्कथं तेषु दुष्यन्ते प्रसिद्धा शकुन्तलारतिर्गृह्यतामित्यत आह कल्पितदुष्यन्तत्व॰ अय भावः—भावनादोषवशाद् नाहं दुष्यन्त इति भेदज्ञानं न भवति अहं दुष्यन्त इति भ्रमश्च जायते। शब्दार्थन्त्वनुपदमेव वक्ष्यति। स्वात्मनि सामाजिकात्मनि, यथा रजतोत्पत्तौ शुक्तित्वरङ्गत्वादिप्रकारकमज्ञानं कारणं तथात्र तादृशरत्यादेरुत्पत्तौ दुष्यन्त-भेदाज्ञानं कारणं, अवच्छिन्ने आवृते, शुक्तिशकल इव आत्मनि रजतखण्ड इव रत्यादि-रित्यन्वयः, इवशब्दस्य देहलीदीपकन्यायेनोभयत्रान्वयः। अनिर्वचनीयः॰ सत्त्वेन असत्त्वेन च निर्वचनानर्हः, सच्चेत् सर्वदा प्रतीयेत अयं च विभावादिभावनासमकालमेवा-वभासते नान्यस्मिन् काले, असच्चेत् शशविषाणवत्कदापि नानुभूयेतात उभाभ्यां विलक्षणोऽनिर्वचनीयः। साक्षिभास्यस्वरूपं प्राक्प्रकटितमवसेयम्, वेदान्तिनये सर्वत्रैव भ्रमस्थले वस्तूत्पत्त्यैव प्रत्यक्षमिति हृदयम्। अयञ्च॰ सामाजिकहृदये समुत्पन्नो रत्यादिः, तन्नाशस्य भावनाविशेषरूपदोषनाशस्य, स्वोत्तरभाविना आस्वादरूपेण, आह्लादे लोकोत्तरत्वञ्च काव्यार्थभावनामहिम्ना भग्नावरणचिदानन्देन आचार्यमतवद्गोचरीक्रिय-

व्यपदेश्यो भवति। स्वपूर्वोपस्थितेन रत्यादिना तदग्रहात्तद्रतित्वेनैकत्वाध्यवसानाद्वा व्यङ्ग्यो वर्णनीयश्चोच्यते। अवच्छादकं दुष्यन्तत्वमप्यनिर्वचनीयमेव। अवच्छादकत्वं च रत्यादिविशिष्टबोधे विशेष्यतावच्छेदकत्वम्। एतेन दुष्यन्तादिनिष्ठस्य रत्यादेरनास्वाद्यत्वान्न रसत्वम्। स्वनिष्ठस्य तु तस्य शकुन्तलादिभिरतत्संबन्धिभिः कथमभिव्यक्तिः। स्वस्मिन् दुष्यन्ताद्यभेदबुद्धिस्तु बाधबुद्धिपराहतेत्यादिकमपास्तम्। यद्यपि विभावादीनां साधारण्यं प्राचीनैरुक्तं तदपि काव्येन शकुन्तलादिशब्दैः शकुन्तलात्वादिप्रकारकबोधजनकैः प्रतिपाद्यमानेषु शकुन्तलादिषु दोषविशेषकल्पनं विना दुरुपपादम्। अतोऽवश्यकल्प्ये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धिरपि

माणत्वादेव। गोचरतादशायां रतिचिदानन्दयोर्भेदाग्रहः। **स्वपूर्वो** • स्वं सामाजिकान्तःकरणवृत्तिर्नूतनो रत्यादिः, तत्पूर्वोपस्थितो दुष्यन्तादिनिष्ठो व्यञ्जनया गम्यमानः। तदग्रहो भेदाग्रहः, एकत्वाध्यवसायोऽभेदनिश्चयः, कल्पितेन • दुष्यन्तत्वेनावच्छादिते आत्मनि इत्युक्तन्तत्रावच्छादके दुष्यन्तत्वे किं कल्पितत्वमित्याह **अवच्छादक** • रङ्गरजतवत्सामाजिकात्मनि दुष्यन्तत्वमुत्पन्नमिति भावः। **विशिष्टबोधे** दुष्यन्तोऽहं शकुन्तलाविषयकरतिमान् इत्याकारके बोधे शकुन्तलाविषयकरतिः प्रकारः दुष्यन्तत्वविशिष्टः सामाजिकात्मा विशेष्यः, विशेष्यता तादृशात्मनि विशेष्यतावच्छेदकं दुष्यन्तत्वम्, सरला तु किञ्चिदबुध्वैव व्याख्याति। **एतेन** • शकुन्तलाविषयकरतिमान् इत्याकारे बोधे रतेर्दुष्यन्तत्वस्य च सामाजिकात्मन्युत्पादेन, दुष्यन्तबुद्धेः सम्पादनेन च अपास्तमित्यनेनान्वयि अनास्वाद्यत्वादित्यस्य सामाजिकैरिति शेषः, तदपि संबन्धाभावात्, सामाजिकानामेव रसास्वादः, स्वनिष्ठस्य सामाजिकनिष्ठरत्यादेः, बाधबुद्धिर्नाहं दुष्यन्त इति बुद्धिः। **दुरुपपादम्** • दुष्यन्तरमणीत्वशकुन्तलात्वादिविशेषधर्मपुरस्कारेण काव्यमुपस्थापयति तेन रूपेण बोधो न भवेदनुपस्थितकान्तात्वेन बोधो भवेदित्यादि दुरुपपादम्, भावनादोषस्तु विशेषधर्मपुरस्कारेण बोधं प्रतिबध्नातीति दोषस्य प्रतिबन्धकता प्राचां मतेनापि आयाति। **दोषविशेषे** प्रतिबन्धकविशेषे, बुद्धिरपि दुष्यन्तत्वोत्पत्तिद्वारेति शेषः। नन्वेवं प्रभृतिजनयन्तीत्यन्तेन करुणे व्यभिचारशङ्कया रसस्य आनन्दरूपतासन्देहं सोपपादनं

सूपपादा। नन्वेवमपि रतेरस्तु नाम दुष्यन्त इव सहृदयेऽपि सुखविशेषजनकता, करुणरसादिषु तु स्थायिनः शोकादेर्दुःखजनकतया प्रसिद्धस्य कथमिव सहृदयाह्लादहेतुत्वम्। प्रत्युत नायक इव सहृदयेऽपि दुःखजननस्यैवौचित्यात्। न च सत्यस्य शोकादेर्दुःखजनकत्वं क्लृप्तं न कल्पितस्येति नायकानामेव दुःखम्, न सहृदयस्येति वाच्यम्। रज्जुसर्पादेर्भयकम्पाद्यनुत्पादकतापत्तेः। सहृदये रतेरपि कल्पितत्वेन सुखजनकतानुपपत्तेश्चेति चेत्। सत्यम्। शृङ्गारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योऽपि यदि केवलाह्लाद एव सहृदयहृदयप्रमाणकस्तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वाल्लोकोत्तरकाव्यव्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम्। अथ यद्याह्लाद इव दुःखमपि प्रमाणसिद्धं तदा प्रतिबन्धकत्वं न कल्पनीयम्। स्वस्वकारणवशाच्चोभयमपि भविष्यति। अथ तत्र कवीनां कर्तुम्; सहृदयानां च श्रोतुम्, कथं प्रवृत्तिः। अनिष्टसाधनत्वेन निवृत्तेरुचितत्वात्। इति चेत्। इष्टस्याधिक्यादनिष्टस्य च न्यूनत्वाच्चन्दनद्रवलेपनादाविव प्रवृत्तेरुपपत्तेः। केवलाह्लादवादिनां तु प्रवृत्तिरप्रत्यूहैव। अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभाव्यात्। न तु दुःखात्। अत एव भगवद्भक्तानां

निरस्यति नन्वेवम् **नायक इव** ● सीतामनुशोचति रामे इव। **नायकानामेव** ● विभावमनुशोचतां रामादीनामेव, सहृदयपदेन सामाजिकसहृदयः। **रज्जुसर्पा** ● सत्य एव सर्पो भयं जनयेत् नतु रज्जौ अनिर्वचनीयः सर्पः, परं सोऽपि भयं जनयति अतः सत्यस्येवाऽसत्यस्यापि तादृशकार्यजनकता, प्रकृतप्रक्रियायामपि दोष इत्याह **सहृदये** ● कल्पितत्वेन असत्यत्वेन। केवलाल्हादो दुःखेनामिश्रित आनन्दः, कार्यस्य केवलाल्हादस्यानुभवसिद्धस्यानुरोधेन कारणस्य काव्यार्थभावनामाहात्म्यस्य, काव्यार्थभावनाविशेषः कारुण्यसम्पादकसामग्रीतो जायमानस्य दुःखस्योत्पत्तिं प्रतिबध्नाति, आल्हादजनकत्वन्तु रसान्तरसाधारणम्। **स्वस्वकारण** ● शोकवशाद् दुःखम्, अन्यरसास्वादसामग्रीत आह्लादः, **अप्रत्यूहा** ● अनिष्टसाधनत्वाभावात्। जात्वपि ईषदपि तदारोपेऽपि शोकादि-

भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते। न हि तत्र जात्वपि दुःखानुभवोऽस्ति। न च करुणरसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपे यद्याह्लादस्तदा स्वप्नादौ संनिपातादौ वा स्वात्मनि तदारोपेऽपि स स्यात्। आनुभविकं च तत्र केवलं दुःखम्। इतीहापि तदेव युक्तमिति वाच्यम्। अयं हि लोकोत्तरस्य काव्यव्यापारस्य महिमा, यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति। विलक्षणो हि कमनीयः काव्यव्यापारज आस्वादः प्रमाणान्तरजादनुभवात्। जन्यत्वं च स्वजन्यभावनाजन्यरत्यादिविषयकत्वम्। तेन रसास्वादस्य काव्यव्यापाराजन्यत्वेऽपि न क्षतिः। शकुन्तलादावगम्यात्वज्ञानोत्पादस्तु स्वात्मनि दुष्यन्ताभेदबुद्ध्या प्रतिबध्यते' इत्याहुः। परे तु 'व्यञ्जन-

---

मतः कस्यचिदारोपेऽपि स आल्हादः, इहापि काव्यनाटकस्थलेऽपि, तदेव शोकादिमद्दशरथारोपे दु.खमेव। अनुभवात् ● प्रत्यक्षादिप्रमाणजन्यमनुभवमपेक्ष्य काव्यार्थभावनावशाज्जायमानोऽनुभवरूप आस्वादो विलक्षणः। ननु काव्यव्यापारेण काव्यार्थभावना जन्यते नतु रतेरास्वाद इति चेदाह जन्यत्वञ्च ● परम्परया जन्यत्वमिति, स्वं काव्यव्यापारस्तज्जन्या या भावना तज्जन्यो रत्यादिस्तद्विषयक आस्वादः काव्यव्यापारज आस्वादोऽभिहितः। तेन एतादृशजन्यत्ववर्णनेन। इत्याह। इदमपि मतं स्थायिभावस्यैव रसत्वादि परं नायकनायिकानिष्ठस्यैव नतु सामाजिकनिष्ठस्येति पूर्वस्माद्विशेषः। चतुर्थमतेन सह भावनाया दोषत्वकल्पना नव्यमतस्य समाना अन्या विलक्षणा प्रक्रिया।

इति नव्यमतम्।

अथ चतुर्थं मतम्

परे तु ● अस्मिन्मते बोधस्य रसत्वं नतु स्थायिन इति पूर्वस्मात्मतक्रमाद्विशेषः, रसो रसास्वादश्चैक एव। अहं शकुन्तलाविषयकरतिमद्दुष्यन्त इत्याद्याकारको बोधो रसः, एतादृशो बोधो भावनारूपदोषवशादेव भ्रमात्मको जायते इति स्वीकरोति परमनिर्वचनीयख्यातिं नाङ्गीकरोति तदा वेदान्तप्रक्रियां विहाय कया प्रक्रियया भ्रमं सम्पादयतीति न निश्चीयते केवलं विलक्षणविषयताशाली इत्येव वक्ति, तत्र विषयतायां वैलक्षण्यं किमिति न प्रतिभासते। प्रायः समेषां दार्शनिकानां दोषवशाद् भ्रमोपपादनाय विभिन्ना प्रणाली वर्तते यथा नैयायिकानामन्यथाख्यातिः बौद्धानामात्मख्यातिः,

व्यापारस्यानिर्वचनीयख्यातेश्चानभ्युपगमेऽपि प्रागुक्तदोषमहिम्ना स्वात्मनि दुष्यन्तादितादात्म्यावगाही शकुन्तलादिविषयकरत्यादिमदभेदबोधो मानसः काव्यार्थभावनाजन्मा विलक्षणविषयताशाली रसः। स्वाप्नादिस्तु तादृशबोधो न काव्यार्थचिन्तनजन्मेति न रसः। तेन तत्र न तादृशाह्लादापत्तिः। एवमपि स्वस्मिन्नविद्यमानस्य रत्यादेरनुभवः कथं नाम स्यात्। मैवम्। नह्ययं लौकिकसाक्षात्कारो रत्यादेः, येनावश्यं विषयसद्भावोऽपेक्षणीयः स्यात्। अपि तु भ्रमः। आस्वादनस्य रसविषयकत्वव्यवहारस्तु रत्यादिविषयकत्वालम्बनः' इत्यपि वदन्ति। एतैश्च स्वात्मनि दुष्यन्तत्वधर्मितावच्छेदकशकुन्तलादिविषयकरतिवैशिष्ट्यावगाही, स्वात्मत्वविशिष्टे

अन्येषां सत्ख्यातिः। अन्यथाख्यात्या आत्मख्यात्या वाऽस्योपपादनं संभवति परं द्वयोः प्रक्रियाप्रदर्शने महान् ग्रन्थविस्तरः पाठकानां क्लेशश्चेति तत्परित्यज्यते। शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति योगसूत्रलक्षितस्य विकल्पज्ञानस्यापि नात्रावसरः। काव्यप्रकाशप्रतिपादितेन श्रीशङ्कुकसम्मतेन चित्रतुरगादिन्यायेन नट एव दुष्यन्ताभेदबुद्धिः संभवति नतु सामाजिके। यदि सामाजिकेऽपि संभवेत्तदा स एवोपाय आस्थीयताम्। आचार्यमतविवरणप्रकरणे वैयाकरणसिद्धान्तलघुमञ्जूषाप्रक्रिया प्रदर्शिता तत्रापि इदं निर्वहेदिति ध्येयं परं तन्नातिप्रसिद्धम्। विषयाभावेऽपि विषयज्ञानमिति तदभिप्रायः। **प्रागुक्तदोषः** ॰ भावनाविशेषो दोषः। **अभेदबोधो** ॰ दुष्यन्तोऽहं शकुन्तलाविषयकरतिमान् इत्याकारकः, आत्मनि दुष्यन्तस्य रत्यादिमतश्चाभेदावगाही। प्रमाणाजन्यत्वप्रतिपत्तये मानस इति। **तु भ्रमः** ॰ दोषवशादेव विषयसद्भावाभावेऽपि भ्रमज्ञानमिति लघुमञ्जूषा प्रक्रिया। नैयायिकनये अविद्यमानरत्यादिना सह संयुक्तसमवायादेर्मनसः सन्निकर्षविरहेऽपि रत्यादेरनुमितिस्वरूपज्ञानलक्षणासंबन्धसत्त्वाद् भ्रमात्मकं प्रत्यक्षम्। तेषां शुक्तौ रजतप्रत्यक्षे रजतज्ञानमेव ज्ञानलक्षणानामा अलौकिकः सन्निकर्षः। सैवान्यथाख्यातिरिति ध्येयम्। ननु रत्यादिमदभेदबोधस्यैव रसत्वेनास्मिन् मते रसास्वादः कीदृश इत्याह **आस्वादनस्य** ॰ रस एव आस्वादः स्थायिभावस्य रसत्वमुपचर्य रसविषयक आस्वाद इत्यौपचारिकः, स्थायिन आस्वाद एव रस इति भावः। विशेष्यविशेषणभावस्यात्र कश्चिन्नियामको नास्तीति त्रिविधोऽपि बोधो रस इत्याह **एतैश्च** ॰ प्रथमो दुष्यन्तोऽहं शकुन्तलाविषयकरतिमान्, द्वितीयोऽहं, शकुन्तलाविषयकरतिविशिष्टदुष्यन्तः, तृतीयश्च अहं दुष्यन्तः शकुन्तलाविषयकरतिमांश्चेत्या-

शकुन्तलादिविषयकरतिविशिष्टदुष्यन्ततादात्म्यावगाही, स्वात्मत्व-विशिष्टे दुष्यन्तत्वशकुन्तलाविषयकरत्योर्वैशिष्ट्यावगाही, वा त्रिविधोऽपि बोधो रसपदार्थतयाभ्युपेयः। तत्र 'रतेर्विशेषणीभूतायाः शब्दादप्रतीतत्वाद्व्यञ्जनायाश्च तत्प्रत्यायिकाया अनभ्युपगमाच्चेष्टादिलिङ्गकमादौ विशेषणज्ञानार्थमनुमानमभ्युपेयम्।

कारकः। सरला तु अशुद्धं व्याख्यातीति ध्येयम्। प्रथमे शकुन्तलाविषयकरतेर्धर्मस्य दुष्यन्तत्वविशिष्टाहंपदार्थः सामाजिकात्मा धर्मी धर्मिता तस्मिन् धर्मितावच्छेदकं दुष्यन्तत्वं वैशिष्ट्यं च मतुपाऽभिलप्यमानः संबन्धः, अवगाही विषयकः, दुष्यन्तत्वं धर्मितावच्छेदकं यस्यैवंभूतो धर्मः शकुन्तलारतिस्तत्संबन्धविषयको बोधः प्रथमः। प्रथमं दुष्यन्तत्वस्य आत्मनि भानं तदनन्तरं दुष्यन्तत्वविशिष्टे आत्मनि रतिसंबन्धज्ञानमिति भावः। रतिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकं दुष्यन्तत्वमिति यावत्। द्वितीये बोधे रतिर्दुष्यन्ते विशेषणं रतिविशिष्टश्च दुष्यन्तस्तादात्म्येनाहम्पदार्थात्मनि विशेषणम्। रतिः साक्षादात्मनि न भासत इति विशेषः, रतिनिष्ठप्रकारतानिरूपिता विशेष्यता दुष्यन्ते नतु आत्मनि, दुष्यन्तनिष्ठप्रकारतानिरूपिता विशेष्यता आत्मनि तदवच्छेदकं स्वात्मत्वम्, प्रथमं विशिष्टे वैशिष्ट्यावगाहि, द्वितीयं विशिष्टस्य वैशिष्ट्यावगाहि। तृतीयश्चैकत्र द्वयमिति रीत्या चोच्यते आत्मनि दुष्यन्तत्वं शकुन्तलारतिश्च विशेषणम्, अत्र रतिनिष्ठप्रकारतानिरूपितविशेष्यताया, अवच्छेदकं स्वात्मत्वं नतु दुष्यन्तत्वम्, दुष्यन्तनिरूपितविशेष्यताया अवच्छेदकं स्वात्मत्वम्, प्रथमे दुष्यन्तत्वस्य धर्मितावच्छेदकतया रतेश्च प्रकारतया भानम्, द्वितीये दुष्यन्तस्य प्रकारतया रतेश्च प्रकारतावच्छेदकतया भानम्, तृतीये दुष्यन्तत्वस्य रतेश्च प्रकारतयैव भानमिति ध्येयम्। सावच्छिन्ना विशेष्यता धर्मितोच्यते। सावधानोऽपि भाषानुवादो दुर्गमेऽत्र किञ्चित्प्रास्खलदेवेति ज्ञेयम्। **शब्दादप्रतीतत्वात्** ० अभिधालक्षणाभ्यां तदङ्गीकृताभ्यामितिशेषः। तत्प्रत्यायिका रतेर्व्यञ्जिका, **अनुमानमभ्युपेयम्** ० व्यञ्जनाया अभावेन शकुन्तलारतेर्विशेषणस्य शब्देन ज्ञानासंभवः, विनष्टायाश्च रतेः प्रत्यक्षमपि न संभवेत्, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् प्रागुक्तरतिरूपविशेषणस्य ज्ञानाभावे त्रयोऽपि रसपदार्थतयाऽभ्युपगता विशिष्टबोधा न सम्भवेयुरन्नतो विशेषणस्य रतेरनुमानं कार्यम्, अनुमानप्रयोगश्च अभिनेतारमुद्दिश्य अयं शकुन्तलाविषयकरतिमान् तदनुकूलचेष्टादिमत्वाद् ऐतिहासिकदुष्यन्तवत्। अस्य मतस्य बहुतरन्यायपथे प्रयातत्वात् नैयायिकमतानुसारेणैव पण्डितराजेन समुद्धृतमिति प्रतिभाति। आत्मनि शकुन्तलारतेरनुमानसंभवाद् भ्रमात्मको बोधः कल्पितः स्यात्। इति चिन्तनीयं सुधीभिः।

मुख्यतया दुष्यन्तादिगत एव रसो रत्यादिः कमनीयविभावाद्यभिनयप्रदर्शनकोविदे दुष्यन्ताद्यनुकर्तरि नटे समारोप्य साक्षात्क्रियते इत्येके। मतेऽस्मिन्साक्षात्कारो दुष्यन्तोऽयं शकुन्तलादिविषयकरतिमानित्यादिः प्राग्वद्धर्म्यंशे लौकिक आरोप्यांशे त्वलौकिकः।

अथ पञ्चमं मतम्

भट्टलोल्लटस्य मीमांसकरीत्या व्याख्यानामिदमिति प्रवादः, काव्यप्रकाशे भट्टलोल्लटस्य यन्मतं प्रतिपादितं तदनुकरोतीदं परं मीमांसकरीतिरत्र न काचित्स्फुरति लौकिकालौकिकेत्यादिपण्डिराजशब्देन नैयायिकसरणिरेषोदेति। मीमांसकैरलौकिकप्रत्यक्षानङ्गीकारात्। आरोपार्थविवेचने मीमांसकरीतिं दर्शयिष्यामि। लौकिकोऽलौकिको बोध इत्यभिप्रायं विवृण्वन् भाषानुवादो न जानात्यत्रत्यं ग्रन्थाभिप्रायम्। अत एव चाग्रिममते अनुमितिसामग्र्या बलवत्वादित्यस्यानुवादे महती अशुद्धिरिति ध्येयम्। मुक्तावल्यादौ लौकिकालौकिकभेदेन प्रत्यक्षं द्विविधं वर्णितम्। तद्रीत्या लौकिकं प्रत्यक्षमलौकिकञ्च प्रत्यक्षमित्यभिप्रायेणानुवादो युज्यते। अस्मिन् मते स्थायीभाव एव रसः, तदास्वादश्च सामाजिकानां स्थायिभावस्य साक्षात्कारः। साक्षात्कारश्च भ्रमात्मकः, काव्यप्रकाशप्रतिपादितं मतमिदं निष्कृष्य संक्षेपेण नूतनांशमेव वर्णयति **मुख्यतया** • अनारोपितरूपेण, रत्यादिरित्यस्य शकुन्तलाविषयकेत्यादिः शेषः, कमनीयं सुन्दरं कोविदं प्रवीणं, कोविदत्वेन कृत्रिमस्यापि तदभिनयस्य अकृत्रिमतया ग्रहणद्वारा नटे दुष्यन्तसमारोपसामग्री समायाति **समारोप्य** • अयं दुष्यन्त इति ज्ञात्वेत्यर्थः। नटपदं काव्यश्रोतुरप्युपलक्षणम्। साक्षात्क्रियते इत्यस्य सामाजिकैरिति शेषः, नटमुद्दिश्य दुष्यन्तोऽयं शकुन्तलाविषयकरतिमान् इत्याकारकः। स साक्षात्कार एव रसास्वादः। दुष्यन्तगतः शकुन्तलाविषयकरतिरेव रसः। इदमवधेयम्। समारोप्येत्यस्य दुष्यन्तत्वं शेषं कृत्वा व्याख्येयम्, साक्षात् क्रियते इति रत्यादिरेव यथा कर्म तथा समारोप्येत्यस्यापि रत्यादिरेव कर्म शब्दत आयाति, परं काव्यप्रकाशस्थतद्रूपतानुसन्धानादित्यक्षरेण तद्व्याख्यानेन च नटे दुष्यन्तत्वारोपः प्राक् समायाति तदनुरोधेनैवं व्याख्यान्तरम्। तदनुरोधाभावे तु समारोपाकारः 'अयं शकुन्तलादिविषयकरतिमान्' इति बोध्यम्। स च समारोप इदं रजतमितिवत् प्रत्यक्षम्, भ्रमात्मिका अनुमितिर्वा बोध्या प्रत्यक्षमपि भ्रमात्मकमेव। तद्विशेषविवेचने तु ग्रन्थविस्तरः समापतेत् अग्रिमप्राग्वत्पदस्वारस्यन्तु अलौकिकप्रत्यक्षरूपत्वं समारोपस्य नयतीति ध्येयम्। **लौकिकः** • संयोगसंयुक्तसमवायादिषड्विधैर्विषयेण सहेन्द्रियसन्निकर्षैर्लौकिकं प्रत्यक्षम्, अविद्यमानविषयेण साकं संयोगादिसन्निकर्षासंभवादलौकिको ज्ञानलक्षणसन्निकर्षो नैयायिकैरङ्गीक्रियते नते

जायमानमलौकिकं प्रत्यक्षमिति व्यपदिश्यते। ज्ञानं लक्षणं स्वरूपं यस्याः सा ज्ञानलक्षणा। शुक्ताविदं रजतमिति भ्रमसंपादने रजतस्याविद्यमानतया संयोगादिसन्निकर्षा-संभवात् चाकचिक्यादिना जातं रजतस्मरणमेव ज्ञानं चक्षुषा सह रजतस्य सन्निकर्षः, सर्वत्र भ्रम एषैव नैयायिकप्रक्रिया। प्रकृते अयंपदार्थे नटे पुरोवर्त्तिनि चक्षुषः संयोग-संबन्धान्नटस्य लौकिकं प्रत्यक्षम्, आरोप्यस्य दुष्यन्तत्वस्य शकुन्तलारतेश्च काव्योत्थं ज्ञानमेव सन्निकर्षः। उभाभ्यां लौकिकालौकिकसन्निकर्षाभ्यामेकं प्रत्यक्षम्। एकमेव विशिष्टं प्रत्यक्षं ग्रन्थाभिप्रेतं तादृशाकारप्रदर्शनादंशपदस्वारस्याच्च। तच्च मीमांसकमते न संभवति तत्रैतादृशस्थले ज्ञानद्वयाङ्गीकारादलौकिकप्रत्यक्षानङ्गीकारात्, आरोप्यस्य स्मृतेः परोक्षत्वस्य वाभ्युपगमाच्च। अतोऽस्मात् काव्यप्रकाशाद्वा ग्रन्थान्न काचिन्मीमांसक-सरणिराविर्भवितुं शक्नोति। अतः प्रवादोऽयं मृषैव यदि प्रवादरक्षां कर्तुमीहेत तदैवं भट्ट-लोल्लटस्य मतमुपपादनीयम्। मीमांसाया अख्यातिवादः ज्ञाने भ्रमत्वं नाङ्गीक्रियते किन्तु व्यवहार एव। इदं रजतमिति ज्ञानद्वयस्याकारः इदमः प्रत्यक्षम्, रजतस्य च स्मृतिः, सर्वैरङ्गीकृतस्य दोषस्य महिम्ना पुरोवर्त्तिशुक्तिरजतयोर्भेदो न भासते तादृश-भेदाग्रहसहकृता रजतस्मृतिरेव रजतार्थिनं पुरोवर्त्तिनि प्रवर्तयति, एवं प्रकृते विभावाद्य-भिनयपाटववशाद् नटदुष्यन्तयोर्भेदाग्रहसहकृतं काव्योत्थं शकुन्तलारतिविशिष्टदुष्यन्त-ज्ञानं नटप्रत्यक्षञ्च चमत्कुर्वत् रसास्वाद उच्यते इति। अन्या च सैव प्रक्रिया। नटदुष्यन्त-भेदाग्रहेण शकुन्तलारतिविशिष्टदुष्यन्तस्य परोक्षग्रहेण विशिष्टो नटसाक्षात्कार एव रससाक्षात्कार इति सारः। रसास्वादः सामाजिकानामेव तदास्मिन्मते सामाजिकानां न रसास्वाद इत्यस्वरसप्रदर्शनं काव्यप्रकाशटीकानामेवमेव। दुष्यन्ते रतिमनुमायेति लिखन्ती सरला स्वीयामालङ्कारिकतां प्रकाशयति, अत्रापि पूर्वमतवद्विशेष्यविशेषण-भाववैपरीत्येन त्रिधा साक्षात्कारस्वरूपं वर्णयन् भाषानुवादः सरला च न सम्यक करोति आरोप्यांशस्य सर्वत्र विशेषणताया एवौचित्यात्। कुमारिलभट्टेन अलौकिकप्रत्यक्षाङ्गी-कारात्तदनुयायित्वे कथमपि मीमांसकत्वमस्येति ध्येयम्।

षष्ठं मतम्

पञ्चममतमपेक्ष्यास्मिन् मते एतावानेव विशेषो यत् तत्र सामाजिकानां रसास्वादः साक्षात्कारोऽस्मिंश्चानुमितिः। प्राक्तनमते दुष्यन्तोऽयं शकुन्तलाविषयकरतिमानिति ज्ञानं प्रत्यक्षमस्मिंश्चानुमितिः, इदमपि वक्तुं शक्यते यत्पूर्वमते दुष्यन्तनिष्ठरतेरास्वादात्प्रागपि रसो नाम अस्मिन् मते तु अनुमीयमानतायामेव रसः, तदा रसो रसास्वादश्च एक एव सामाजिकेष्वपि रसः, प्राक्तनमते सामाजिकेषु रसास्वाद एव न रसः।

इदं काव्यप्रकाशप्रतिपादितस्य श्रीशङ्कुकमतस्य सिद्धान्तांशमनुकरोति। अस्य व्याख्या नैयायिकमतानुसारिणीति प्रवादोऽनुमितिसामग्र्या बलवत्वादित्यंशे किञ्चित्

'दुष्यन्तादिगतो रत्यादिर्नटे पक्षे दुष्यन्तत्वेन गृहीते विभावादिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैर्भिन्ने विषयेऽनुमितिसामग्र्या बलवत्त्वाद-

---

स्थानं लभते । नटे दुष्यन्तबुद्धिः कीदृशी कया रीत्या वेति विषयमवलम्ब्य चतुर्विध-प्रतीतिव्यावृत्तिपुरस्सरं चित्रतुरगादिन्यायेन नटविशेष्यका "अयं दुष्यन्त" इत्याकारिका प्रतिपादिता । चित्रतुरगादिन्यायस्येदमभिप्रेतम्—तुरगचित्रं दृष्ट्वा तुरगोयमिति ज्ञानं जायते तथाभिनयकोविदं दृष्ट्वा दुष्यन्तोऽयमिति ज्ञानं जायते । यद्यपीदमपि ज्ञानमलौकिकं पूर्ववद्भ्रमात्मकं प्रत्यक्षत्वात् परं तुरगचित्रमिदमिति जानानोऽपि तुरगोऽयमिति आबालैः पण्डितैश्च व्यवह्रियते तथा दुष्यन्ताभिनेतारं दृष्ट्वा दुष्यन्त आयातीत्यादि सर्वैर्व्यवह्रियते तथा च प्रथमं दुष्यन्तत्वस्य नटे आरोप एतावानेवांशः परिगृह्यते सारः पंडितराजेन संक्षेपतश्च वर्ण्यते **दुष्यन्तादि** • इत्यादिरित्यस्य शकुन्तलाविषयकेत्यादिः शेषः, रत्यादिरनुमीयमानो रस इत्यन्वयः दुष्यन्तत्वेन गृहीते नटे पक्षेऽनुमीयमान इत्यन्वयः, नटे दुष्यन्तत्वग्रहानन्तरमनुमितिः, नटे दुष्यन्तत्वग्रहश्च पूर्वमतवत्समारोपः, समारोपे च दुष्यन्तनटयोर्भेदाग्रहेण कारणेन भाव्यम्, स च भेदाग्रहः समानचेष्टादिभिः संभवेत्त-त्संपादनायाह **कृत्रिमैरपि** • कृत्रिमैरपि अकृत्रिमतया गृहीतैर्विभावादिभिरित्यन्वयः, यद्यपीदमनुमितिहेतुतयोपात्तं तथापि समुपयोगेन तात्पर्यात्, देहलीदीपकन्यायेन वा दुष्यन्तभेदाग्रहस्यापि सम्पादकम् । कृत्रिमा नटस्य अकृत्रिमा दुष्यन्तस्य, तथा च नटाभि-नीयमानानुभावादौ दुष्यन्तचरितानुमानादित्यस्यापि भ्रमात्मको ग्रहः, विभावादिपदेन व्यञ्जकचेष्टादिः परिगृह्यते । तथा चायं दुष्यन्तः शकुन्तलाविषयकरतिमान् तादृशरति-व्याप्यचेष्टादिमत्वात्, ऐतिहासिकदुष्यन्तवदित्यनुमानप्रयोगः । नटपक्षकशकुन्तलारति-साध्यकचेष्टादिलिङ्गकानुमितिरेषा । यद्यपि नटे तादृशरतेरभावात् तद्व्याप्यचेष्टादयोऽपि न सन्ति परं दुष्यन्तचेष्टाया नटे ज्ञानादनुमितिर्निर्बाधा, अनुमितिसंपादने पक्षे हेतोः सत्वं नापेक्षितमपि तु हेतोर्ज्ञानमेव । इयन्त्वनुमितिर्भ्रमात्मिका परं प्रमाऽपि अनुमितिः पक्षे हेतोरसत्वदशायां जायते । कज्जलाद्यनुमितस्य विनष्टस्यापि धूमस्य ज्ञानेन यज्ञशालादा-वतीतवह्न्यनुमितिर्भवति, वर्णितश्चेदं जायमानं लिङ्गन्तु करणं नहीत्यादिना भाषापरिच्छे-देऽपि मुक्तावल्यां च सोदाहरणं स्पष्टीकृतम् । अत्र हेतोः पक्षावच्छेदकस्य दुष्यन्तत्वस्य च भ्रम इति चिन्त्यम् । ननु नटेन सह संयोगसंनिकर्षे अभिनयदर्शनकाव्यशकुन्तलारतिज्ञानेन ज्ञानलक्षणासंनिकर्षरूपेण भट्टलोल्लटमतवद् "दुष्यन्तोऽयं शकुन्तलादिविषयकरतिमान्" इत्याकारकमलौकिकंच विशिष्टं प्रत्यक्षमेव कुतो न जायते इत्यत आह **अनुमितिसामग्र्या बलवत्त्वात्** • दुष्यन्तोऽयं शकुन्तलारतिव्याप्यचेष्टादिमानिति परामर्शोऽनुमितिसामग्री पूर्वोक्तज्ञानलक्षणाघटिता प्रत्यक्षसामग्री, तत्रानुमितिसामग्र्या बलवत्त्वादनुमितिरेवेति भावः ।

प्रत्यक्षसामग्र्या बलवत्वे पर्वतेन सहेन्द्रियसन्निकर्षे वह्निस्मृतिवशात् पर्वतो वह्निमानिति प्रत्यक्षमेव स्यान्नत्वनुमितिः। अत्र नैयायिकानां मते पर्वतो वह्निमान् इत्याकारकमनुमित्यात्मकमेकमेव ज्ञानम्, कतिपयदार्शनिकनये पर्वतांशे प्रत्यक्षत्वं वह्न्यंशेऽनुमितित्वम्, तेषां मतेऽनुमितिसामग्र्या बलवत्ववर्णनस्य नास्ति आवश्यकता पक्षप्रत्यक्षस्याऽप्यङ्गीकारात्। कदाचिदत्र विषये प्रत्यक्षाङ्गीकारवशादेव भट्टलोल्लटविषये मीमांसकसरणेः प्रवादः स्यात्परं तदपि विवेचने पूर्णतया समन्वयं न भजते। भाषानुवादस्तु अत्रत्यं ग्रन्थार्थमशुद्धं लिखतीति ध्येयम्। ननु दूरात्स्थाणुः पुरुषो वेति प्रत्यक्षसंशये पुरुषत्वव्याप्यकरादेर्विशेषस्य दर्शने पुरुषोऽयमिति प्रत्यक्षमेवाङ्गीक्रियते, तदाकारानुमित्यङ्गीकारे प्रत्यक्षसंशयस्य निवृत्तिर्न स्यात्। तत्रापि विशेषदर्शनरूपव्याप्तिज्ञानघटितानुमितिसामग्र्या संयोगसन्निकर्षादिघटितप्रत्यक्षसामग्री बाधिता सती प्रत्यक्षं न जनयेदपितु अनुमितिरेवापद्येतेत्यतोऽनुमितिसामग्र्या बलवत्वं न युक्तमित्याशङ्कां वारयितुमाह **भिन्ने विषये** ० सर्वत्र नानुमितिसामग्री बलवती अपि तु भिन्ने विषये इति भावः। प्रत्यक्षसंशयोत्तरं पुरुषत्वस्यैवानुमितिसामग्री तस्यैव च संयुक्तसमवायादिप्रत्यक्षसामग्री समानविषयत्वात् प्रत्यक्षसामग्र्येव बलवती सती प्रत्यक्षमेव जनयेत्, पर्वतो वह्निमान् इत्यनुमितिस्थले पर्वतस्य प्रत्यक्षसामग्री वह्नेश्चानुमितिसामग्री विभिन्नविषयत्वादनुमितिसामग्र्येव बलवती। प्रकृते च नटस्य प्रत्यक्षसामग्री शकुन्तलारतिव्याप्यचेष्टादिदर्शनं शकुन्तलारतेरनुमितिसामग्री, भिन्नविषयत्वेनानुमितिसामग्र्या बलवत्वेनानुमितिरेव युक्तेति। विषयप्रत्यक्षादेव चन्दनादिस्पर्शादेरानन्दानुभवो नतु तदनुमितिज इति प्रवादेन प्रत्यवतिष्ठमानानां मुखमुद्रणाय श्रीशंकुकमतेन काव्यप्रकाशे सम्यगुक्तम् "वस्तुसौन्दर्यबलाद् रसनीयत्वेनान्यानुमीयमानविलक्षणः" अनुभूयते चेदं यद् वस्तुस्वभावप्रयोज्यं सुखदुःखादिकं न तु वस्तुतो ज्ञानस्य प्रत्यक्षत्वानुमितित्वादि प्रयोज्यम्, यथा पुत्रस्योन्नत्यादिकं प्रत्यक्षीकुर्वन् हृष्यति तथा कुण्डल्यां समीचीनग्रहसञ्चारवशादनुमायापि, अवनतेः प्रत्यक्षादनुमितितश्च विषीदतीति स्थायिभावादीनां सौन्दर्यस्वभावत्वे सहृदयानां प्रवृत्तिरेव बीजम्। यत्तु काव्यप्रकाशटीकायां संज्ञातबाधस्य सामाजिकस्य नटे निरुक्तानुमितिविरहेऽपि आस्वादोद्रेकात् रसं साक्षात्करोमीत्यनुव्यवसायानुपपत्तिश्चेत्युक्तं तत्रापीदमवधेयम्, अद्यावधि कापि रसास्वादप्रक्रिया न प्रसिद्धा यत्र भ्रमः कस्मिंश्चिदपि अंशे स्थानं न लभेत, तथा च सर्वत्र बाधोऽपि। अनुव्यवसाये साक्षात्कारत्वमनुमितित्वरूपं द्विसेटकगुरुत्वसाक्षात्कारव्यवहारस्थले इव। अथवा रतेरनुमित्या रसत्वसंपत्तावनन्तरं मानससाक्षात्कारोऽपि संभवत्येव, अत एव काव्यप्रकाशे चर्व्यमाण इत्युक्तम्। इत्यलं प्रसक्तानुप्रसक्तेन।

सप्तमं मतम्

यद्यपि विकासक्रममनुरुध्य स्थूलसूक्ष्मसूक्ष्मतरादिविचारक्रमेणाग्रिमाणां पञ्चानामपि मतानां क्रमश आविर्भावो भाषानुवादभूमिकायां विवेचितः, तत्परिज्ञानञ्च तत एव विधेयं

नुमीयमानो रस.' इत्यपरे। 'विभावादयस्त्रयः समुदिता रसाः' इति कतिपये। 'त्रिषु य एव चमत्कारी स एव रसोऽन्यथा तु त्रयोऽपि न' इति बहवः। 'भाव्यमानो विभाव एव रसः' इत्यन्ये।

कल्पना च सा समीचीना, परन्तां कश्चिदितिहासो नाङ्गीकरोति, अतः प्रतिभाति- यत्पण्डितराजानां कल्पनापाथोधेरेवेमा विभिन्ना विचित्रा वीचयः तथाहि स्थायिभावस्य तज्ज्ञानस्य वा रसत्ववादिनां पूर्ववर्णितानां मते सामाजिकात्मनि अवर्तमानस्य स्थायि- भावस्य कथं साक्षात्कारोऽनुमितिर्वा, विविधचेतःसमाधिसाध्यो भगवत आनन्दस्य कथमा- विर्भाव इति विषये काव्यस्य साधारणशब्ददुर्लभमलौकिकं महिमानमङ्गीकृत्यैव स्ववासना- वासिताभिर्नैकविधाभिर्दर्शनप्रक्रियाभिर्वर्णनं यथा क्रियते तथा स्थायिभावातिरिक्तानां स्वायत्तानामेषां विभावादीनां स्वार्पितभावनासाम्राज्येन साक्षात्कारयितुमनुमापयितुं वा सच्चिदानन्देन सह संबद्धुं कथमुदासीनो भगवान् करुणावरुणालयः काव्यमहिमा।

तथा च अलौकिकेन काव्येन समर्पितानां विभावानुभावसञ्चारिणां भावनया भग्नावरणेन सच्चिदानन्देन गोचरीक्रियमाणा विभावादयस्त्रयः समुदिता सामाजिकान् आनन्दयन्तीति समुदिता विभावादयस्त्रयो रसः, तस्य भग्नावरणचित्संबन्ध आस्वादः, विभावादीनां सामाजिकान्तःकरणसंबन्धोऽभिनवगुप्तपादाचार्यप्रक्रियादिशा नव्यमतप्रक्रिया- दिशा वा। रसत्रयवारणाय समुदितपदम्। इति सप्तमं मतम्।

अथाष्टमं मतम

आस्वादपदवीमधिगच्छन् सुखाकारतया सुखहेतुतया वा रसपदेनाभिधीयेत ननु तत्र रसपदार्थत्वे विभावत्वादिकं प्रयोजकमित्यभिसंधान आह त्रिषु • विभावानुभाव- व्यभिचारिषु काव्योत्थेषु, चमत्कारी सुखजनकः, अन्यथा चमत्कारित्वाभावे। अतएव न सर्वस्मात्काव्याद् रसस्वादः, एषां त्रयाणां चमत्कारिणां भावनैव स्थायिनमास्वादपदवीं गमयतीति प्रथमोपस्थितामेषां कथमुपेक्षेति द्योतनाय बहव इति।

अथ नवमं मतम्

स्थायिनो रसत्ववादिनयेऽपि स्थायिभावस्य रत्यादेर्विषयैकप्राणभूततया स्थायि- भावस्य प्राणो विषयो विभाव आस्वादपदवीमधिगच्छन् कथन्न रस इत्यभिप्रायेण मतमिदमवतरति सुप्ता किन्नु मृता मनसि मे लीना विलीना नु किमित्यादौ भावनावशाद् विभावे तल्लीनता प्रतीयते रसतामन्तरा कथं तल्लीनता? भाव्यमानो विभावः • भावनाविषयतां प्राप्नुवन्।• शानजर्थवर्तमानत्वस्य विवक्षणाद् भावनाविरामे न रसत्वम्, अनुभावः सञ्चारी च लब्धप्राणं स्थायिनं प्रकाशयति पोषयति च प्राणदाता तु विभाव एवेत्यभिप्रायः।

'अनुभावस्तथा तथा' इतीतरे। 'व्यभिचार्येव तथा तथा परिणमति' इति केचित्। तत्र 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रं तत्तन्मतपरतया व्याख्यायते—'विभावानुभावव्यभिचारिभिः संयोगाद् व्यञ्जनाद्रसस्य चिदानन्दविशिष्टस्थाय्ययात्मनः स्थाय्युपहितचिदानन्दात्मनो वा निष्पत्तिः स्वरूपेण प्रकाशनम्' इत्याद्ये। 'विभावानुभावव्यभिचारिणां सम्यक्साधारणात्मतया योगाद्भावकत्वव्यापारेण भावनाद्रसस्य स्थाय्युपहितसत्त्वोद्रेकप्रकाशितस्वात्मानन्दरूपस्य निष्पत्तिर्भोगाख्येन साक्षात्कारेण विषयीकृतिः' इति द्वितीये। 'विभावानुभावव्यभिचारिणां संयोगाद्भावनाविशेषरूपाद्दोषाद्रसस्यानिर्वचनीयदुष्यन्तरत्याद्यात्मनो निष्पत्तिरुत्पत्तिः' इति तृतीये। 'विभावादीनां संयोगाज्ज्ञानाद्रसस्य ज्ञानविशेषात्मनो निष्पत्तिरुत्पत्तिः' इति चतुर्थे। 'विभावादीनां संबन्धाद्रसस्य रत्यादेर्निष्पत्तिरारोपः' इति पञ्चमे। 'विभावादिभिः कृत्रिमैरप्यकृत्रिमतया गृहीतैः संयोगादनुमानाद्रसस्य रत्यादेर्निष्पत्तिरनुमितिर्नटादौ पक्ष इति

अथ दशमं मतम्

लब्धप्राणोऽपि स्थायी तदनुकूलचेष्टादिमन्तरा अज्ञाततया अजात इव मृत इव तिष्ठेदतोऽनुभाव एव काव्यार्थेषु सारः, अन्यथा विभावानुकूलचेष्टादिमन्तरा विभावस्य विभावताऽपि न प्रतीयेत अनुभावभावनायां विभावोऽपि विषयो भवत्येव। ननु सर्वस्यां विभावभावनायामनुभावः, इत्यभिप्रेत्याह **अनुभावस्तथा॰** एकेन तथापदेन भाव्यमानः अन्येन च रस इति परामृश्यते।

एकादशं मतम्

विभावस्य मनोवृत्तय एव विभावतां स्थायिनञ्च पुष्णाति, न तथाऽनुभावः, तदनुकूलचेष्टादेः कृत्रिमस्यापि संभवादतो व्यभिचारिभावनैव आनन्ददायिनी इत्यत आह **व्यभिचार्येव॰** तथा पदस्य पूर्ववदर्थः परिणमति रसरूपेणेति शेषः।

सूत्रव्याख्यानम्

अस्य भरतसूत्रस्य प्रमाणत्वेनाङ्गीकृतस्य भट्टलोल्लटश्रीशंकुकभट्टनायकाभिनवगुप्तपादाचार्याणां व्याख्या काव्यप्रकाशादिषु अन्यत्र चोपलभ्यते, परमन्येषु अपि मतेषु

शेष.' इति षष्ठे। 'विभावादीनां त्रयाणां संयोगात्समुदायाद्रस-निष्पत्ती रसपदव्यवहारः' इति सप्तमे। 'विभावादिषु सम्यग्योगाच्चमत्कारात्' इत्यष्टमे। तदेवं पर्यवसितस्त्रिषु मतेषु सूत्र-विरोधः। विभावानुभावव्यभिचारिणामेकस्य तु रसान्तरसाधारण-तया नियतरसव्यञ्जकतानुपपत्तेः सूत्रे मिलितानामुपादानम्।

प्रक्रियाभेदेऽपि सूत्रार्थस्य समन्वयो जायते। यद्यपीदानीमुपलभ्यमाने नाट्यशास्त्रे स्थायिभावस्यैव रसत्वनिष्पत्तिरुपलभ्यते तथाहि —

यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम्।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः॥
भावानभिनयसंबद्धान् स्थायिभावांस्तथा बुधाः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः॥

तथापि मन्ये पण्डितराजस्तदन्ययोजितं मत्वा विभावादे रसत्वेऽपि यावच्छक्यं सूत्रं योजयति। आत्मचैतन्यस्य अभिव्यक्तेर्वा रसत्वेऽधस्तनमग्निपुराणं कदाचिन्मूलं स्यात्। तथाहि—

अक्षरं ब्रह्मपरमं सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्॥
आनन्दः सहजस्तस्य व्यज्यते स कदाचन।
व्यक्तिः सा तस्य चैतन्यचमत्काररसाह्वया॥

इत्यादि अस्त्वेतत्। सूत्रे त्रयाणां विभावादीनामुपादानाद् एकैकस्य रसत्व-वादिनां मतेषु न सूत्रसमन्वयः इति स्वयमेवाङ्गीकरिष्यति। अष्टसु च मतेषु सूत्रसमन्वयः समीह्यते। तत्र संयोगनिष्पत्तिशब्दयोरर्थभेदेन सर्वत्र समन्वयः। संयोगशब्दस्य व्यञ्जनं सम्यक् साधारणात्मकत्वम्, भावनाविशेषो दोषः, ज्ञानम्, संबन्धः, अनुमानम्, समुदायः, चमत्कारः इत्यष्टावर्था अष्टसु मतेषु क्रमशः। एवं निष्पत्तिशब्दस्य स्वरूपेण प्रकाशनम्, विषयी कृतिः, उत्पत्तिः, आरोपः, अनुमितिः, पदव्यवहारः, इति षडर्थाः, तत्र तृतीय-चतुर्थयोर्मतयोरुत्पत्तिरेवार्थः, एवं सप्तमाष्टमयोः रसपदव्यवहारः, प्रथममभिनवगुप्तस्य, द्वितीयं भट्टनायकस्य, तृतीयं नव्यानां, चतुर्थं परे तु, पञ्चमं भट्टलोल्लटस्य, षष्ठं श्रीशंकुकस्य, सप्तमं कतिपये इति, अष्टमं बहव इति रसान्तरसाधारणतया • अत्र मर्म-

एवं च प्रामाणिके मिलितानां व्यञ्जकत्वे यत्र क्वचिदेकस्मा-देवासाधारणाद्रसोद्बोधस्तत्रेतरद्वयमाक्षेप्यम्। अतो नानैकान्तिकत्वम्। इत्थं नानाजातीयाभिः शेमुषीभिर्नानारूपतयावसितोऽपि मनीषिभिः परमाह्लादाविनाभावितया प्रतीयमानः प्रपञ्चेऽस्मिन्रसो रमणीयतामावहतीति निर्विवादम्।

स च

'शृङ्गारः करुणः शान्तो रौद्रो वीरोऽद्भुतस्तथा।
हास्यो भयानकश्चैव बीभत्सश्चेति ते नव॥'

इत्युक्तेर्नवधा। मुनिवचनं चात्र मानम्।

प्रकाशः—व्याघ्रादयो विभावा भयानकस्येव रौद्राद्भुतवीराणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्तादयो व्यभिचारिणः शृङ्गारस्येव करुणवीर-भयानकानाम्, इति। **यत्र क्वचित्** ● अत्रापि मर्मप्रकाशः—

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः॥

इत्यादावित्यर्थः। माधवमुखेन मालत्या वर्णनेऽनुभावमात्रस्योपपादनेऽपि विभाव-व्यभिचारिणावाक्षिप्यैव शृङ्गारनिष्पत्तिः। **नानैकान्तिकत्वम्** ● अत्रोदाहरणेऽनुभाव-मात्राद्यदि रसो निष्पद्येत तदा त्रयाणामभावेऽपि रसनिष्पत्त्या व्यभिचाराद् रसनिष्पत्तौ त्रयाणां हेतुता न स्यात्, इतरयोराक्षेपेण रसनिष्पत्तौ तु न व्यभिचार इति भावः। शेमुषीभिर्बुद्धिभिः। अवसितो निश्चितः, रस इत्यस्य विशेषणम्। परममाह्लादं विना न भवितुं शीलं यस्य तत्तया, अविनाभावश्च रसस्य परमाह्लादरूपतया परमाह्लादेन नित्य-संस्पृक्ततया च। **निर्विवादम्** ● रसास्वादेऽवश्यं परमाह्लाद एतावन्मात्रं समेषां सहृदया-नामनुभावाद् वस्तुतः, रसस्य स्वरूपनिर्धारणं तदास्वादप्रक्रिया चैतत्सर्वं यथामति कल्पनामात्रं न कुत्रचिदास्था कार्या, निश्चितस्वरूपे वस्तुनि नैकविवादासंभवात्, निर्वि-वादश्च रसस्याविनाभाव एवेति सूचितम्। **स च** ● रसश्च। **मुनिवचनं चात्रमानम्** ●

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताश्च, नाट्ये नव रसाः स्मृताः॥

केचित्तु—

'शान्तस्य शमसाध्यत्वान्नटे च तदसंभवात् ।
अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते ॥'

इत्याहुः । तच्चापरे न क्षमन्ते । तथाहि—नटे शमाभावादिति हेतुरसंगतः । नटे रसाभिव्यक्तेरस्वीकारात् । सामाजिकानां शमवत्त्वेन तत्र रसोद्बोधे बाधकाभावात् । न च नटस्य शमाभावात्तदभिनयप्रकाशकत्वानुपपत्तिरिति वाच्यम् । तस्य भयक्रोधादेरप्यभावेन तदभिनयप्रकाशकताया अप्यसंगत्यापत्तेः । यदि च नटस्य क्रोधादेरभावेन वास्तवतत्कार्याणां वधबन्धादीनामुत्पत्त्यसंभवेऽपि कृत्रिमतत्कार्याणां शिक्षाभ्यासादित उत्पत्तौ नास्ति बाधकमिति नीरीक्ष्यते तदा प्रकृतेऽपि तुल्यम् । अथ नाट्ये गीतवाद्यादीनां विरोधिनां सत्त्वात्सामाजिकेष्वपि विषयवैमुख्यात्मनः शान्तस्य कथमुद्रेक इति चेत्, नाट्ये शान्तरसमभ्युपगच्छद्भिः फलबलात्तद्गीतवाद्यादेस्तस्मिन्विरोधिताया अकल्पनात् । विषयचिन्तासामान्यस्य तत्र विरोधित्वस्वीकारे तदीयालम्बनस्य संसारानित्यत्वस्य तदुद्दीपनस्य पुराणश्रवणसत्सङ्गपुण्यवनतीर्थावलोकनादेरपि विषयत्वेन विरोधित्वापत्तेः । अत एव चरमाध्याये संगीतरत्नाकरे—

'अष्टावेव रसा नाट्येष्विति केचिदचूचुदन् ।
तदचारु यतः कंचिन्न रसं स्वदते नटः ॥'

प्रकृतेऽपि तुल्यम् • अत्र मर्मप्रकाश आह नच शान्तस्य रोमाञ्चादिराहित्येनानभिनेयत्वात्कथं नाट्ये स इति वाच्यम् सर्वचेष्टाराहित्येनैव तदभिनयसंभवादित्याहुरिति । विषयवैमुख्या • विषयौदासीन्यस्वरूपस्य, फलवत्वाद् • गीतवाद्यादिसत्वेऽपि शान्तरसाभिव्यक्तिरूपफललाभात् । सामान्यस्य • यस्य कस्यापि विषयस्य चिन्तनादेः, विरोधित्वापत्तेः • तथा च शान्तरसस्य सिद्धिरेव न स्यादतः शान्ते कतिपयविषयाणां सद्भावोऽपि वाच्यः, अत एव • संगीतवाद्यादेः शान्तविरोधित्वाभावादेव, कञ्चित् कञ्चिदपि

इत्यादिना नाट्येऽपि शान्तो रसोऽस्तीति व्यवस्थापितम् । यैरपि नाट्ये शान्तो रसो नास्तीत्यभ्युपगम्यते तैरपि बाधकाभावान्महाभारतादिप्रबन्धानां शान्तरसप्रधानतया अखिललोकानुभवसिद्धत्वाच्च काव्ये सोऽवश्यं स्वीकार्यः । अत एव 'अष्टौ नाट्ये रसाः स्मृताः' इत्युपक्रम्य 'शान्तोऽपि नवमो रसः' इति मम्मटभट्टा अप्युपसमहार्षुः ।

स्थायिभावनिरूपणम्

अमीषां च

'रतिः शोकश्च निर्वेदक्रोधोत्साहाश्च विस्मयः ।
हासो भयं जुगुप्सा च स्थायिभावाः क्रमादमी ॥'

रसेभ्यः स्थायिभावानां घटादेर्घटाद्यवच्छिन्नाकाशादिव प्रथमद्वितीययोर्मतयोः, सत्यरजतस्यानिर्वचनीयरजतादिव तृतीये, विषयस्य

रसम्, अतएव प्रबोधचन्द्रोदयादेः शान्तप्रधाननाटकत्वम् । काव्ये तु नवरससत्त्वे विवादाभाव इत्याह—यैरपि ० ।

स्थायिभावनिरूपणम्

अमीषाम् ० शृंगारकरुणशान्तरौद्रवीराद्भुतहास्यभयानकबीभत्सानां क्रमश इत्यर्थः । स्थायिभावानाम् ० भेदो बोध्य इत्यत्रान्वयः । प्रथमं 'रत्यवच्छिन्ना भग्नावरणाचिदेव रसः, इत्यनेन प्राक् प्रतिपादितमभिनवगुप्ताचार्यमतम् । घटेनावच्छिन्नमाकाशमिव रत्यऽवच्छिन्नं चैतन्यं रसः । तथा च अवच्छेद्यो रसोऽवच्छेदकश्च स्थायिभावः । अवच्छेद्यावच्छेदकभावस्थले यथाऽवच्छेद्यावच्छेदकयोर्भेदस्तथाऽत्राऽपीतिभावः । एवं द्वितीयभट्टनायकमते । तथाहि भुज्यमानो रत्यादिः, रत्यादिभंगो वा रसः, इति प्रागुक्तम् मूले, तत्र मर्मप्रकाशः—भोगः सत्वगुणोद्रेकात्प्रकाशते य आनन्दस्तत्स्वरूपानन्यालम्बना या संवित्तत्स्वरूपो लौकिकसुखानुभवविलक्षण इत्याह । तस्याक्षरार्थस्तु तत्रैव द्रष्टव्यः । तात्पर्यार्थस्तु अभिव्यक्ता आत्मानन्दस्वरूपा चिद् भोग इति । तथा च अभिनवगुप्ताचार्यमतसदृशमेव केवलमभिव्यञ्जने चितः प्रकारभेदः । चिद्रत्योर्विशेष्यविशेषणभावभेदं परिकल्प्य प्रकारद्वयमुपन्यस्तम् । आनन्दाभिन्नचिद्विषयीभूतो रत्यादिः, रत्याद्यवच्छिन्ना आनन्दाभिन्नाचिद्वा रस इति तत्फलितम् । तत्र प्रथमप्रकारे भेद एव नेति पञ्चमादिमतमिव ध्येयम् । द्वितीये प्रकारे तु पूर्ववदवच्छेद्यावच्छेदकभाव इति । तृतीयं नव्यास्तु

(रजतादेः) ज्ञानादिव चतुर्थे भेदो बोध्यः । तत्र आ प्रबन्धं स्थिरत्वादमीषां भावानां स्थायित्वम् । न च चित्तवृत्तिरूपाणामेषामाशुविनाशित्वेन स्थिरत्वं दुर्लभम्, वासनारूपतया स्थिरत्वं तु व्यभिचारिष्वतिप्रसक्तमिति

इत्यादिना प्राक्प्रतिपादितं मतम् । सत्यं रजतं तदवयवतदवयवसंयोगदेशकालादिनिमित्तैर्जायमानं यावद्रजतव्यवहारं स्थायि, स्वेन सहेन्द्रियसन्निकर्षादिना साक्षात् क्रियमाणं भवति, असत्यन्तु अवयवतत्संयोगादि विनैव शुक्त्यवच्छिन्नचैतन्यनिष्ठं यच्छुक्तिविषयकमज्ञानं तद्रूपदोषेण रजतविषयकसंस्कारलोभसहितेन जायते । यावच्च तद्रजतविषयकं ज्ञानं तावत्तिष्ठति, इन्द्रियसन्निकर्षासंभवेऽपि अन्तःकरणवृत्तिमात्रेण अविद्यावृत्तिमात्रेण वा प्रत्यक्षीक्रियते । प्रकृते तु शकुन्तलाविषयिणी सत्या शकुन्तलातच्चेष्टादिज्ञानेन जायमाना, विभावादिप्रकाशककाव्यादिना व्यञ्जनासहायेन सामाजिकैर्गृह्यमाणा, दुष्यन्तमात्रनिष्ठा रतिः स्थायिभावः । रसस्तु पूर्वोक्तरतेरभिव्यक्तेरनन्तरं भावनारूपदोषेण जायमाना सामाजिकनिष्ठा असत्या सामाजिकानां भावनारूपदोषेणैव अविद्यावृत्त्या वा गृह्यमाणा रतिः इति ।

परे तु इत्यादिना प्राक् प्रतिपादितचतुर्थमते रत्यादिः स्थायिभावो रत्यादेर्ज्ञानं रस इत्यायाति । रतिर्विषयो ज्ञानं विषयि, तथा च नैयायिकनये विषयतज्ज्ञानयोर्विषयविषयीभावः सम्बन्धः । तथा च रजततज्ज्ञानयोर्यादृशो भेदस्तथाऽत्रापि रसस्थायिभावयोरिति भावः ।

यद्यपि वेदान्तिनये न विषयविषयीभावोऽपि तु ज्ञानेऽधिष्ठानेऽध्यस्ता विषया इति अधिष्ठानाध्यस्तभावः सम्बन्धो व्यवह्रियते चाभेदोऽपि तत्र तथापि सत्यानृतत्वभेदेन भेदोऽङ्गीक्रियत एव, तस्य विशदीकरणं विस्तरभिया न प्रक्रम्यते । पञ्चमादिमते न भेद इति न तद्विवेचितम् । स्थिरो भावः स्थायिभाव इति योगार्थं दर्शयति तत्र • । रत्यादिषु योगरूढिरिति भावः । न च शृङ्गारादावालम्बनमपि स्थिरमेव, तथा चातिव्याप्तिरिति वाच्यम् अस्य लक्षणपरत्वाभावाद् रत्याद्यन्यतमत्वस्यैव लक्षणतयेष्टत्वात्, करुणे आलम्बनस्य विनष्टत्वाच्च ।

आशुविनाशित्वेन • इदन्त्ववधेयं नात्र वेदान्तिमते नैयायिकानां ज्ञानादिष्विव तृतीयक्षणविनाशित्वमाशुविनाशित्वम्, अपि तु विरोधिवृत्त्यन्तरोत्पत्तिं यावत्पूर्ववृत्तेः स्थिरत्वमङ्गीक्रियते । किन्तु क्वचित्त्वरितं विरोधि वृत्त्यन्तरोत्पत्त्या तृतीयक्षणेऽपि विनाशित्वं सिद्धम् अत्र काव्ये प्रबन्धे प्रसङ्गतो विविधविषयाणां वर्णनाद् वृत्तिभेद आवश्यकोय एव, यद्यपि तिष्ठतु नाम काचित्प्रहरमपि, कथमपि मध्ये विच्छेदो भवत्येव ।

वाच्यम् । वासनारूपाणाममीषां मुहुर्मुहुरभिव्यक्तेरेव स्थिरपदार्थत्वात् । व्यभिचारिणां तु नैव, तदभिव्यक्तेर्विद्युदुद्द्योतप्रायत्वात् ।

यदाहुः—

'विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्याशु स स्थायी लवणाकरः ॥
चिरं चित्तेऽवतिष्ठन्ते संबध्यन्तेऽनुबन्धिभिः ।
रसत्वं ये प्रपद्यन्ते प्रसिद्धाः स्थायिनोऽत्र ते ॥'

चिरमिति व्यभिचारिवारणाय । अनुबन्धिभिर्विभावाद्यैः ।

केचन वेदान्तिनोऽपि धारावाहिकबुद्धावधिगतार्थत्वं प्रकारान्तरेण वारयन्तोऽङ्गीकुर्वन्ति नैयायिकानामिवाशुविनाशित्वमपि तन्मतेन वेदम् ।

ननु मास्तु रत्यादिवृत्तीनां चिरमवस्थानं तादृशवृत्तिप्रयोज्या वासनास्तु चिरमवतिष्ठन्ते । तथा च येषां भावानां वासना आ प्रबन्धमवतिष्ठन्ते तेषां स्थायित्वमित्येवाभिप्रायोऽस्तु इत्यत आह वासनारूप ● व्यभिचारिणामपि वासना स्थिरा एव तथा च व्यभिचारिभावेषु स्थायित्वातिव्याप्तिः । रूपाणाम् ● वासनारूपेण स्थितानामेषां रत्यादीनां मुहुर्मुहुरुत्पत्तिरत एव स्थायिताव्यवहार एषु । स्थायिभावानामुत्पत्तेः कारणानि क्वचिदेव समवधीयन्ते ।

अथवा अभिव्यक्तिः स्मृतिः । तथा च स्थायिस्मृतेरुद्बोधकानि मुहुर्मुहुरुपतिष्ठन्ते व्यभिचार्यादिस्मृतेस्तु कदाचिदेव क्वचिदिति भावः । कादाचित्कत्वक्वाचित्कत्वयोर्बोधनाय विद्युदुद्योतेत्युक्तम् । विरुद्धैर ● विच्छिद्यते येषां वासनाया नाशो न भवति, आत्मभावम् आत्मनोऽङ्गताम् अन्यान् भावान् इति शेषः । लवणाकरो यथा अन्यान् एकरसतां प्रापयति तथा स्थायिभावोऽपि अन्यान् भावान् एकरसानुकूलतां नयति । स च स्वाङ्गत्वद्वारेति भावः । तथा च आप्रबन्धं मुहुर्मुहुरभिव्यज्यमानोऽन्येषां भावानां प्राधान्यमावहन् 'भावः' स्थायीति फलति । उच्छेदाभावेन मुहुरभिव्यक्तिरभिप्रेयते । भावानां विरुद्धत्वादिवचनं लौकिकदृष्ट्या, काव्यमार्गे तु अयं स रशनोत्कर्षीत्यादौ रतिशोकयोरुपकार्योपकारकभावस्यैव दृष्टत्वात्, अन्यथा तत्र प्रतिकूलविभावादिग्रहरूपो रसदोषः समापतेदिति स्व० म० म० गङ्गाधरशास्त्रिमहाभागानां टिप्पणाभिप्रायः प्रतिभाति । वयन्तु पश्यामः—प्राधान्येनैवोभयोरवस्थापने रतिशोकयोर्विरोधो न त्वङ्गाङ्गीभावेनेति रसविरोधाविरोधप्रदर्शकाग्रिमग्रन्थेन स्फुटं प्रतीयते । तथा च यथा सन्निवेशे विरोधः स्फुरति

तथा—

'सजातीयविजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायिभाव उदाहृतः ॥' इति ।

केचित्तु रत्याद्यन्यतमत्वं स्थायित्वमाहुः । तन्न । रत्यादीनामेकस्मिन्प्ररूढेऽन्यस्याप्ररूढस्य व्यभिचारित्वोपगमात् । प्ररूढत्वाप्ररूढत्वे बह्वल्पविभावजत्वे ।

तदुक्तं रत्नाकरे—

'रत्यादयः स्थायिभावाः स्युर्भूयिष्ठविभावजाः ।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ॥' इति ।

एवं च वीररसे प्रधाने क्रोधो रौद्रे चोत्साहः शृङ्गारे हासो

तादृशे काव्यमार्गेऽपि विरुद्धत्वं यथाश्रुतमेव । यो हि विरोधिवृत्त्युत्पत्तिपर्यन्तं पूर्ववृत्तीनामवस्थानात्, काव्यमार्गे च पूर्वोक्तरीत्या विरोधाभावाद्वृत्तेरुच्छेदाभावेन रत्यादीनां वस्तुतः स्थिरत्वेन च वेदान्तिनये मुहुरभिव्यक्तेर्वचनं नावश्यकतामावहतीति टिप्पणाभिप्रायस्तत्रापीदमवधेयम् ।

न च वृत्तीनां तेजस्तिमिरादिवद्विरोधोऽपि तु घटाकारवृत्तेः पटाकारवृत्तिविरोधितया विभिन्नाकारकत्वमेव विरोधप्रयोजकम्, तथा च शोकरतिवृत्त्योर्भिन्नकालिकत्वं स्यादेव । केवलं यत्र नैयायिकानां धारावाहिकबुद्धेर्व्यवहारस्तत्र वृत्तीनां स्थैर्यमङ्गीकुर्वन्ति वेदान्तिनः । शोकरतिवृत्त्योरुपकार्योपकारकभावस्त्वव्यहितपूर्वापरीभावेन समूहालम्बनत्वेन वा इति त्वन्यत् । **चित्तेऽवतिष्ठन्ते** ● मुहुर्मुहुरभिव्यक्तिश्चिरमवस्थानं संबध्यन्ते स्वानुकूलतां संपादयन्ति ।

सजातीय ● स्वसहकारिणो विभावाद्याः सजातीयाः, विभिन्नरसविभावाद्या विजातीयाः । अतिरस्कृता अप्रतिबद्धा मूर्तिरभिव्यक्तिर्यस्य, रसास्वादपर्यन्तं वर्तमानः । **अन्यतमत्वम्** ● प्ररूढत्वाविशेषितम् । **बह्वल्प** ● विभावपदं यथासंभवमनुभावादीनामप्युपलक्षणम् । विपुलविभावजत्वं प्ररूढत्वम्, न्यूनविभावजत्वमप्ररूढत्वम् ।

रत्यादयः ● भूयिष्ठं बहुतरम्, ते एव ये स्थायिभावनाम्ना निर्दिष्टास्ते एव भूयिष्ठविभावजत्वात् स्थायितामावहतो विभावादीनपेक्ष्य न्यूनैर्विभावादिभिर्जायमानाः

व्यभिचारी भवति, नान्तरीयकश्च। यदा तु प्रधानपरिपोषार्थं सोऽपि बहुविभावजः क्रियते तदा तु रसालंकार इत्यादि बोध्यम्।

तत्र

स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिः स्थायिभावः॥

गुरुदेवतापुत्राद्यालम्बनस्तु व्यभिचारी।

पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः॥

स्त्रीपुंसयोस्तु वियोगे जीवित्वज्ञानदशायां वैक्लव्यपोषिताया रतेरेव प्राधान्याच्छृङ्गारो विप्रलम्भाख्यो रसः। वैक्लव्यं तु संचारिमात्रम्। मृतत्वज्ञानदशायां तु रतिपोषितस्य वैक्लव्यस्येति करुण एव। यदा तु सत्यपि मृतत्वज्ञाने देवताप्रसादादिना पुनरुज्जीवनज्ञानं कथंचित्स्यात्, तदालम्बनस्यात्यन्तिकनिरासाभावाच्चिरप्रवास इव विप्रलम्भ एव, न स करुणः। यथा चन्द्रापीडं प्रति महाश्वेतावाक्येषु। केचित्तु रसान्तरम्

सन्तो व्यभिचारिणो भवन्ति। **नान्तरीयकश्च** ० भवतीति वर्तते, क्रोधमन्तरा समुत्साहो न पोषमेतीति भावः। प्रधानस्य समुत्साहस्य परिपोष आस्वादयोग्यतानयनम्, सोऽपि क्रोधोऽपि बहुविभावजः प्ररूढः, द्वयोः प्ररूढत्वं प्रकरणादेकस्य प्राधान्यमवगन्तव्यम्। **रसालंकारः** ० रसपदं स्थायिभावपरम्, प्ररूढोऽपि क्रोधो न रौद्रतया परिणेतुमपितु वीरस्य परिपोषार्थं तदेवालङ्करणम्, स एव रसवद्नाम्नाऽन्यत्र व्यवह्रियते। **पुत्रादि** ० आदिना विशेषतः प्रीतिपात्रस्य भ्रातृनृपादेः परिग्रहः। **रतेरेव** ० प्रेमवशादेव वैक्लव्यातिशयात्। **संचारिमात्रम्** ० मात्रपदेन रसत्वव्यवच्छेदः, प्राक् प्रतिपादितदिशा प्राधान्येनास्वादाभावात्। दशायाम् आलम्बनाभावेन रतेरुच्छिन्नप्रायतया, वैक्लव्यस्य प्राधान्यमिति, **विप्रलम्भ एव** ० वियोगावच्छिन्नरतिकतया, नच आलम्बनस्याभावात् कथं रतिस्तत्रेति वाच्यम् आलम्बनप्राप्तिज्ञानस्य रतेः स्थायितानियामकत्वात्। **यथा** ० कादम्बर्यामिति शेषः। ननु मरणान्तरं यावद् देवताप्रसादादिना पुनरुज्जीवनं न परिज्ञातं तावद् रतिपोषितः शोकः प्रधानम्, जीवनाऽऽशानन्तरन्तु रतिः प्रधानं तथा च रतिः प्राधान्यस्य विच्छेदान्न तदपेक्षिणो विप्रलंभस्य संभवोऽपि तु करुणस्यापि प्राधान्येन संवलितस्योभयचित्रितस्य रसान्तरस्येति मतमाह **केचित्तु** ० चित्ररूपवद्रसान्तरमिति

एवात्र करुणविप्रलम्भाख्यमिच्छन्ति ।

नित्यानित्यवस्तुविचारजन्मा विषयविरागाख्यो निर्वेदः ॥

गृहकलहादिजस्तु व्यभिचारी ।

गुरुबन्धुवधादिपरमापराधजन्मा प्रज्वलनाख्यः क्रोधः ॥

अयं च परविनाशादिहेतुः । क्षुद्रापराधजन्मा तु पुरुषवचनासंभाषणादिहेतुः । अयमेवामर्षाख्यो व्यभिचारीति विवेकः ।

परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्य उत्साहः ॥

अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः ॥

वागङ्गादिविकारदर्शनजन्मा विकासाख्यो हासः

व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः स भयम् ॥

परमानर्थविषयकत्वाभावे तु स एव त्रासो व्यभिचारी । अपरे तु औत्पातिकप्रभवस्त्रासः, स्वापराधद्वारोत्थं भयमिति भयत्रासयोर्भेदमाहुः ।

कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा ।

भावः । अन्ये तु आद्यन्तयो रतेः प्राधान्याच्छोकचित्रितं शृंगारस्यैव भेदान्तरमिति वदन्ति । तदपरे न क्षमन्ते तथाहि मरणानन्तरं पुनरुज्जीवनज्ञानात्प्राक् सत्यं नायिकादि शोकः प्राधान्येनाराजत परं न स स्थायिभावः परं प्राक्प्रदर्शितदिशा मतभेदेन सामाजिकहृदि जायमान एव, सामाजिकानां रसास्वादस्तु संपूर्णेनैव प्रबन्धेन न तु प्रबन्धांशेन, तादृशस्य प्रायः सर्वत्रैव सत्त्वादव्यवस्थापत्तेः, संपूर्णे निबन्धे तु प्राधान्यमेवावहति रतिः, तथा च तस्य विप्रलम्भत्वमेव, नच मध्ये शोकेन विच्छिन्नाया रतेः कथं स्थायित्वम् इति वाच्यम् रतेः प्राधान्यविच्छेदेऽपि तस्या अविच्छेदादिति । अत एवेच्छन्तीत्युक्तं न च सिद्धयतीति भावः । नित्यानित्य ● आत्मनो नित्यत्वस्येतरेषाञ्चानित्यत्वस्य च विचारेण जन्म यस्य, दुःखं दुःखं हेयं हेयमिति वा बुद्धिर्विरागः । गृह ● गृहकलहादिना गृहे गृहसंबन्धिषु वैराग्यसंभवेऽपि अन्यत्र रागसंभवात् न शान्तिः संभवति । गुरुबन्धु ● वधादिरूपो यः परमापराधः, अयञ्च परमापराधजन्यश्च, परुषवचनस्य असंभाषणादेश्च हेतुः । अयमेव क्षुद्रापराधजन्यः क्रोध एव । परपराक्रम ● परेषां पराक्रमादिः, परउत्कृष्टो वा । परमानर्थो ● मरणादिफलकः । स एव वैक्लव्याख्यश्चित्तवृत्तिविशेष एव । कदर्यवस्तु ●

एवमेषां स्थायिभावानां लोके तत्तन्नायकगतानां यान्यालम्बनतयोद्दीपनतया वा कारणत्वेन प्रसिद्धानि तान्येषु काव्यनाट्ययोर्व्यज्यमानेषु विभावशब्देन व्यपदिश्यन्ते ॥

विभावयन्तीति व्युत्पत्तेः ।

यानि च कार्यतया तान्यनुभावशब्देन ॥

अनु पश्चाद्भाव उत्पत्तिर्येषाम् । अनुभावयन्तीति वा व्युत्पत्तेः ।

यानि सह चरन्ति तानि व्यभिचारिशब्देन ॥

तत्र शृङ्गारस्य स्त्रीपुंसावालम्बने । चन्द्रिकावसन्तविविधोपवनपवनरहःस्थानादय उद्दीपनविभावाः । तन्मुखावलोकनतद्गुणश्रवणकीर्तनादयोऽन्ये सात्त्विकभावाश्चानुभावाः ।स्मृतिचिन्तादयो व्यभिचारिणः ।

करुणस्य बन्धुनाशादय आलम्बनानि । तत्संबन्धिगृहतुरगाभरणदर्शनादयस्तत्कथाश्रवणादयश्चोद्दीपकाः । गात्रक्षेपाश्रुपातादयोऽनुभावा ग्लानिश्चयमोहविषादचिन्तौत्सुक्यदीनताजडतादयो व्यभिचारिणः ।

शान्तस्यानित्यत्वेन ज्ञातं जगदालम्बनम् । वेदान्तश्रवणतपोवनतापसदर्शनाद्युद्दीपनम् । विषयारुचिशत्रुमित्राद्यौदासीन्यचेष्टाहानिनासाग्रदृष्ट्यादयोऽनुभावाः । हर्षोन्मादस्मृतिमत्यादयो व्यभिचारिणः ।

कदर्यं कुत्सितं, विचिकित्सा नात्र संशयपर्यायोऽपि तु घृणावद्विलक्षण एव । विभावादीन् लक्षयति एवमेषाम् ● आलम्बनतया इत्यस्य कारणत्वेन, विभावयन्ति प्रादुर्भावयन्ति । कार्यतया ● प्रसिद्धानि व्यपदिश्यन्ते इति चानुवर्तते । न वस्तुतः समुत्पत्तिरतो वैलक्षण्याभिप्रायेण व्युत्पत्त्यन्तरं दर्शयति अनुभाव ● व्यभिचारिलक्षणमाह—यानि सह ● क्वचिद् यानि व्यभिचरन्तीति पाठः । व्यपदिश्यन्त इति वर्तते । रसभेदेन लक्ष्याणि वर्णयति तत्र शृङ्गारस्य ● तेषां मध्ये, आगूस्कृदपराधी, संचारिणां लक्षणानि तु अग्रे मूले स्फुटीभविष्यन्त्येव । अन्ये प्रसिद्धप्रायाः । अन्येषामपि रसानामेवमेव बोध्यम् । तथाहि हास्यस्य विकृताकारवाक्चेष्टाश्रय आलम्बनम्, तच्चेष्टादय उद्दीपनम्, अक्षिसंकोचवदनस्मेरतादयोऽनुभावाः, आलस्यावहित्थाश्रमादयो व्यभिचारिणः । वीरस्य विजेतव्या

रौद्रस्यागस्कृत्पुरुषादिरालम्बनम् । तत्कृतोऽपराधादिरुद्दीपकः । वधबन्धादिफलको नेत्रारुण्यदन्तपीडनपरुषभाषणशस्त्रग्रहणादिरनुभावः । अमर्षवेगौग्र्यचापलादयः संचारिणः ।

एवं यस्याश्चित्तवृत्तेर्यो विषयः स तस्या आलम्बनम् । निमित्तानि चोद्दीपकानीति बोध्यम् ।

रसविशेषवर्णनम्

तत्र शृङ्गारो द्विविधः । संयोगो विप्रलम्भश्च । रतेः संयोगकालावच्छिन्नत्वे प्रथमः । वियोगकालावच्छिन्नत्वे द्वितीयः संयोगश्च न दम्पत्योः सामानाधिकरण्यम् । एकतल्पशयनेऽपीर्ष्यादिसद्भावे विप्रलम्भस्यैव वर्णनात् । एवं वियोगोऽपि न वैयधिकरण्यम् । दोषस्योक्तत्वात् । तस्माद्द्वाविमौ संयोगवियोगाख्यावन्तःकरणवृत्तिविशेषौ । यत्संयुक्तो वियुक्तश्चास्मीति धीः । तत्राद्यो यथा 'शयिता सविधेऽप्यनीश्वरा' (४३ पृष्ठे) इत्यत्र निरूपितः ।

आलम्बनम्, तेषां चेष्टादय उद्दीपकाः, युद्धवीरस्य सहायान्वेषणादि दानस्य त्यागधनसंग्रहादि, धार्मिकस्य यागानुष्ठानादि, दयावतो वीरस्य आश्वासनादयः, पण्डितस्य प्रमाणाद्युच्चारणम्, क्षमावतः शमवाक्योच्चारणादि अनुभाव ऊहनीयः, धृतिमतिगर्वस्मृतितर्कहर्षाः संचारिणः । घोरतरसिंहपिशाचादिर्भयानकस्यालम्बनम्, आलम्बनस्य घोरतरा चेष्टा उद्दीपनम्, वैवर्ण्यगद्गदस्वरादयोऽनुभावाः, वेगसम्मोहत्रासादयः संचारिणः । बीभत्सस्य दुर्गन्धवस्त्वादि आलम्बनम्, तदीयकृम्यादय उद्दीपनम्, निष्ठीवनादयोऽनुभावाः, मोहवेगादयः सञ्चारिणः । अद्भुतरस अलौकिकं वस्तु आलम्बनम्, विलक्षणगुणश्रवणाद्युद्दीपनम्, स्तम्भस्वेदादयोऽनुभावाः, आवेगसंभ्रमादयो व्यभिचारिणः । विभावभेदं दर्शयति एवं

रसविशेषवर्णनम्

कालावच्छिन्नत्वे ० यस्मिन् काले संयोगस्तस्मिन् काले या रतिः, एवमग्रेऽपि । सामानाधि ० एकस्मिन् देशे काले वा वर्तमानत्वम् । अतिव्याप्तिमाह—एकतल्प ० तल्पः शय्या । दोषस्योक्तत्वात् ० एकतल्पशयने इत्यादिना अव्याप्तेः । यत्संयुक्तो ० यद् यस्माद्वृत्तिविशेषात् संयुक्तोऽस्मीति, वियुक्तोऽस्मीति अनुव्यवसायधीः । तत्राद्यो ० तथेति शेषो निरूपितपदार्थान्वयी । शयितेति पद्यं प्रथमस्योत्तमोत्तमकाव्यस्योदाहरणतया

यत्तु चित्रमीमांसायाम्—'वागर्थाविव संपृक्तौ' इत्यत्र रसध्वनिः निरतिशयप्रेमशालिताव्यञ्जनात्' तद्ध्वनिमार्गानाकलननिबन्धनम् । पार्वतीपरमेश्वरविषयककविरतौ प्रधाने निरतिशयप्रेम्णो गुणीभावात् । न हि गुणीभूतस्य रत्यादे रसध्वनिव्यपदेशहेतुत्वं युक्तम् । 'भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः' इति सिद्धान्तात् ।

द्वितीयो यथा—

'वाचो माङ्गलिकीः प्रयाणसमये जल्पत्यनल्पं जने
केलीमन्दिरमारुतायनमुखे विन्यस्तवक्त्राम्बुजा ।
निःश्वासग्लपिताधरोपरिपतद्बाष्पार्द्रवक्षोरुहा
बाला लोलविलोचना शिव शिव प्राणेशमालोकते ॥'

अत्राप्यालम्बनस्य नायकस्य, निःश्वासाश्रुपातादेरनुभावस्य, विषादचिन्तावेगादेश्च व्यभिचारिणः, संयोगाद्रतिरभिव्यज्यमाना वियोगकालावच्छिन्नत्वाद्विप्रलम्भरसव्यपदेशहेतुः ।

निरूपितम् । वागर्थाविव ● 'वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ'। इति रघुवंशस्यादिमं पद्यम् । व्यञ्जनात् ● वागर्थयोर्नित्यसंबन्धिनोरुपमावशादित्यर्थः । ध्वनिमार्गः प्राधान्य एव व्यङ्ग्यस्य ध्वनित्वव्यवहारः । प्रेम्णः पार्वतीपरमेश्वरनिष्ठस्य । भिन्नो रसा- ● रसो रसाभासो भावादिरलङ्कारश्च योऽन्यं प्रति गुणीभूतस्तस्माद्भिन्नः, तादृशैरङ्गभावमावहद्भिरलङ्कारादिभिः सुशोभनीयतां गतो ध्वनिव्यवहारयोग्यो जायते । विप्रलंभमुदाहरति वाचो मांगलिकीः ● नायकस्य विदेशयात्रासमये नायकातिरिक्ते जने मंगलपाठान् बहु जल्पति सति बाला तन्नायिका तु विरहौत्सुक्यवशात् क्रीडागृहस्य गवाक्षद्वारि विन्यस्तं मुखकमलं यया, विरहजन्योष्णश्वासेन ग्लपितस्य अधरस्योपरितः पतद्भिर्बाष्पैरार्द्रौ वक्षोरुहौ स्तनौ यस्याः, अश्रुधारानेत्रनिःसृता अधरतः स्तनयोरुपरि समापतदित्यर्थः, उत्कण्ठावशाच् चंचलनयना शिवशिवप्राणेशमालोकते । ग्लपित इत्यत्र ग्लैहर्षक्षये । अस्यांशस्य व्याख्याने मर्मप्रकाशे लेखकपरम्परया अशुद्धिस्तदनुसारं पद्येऽस्मिन् कश्चित् पाठभेदो वा । शिव शिवेति खेदातिशये । अत्रालम्बनस्य ● नायिकानिष्ठविप्रलंभरतेर्विषय आलम्बनम्, तादृशरतेः कार्याणि

यथा वा—

'आविर्भूता यदवधि मधुस्यन्दिनी नन्दसूनोः
कान्तिः काचिन्निखिलनयनाकर्षणे कार्मणज्ञा।
श्वासो दीर्घस्तदवधि मुखे पाण्डिमा गण्डयुग्मे
शून्या वृत्तिः कुलमृगदृशां चेतसि प्रादुरासीत् ॥

यथा वा—

'नयनाञ्चलावमर्शं या न कदाचित्पुरा सेहे।
आलिङ्गितापि जोषं तस्थौ सा गन्तुकेन दयितेन ॥'

इहापि सहजचाञ्चल्यनिवृत्तिर्जडता चानुभावव्यभिचारिणौ। इमं च पञ्चविधं प्राञ्चः प्रवासादिभिरुपाधिभिरामनन्ति। ते च प्रवासाभिलापविरहेर्ष्याशापानां विशेषानुपलम्भान्नास्माभिः प्रपञ्चिताः।

अनुभावाः, एवमग्रेऽपि। श्रीकृष्णविरहिणीनामवस्थामाह—**आविर्भूता** • यस्मात् कालात् श्रीकृष्णस्य माधुर्यस्राविणी निखिलानां नयनानां वशीकरणे प्रवीणा काचिद् विलक्षणा कान्तिः प्राकटत्, तस्मादेव कालात्, कुलाङ्गनानां मुखे दीर्घः श्वासः, कपोलयुगले पाण्डुरत्वम्, चेतसि निरलम्बना वृत्तिः प्राकटत्। कार्चिदित्यनेनावर्णनीयता सूच्यते। यदवधितदवधिशब्दाभ्यां कार्यकारणयोः कान्तिप्रादुर्भावश्वासादीनां समानकालतावर्णनादतिशयेनातिशीघ्रतया श्वासादीनामुत्पत्तिः पोषिता। कर्मशब्दादणि टिलोपाभावे कार्मणशब्दः। कार्मणं मन्त्रतन्त्रादियोजने कर्मणेऽपि वेति मेदिनीकोशः। पाण्डोर्भावः पाण्डिमा इमनिच्प्रत्ययः। अत्र श्रीकृष्णालम्बना श्वासाद्यनुभाविता शून्यवृत्तिसञ्चारिता रतिः प्रतीयते। श्रीकृष्णविषयकविरतावङ्गतामाशङ्कमानानां कृते स्फुटत्वायाह—**नयनाञ्चला** • या नायिका संयोगकाले लज्जावशात् नेत्रपक्ष्मस्पर्शमपि न सेहे सा एव वियोगकाले गन्तुमुत्सुकेन प्रियेण आलिङ्गिताऽपि मौनमेव तस्थौ नयनाञ्चलामर्शमित्यनेन अवलोकनेऽपि अवगुण्ठनादिकंमापततिस्मेति व्यज्यते। **चाञ्चल्य** • चाञ्चल्यनिवृत्तिरनुभावः, जडता व्यभिचारिणी। **ते च** • अत्र मर्मप्रकाशः—प्रवासः प्रसिद्धः, अनादिसङ्गेऽपि गुणश्रवणादिजन्याभिलाषे इच्छारूपे सति तदप्राप्तौ यः सोऽभिलाषहेतुक उच्यते, गुरुजनादिलज्जातः संगमप्रतिबन्धो विरहः, ईर्ष्याऽसूयादिशब्देन मानहेतुक उच्यते, प्रिये सपत्नीरते ईर्ष्या, तत्कृतो गुणेषु दोषारोपोऽसूया, शापादेर्यथा शकुन्तलादेर्दुर्वासस इति प्राचामाशयः। **विशेषानु** • विप्रलम्भहेतूनां परस्परं भेदेऽपि तत्कृतविप्रलम्भे

करुणो यथा —

'अपहाय सकलबान्धवचिन्तामुद्वास्य गुरुकुलप्रणयम् ।
हा तनय विनयशालिन्कथमिव परलोकपथिकोऽभूः ॥'

अत्र प्रमीततनय आलम्बनम् । तत्कालावच्छिन्नबान्धवदर्शनाद्युद्दीपनम् । रोदनमनुभावः । दैन्यादयः संचारिणः ।

शान्तो यथा—

'मलयानिलकालकूटयो रमणीकुन्तलभोगिभोगयोः ।
श्वपचात्मभुवोर्निरन्तरा मम जाता परमात्मनि स्थितिः ॥'

अत्र प्रपञ्चः सर्वोऽप्यालम्बनम् । सर्वत्र साम्यमनुभावः । मत्यादयः संचारिणः । यद्यपि प्रथमार्धे उत्तमाधमयोरुपक्रमाद्द्वितीयार्धेऽधमोत्तमवचनं क्रमभङ्गमावहति, तथापि वक्तुर्ब्रह्मात्मकतयोत्तमाधमज्ञानवैकल्यं संपन्नमिति द्योतनाय क्रमभङ्गो गुण एव ।

इदं पुनर्नोदाहार्यम्——

'सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-
र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान् ।

विशेषो नोपलभ्यते प्रायः समाना एवानुभावव्यभिचारिणः सर्वत्र । यत्तु कामाद्यवस्थानां तेषु तेषु विप्रलम्भेषु साहित्यदर्पणादिकृतं पृथग्वर्णनं तत्तु प्रायोवादेन नियमाभावादिति भावः।

मृतं पुत्रमुद्दिश्य तत्पितुर्मातुर्वा विलपनमाह—अपहाय ० सकलपरिवारचिन्तां त्यक्त्वा गुरुकुलप्रीतिं दूरीकृत्य, । तत्कालाव ० तस्मिन् काले बान्धवादिदर्शनम् ।

संसारे आसक्तानां स्पृहणीये दूषणीये च सर्वत्र वस्तुनि शान्तस्य समानां दृष्टिमाह— मलयानि ० कालकूटो विषम्, कुन्तलाः केशविशेषाः, भोगिभोगः सर्पफणः श्वपचश्चाण्डाल आत्मभूर्ब्रह्मा मर्मप्रकाशमते ज्ञानी च आत्मनि भवतीति व्युत्पत्तेः । निरन्तरा भेदरहिता, एषु समानमेव परमात्मनश्चैतन्यमिति भावः, अहं ब्रह्मास्मीति भावनैव परमात्मनि स्थितिः । उत्तमाद्य ० मलयानिलरमणीकुन्तलात्मभुव उत्तमाः, कालकूटभोगिभोगश्वपचा अधमाः, । क्रमभङ्गम्, अक्रमत्वदोषम्, ब्रह्मात्मकतया तद्भावनया, उत्तमत्वेन अधमत्वेन च यज्ज्ञानं तस्य वैकल्यम्, अथवा सर्वेषां ब्रह्मात्मकतया पूर्वोक्तज्ञानवैकल्यमित्यर्थः । गुणीभूतस्य जगन्निर्वेदस्य प्रत्युदाहरणमाह—सुरस्रोत ० गङ्गातटे तिष्ठन्

विधूतान्तर्ध्वान्तो मधुरमधुरायां चिति कदा
निमग्नः स्यां कस्यांचन नवनभस्याम्बुदरुचि ॥'

अत्रापि यद्यपि विषयगणालम्बनः सुरस्रोतस्विनीतटाद्युद्दीपितो नयननिमीलनादिभिरनुभावितः स्थायी निर्वेदः प्रतीयते, तथापि भगवद्वासुदेवालम्बनायां कविरतौ गुणीभूत इति न शान्तरसव्यपदेशहेतुः। इदं च पद्यं मन्निर्मितायां भगवद्भक्तिप्रधानायां करुणालहर्यामुपनिबद्धमिति तत्प्रधानभावप्राधान्यमेवार्हति। शान्तरसाननुगुणश्चायमोजस्वी गुम्फ इति चानुदाहार्यमेवैतत्। पूर्वपद्ये तु 'परमात्मनि स्थितिः' इत्यनेन तत्तादूप्यावगमाद्रतेरप्रतिपत्तिः।

रौद्रो यथा—

'नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे
मदीयगुरुकार्मुकं गलितसाध्वसं वृश्चति।
अयं पततु निर्दयं दलितदृप्तभूभृद्गल-
स्खलद्रुधिरघस्मरो मम परश्वधो भैरवः ॥'

नयनयोरन्तर्मुखत्वं कृत्वा अनन्तरं बहिरिन्द्रियाणां बाह्यान् रूपादीन् विषयान् चेतसो दूरीकृत्य नष्टान्तःकरणमलः कस्याञ्चन विलक्षणायां चैतन्यरूपायां नवस्य भाद्रमासीयमेघस्य इव श्यामायां श्रीकृष्णकान्तौ अभेदभावनया संसक्तो भवेयम्। स्रोतस्विनी नदी स्रोतश्शब्दाद् विनिः, अधिशीङ्स्थासामित्यादिना पुलिनस्य कर्मत्वम्, ध्वान्तमत्र मलमविद्या वा, मधुरमधुरा आनन्दरूपा। **प्रधानभाव** • प्रधानो भावो भगवद्भक्तिस्तस्या एव प्राधान्यं न तु विषयाणां निर्वेदस्य। कारणान्तरमप्याह—**शान्तरसा** •। ननु पूर्वपद्येऽपि परमात्मनि स्थितिरित्यनेन परमात्मविषयिणी रतिः प्रतीयत एवेत्याशङ्कायामाह—**तादूप्य** • उत्कर्ष एव भक्तिभावस्य समुद्रेको न त्वभेदभावनायामिति भावः।

धनुर्भङ्गेन भञ्जयति रामभद्रे क्रुद्धस्य परशुरामस्य क्रोधवर्णनमाह—**नवोच्छलित** • नवेन वृद्धिं गतेन यौवनेन स्फुरन् महान् गर्व एव ज्वरो यस्य तस्मिन्, मदीयगुरोः शिवस्य धनुः, गलितं विनष्टं साध्वसं भयं यस्मिंस्तत्तथा छिन्दति च्छेदनकर्तुरुपरि मम अयं भयंकरः दलिता ये दृप्तानां भूभृतां राज्ञां गलास्तेभ्यः स्खलतां रुधिराणां भक्षकः

अत्र तदानीं रामत्वेनाज्ञातो गुरुकार्मुकभञ्जक आलम्बनम्। अत एव विशेष्यानुपादानम्। गुरुद्रुहो नामग्रहणानौचित्यात्, क्रोधाविष्काराद्वा। ध्वनिविशेषानुमितो निःशङ्कधनुर्भङ्ग उद्दीपकः। परुषोक्तिरनुभावः। गर्वोग्रत्वादयः संचारिणः। एषा च धनुर्भङ्गध्वनिभग्नसमाधेर्भार्गवस्योक्तिः। वृत्तिरप्यत्र महोद्धता रौद्रस्य परमौजस्वितां परिपुष्णाति। अन्यत्र गुरुस्मरणे सत्यहंभावविगमस्यावश्यकतया प्रकृते चाजहत्स्वार्थलक्षणामूलध्वननेन मदीयेत्यनेन गर्वोत्कर्षस्यैव प्रकाशनात्स्फुटं गम्यमानेन विवेकशून्यत्वेन क्रोधस्याधिक्यं गम्यते।

इदं तु नोदाहार्यम्—

'धनुर्विदलनध्वनिश्रवणतत्क्षणाविर्भव-
न्महागुरुवधस्मृतिः श्वसनवेगधूताधरः।
विलोचनविनिःसरद्बहलविस्फुलिङ्गव्रजो
रघुप्रवरमाक्षिपञ्जयति जामदग्न्यो मुनिः॥'

अत्राप्यपराधास्पदेन रघुनन्दनेनालम्बितो धनुर्विदलनध्वनिश्रवणेनोद्दीपितो निश्वासनेत्रज्वलनादिभिरनुभावितो महागुरुवध-

---

परशुर्निर्दयं पततु। वृश्चतीति ओव्रश्चूछेदने इत्यस्य शत्रन्तस्य सप्तम्यन्तम्। घस्लृ अदने इत्यस्मात् सृघस्य दः क्मरजित्यनेन क्मरचिघस्मर इति। भक्षको घस्मरोऽद्मरः इत्यमरकोषोऽपि। भार्गवः परशुरामः। अहंभावोऽहंकारः, चाजहत्स्वार्था ० स्वार्थं बोधयन्ती सती लक्ष्यार्थस्यापि बोधिका लक्षणा अजहत्स्वार्था या प्राचीनैरुपादानलक्षणानाम्ना व्यवह्रियते, अत्र चैकविंशतिकृत्वो निःक्षत्रियवसुमतीकारकत्वं पितुराज्ञामात्रेण निःशङ्कं मातृहन्तृत्वं वा लक्ष्यतावच्छेदकम्, तेन रूपेण शक्यार्थस्य बोध इत्यभिप्रायः। तादृशेन लक्ष्यार्थेन गर्वोत्कर्षः, तेन च विवेकशून्यता, तया च क्रोधाधिक्यं व्यज्यत इति व्यञ्जनाया लक्षणामूलायाः परम्परा। तादृश एव प्रसंगे परशुरामक्रोधस्य गुणीभूतत्वमारचयति—धनुर्विदलन ० धनुषो विदलनस्य ध्वनेः श्रवणस्यानन्तरमप्यतिशयवशाच्छ्रवणक्षणे एव आविर्भवन्ती महागुरोः पितुर्जमदग्नेर्वधस्य स्मृतिर्यस्य सः, क्रोधश्वासवेगेन कम्पितोऽधरोष्ठो यस्य क्रोधाद् रक्तनेत्राभ्यां विनिःसरतां बहलानां विस्फु-

स्मृतिगर्वौग्र्यत्वादिभिश्च संचारितः क्रोधो यद्यपि व्यज्यते, तथाप्यसौ तत्प्रभाववर्णनबीजभूतायां कविरतौ गुणीभूत इति न रौद्ररसध्वनिव्यपदेशहेतुः । काव्यप्रकाशगतरौद्ररसोदाहरणे तु 'कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकम्' इति पद्ये रौद्ररसव्यञ्जनक्षमा नास्ति वृत्तिः, अतस्तत्कवेरशक्तिरेव ।

वीरश्चतुर्धा । दानदयायुद्धधर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात् । तत्राद्यो यथा—

'कियदिदमधिकं मे यद्द्विजायार्थयित्रे
कवचमरमणीयं कुण्डले चार्पयामि ।
अकरुणमवकृत्य द्राक्कृपाणेन निर्य-
द्बहलरुधिरधारं मौलिमावेदयामि ॥'

एषा द्विजवेषायेन्द्राय कवचकुण्डलदानोद्यतस्य कर्णस्य तद्दानविस्मितान्सभ्यान्प्रत्युक्तिः । अत्र याचमान आलम्बनम् । तदुदीरिता स्तुतिरुद्दीपिका । कवचादिवितरणं तत्र लघुत्वबुद्ध्यादिकं चानुभावः । मे इत्यर्थान्तरसंक्रमितवाच्यध्वन्युत्थापितो गर्वः

लिङ्गानां व्रजं समुदायो यस्य सः, धनुर्भङ्गकारिणं श्रीराममाक्षिपन् जमदग्निपुत्रो मुनिः परशुरामो जयति । तत्प्रभाव० परशुरामप्रभावः, जयतीत्युक्त्या कविगतरतेः स्फुटं प्रतीतेः । पूर्वपद्ये तु कविगतरतिप्रत्यायिका सामग्री नास्ति । गुरुपातकम्० मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः । नरकरिपुणा सार्धं तेषां सभीमकिरीटिनाम् अयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् । श्रीकृष्णो नरकरिपुः किरीटी अर्जुनः, वेणीसंहारनाटकस्य तृतीयेऽङ्के द्रोणाचार्यवधेन कुपितस्याश्वत्थाम्नोऽर्जुनादीनुद्दिश्योक्तिः । वृत्तिः गाढबन्धा ओजस्विनी । तदुपाधे० वीररसस्थायिभावस्य । कियदिद० इदं मम दानं कियद् अधिकं यद् महते पात्राय द्विजाय याचकाय अरमणीयं कवचं साधारणे कुण्डले च अर्पयामि । सम्यग्दानं तु तद् भवेत्तदाह निर्दयं यथा स्यात्तथा शीघ्रं कृपाणेन छित्वा बहला रुधिरस्य धारा यस्मिंस्तं मौलिं निवेदयामि । इत्यर्थान्तर० लोकोत्तरपितृ-

स्वकीयलोकोत्तरपितृजन्यत्वादिस्मृतिश्च संचारिणौ। वृत्तिरप्यत्र तत्तदर्थानुरूपोद्गमविरामशालितया सहृदयैकचमत्कारिणी। तथाहि—उत्साहपोषकं कवचकुण्डलार्पणयोर्लघुत्वनिरूपणं विधातुं पूर्वार्धे तदनुकूलशिथिलबन्धात्मिका। उत्तरार्धे तु मौलितः प्राग्वक्तृगतगर्वोत्साहपरिपोषणायोद्धता। ततः परं ब्राह्मणे सविनयत्वं प्रकाशयितुं तन्मूलीभूतं गर्वराहित्यं ध्वनयितुं पुनः शिथिलैव। अत एवावेदयामीत्युक्तम्। न तु ददामि वितरामीति वा।

इदं तु नोदाहरणीयम्—

'यस्योद्दामदिवानिशार्थिविलसद्दानप्रवाहप्रथा-
माकर्ण्यावनिमण्डलागतवियद्बन्दीन्द्रवृन्दाननात्।
ईर्ष्यानिर्भरफुल्लरोमनिकरव्यावल्गदूधःस्रव-
त्पीयूषप्रकरैः सुरेन्द्रसुरभिः प्रावृट्पयोदायते॥

अत्रेन्द्रसभामध्यगतसकलनिरीक्षकालम्बनः अवनिमण्डलागतवियद्बन्दीन्द्रवदनविनिर्गतराजदानवर्णनोद्दीपितः, ऊधःप्रस्नुतपीयूषप्रकरैरनुभावितः, असूयादिभिः संचारिभिः परिपोषितोऽपि कामगवीगत उत्साहो राजस्तुतिगुणीभूत इति न रसव्यपदेशहेतुः।

भास्करजन्यः कर्णनामा अस्मच्छब्दवाच्यः, तथा च लोकोत्तरपितृजन्यत्वस्य स्मृतिः। अस्मच्छब्दस्य तादृशवाच्यार्थकस्य रणेषु क्षतजर्जरकलेवरे सकलराज्यकोषदातरि वा लक्षणया वाच्योऽर्थान्तरे संक्रमितः लक्षणामूलकव्यञ्जनया तु गर्व उपस्थाप्यते, ध्वनिपदं व्यञ्जनापरम्। उद्गमविरामौ आरम्भसमाप्ती। मौलितः प्राक् मौलिर्मिति पदतः प्राग्वर्ती पद्यांशः। राज्ञो दानयशसा ईर्ष्यां गताया देवकामधेन्वा उत्साहस्य वर्णनमाह—यस्योद्दाम ● कामधेनुः यस्य नृपस्य उद्दाम्नः रात्रिन्दिवं याचकेषु विलसतो दानप्रवाहस्य प्रसिद्धिम्, पृथ्वीमण्डले आगतानां स्वर्गीयस्तुतिपाठकानां मुखात् श्रुत्वा असहनवशात् फुल्लो रोमाणां समूहो यस्य स्फुरन् यः स्तनस्तस्मात्स्रवतां क्षीराणां समूहैः वर्षामेघ इवाचरति क्षीराणि वर्षतीति। कामगावी कामधेनुः। रसव्यप ●

अत एवेदमपि नोदाहरणम्—

'साब्धिद्वीपकुलाचलां वसुमतीमाक्रम्य सप्तान्तरां
सर्वां द्यामपि सस्मितेन हरिणा मन्दं समालोकितः ।
प्रादुर्भूतपरप्रमोदविदलद्रोमाञ्चितस्तत्क्षणं
व्यानम्रीकृतकंधरोऽसुरवरो मौलिं पुरो न्यस्तवान् ॥'

इह च भगवद्वामनालम्बनः, तत्कर्तृकमन्दनिरीक्षणोद्दीपितः, रोमाञ्चादिभिरनुभावितः, हर्षादिभिः पोषितः, उत्साहो व्यज्यमानोऽपि गुणः । प्रागन्यगतस्येव प्रकृते राजगतस्यापि तस्य राजस्तुत्युत्कर्षकत्वात् । एतेन 'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति श्रीवत्सलाञ्छनोक्तमुदाहरणं परास्तम् ।

रसध्वनिव्यपदेशहेतुः । ईर्ष्याया वाच्यत्वेऽपि संचारिभावस्यासूयाया व्यङ्ग्यत्वमेव, ईर्ष्या अक्षमा गुणेषु दोषारोपोऽसूयेति भेदात् । अत एव ● गुणीभूतत्वादेवोत्साहस्य ।

वामनभगवन्तं प्रति दैत्यराजस्य बलेर्दानोत्साहं वर्णयति—साब्धिद्वीप ● एकेन पादेन सागरेण द्वीपेन पर्वतेन च सहितां पृथ्वीं समाक्रम्य, द्वितीयेन पादेन सप्तप्राकारां सर्वां द्यां स्वर्गमपि आक्रम्य तृतीयपादस्य किं स्थानमिति विहस्य हरिणा मन्दं समालोकितः प्रादुर्भूतेन परमप्रमोदेन प्रफुल्लं रोमाञ्चं प्राप्तो नतमस्तको बलिस्तत्क्षणमेव इदमेव तृतीयपादस्थानमिति बुद्ध्या पुरः शिरः स्थापितवान् । पोषितः ● अत्र मर्मप्रकाशः—प्रमोदः सुखम्, तदंशावरणभञ्जकवृत्तिविशेषो हर्ष इति न वाच्यता व्यभिचारिण इत्यवधेयम् इत्याह । सुखं निरावरणं वृत्यवच्छिन्नं चैतन्यमानन्दरूपम्, आनन्दांशस्यावरणाज्ञाननाशकश्चेतसो वृत्तिविशेषो हर्ष इति तदभिप्रायः प्रतिभाति । व्यभिचारिणां चित्तवृत्तिविशेषत्वमग्रे मूलेऽपि वक्ष्यति । अन्यगत ● यस्योद्दामेत्यादिपद्ये कविगताया राजविषयकरतेः कामगवीगत उत्साह उत्कर्षकतयाङ्गम्, अत्र बलिराजगत उत्साहो बलिराजविषयककविगतरतेस्तथैवाङ्गम् । तथा अङ्गाङ्गिनोः सामानाधिकरण्यवैयधिकरण्यप्रयुक्तभेदेऽपि भावोपकारकत्वमङ्गत्वसाधकमुभयत्रापि उत्साहयोः समानमेव, तथा च नोत्साहस्य वीररसत्वमिति भावः । एतेन ● अन्याङ्गस्योत्साहस्य गुणीभूतत्वाद् वीरस्य ध्वनिव्यपदेशहेतुत्वाभावेन । श्रीवत्स● काव्यप्रकाशस्य सारबोधिनीटीकायाः कर्ता श्रीवत्सलाञ्छनः । संपूर्णं पद्यन्तु—

तस्य गुणीभूतव्यङ्ग्यत्वेन रसध्वनिप्रसङ्गेऽनुदाहरणीयत्वात्। ननु 'अकरुणमवकृत्य—' इत्यत्रापि प्रतीयमानस्य दानवीरस्य कर्णस्तुत्यङ्गत्वात्कथं ध्वनित्वमिति चेत्, सत्यम्। अत्र कवेः कर्णवचनानुवादमात्रतात्पर्यकत्वेन कर्णस्तुतौ तात्पर्यविरहात्, कर्णस्य च महाशयत्वेनात्मस्तुतौ तात्पर्यानुपपत्तेः स्तुतिरवाक्यार्थ एव। परं तु वीररसप्रत्ययानन्तरं तादृशोत्साहेन लिङ्गेन स्वाधिकरणे सानुमीयते। राजवर्णनमध्ये तु राजस्तुतौ तात्पर्याद्वाक्यार्थतैव तस्याः।

द्वितीयो यथा—

'न कपोत भवन्तमण्वपि स्पृशतु श्येनसमुद्भवं भयम्।
इदमद्य मया तृणीकृतं भवदायुःकुशलं कलेवरम्॥'

उत्पत्तिर्जमदग्नितः स भगवान् देवः पिनाकी गुरुः।
शौर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः॥
त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः।
ब्रह्मक्षत्रतपोनिधेर्भगवतः किं किं न लोकोत्तरम्॥

सप्तभिः समुद्रैः परिखारूपैर्वेष्टितायाः पृथिव्या निर्व्याजं दानमवधिर्यस्य, क्षत्रियस्य ब्राह्मणस्य च तपसोर्निधेः। महावीरचरितनाटकस्य द्वितीयेऽङ्के श्रीशिवधनुर्भङ्गेन कुपितं परशुराममुद्दिश्य श्रीरामचन्द्रस्योक्तिः। **तस्य गुणी०** परशुरामोत्साहस्य परशुरामस्तुतौ गुणीभूतत्वेन भावध्वनित्वमेव। अत एवाह **रसध्वनि०**। दानवीरस्य दानोत्साहस्य। **अवाक्यार्थः०** कर्णस्य कवेर्वा स्तुतौ 'तात्पर्याभावेन अस्तुतिपरस्य वाक्यस्य न स्तुतिर्वाक्यार्थ इति भावः। ननूत्साहेन कर्णस्तुतिः प्रतीयमाना कथमपलप्येतेति वाच्यम्? तत्र स्तुत्यनुमितेः शाब्दबोधरूपत्वाभावात्, शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वेऽतात्पर्यविषयस्य शाब्दविषयत्वासंभवात्, अनुमितिरूपा प्रतीतिस्तु नापलप्यते इत्यभिप्रायेणाह **परन्तु०** स्वाधिकरणे उत्साहाधिकरणे कर्णे सा स्तुतिः, कर्णः स्तुतिमान् लोकोत्तरोत्साहशालित्वात्। स्तुतिमत्ता च विषयतासंबन्धेन। अथवा स्वाधिकरणे इति न स्तुत्यन्वयि अपितु अनुमित्यन्वयि, तथा च स्वाधिकरणे तादृशोत्साहज्ञानाधिकरणे सहृदये सानुमीयते स्तुतिविषयिणी अनुमितिः, अत्र मते तादृशोत्साहेनेत्यस्य तादृशोत्साहज्ञानेनेत्यर्थः। उत्साहः कर्णे उत्साहज्ञानमेव श्रोतरि। तस्याः स्तुतेः। यदा शिवेः परीक्षामुद्दिश्य देवौ श्येनकपोतवेषं परिगृह्य तत्समक्षमागतौ श्येनाद्बिभ्यच्च कपोतः शिबिशरणमाजगाम तदा कपोतं प्रति शिबिर्वक्ति **न कपोत०** भवन्तमणावपीति लेखक-

अथवैवं विन्यासः—

'न कपोतकपोतकं तव स्पृशतु श्येन मनागपि स्पृहा ।
इदमद्य मया समर्पितं भवते चारुतरं कलेवरम् ।'

एषा शिवेः कपोतं श्येनं प्रति चोक्तिः । अत्र कपोत आलम्बनम् । तद्गतं व्याकुलीभवनमुद्दीपनम् । तस्य कृते स्वकलेवरार्पणमनुभावः । न चात्र शरीरदानप्रत्ययाद्दानवीरध्वनित्वापत्तिरिति वाच्यम् । श्येन-कपोतयोर्भक्ष्यभक्षकभावापन्नत्वेन शिविशरीरस्यार्थिनोऽभावात्तद-प्रतिपत्तेः । श्येने शरीरनिवेदनस्य कपोतशरीरत्राणोपाधिकतया विनिमयपदवाच्यत्वात् ।

तृतीयो यथा—

'रणे दीनान्देवान्दशवदन विद्राव्य वहसि
प्रभावप्रागल्भ्यं त्वयि तु मम कोऽयं परिकरः ।
ललाटोद्यज्ज्वालाकवलितजगज्जालविभवो
भवो मे कोदण्डच्युतविशिखवेगं कलयतु ॥'

एषा दशवदनं प्रति भगवतो रामस्योक्तिः । इह भव आलम्बनम् । रणादर्शनमुद्दीपनम् । दशवदनावज्ञानुभावः । गर्वः संचारी । वृत्तिरत्र

परम्पराकृतोऽशुद्धः पाठः भवन्तमणवपि इति पाठः । भवत आयुषो रक्षकम्, शरीरं तृणवद्दाने मोहरहितं कृतम् । तदेव कपोतोद्देश्यकं पद्यं श्येनोद्देश्यकत्वेन विपरिणमयति न कपोतकपोतकम • अल्पार्थे कद्वयम् । तव श्येनस्य, स्पृहाभक्षणविषयिणी । कपोतो भक्ष्यः श्येनश्च भक्षक इति भक्ष्यभक्षकभावो न तु याच्ययाचकभावः । याच्यमपि कपोत-शरीरं न तु शिविशरीरम्, अर्थी श्येनः कपोतस्य न तु स दीयते दीयते शिबिशरीरं न तस्यार्थी इत्येवोक्तम् अर्थिनोऽभावात् । तदप्रतीतेर्दानाप्रतीतेः । त्राणोपाधिक • शरीरनिवेदनं न दानविधया अपितु कपोतशरीररक्षाप्रयुक्तम्, अतोऽयं कपोतशिबिशरीरयोर्विनिमयः, निरुपाधिकनिवेदनस्थले एव वस्तुतो दानस्य व्यवहारः । रणे दीनान् • हे दशवदन ! रणे कातरान् देवान् पराजित्य धाष्ट्यंप्रतिष्ठां धारयसि त्वयि मम शिवधनुर्भङ्गाद्यनेक-लोकोत्तरकार्यकारिणो रामस्य कोऽयं युद्धाय गात्रबन्ध आरम्भो वा, न त्वं मम प्रतिभट्टो

देवानां प्रस्तावे तद्गतकातर्यप्रकाशनद्वारा वीररसानालम्बनत्वावगत-येऽनुद्धतैव। दशवदनप्रस्तावे तु देवदर्पदमनवीरत्वप्रतिपादना-योद्धतापि तस्यावज्ञया रामगतोत्साहानालम्बनत्वेन तदालम्बनस्य रसस्याप्रत्ययान्न प्रकर्षवती। भगवतो भवस्य तु परमोत्तमालम्बन-विभावत्वात्तत्प्रस्तावे तदालम्बनस्यौजस्विनो वीररसस्य निष्पत्तेः प्रकृष्टोद्धता।

चतुर्थो यथा—

'सपदि विलयमेतु राज्यलक्ष्मीरुपरि पतन्त्वथवा कृपाणधाराः।
अपहरतुतरां शिरः कृपान्तो मम तु मतिर्न मनागपैति धर्मात्॥'

एषाऽधर्मेणापि रिपुर्जेतव्य इति वदन्तं प्रति युधिष्ठिरस्योक्तिः। अत्र धर्मविषय आलम्बनम्। 'न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः' इत्यादिवाक्यालोचनमुद्दीपनम्। शिरश्छे-दाद्यङ्गीकारोऽनुभावः। धृतिः संचारिणी। इत्थं वीररसस्य चातुर्विध्यं प्रपञ्चितं प्राचामनुरोधात्।

वस्तुतस्तु बहवो वीररसस्य शृङ्गारस्येव प्रकारा निरूपयितुं शक्यन्ते। तथा हि—प्राचीन एव 'सपदि विलयमेतु' इत्यादि पद्ये 'मम तु मतिर्न मनागपैतु सत्यात्' इति चरमपादव्यत्यासेन पद्यान्तरतां प्रापिते सत्यवीरस्यापि संभवात्। न च सत्यस्यापि धर्मान्तर्गततया धर्मवीररस एव तद्वीरस्याप्यन्तर्भाव इति वाच्यम्। दानदययोरपि तदन्तर्गततया तद्वीरयोरपि धर्मवीरात्पृथग्गणनानौचित्यात्।

भवितुमर्हसीति भावः। प्रतिभटश्च ललाटे उद्यन्त्या अग्निज्वालया कवलितः प्रपञ्च-प्रभावो यस्य स शिवो मम धनुषोत्क्षिप्तस्य बाणस्य वेगम् अनुभवतु कीदृक् सः। **उद्धतापि** • न प्रकर्षवतीत्यनेनान्वेति न प्रकृष्टोद्धतेत्यर्थः। तदालम्बनस्य रावणालम्बनस्य, **सपदि** • स्फुटमेतत्, अपैति पृथग् याति मनाक् ईषत्। पादत्रयेण क्रमशः काममय-जीवितानां धर्ममपेक्ष्य परित्यागो वर्णितः। तद् ध्वनयति 'न जातु' इत्यादिना। **तद्वीरस्या** •

एवं पाण्डित्यवीरोऽपि प्रतीयते ।

यथा—

'अपि वक्ति गिरां पतिः स्वयं यदि तासामधिदेवतापि वा ।
अयमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥'

अत्र बृहस्पत्याद्यालम्बनः सभादिदर्शनोद्दीपितो निखिलविद्वत्तिरस्कारानुभावितो गर्वेण संचारिणा पोषित उत्साहो वक्तुः प्रतीयते । ननु चात्र युद्धवीरत्वम् । युद्धत्वस्य वादसाधारणस्य वाच्यत्वाद् इति चेत्, क्षमावीरे किं ब्रूयाः ।

यथा—

'अपि बहलदहनजालं मूर्ध्नि रिपुर्मे निरन्तरं धमतु ।
पातयतु वासिधारामहमणुमात्रं न किंचिदाभाषे ॥'

क्षमावत उक्तिरियम् ।

बलवीरे वा किं समादध्याः ।

यथा—

'परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय ।
अहमिह पुरुहूत पक्षकोणे निखिलमिदं जगदक्लमं वहामि ॥'

सत्यवीरस्यापि, तदन्तर्गततया धर्मान्तर्गततया, तद्वीरयोः दानवीरदयावीरयोः, । हयग्रीवभगवत उपासनया शास्त्रसागरमुत्तीर्णस्य विदुषो वादोत्साहवर्णनमाह—**अपि वक्ति** • गिरां पतिः बृहस्पतिः, वाचामधिदेवता सरस्वती, पुरो वादाहवे समक्षम्, हयाननो हयग्रीवः हयाननस्य स्मरणेन समापितः शास्त्रसागरो येन सः, । **वादसाधारण** • शब्देनास्त्रेण शरीरेण वा कलहो युद्धमित्यादिरूपेण, ब्रूयाः कुत्रान्तर्भावं कुर्याः । **अपि बहल** • बहूनामग्नीनां समूहं धमतु उत्तेजयतु, आभाषे प्रतिकृतिकरणन्तु दूरे स्याद् विपरीतभाषणमपि न कुर्याम्, शत्रुरालम्बनः, तादृशापकारादिसहनमनुभावः, क्षणभङ्गुरस्य शरीरादेः कृते किं परद्रोहाद्याचरणमित्यादिचिन्तोद्दीपितः, धृत्यादिः संचारी, तद्वशात्क्षमारसो व्यज्यत एवेति भावः । बलवीरं गरुडमाह—**परिहरतु** •

पुरुहूतं प्रत्येषा गरुत्मत उक्तिः। ननु 'अपि वक्ति—' 'परिहरतु धराम्—' इति पद्यद्वये गर्व एव नोत्साहः। मध्यस्थपद्ये तु धृतिरेव ध्वन्यते इति भावध्वनय एवैते न रसध्वनय इति चेत्, तर्हि युद्धवीरादिष्वपि गर्वादिध्वनितामेव किं न ब्रूयाः। रसध्वनिसामान्यमेव वा किं न तद्व्यभिचारध्वननेन गतार्थयेः। स्थायिप्रतीतिर्दुरपह्नवा चेत्तुल्यं प्रकृतेऽपि। अनन्तरोक्तपद्ये तु नोत्साहः प्रतीयते। दयावीरादिषु प्रतीयत इति तु राज्ञामा (राजा) ज्ञामात्रम्।

अद्भुतो यथा—

'चराचरजगज्जालसदनं वदनं तव।
गलद्गगनगाम्भीर्यं वीक्ष्यास्मि हृतचेतना ॥'

कदाचिद्भगवतो वासुदेवस्य वदनमालोकितवत्या यशोदाया इयमुक्तिः। अत्र वदनमालम्बनम्। अन्तर्गतचराचरजगज्जालदर्शनमुद्दीपनम्। हृतचेतनत्वम्, तेन गम्यं रोमाञ्चनेत्रस्फारणादि चानुभावः। त्रासादयो व्यभिचारिणः। नैवात्र विद्यमानापि पुत्रगता प्रीतिः प्रतीयते। व्यञ्जकाभावात्। प्रतीतायां वा तस्यां विस्मयस्य गुणत्वं न युज्यते। एवं कश्चिन्महापुरुषोऽयमिति भक्तिरपि तस्याः

सर्पश्रेष्ठः शेषः पृथ्वीं त्यजतु, तां पृथ्वीं परित्यज्य कच्छपोऽपि भगवान् सुखमन्यत्र गच्छतु, अय गतावित्यस्य लोटि अयतामिति। हे इन्द्र! अहम् इह पक्षकोणे निखिलं जगत् खेदरहितं यथा स्यात्तथा वहामि। क्वचिद् जगदण्डकमिति पाठस्तत्राल्पार्थे कन्। अपि बहलेत्यादि मध्यस्थं पद्यम्, विनिगमनाविरहाद् रससामान्योच्छेदमाह—**रसध्वनि** • विनिगमकमाह—**स्थायि** • तद्विनिगमकं सत्यक्षमाबलवीररसेष्वप्याह **तुल्यं प्रकृतेऽपि** •। **राजाज्ञामात्रम्** • न तु वस्तु इति भावः, तेन चत्वार एव वीररसभेदा इति प्राचां सरणावास्था न कार्या। राज्ञामाज्ञामात्रमित्यपि पाठः।

चराचर • स्थावरजङ्गमादिप्रपञ्चस्य स्थानम्, विनश्यत् गगनस्य गांभीर्यं यस्मिस्तत् गगनतोऽप्यतिगभीरं परिमाणशून्यं हृतचेतना विवेकशून्या। **तेन गम्यम्** • हृतचेतनतया व्यङ्ग्यं बोधकशब्दाभावात्। **न युज्यते** • हृतचेतनत्वेन विस्मयस्यैवोत्कटत्व

पुत्रो ममायं बाल इति निश्चयेन प्रतिबन्धादुत्पत्तुमेव नेष्टे। अतस्तस्यामपि विस्मयस्य गुणीभावो न शङ्क्यः।

यच्च सहृदयशिरोमणिभिः प्राचीनैरुदाहृतम्—

'चित्रं महानेष तवावतारः क्व कान्तिरेषाभिनवैव भङ्गिः।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः॥' इति,

तत्रेदं वक्तव्यम्—प्रतीयतां नामात्र विस्मयः, परं त्वसौ कथंकारं [अद्भुतरस] ध्वनिव्यपदेशहेतुः। प्रतिपाद्यमहापुरुषविशेषविषयायाः प्रधानीभूतायाः स्तोतृगतभक्तेः प्रकर्षकत्वेनास्य गुणीभूतत्वात्। यथा महाभारते गीतासु विश्वरूपं दृष्टवतः पार्थस्य 'पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्' इत्यादौ वाक्यसंदर्भे। इत्थं चास्य रसालंकारत्वमुचितम्। भक्तिर्नैवात्र प्रतीयत इति चेद्दरमुकुलितलोचनं विदांकुर्वन्तु सहृदयाः।

हास्यो यथा—

'श्रीतातपादैर्विहिते निबन्धे निरूपिता नूतनयुक्तिरेषा।
अङ्गं गवां पूर्वमहो पवित्रं न वा कथं रासभधर्मपत्न्याः॥'

प्रतीतेः कथञ्चित् प्रतीयमानाऽपि वत्सलता विस्मयस्यैव पोषिका भवेत्। तस्या यशोदाया निश्चयेनेत्यत्रान्वेति, बालबुद्धिः पुत्रबुद्धिश्च महापुरुषबुद्धिं प्रतिबध्नीतः। तस्यां भक्तौ।

काव्यप्रकाशोदाहरणे विस्मयस्य गुणीभूतत्वं दर्शयति **चित्रं महानेष** • वामनभगवन्तं दृष्ट्वा बलिर्वर्णयति। अभिनवा नूतना भङ्गी रचना, सर्गः सृष्टिः। अत्र चित्रक्वाभिनवादिशब्दा अतिशयद्योतनद्वारा विस्मयं पोषयन्ति परं तथा पुष्टोऽपि विस्मयो भगवदालम्बनां बलिनिष्ठां भक्तिं पुष्णाति। तथा च भावध्वनेरेवोदाहरणत्वमस्य युक्तम्। कथंकारं कथं कृत्वा, अस्य विस्मयस्य, **वाक्यसंदर्भे** • यथा भक्तौ प्रतीयमानायां विस्मयो गुणीभूतः। **चास्य** • भक्तौ गुणीभूतस्य विस्मयस्य भक्तेरलङ्करणाद् रसवदलङ्कारत्वमेव युक्तम्। प्राधान्ये रसस्य ध्वनिर्गुणीभूतत्वे रसवदलङ्कार इति सिद्धान्तः। लोचनमिति क्रियाविशेषणम्, "**भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुम्**" इत्यादिना भक्तिभावस्यैव प्राधान्यप्रतीतेः।

श्रीतातपादैः • विहिते कृते निरूपिता लिखिता, अहो गवां पूर्वमङ्गं धर्मशास्त्रे

तार्किकपुत्रोऽत्रालम्बनम् । तदीया निःशङ्कोक्तिरुद्दीपिका । रदनप्रकाशादिरुद्वेगादयश्चानुभावव्यभिचारिणः ।

अत्राहुः—

"आत्मस्थः परसंस्थश्चेत्यस्य भेदद्वयं मतम् ।
आत्मस्थो द्रष्टुरुत्पन्नो विभावेक्षणमात्रतः ॥
हसन्तमपरं दृष्ट्वा विभावश्चोपजायते ।
योऽसौ हास्यरसस्तज्ज्ञैः परस्थः परिकीर्तितः ॥
उत्तमानां मध्यमानां नीचानामप्यसौ भवेत् ।
त्र्यवस्थः कथितस्तस्य षड्भेदाः सन्ति चापरे ॥
स्मितं च हसितं प्रोक्तमुत्तमे पुरुषे बुधैः ।
भवेद्विहसितं चोपहसितं मध्यमे नरे ॥
नीचेऽपहसितं चातिहसितं परिकीर्तितम् ।
ईषत्फुल्लकपोलाभ्यां कटाक्षैरप्यनुल्बणैः ॥

पवित्रं प्रसिद्धं गदर्भ्याः कथं न तस्या अपि तथा भाव्यमित्यर्थः । **रदन प्र** • क्रमशोऽन्वयः हास्यो रसो द्विविधः आत्मस्थः परसंस्थश्च इत्याह **आत्मस्थ** • अस्य हास्यरसस्य । आत्मस्थलक्षणमाह **आत्मस्थो** • हास्यातिरिक्तस्य यस्य वस्तुनो दर्शनेन हासो जायते स विभावो हास्यकारणम्, मात्रपदेन हास्यस्य व्यावृत्तिः । परस्थलक्षणमाह—**हसन्तम्** • अपरं हसन्तं दृष्ट्वा जायमानस्य यस्य हासस्य हसन्निष्ठो हास्यरस एव विभावो भवति स हास्यरसः परस्थः परिकीर्तितः, हासातिरिक्तविभावक आत्मस्थः, हासविभावको हासः परस्थः । प्रथमं हसन्नात्मा, तद्दर्शनेन द्वितीयो हसन् परः ।

उत्तममध्यमनीचभेदेन त्रयः सामाजिकास्तद्वृत्तितया हास्योऽपि त्र्यवस्थ इत्याह **उत्तमानाम्** • असौ हासस्तिस्रोऽवस्था यस्य स कथितः । तस्य हास्यसामान्यस्य प्रकारान्तरेण वक्ष्यमाणाः षड्भेदाः, यथा स्मितम् = हसितं, विहसितम् उपहसितम्, अपहसितम् अतिहसितम्, उत्तमादिषु क्रमशो द्वौ द्वौ वर्तेते इति सार्धपद्येनाह **स्मितञ्च** • स्मितलक्षणमाह **ईषत्फुल्ल** • मधुरो माधुर्ययुक्तः, माधुर्ये तृतीयार्थप्रयोज्यत्वस्यान्वयः । फुल्लं विकसितम्, अनुल्बणैरनुत्कटैः, दशनं दन्तः, अथवोपलक्षितपदमध्याहृत्योपलक्षणे तृतीया बोध्या ।

अदृश्यदशनो हासो मधुरः स्मितमुच्यते ।
वक्त्रनेत्रकपोलैश्चे दुत्फुल्लैरुपलक्षितः ॥

किंचिल्लक्षितदन्तश्च तदा हसितमिष्यते ।
सशब्दं मधुरं काव्यगतं वदनरागवत् ॥

आकुञ्चिताक्षि मन्द्रं च विदुर्विहसितं बुधाः ।
निकुञ्चितांसशीर्षश्च जिह्मदृष्टिविलोकनः ॥

उत्फुल्लनासिको हासो नाम्नोपहसितं मतम् ।
अस्थानजः साश्रुदृष्टिराकम्पस्कन्धमूर्धजः ॥

शार्ङ्गदेवेन गदितो हासोऽपहसिताह्वयः ।
स्थूलकर्णकटुध्वानो बाष्पपूरप्लुतेक्षणः ।
करोपगूढपार्श्वश्च हासोऽतिहसितं मतम् ॥' इति ।

भयानको यथा—

'श्येनमम्बरतलादुपागतं शुष्यदाननबिलो विलोकयन् ।
कम्पमानतनुराकुलेक्षणः स्पन्दितुं नहि शशाक लावकः ॥'

अत्र श्येन आलम्बनम् । सवेगापतनमुद्दीपनम् । आननशोषादयोऽनुभावाः । दैन्यादयः संचारिणः ।

हसितं लक्षयति **वक्त्रनेत्र** • उपलक्षितो हासः । विहसितं लक्षयति **सशब्दम्** • शब्दसहितम्, कायगतं संपूर्णशरीरे प्रभावं पातयत्, कालगतमिति त्वपाठः, मुखरक्तता यस्मिन् जायते, नेत्रञ्च यस्मिन् संकुचितम्, गम्भीरम् । उपहसितमाह **निकुञ्चितांस** • संकुचिते अंसः शिरश्च यस्मिन् । अपहसितं दर्शयति **अस्थानजः** • अनवसरे जातः, अश्रुसहिता दृष्टिर्यस्मिन्, आकम्पमानौ स्कन्धकेशौ यस्मिन् । अतिहसितं लक्षयति **स्थूलकर्ण** • महान् कर्णकटुः शब्दो यस्मिन्, अश्रुधारया पूरितं नेत्रं यस्मिन्, पार्श्वयोः पीडावशात्कराभ्यामुपगूढे पार्श्वे यस्मिन् । श्येनाल्लावकपक्षिणो भीतिमाह **श्येनम्** • शुष्यद् मुखमेव बिलं यस्य, कम्पमानशरीरो व्याकुलनेत्रो लावको गगनात् पार्श्वे आगतं श्येनं विलोकयन् भीतिवशान्मृतवन्निश्चलोऽभूत् । भूताविष्टः शवस्तत्स्त्रीणां श्मशाने

बीभत्सो यथा—

'नखैर्विदारितान्त्राणां शवानां पूयशोणितम् ।
आननेष्वनुलिम्पन्ति हृष्टा वेतालयोषितः ॥'

शवा इहालम्बनम् । आन्त्रविदारणाद्युद्दीपनम् । आक्षिप्ता रोमाञ्चनेत्रनिमीलनादयोऽनुभावाः । आवेगादयः संचारिणः । ननु रतिक्रोधोत्साहभयशोकविस्मयनिर्वेदेषु प्रागुदाहृतेषु यथालम्बनाश्रययोः संप्रत्ययः, न तथा हासे जुगुप्सायां च । तत्रालम्बनस्यैव प्रतीतेः । पद्यश्रोतुश्च रसास्वादाधिकरणत्वेन लौकिकहासजुगुप्साश्रयत्वानुपपत्तेरिति चेत् । सत्यम् । तदाश्रयस्य द्रष्टृपुरुषविशेषस्या

क्रीडामाह **नखैर्विदा०** हृष्टा वेतालयोषितो नखैर्विदारितानि अन्त्राणि येषां तेषां शवानां पूयं शोणितञ्च स्वीयेषु मुखेषु अनुलिम्पन्ति ।

हासजुगुप्सयोरयं विवेकः । रतेर्नायिकाविषयो नायकश्च आश्रयः, नाटकद्रष्टारः पद्यश्रोतारश्च सामाजिकाः सहृदयाः शृंगाररसास्वादिनः, एवं क्रोधस्यापि नवोच्छलितेत्यादिपद्ये धनुर्भञ्जको राम आलम्बनं क्रोधस्य परशुरामश्च आश्रयः पद्यश्रोतारः सहृदया रौद्ररसास्वादिनः । एवमुत्साहादिष्वपि बोध्यम् । परं हासजुगुप्सयोर्नैवं प्रथमतृतीययोः सत्वेऽपि द्वितीयस्याश्रयस्याभावात् । तथा च श्रीतातपादैरित्यादिहास्यरसोदाहरणे तादृशनवयुक्तेर्वर्णयिता तार्किकपुत्र आलम्बनं पद्यश्रोतारो हास्यरसास्वादयितारः, परं तादृशतार्किकपुत्रात् कस्य हासो जात इति न वर्णितमस्ति । न चावश्यं रसास्वादस्तमपेक्षते एवं जुगुप्साया अपि वृत्तम्—नखैर्विदारितेत्यादिपद्ये आलम्बनस्य वेतालयोषितो वर्णनेऽपि तद्दर्शनेन कस्य प्रथमं जुगुप्सेति न वर्णितम्, नापि बीभत्सास्वादो जुगुप्साश्रयमपेक्षते । रतिक्रोधादौ तु आश्रयोऽपि वर्ण्यते रसास्वादश्च तमपेक्षते । तथाहि न रतिः शृंगाररूपेण परिणामे आलम्बनमात्रमपेक्षतेऽपि त्वाश्रयमपि अन्यथा नीचस्य उत्तमनायिकाविषयकरतेरपि शृंगारतापत्तेः । एवं क्रोधादावपि अन्यथा अकिंचित्करबालाद्यपराधेनाऽपि क्रोधवर्णने रौद्रतापत्तेरेवमग्रेऽपि । इत्यादिकं विभाव्य आशङ्कते **ननु रति०** । **तत्रालम्ब०** हासजुगुप्सयोः, एतेन आश्रयस्य व्यवच्छेदः । **लौकिक०** काव्यातिरिक्तलौकिकसामग्र्या संपादितो लौकिकः, काव्यसामग्रीसंपादितोऽलौकिकः । यस्य तु पद्यमात्रश्रवणेन तार्किकपुत्रमदृष्ट्वैव तद्वचो वाऽश्रुत्वैव हासो जायते स तार्किकपुत्रदर्शनतद्वचःश्रवणाभ्यां जनितस्य लौकिकहास्यस्य कथमाश्रयः, स्यात् । पूर्वोक्तविवेकं स्वीकर्त्तुमाह **सत्यम्०** तत्र व्यक्तिविशेषस्याश्रयत्वेनापेक्षाभावेऽपि, सामान्यतोऽपेक्षायामाह **तदाश्रयस्य०**

तत्राक्षेप्यत्वात्। तदनाक्षेपे तु श्रोतुः स्वीयकान्तावर्णनपद्यादिव रसोद्बोधे बाधकाभावात्।

एवं च संक्षेपेण निरूपिता रसाः। एषां प्राधान्ये ध्वनिव्यपदेशहेतुत्वम्, गुणीभावे तु रसालंकारत्वम्। केचित्तु 'प्राधान्य एवैषां रसत्वमन्यथालंकारत्वमेव। रसालंकारव्यपदेशस्त्वलंकारध्वनिव्यपदेशवत्। ब्राह्मणश्रमणन्यायात्। एवमसंलक्ष्यक्रमतायामेव। अन्यथा तु वस्तुमात्रम्' इत्याहुः। एते चासंलक्ष्यक्रमव्यङ्ग्याः। सहृदयेन रसव्यक्तौ झटिति जायमानायां विभावानुभावव्यभिचारिविमर्शक्रमस्य सतोऽपि सूचीशतपत्रपत्रशतवेधक्रमस्येवालक्षणात्। न त्वक्रमव्यङ्ग्याः। व्यक्तेस्तद्धेतूनां च हेतुहेतुमद्भावासंगत्यापत्तेः। अथ कथमेत एव रसाः। भगवदालम्बनस्य रोमाञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य भागवतादि-

---

हासाश्रयस्य जुगुप्साश्रयस्य च। अनाक्षेपेऽपि सत्यभावमाह **तदना** • तुरप्यर्थे अलौकिकरसाश्रयोऽपि लौकिकहासादेराश्रय इत्यत्र दृष्टान्तमाह—**स्वीयकान्ता** • स्वीयकान्तया सह स्वकीयक्रीडावर्णनविषयकात् पद्यात्। अत्र लौकिकी रतिः काव्यसामग्रीसंपादितोऽलौकिको रसश्चैकस्मिन्नेव। **रसालङ्कारत्वम्** • अस्यैव नाम रसवदलङ्कारः। **प्राधान्य एव** • एवकारेण गुणीभूतस्य व्यवच्छेदः। **कारत्वमेव** • एतेन रसत्वव्यवच्छेदः। **व्यपदेशवत्** • सकलवाक्यार्थापेक्षया प्रधानीभूतस्यैव ध्वनित्वम्, न च ध्वनीभूतोऽलङ्कारो वस्तुतोऽलङ्करणतां बिभर्त्ति, तस्यालङ्करणत्वेऽलङ्कार्यान्तरस्य प्रधानीभूतस्यापेक्षायामलङ्कारध्वनेरेवोपक्षयात्। किंतु अलङ्कार्य एव वस्तुतस्तथापि अन्यत्र प्रसिद्धं स्वीयमलङ्कारनाम बिभर्त्येव बहुशोऽन्यावस्थायामलङ्कारत्वस्य विद्यमानत्वात्। तथा प्राधान्यदशायां बहुशः प्रसिद्धं स्वीयं रसनाम बिभर्त्येव वस्तुतो रसतामनावहन्नपि गुणीभूतः स्थायिभावः। पूर्वं ब्राह्मणजातीयः संन्यासग्रहणानन्तरं शिखासूत्रादिभिः सह ब्राह्मणत्वस्य जातेरपि परित्यागेऽपि भूतपूर्वां जातिमादाय ब्राह्मणः श्रमण इति व्यवहारो ब्राह्मणश्रमणन्यायविषयः। तथा रसतामगतोऽपि गुणीभूतो रसो रसशब्देन व्यवह्रियते। एवमलङ्कारध्वनावपि ज्ञेयम्। **एवम** • रसत्वमेषामिति वर्तते। **अन्यथा** • सलक्ष्यक्रमतायाम्। **इत्याहुः** • अरुचिबीजन्तु रसत्वेऽपि न क्षतिरित्यन्ये। संलक्ष्यक्रमो

पुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात्। भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः। न चासौ शान्तरसेऽन्तर्भावमर्हति। अनुरागस्य वैराग्यविरुद्धत्वात्। उच्यते— भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः।

'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।
भावः प्रोक्तस्तदाभासा ह्यनौचित्यप्रवर्तिताः॥'

इति हि प्राचां सिद्धान्तात्। न च तर्हि कामिनीविषयाया अपि रतेर्भावत्वमस्तु, रतित्वाविशेषात्, अस्तु वा भगवद्भक्तेरेव स्थायित्वम्; कामिन्यादिरतीनां च भावत्वम्, विनिगमकाभावात्, इति वाच्यम्। भरतादिमुनिवचनानामेवात्र रसभावत्वादिव्यवस्थापकत्वेन स्वातन्त्र्ययोगात्। अन्यथा पुत्रादिविषयाया अपि रतेः स्थायिभावत्वं कुतो न स्यात्, न स्याद्वा कुतः शुद्धभावत्वं जुगुप्साशोकादीनाम्, इत्यखिलदर्शनव्याकुली स्यात्। रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्येत, इति यथाशास्त्रमेव न्यायः।

विरोधिरससमावेशनिरूपणम्

एतेषां परस्परं कैरपि सहाविरोधः कैरपि विरोधः। तत्र वीरशृङ्गारयोः, शृङ्गारहास्ययोः, वीराद्भुतयोः, वीररौद्रयोः, शृङ्गाराद्भुतयोश्चाविरोधः। शृङ्गारबीभत्सयोः, शृङ्गारकरुणयोः, वीरभयानकयोः, शान्तरौद्रयोः, शान्तशृङ्गारयोश्च विरोधः। तत्र कविना

रसभावादिरित्यग्रे मूलकृता विवेचितमित्यपरे। रतिर्देवादि • अञ्जितोऽभिव्यक्तः, तदाभासाभावाभासाः, अनुचितालम्बनाः। अनौचित्यन्तु भावलक्षणप्रकरणे मूले वक्ष्यते। वचनानामेव • एवकारेण अस्मदाद्यनुभववचनयोः स्वातन्त्र्यं व्यवच्छिद्यते। स्वातन्त्र्यायोगादिति क्वाचित्के पाठे अस्मदादीनामित्यध्याहार्यम्।

अथ विरोधिरससमावेशप्रकारः

विरोधः • अन्ये तूदासीनाः, यथा शान्ताद्भुतौ, वीरबीभत्सावित्यादि।

प्रकृतरसं परिपोष्टुकामेन तदभिव्यञ्जके काव्ये तद्विरुद्धरसाङ्गानां निबन्धनं न कार्यम्। तथा हि सति तदभिव्यक्तौ विरुद्धः प्रकृतं बाधेत। सुन्दोपसुन्दन्यायेन चोभयोरुपहतिः स्यात्। यदि तु विरुद्धयोरपि रसयोरेकत्र समावेश इष्यते तदा विरोधं परिहृत्य विधेयः। तथा हि—विरोधस्तावद्द्विविधः। स्थितिविरोधो ज्ञानविरोधश्च। आद्यस्तदधिकरणावृत्तितारूपः। द्वितीयस्तज्ज्ञानप्रतिबद्धज्ञानकत्वलक्षणः। तत्राधिकरणान्तरे विरोधिनः स्थापने प्रथमो निवर्तते। यथा नायकगतत्वेन वीररसे वर्णनीये प्रतिनायके भयानकस्य। रसपदेनात्र प्रकरणे तदुपाधिः स्थायिभावो गृह्यते। रसस्य सामाजिकवृत्तित्वेन नायकाद्यवृत्तित्वात्। अद्वितीयानन्दमयत्वेन विरोधासंभवाच्च।

उदाहरणम्—

'कुण्डलीकृतकोदण्डदोर्दण्डस्य पुरस्तव।
मृगारातेरिव मृगाः परे नैवावतस्थिरे॥'

तदभिव्यञ्जके • प्रकृतरसाभिव्यञ्जके, **तद्विरुद्ध** • प्रकृतरसविरुद्धरसस्याङ्गानाम्, **सुन्दोपसुन्द** • परस्परं विरोधिनोः समबलयोः प्रसङ्गेऽयं न्यायो व्यवह्रियते। महाभारते सुन्दोपसुन्दयोर्भ्रात्रोस्तपोबलाद् ब्रह्मणः सकाशात्प्राप्तवरयोरेकस्यां नायिकायामासक्तौ परस्परमेव हतयोः कथा प्राप्यते। उपहतिः प्रतिबन्धः **तदधिकरण** • तस्यैकस्याश्रयेऽन्यस्यावर्तमानता। **तज्ज्ञान** • तस्यैकस्य ज्ञानेन प्रतिबद्धं ज्ञानं यस्य तत्वम् • सह स्थातुमशक्तयोः प्रथमः, सहानुभवितुमशक्ययोर्द्वितीययोर्विरोध इति। ज्ञानपदमास्वादपरं बहुव्रीहिद्योतनार्थः कः। प्रतिबद्धज्ञानकत्वमित्यपि पाठः क्वचिज्जनकत्वघटितस्तु पाठोऽपपाठ एव। **रणान्तरे** • प्रकृतरसाश्रयाद् भिन्ने आश्रये विरोधिनो रसस्य स्थापने इत्यर्थः। **अद्वितीया** • आनन्दश्चिद्रूपो विरुद्धाकारवृत्योरपि प्रतिबिम्बेदित्यर्थः। **उदाहरणम्** • विरुद्धयो रसयोराश्रयभेदेन वर्णनस्योदाहरणमित्यर्थः। **कुण्डलीकृत** • कोदण्डो धनुः। कुण्डलीकृतः कोदण्डो याभ्यामेवंभूतौ दोषौ बाहू दण्डौ यस्य तस्य तव पुरः, मृगा इति सिंहस्य पुरो मृगा इव परे शत्रवो नैवावतस्थिरे पलायनं चक्रुरित्यर्थः। अत्र प्रकृते राज्ञि कुण्डलीकृतादिव्यङ्ग्यो वीरो रसः, पलायनव्यङ्ग्यो भयानकस्तु शत्रुषु

रसान्तरस्याविरोधिनः संधिकर्तुरिवान्तरालेऽवस्थापने द्वितीयोऽपि निवर्तते। यथा मन्निर्मितायामाख्यायिकायां कण्वाश्रमगतस्य श्वेतकेतोर्महर्षेः शान्तिरसप्रधाने वर्णने प्रस्तुते 'किमिदमनाकलितपूर्वं रूपम्, कोऽयमनिर्वाच्यो वचनरचनाया मधुरिमा' इत्यद्भुतस्यान्तरवस्थापनेन वरवर्णिनीं प्रत्यनुरागवर्णने।

यथा वा—

'सुराङ्गनाभिराश्लिष्टा व्योम्नि वीरा विमानगाः।
विलोकन्ते निजान्देहान्फेरुनारीभिरावृतान् ॥'

अत्र सुराङ्गनामृतशरीरालम्बनयोः शृङ्गारबीभत्सयोरन्तः स्वर्गलाभाक्षिप्तो वीररसो निवेशितः। अन्तर्निवेशश्च तदुभयचर्वणाकालान्तर्वर्तिकालगतचर्वणाकत्वम्। तच्च प्रकृतपद्ये प्रथमार्ध एव शृङ्गारचर्वणोत्तरं वीरस्य चर्वणादनन्तरं च द्वितीयार्धे बीभत्सस्येति स्फुटमेव। 'भूरेणुदिग्धान्' इत्यादि काव्यप्रकाशगतपद्यकदम्बेषु तु

इति भावः। ज्ञानविरोधिनो रसयोरेकत्र वर्णनप्रकारं प्रदर्शयति **रसान्तर** • अन्तराले विरोधिरसद्वयमध्ये संन्धिः सम्बन्धः। **रागवर्णने** • श्वेतकेतुनिष्ठो रसः प्रधानः शान्तः अप्रधानश्च वरवर्णिन्यालम्बनः—शृङ्गारः। शान्तशृङ्गारौ च विरुद्धौ। मध्ये उदासीनस्याद्भुतस्य संधिकर्तुरवस्थापने विरोधो निवर्तते इति भावः। **सुराङ्गनाभिरा** • युद्धे वीरगत्या मृतास्तन्माहात्म्यात्स्वर्गं प्राप्ताः 'स्ववेंश्याभिरालिङ्गिता गगने विमानचारिणः सन्तो वीरा रणाङ्गणस्थितान् शृगालादिभिः परिवृतान् निजान् देहान् विलोकन्ते। प्रथमपादेन सुराङ्गनालम्बनः शृङ्गारः, द्वितीयेन प्रथमेन च पादेन स्वर्गप्राप्त्या वीरो रसः। उत्तरार्धेन शरीरदशया बीभत्सः। शृङ्गारबीभत्सौ विरुद्धौ मध्ये स्थितो वीरः संधिकर्ता। अव्यवहितपूर्वापरीभावेन विरुद्धयो रसयोरास्वादो न संभवति मध्येऽविरुद्धस्यास्वादेन व्यवधाने तयोरास्वादः संभवतीति आस्वादनविरोधो निवर्तत इत्यभिप्रायेणाह **अन्तर्निवेशश्च** • चर्वणा आस्वादः। तस्य रसस्य मध्ये निवेशनं नाम मध्यकाले तदास्वाद इत्यर्थः। तच्च अन्तर्निवेशनञ्च बीभत्सस्येत्यनेनान्वेति बीभत्सस्येत्यत्र चर्वणादित्यस्य सम्बन्धः। **भूरेणदिग्धान्** •

प्रथमश्रुतबीभत्ससामग्रीवशाद् बीभत्सचर्वणोत्तरं तत्सामग्र्याक्षिप्तनिः-शङ्कप्राणत्यागादिरूपसामग्रीकस्य वीरस्य चर्वणे शृङ्गारचर्वणेति विवेकः। इत्थं चोदासीनचर्वणेन प्रतिबन्धकज्ञाननिवृत्तौ निष्प्रत्यूहः प्रतिबध्यचर्वणोदय इति फलितोऽर्थः। अङ्गाङ्गिनोरङ्गिन्यन्यस्मि-न्नङ्गयोर्वा न विरोधः। अङ्गत्वानुपपत्तिप्रसङ्गात्।

भूरेणुदिग्धान् नवपारिजात-
मालारजोवासितबाहुमध्याः।
गाढं शिवाभिः परिरभ्यमाणान्
सुराङ्गनाश्लिष्टभुजान्तरालाः॥

सशोणितैः क्रव्यभुजां स्फुरद्भिः
पक्षैः खगानामुपवीज्यमानान्।
संवीजिताश्चन्दनवारिसेकैः
सुगन्धिभिः कल्पलतादुकूलैः॥

विमानपर्यङ्कतले निषण्णाः
कुतूहलाविष्टतया तदानीम्।
निर्दिश्यमानाँल्ललनाङ्गुलिभिः
वीराः स्वदेहान् पतितानपश्यन्॥

इति काव्यप्रकाशपद्यानि समानविषयकाणि। **प्रथमश्रुत** • प्रथमपद्यस्य प्रथम-तृतीयपादाभ्यां बीभत्स एवं द्वितीयचतुर्थाभ्यां शृङ्गारो व्यज्यत इति बीभत्सस्य प्रथम-श्रुतत्वम्, द्वितीयपद्यस्यापि पूर्वार्धेन बीभत्स उत्तरार्धेन शृङ्गारश्च व्यज्यते। तृतीयपद्येन तु आकाङ्क्षितपदार्थपूरणम्। **तत्सामग्र्या** • बीभत्सव्यञ्जकसामग्र्येव निःशङ्क-प्राणत्यागरूपां वीररसाभिव्यञ्जकसामग्रीमभिव्यनक्तीति बीभत्सादनन्तरं शृङ्गारात्प्राग् वीररसास्वादस्तदनन्तरं शृङ्गार इति रसास्वादक्रम एव भेदो नान्यस्मिन्नित्यर्थः। **इत्थं चो** • उदासीनचर्वणा वीररसचर्वणा। निष्प्रत्यूहः प्रतिबन्धकरहितः अङ्गाङ्गी-भावेन तृतीयं विरुद्धरससमावेशप्रकारमाह **अङ्गाङ्गिनोः** • न विरोध इत्यनेनान्वयः विरुद्धयोरपि अङ्गाङ्गीभावो न विरुध्यते समबलत्व एव विरोधोदयादिति भावः। यथाऽग्रिमपद्ये करुणविरोध्यपि शृङ्गारः करुणस्याङ्गं भवत्येव। चतुर्थमपि प्रकारमाह **अङ्गिन्य** • अन्यस्मिन् रसेऽङ्गिनि अङ्गतया स्थितयोर्द्वयोर्न विरोधः, परस्परं विरोधि-नावपि द्वौ कार्यवशादेकं नृपं सेवेते एव। यथा उत्क्षिप्तः कवरीभरमित्यादिपद्ये परस्परं

यथा—

प्रत्युद्गता सविनयं सहसा सखीभिः
स्मेरैः स्मरस्य सचिवैः सरसावलोकैः ।
मामद्य मञ्जुरचनैर्वचनैश्च बाले
हा लेशतोऽपि न कथं वद सत्करोषि ॥'

इयं च पुरो निपतितां प्रमीतां नायिकां प्रति नायकस्योक्तिः । इह नायिकालम्बना, अश्रुपातादिभिरनुभावैरावेगविषादादिभिः संचारिभिश्च व्यज्यमाना नायकगता रतिस्तुल्यसामग्र्यभिव्यक्ते प्रकृतत्वात्प्रधानीभूते तद्गत एव शोके प्रकर्षकत्वादङ्गम् । यदि तु नायकगता रतिर्नात्र प्रतीयते, किं तु निरुक्तसामग्र्या शोक एव प्रकृतत्वादित्याग्रह्यते तदा नायकालम्बना प्रत्युद्गमाद्यनुभाविता हर्षादिभिः पोषिता नायिकाश्रया रतिरेव तत्राङ्गमस्तु । नायिकागतरतेर्नायकशोकप्रकर्षहेतुतायाः सर्वसंमतत्वात् । न च नायिकाया नाशात्तद्गताया रतेरसंनिधानात्कथमङ्गतेति वाच्यम् । संनिधानस्याङ्गतायामतन्त्रत्वेन स्मर्यमाणायास्तस्या अङ्गत्वोपपत्तेः ।

विरोधिनावपि शृङ्गारकरुणौ राजविषयिणीं कविगतां रतिं पोषयत एव । रसपदेनात्र भावो व्यवह्रियते इति मूलेऽनुपदमेवोक्तम् प्रत्युद्गता ● अन्यस्मिन् काले यदाहं गृहमागमं तदा सहसा पुर आयान्तीनां सखीनामग्रे भूत्वा मम सम्मुखमागता कामोद्दीपकैर्हासैः, मधुरावलोकनैः, मधुररचायुक्तैर्वचनैश्चासकृन्मां त्वं सत्कृतवती हे बाले हा अद्य पूर्वपरिचितसत्कारकणांशेनापि कथन्न सत्करोषि वद । प्रमीता मृता । तुल्यसामग्र्य● सजातीयसामग्र्या अभिव्यक्ते इत्यर्थः, शोकोऽपि नायकगतो नायिकालम्बनोऽश्रुपातादिभिरनुभावित आवेगविषादादिभिः संचारितश्च परं शोकस्याश्रुपातादय आवेगविषादादयश्च शृङ्गारसम्बन्धिभिस्तैर्भिन्ना इति सजातीयलाभार्थं तुल्यग्रहणम् । इति मर्मप्रकाशात्प्रतीयते भाषानुवादात्तु तुल्यपदं प्रायोऽभेदार्थकं प्रतिभाति इति चिन्तनीयं सुधीभिः । प्रकृतत्वात् प्रकरणवशात्, तद्गते नायकगते, प्रकर्षकत्वाद् रतिः शोकस्य पोषिका अतः शोकस्याङ्गं जायते । आगृह्यते ● आग्रहः क्रियते, हापदेन विषादस्य द्योतनेऽपि तस्य करुणसाधारणत्वात्, रतेरनुभावानामश्रुपातादीनां सञ्चारिणश्चावेगादेः साक्षादप्रतिपादनात्, नायिका-

अङ्गयोर्यथा--

'उत्क्षिप्ताः कबरीभरं विवलिताः पार्श्वद्वयं न्यक्कृताः
पादाम्भोजयुगं रुषा परिहृता दूरेण चेलाञ्चलम् ।
गृह्णन्ति त्वरया भवत्प्रतिभटक्ष्मापालवामभ्रुवां
यान्तीनां गहनेषु कण्टकचिताः के के न भूमीरुहाः ।।'

अत्र समासोक्त्यवयवाभ्यां तरुकामिकर्तृकरिपुकामिनीकबर्यादिग्रहणरूपाभ्यां प्रकृताप्रकृतव्यवहाराभ्यां व्यक्तयोः करुणशृङ्गारयो राजविषयकरतिभावाङ्गत्वम् । किं च प्रकृतरसपरिपुष्टिमिच्छता विरोधिनोऽपि रसस्य बाध्यत्वेन निबन्धनं कार्यमेव । तथा हि सति वैरिविजयकृता वर्ण्यस्य कापि शोभा संपद्यते । बाध्यत्वं च रसस्य प्रबलैर्विरोधिनो रसस्याङ्गैर्विद्यमानेष्वपि स्वाङ्गेषु निष्पत्तेः प्रतिबन्धः । व्यभिचारिणो

निष्ठरतेश्च प्रत्युदगमादयोनुभावा हर्षादयो व्यभिचारिणश्च साक्षात् प्रतिपादिता इति प्रतिपादितानुभावादिग्रहणे आग्रहः । दोषश्च स प्रतीयमानस्य कारणं विनापि ग्रहणाभावेन । तत्र शोकेऽङ्गमस्तु अतन्त्रत्वेन अकारणत्वेन ।

उत्क्षिप्ता० हे राजन् तव प्रतापभयात् गहनेषु वनेषु यान्तीनां भवतां शत्रुनृपनायिकानां के के अपितु सर्वेऽपि कण्टकैर्युक्ता अतएव ग्रहणे समर्था वृक्षाः, नेत्रादिच्छेदनभिया उपरि यदि क्षिप्तास्तर्हि त्वरया केशपाशं गृह्णन्ति, यदि विवलितास्तत्रैव वक्रीकृतास्तदा पार्श्वद्वयं गृह्णन्ति, यदि ताभिरेव नायिकाभिरधःकृतास्तदा चरणद्वयं विध्यन्ति, यदि रुषा पृथक् क्रियन्ते तदा वस्त्राञ्चलं गृह्णन्ति । उत्क्षिप्तादीनां कर्त्र्यो वामभ्रुवः कर्म च भूमिरुहाः, ग्रहणं संदर्भवशाद्वेधनपरमपि । अस्य समासोक्तौ अपि व्याख्यानं द्रष्टव्यम् । अवयवाभ्याम् ० प्रकृतव्यवहारोऽप्रकृतव्यवहारश्च समासोक्तेरवयवः, तरुकामि ० तरुकर्तृकः कामिकर्तृकश्च । यत्र साधारणविशेषणमहिम्ना प्रस्तुताप्रस्तुतव्यवहारौ प्रतीयेते प्रस्तुतव्यवहारश्च अप्रस्तुतेन तेनाभिन्नतया भासते तत्र समासोक्तिरित्यग्रे मूले स्पष्टम् । वर्ण्यस्य प्रकृतस्य वर्णनीयस्य रसस्य निष्पत्तेरित्यत्रान्वयः ।

बाध्यत्वं तु तदीयरसनिष्पत्तिप्रतिबन्धमात्रात्। न त्वनभिव्यक्त्या। अभिव्यक्तौ बाधकाभावात्। न च विरोध्यङ्गाभिव्यक्त्या प्रतिबन्धान्नाभिव्यक्तिरिति वाच्यम्। तद्व्यञ्जकशब्दार्थज्ञानसमये विरोध्यङ्गाभिव्यञ्जकशब्दार्थज्ञानस्यासंनिधानात्। प्रतिबध्यप्रतिबन्धकभावकल्पने मानाभावात्। भावशबलताया उच्छेदापत्तेश्च। रसनिष्पत्तेः प्रतिबन्धस्त्वनुभवसिद्ध इति तां प्रत्येव विरोध्यङ्गानां बलवतामभिव्यक्तेः प्रतिबन्धकत्वं न्याय्यम्। अपि च यत्र साधारणविशेषणमहिम्ना विरुद्धयोरभिव्यक्तिस्तत्रापि विरोधो निवर्तते।

यथा—

'नितान्तं यौवनोन्मत्ता गाढरक्ताः सदाहवे।
वसुंधरां समालिङ्ग्य शेरते वीर तेऽरयः॥'

स्वपदं बाध्यरसपरम्। **बन्धमात्रात्** ● यस्य व्यभिचारिणो रसस्यानभिव्यक्तिः स व्यभिचारी बाध्यते इति व्यवहार इति भावः। **तद्व्यञ्जकं** ● व्यभिचारिव्यंञ्जके। **असंनिधानात्** ● विनष्टत्वात्, ज्ञानं द्विक्षणस्थायि तृतीयक्षणे विनश्यति, विरोध्यङ्गाभिव्यक्तेरनन्तरं शब्दज्ञानं तदनन्तरमर्थज्ञानम्, विरोध्यङ्गाभिव्यञ्जकशब्दार्थज्ञानञ्च पूर्वोक्तशब्दज्ञानक्षण एव विनश्यति अतः प्राक्क्षणे प्रतिबंधकस्यासत्वान्न बाध्यत्वं व्यभिचारिणः।

ननु विरोध्यङ्गाभिव्यञ्जकशब्दार्थज्ञानसंस्कारस्यैव तर्हि प्रतिबंधकत्वमस्तु इत्याशंकायां मानाभावमाह **प्रतिबध्य** ● व्यभिचारिणोऽननुभव एव विरोध्यङ्गाभिव्यक्तिदशायां मानमिति चेत्तत्राप्यनुभवविरोधमप्याह **भावशबलताया** ●। **प्रत्येव** ● एवकारेण व्यभिचारिणोऽननुभवो व्यावर्त्यते। बलवतां विरोध्यङ्गानामभिव्यक्तिरनुभववशाद् रसनिष्पत्तिं प्रति प्रतिबन्धिकेत्यर्थः। समानविशेषणैरभिव्यक्तयोः करुणशृङ्गारयोरुदाहरणमाह **नितान्तम्** ● अत्यन्तं यौवनेन तदुपलक्षितकामावस्थयोन्मत्ताः, गाढरक्ता दृढानुरागास्तेऽरयो हे वीर वसुन्धरां पृथ्वीनायिकां समालिङ्ग्य शेरतेऽनया रीत्या शृङ्गारो व्यज्यते। यौवनोन्मत्ता न तु वृद्धा गाढरुधिराः संग्रामेऽनुरागिणो वा पृथ्वीं संस्पृश्य शेरते अनया रीत्या करुणो व्यज्यते।

रसदोषनिरूपणम्

इत्थमविरोधसंपादनेनापि निबध्यमानो रसो रसशब्देन शृङ्गारादिशब्दैर्वा नाभिधातुमुचितः। अनास्वाद्यतापत्तेः। तदास्वादश्च व्यञ्जनमात्रनिष्पाद्य इत्युक्तत्वात्। यत्र विभावादिभिरभिव्यक्तस्य रसस्य स्वशब्देनाभिधानं तत्र को दोष इति चेत्, व्यङ्ग्यस्य वाच्यीकरणे सामान्यतो वमनाख्यदोषस्य वक्ष्यमाणत्वात्। आस्वाद्यतावच्छेदकरूपेण प्रत्ययाजनकतया रसस्थले वाच्यवृत्तेः कापेयकल्पत्वेन विशेषदोषत्वाच्च। एवं स्थायिव्यभिचारिणामपि शब्दवाच्यत्वं दोषः। एवं विभावानुभावयोरसम्यक्प्रत्यये विलम्बेन प्रत्यये वा न रसास्वाद इति तयोर्दोषत्वम्। समबलप्रबलप्रतिकूलरसाङ्गानां निबन्धनं तु प्रकृतरसपोषप्रातीपिकमिति दोषः। प्रबन्धे प्रकृतस्य रसस्य प्रसङ्गान्तरेण विच्छिन्नस्य पुनर्दीपने सामाजिकानां न सामग्र्येण रसास्वाद इति विच्छिन्नदीपनं दोषः।

अथ रसदोषनिरूपणम्

इत्थम् • पूर्वोक्तैरधिकरणान्तरे स्थापनादिभिः। सामान्यतो • व्यङ्ग्यमात्रविषयत्वात्सामान्यम्। अग्रिमस्य तु रसभावव्यङ्ग्यविषयत्वाद्विशेषदोषत्वम्। आस्वाद्यता• येन रूपेण रस आस्वाद्यते तद्रूपमास्वाद्यतावच्छेदकम्। तेन रूपेण व्यञ्जनैवाभिव्यनक्ति रसं न तु वाच्यवृत्तिरभिधा। कपेरिदं कापेयम्। कपिर्यथा अपेक्षितं यत् तन्न करोति अनपेक्षितञ्च अव्यवस्थितं सम्पादयति तथैव अभिधा यथा रस आस्वादपदवीमधिगच्छति तथा नोपस्थापयति अन्यथा तूपस्थापयति। व्यञ्जना अभिव्यनक्ति अभिव्यक्तं च वस्तु स्वयमन्तःकरणसम्बन्धात्प्रत्यक्षं भवति, अभिधा तु स्मारयति न तु प्रत्यक्षीकारयतीत्येवं रीत्या भावना विधेया न तु साक्षाच्छब्देन केनचिदिदमनुभावयितुं शक्यते। अथवा अभिधालक्षणेऽनुभवं न जनयतः स्वर्गं नरकं वा अनुभवामीत्यनुव्यवसायाभावात्। व्यञ्जना तु अनुभावयत्यपीति विवेको वा। वेदान्तप्रक्रियाभिज्ञैस्तु इत्थमवधेयं तत्त्वमसीत्यादिशब्दैः साक्षादात्मन एव उपस्थापकैः प्रत्यक्षं ज्ञानं जायते तथा आत्मरूपस्य रसस्य व्यञ्जनैव शब्देनोपस्थापिका नाभिधा। तत्र प्रत्यक्षस्य अन्यविधा प्रक्रिया अत्र नये तु तत्कार्यविलक्षणतया अङ्गीक्रियमाणया व्यञ्जनयैवेति वस्त्वन्तरमित्यलं दिक्प्रदर्शनमात्रेण। एवम् • रसवत्। तयोरसम्यक्प्रतीतिविलम्बप्रतीत्योः। समबलेत्यादि रसाङ्गविशेषणम्

तथा तत्तद्रसप्रस्तावनानर्हेऽवसरे प्रस्तावः। विच्छेदानर्हे च विच्छेदः। यथा संध्यावन्दनदेवयजनादिधर्मवर्णने प्रसक्ते कयापि कामिन्या सह कस्यचित्कामुकस्यानुरागवर्णने। यथा च समुपस्थितेषु महाहवदुर्मदेषु प्रतिभटेषु मर्मभिन्दिवचनान्युद्गिरत्सु नायकस्य संध्यावन्दनादिवर्णने चेत्युभयमनुचितम्। एवमप्रधानस्य प्रतिनायकादेर्नानाविधानां चरितानामनेकविधायाश्च संपदो नायकसंबन्धिभ्यस्तेभ्यो नातिशयो वर्णनीयः। तथा सति वर्णयितुमिष्टो नायकस्योत्कर्षो न सिध्येत्। तत्प्रयुक्तो रसपोषश्च न स्यात्। न च प्रतिनायकोत्कर्षस्य तदभिभावकनायकोत्कर्षाङ्गत्वात्कथमवर्णनीयत्वमिति वाच्यम्। यादृशस्य प्रतिनायकोत्कर्षवर्णनस्य तदभिभावकनायकोत्कर्षाङ्गतासंपादकत्वं तादृशस्येष्टत्वात्। तद्विरोधिन एव निषेध्यत्वात्। न च प्रतिपक्षस्य प्रकृतापेक्षया वर्ण्यमानोऽप्युत्कर्षः स्वाश्रयहन्तृतामात्रादेव प्रकृतगतमुत्कर्षमतिशाययेत्, अतो न दोषावह इति वाच्यम्। एवं हि सति महाराजं कमपि विषशरक्षेपमात्रेण व्यापादितवतो वराकस्य शबरस्येव प्रकृतस्य नायकस्य

प्रतीपं विपरीतमञ्चतीति प्रातीपिकम्। प्रतिबन्धकमित्यर्थः। दोषान्तरमाह तथा तत्तत् • तथा दोषः, प्रसक्ते प्रक्रान्ते। रागवर्णने • अनवसरे प्रस्ताव इति शेषः, दिवर्णने • विच्छेदानर्हे वीररसविच्छेदः, एतौ प्रस्तावविच्छेदौ उभयशब्देन ग्राह्यौ। अप्रधानस्य • प्रबन्धे इति वर्तते। विधानामित्यादौ षष्ठीद्वयार्थस्यातिशयपदार्थेनान्वयः। तेभ्यो नानाचरितेभ्यः सम्पद्भ्यश्च। तथा सति नायकमपेक्ष्य प्रतिनायकस्याधिकस्य वर्णने। तत्प्रयुक्तो नायकोत्कर्षप्रयुक्तः। तदभिभावक • तस्य प्रतिनायकस्याभिभावकः पराजेता यो नायकस्तत्सम्बन्ध्युत्कर्षस्य प्रतिनायकोत्कर्षो अङ्गम्। तथा चाङ्गस्य वर्णनीयतैव कथमवर्णनीयता न सर्वे प्रतिनायकोत्कर्षा नायकोत्कर्षस्याङ्गमपि तु केचनैवेत्याशयेनाह यादृशस्य • सर्वविधप्रतिनायकोत्कर्षस्याङ्गतामाशङ्कते न च प्रति • प्रकृतो नायकः, स्वं प्रतिनायकोत्कर्षस्तदाश्रयः प्रतिनायकस्तस्य हन्तृतेत्यादि। तथा च नायकोत्कर्षवर्णनस्यापेक्षैव नास्ति इति मात्रपदेन सूचितम्। उत्कृष्टस्य हननमात्रेणैव नोत्कर्षो हन्तुः सिध्यति अपि तु स्वीयोऽपि गुणोऽपेक्ष्यते, अन्यथा वीरस्य महाराजस्य हन्तुः शबरस्यापि उत्कर्षः सिध्येदिति व्यतिरेकमुखेन साधयति एवं हि • हन्तृतामात्रेणोत्कर्षसाधने, विषाक्तः शरो विषशरः,

न कोऽप्युत्कर्षः स्यादिति । तथा रसालम्बनाश्रययोरनुसंधानमन्तरान्तरा न चेद्दोषः । तदनुसंधानाधीना हि रसप्रतिपत्तिधारा तदननुसंधाने विरता स्यात् । एवं प्रकृतरसानुपकारकस्य वस्तुनो वर्णनमपि प्रकृतरसविरामहेतुत्वाद्दोष एव । अनौचित्यं तु रसभङ्गहेतुत्वात्परिहरणीयम् । भङ्गश्च पानकादिरसादौ सिकतादिनिपातजनितेवारुंतुदता । तच्च जातिदेशकालवर्णाश्रमवयोवस्थाप्रकृतिव्यवहारादेः प्रपञ्चजातस्य तस्य तस्य यल्लोकशास्त्रसिद्धमुचितद्रव्यगुणक्रियादि तद्भेदः । जात्यादेरनुचितं यथा—गवादेस्तेजोबलकार्याणि पराक्रमादीनि, सिंहादेश्च साधुभावादीनि। स्वर्गे जराव्याध्यादि, भूलोके सुधासेवनादि । शिशिरे जलविहारादीनि, ग्रीष्मे वह्निसेवा । ब्राह्मणस्य मृगया, बाहुजस्य प्रतिग्रहः, शूद्रस्य निगमाध्ययनम् । ब्रह्मचारिणो यतेश्च ताम्बूलचर्वणम्, दारोपसंग्रहः । बालवृद्धयोः स्त्रीसेवनम्, यूनश्च विरागः । दरिद्राणामाढ्याचरणम्, आढ्यानां च दरिद्राचारः । प्रकृतयो दिव्या, अदिव्या, दिव्यादिव्याश्च। धीरोदात्तधीरोद्धतधीरललितधीरशान्ता उत्साहक्रोधकामिनीरतिनिर्वेदप्रधाना उत्तममध्यमाधमाश्च। तत्र रत्यादीनां भयातिरिक्तस्थायिभावानां

वराकस्य दानस्य । दोषान्तरमाह तथा रसा ● रसस्य विषयस्य आश्रयस्य च । तयोर्विषयाश्रययोरनुसन्धानस्याधीना, अरुंतुदता मर्मभेदिता । तच्च ● अनौचित्यञ्च तद्भेद इत्यनेनान्वयि । तस्य तस्य प्रत्येकं जात्यादेः, तज्जातेर्यल्लोकेन शास्त्रेण वा सिद्धम् उचितं द्रव्यं गुणः क्रियादिवेत्यादिरीत्यार्थः । जातेर्गवादेरित्यादिना, देशस्य स्वर्गे इत्यादिना, कालस्य शिशिरे वर्णस्य ब्राह्मणेत्यादिना, आश्रमस्य ब्रह्मचारिणः, वयसो बालवृद्धयोः, अवस्थाया दरिद्राणाम् इत्यादिना क्रमश उदाहरणानि, तत्र यथा योग्यमनुचितमित्याद्यध्याहार्यम् । बाहुजः क्षत्रियः, निगमो वेदः । प्रकृतयो ● तथा च प्रकृतिभेदेन शास्त्रेऽस्मिन् नायकस्त्रिविधः । प्रथम इन्द्रादिदेवाः द्वितीयो दुष्यन्तादिः तृतीयो रामकृष्णादयः । त्रयोऽपि धीरोदात्तेत्यादिभेदेन प्रत्येकं चत्वार इति द्वादशविधो नायकः । तेऽपि द्वादश प्रत्येकमुत्तममध्यमाधमा इति षट्त्रिंशत् । उत्साहप्रधानो धीरोदात्तः, क्रोधप्रधानो धीरोद्धतः, कामिनीरतिप्रधानो धीरललितः, निर्वेदप्रधानो धीरशान्तः ।

सर्वत्र समत्वेऽपि रतेः संभोगरूपाया मनुष्येष्विवोत्तमदेवतासु स्फुटीकृतसकलानुभाववर्णनमनुचितम्। क्रोधस्य च लोकभस्मीकरणपटोर्दिनरात्रिव्यत्ययाद्यनेकाश्चर्यकारिणो दिव्येष्विवादिव्येषु। आलम्बनगताराध्यत्वस्यानुभावगतमिथ्यात्वस्य च प्रतीत्या रसानुल्लासापत्तेः। न च साधारणीकरणादाराध्यत्वज्ञानानुत्पत्तिरिति वाच्यम्। यत्र सहृदयानां रसोद्बोधः प्रमाणसिद्धस्तत्रैव साधारणीकरणस्य कल्पनात्। अन्यथा स्वमातृविषयकस्वपितृरतिवर्णनेऽपि सहृदयस्य रसोद्बोधापत्तेः। जयदेवादिभिस्तु गीतगोविन्दादिप्रबन्धेषु सकलसहृदयसंमतोऽयं समयो मनोन्मत्तमतङ्गजैरिव भिन्न इति न तन्निदर्शनेनेदानींतनेन तथा वर्णयितुं सांप्रतम्। तथा विद्यावयोवर्णाश्रमतपोभिरुत्कृष्टैः स्वतोऽपकृष्टेषु न सबहुमानेन वचसा व्यवहर्तव्यम्। व्यवहर्तव्यं चापकृष्टैरुत्कृष्टेषु। तत्रापि तत्रभवन्भगवन्नित्यादिभिः संबोधनैर्मुनिगुरुदेवताप्रभृतय एव न राजादयः, जात्योत्तमैर्द्विजैरेव नाधमैः शूद्रादिभिः, परमेश्वरेत्यादिसंबोधनैश्चक्रवर्तिन एव न मुनिप्रभृतयः संबोध्याः।

सर्वत्र • सर्वासु प्रकृतिषु। स्फुटीकृताः सकलानुभावाः यस्मिंस्तदेवं भूतं वर्णनम्। **वाऽऽदिव्येषु** • वर्णनमनुचितमित्यस्यानुषङ्गः। अनुचितद्वयस्थले क्रमश आह **आलम्बन** • यदि दिव्यप्रकृतिरालम्बनं तदा अयमाराध्य इति प्रतीत्या रसस्योल्लासो न स्यात्। एवं यदि अदिव्या आलम्बनं स्यात्तदा लोकभस्मीकरणदिनरात्रिव्यत्ययादिवर्णनस्य मिथ्यात्वप्रतीत्या रसोल्लासो न स्यात्। अदिव्यो न तथाविधं सम्पादयितुं समर्थ इति भावः।

न च साधारणी • रसप्रकरणे भट्टनायकमते इत्यादिना भावकत्वव्यापारः, नव्यास्तु इत्यादिना भावनाविशेषो दोषश्च साधारणीकरणायोक्तः। तथा च तया रीत्या दुष्यन्तत्वादिकं यथाऽऽच्छाद्यते तथाऽऽराध्यत्वमपि आच्छादितं स्यादिति भावः। अन्यथा तस्य व्यापारस्य सार्वत्रिकत्वे। समयः सङ्केतः। भगवतोऽपि अदिव्येषु इव रतिवर्णनेन भिन्नः। साम्प्रतं युक्तम्। दृष्टान्तेनोन्मादवशादेव तेन कृतमिति सूचितप्रायं जायते। एवं प्रकृत्यनौचित्यं विविच्य व्यवहारानौचित्यं प्रदर्शयति **तथा विद्या** • स्वतः स्वयमपेक्ष्य। क्वचित् सबहुमानेनेत्यपि पाठः। तत्र बहुव्रीहिर्बोध्यः।

तथा चाहुः—

'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा ॥' इति ।

यावता त्वनौचित्येन रसस्य पुष्टिस्तावत्तु न वार्यते । रसप्रतिकूल-स्यैव तस्य निषेध्यत्वात् । अत एव —

'ब्रह्मन्नध्ययनस्य नैष समयस्तूष्णीं बहिः स्थीयतां
स्वल्पं जल्प बृहस्पते जडमते नैषा सभा वज्रिणः ।
वीणां संहर नारद स्तुतिकथालापैरलं तुम्बुरो
सीतारल्लकभल्लभग्नहृदयः स्वस्थो न लङ्केश्वरः ॥'

इति कस्यचिन्नाटकस्य पद्ये विप्रलम्भशृङ्गाराङ्गीभूतवीररसाक्षेप-कपरमैश्वर्यपरिपोषकतया स्थितदौवारिकवचनस्य ब्रह्माद्यधिक्षेपपरस्या-नौचित्यं न दोषः । एवमेव 'अले ले सद्दः समुप्पाडिअहरिअकुसग्गन्थि-मयाच्छमालापइविक्तिविस्सम्भिअबालविहवन्तःकअणा बम्हणा' इत्यादि-

---

अनौचित्याद ● ऋते विना, औचित्योपनिबन्धस्तु इत्यपि पाठः पुस्तकान्तरे दृश्यते । नितरां समीपे सम्बन्धसम्पादिका उपनिषद् ब्रह्मणः, अत्र तु रसस्य । रावण-द्वारि समागतान् ब्रह्मादीन् प्रति दौवारिकस्योक्तिमुदाहरति ब्रह्मन्नध्य● हे ब्रह्मन् वेदाध्यय-नस्य न एष समयः, बहिर्मौनेन स्थीयताम् । अनवसरभाषणेन हे जडमते बृहस्पते स्वल्पं जल्प एषा इन्द्रस्य सभा न । हे नारद ! वीणावादनं विरमय, तुम्बरः स्तुतिपाठकः, स्तुतिकथावार्तां मा कृथाः । तुम्बुरु ऋषिरपीति अमरकोषटीकातः प्रतीयते । गन्धर्वोऽपि । हंसो हाहाहुहूश्च द्वौ रषणश्च तुम्बुरुरिति शब्दार्णवकोषात् । लङ्केश्वरो रावणः सीताया-रल्लकरूपेण भल्लास्त्रेण भग्नं हृदयं यस्य स्वस्थो नास्ति । भल्लो बाणो वा । भल्लानामको लोहास्त्रविशेषो वा । शिरः सिन्दूरशरणिः स्त्रीणामारल्लकं स्मृतम् इति हलायुधः । केचन नेत्रपद्मपङ्क्तिरित्यपि व्याचक्षते ।

विप्रलम्भ ● जगज्जनन्यां प्रवृत्तत्वादाभासस्तस्याङ्गतां वहन् यो वीरो रसः । आक्षेपकोऽत्र साधकः ।

अले ले ● संस्कृतच्छाया तु अरे रे सद्यः समुत्पाटितहरितकुशग्रन्थिमयाक्षमाला-परिवृतिविस्रम्भितबालविधवान्तःकरणाः ब्राह्मणाः । सद्यः समुत्पाटिता हरिताः कुशास्तेषां

विदूषकवचनेऽपि रेशब्देनापिप्रयोगस्य तत्तथा। हास्यानुगुणत्वात्। एषा हि दिगुपदर्शिता। अनया सुधीभिरन्यदप्यूह्यम्।

रसविशेषे गुणनिरूपणम्

रसेषु चैतेषु निगदितेषु माधुर्यौजप्रसादाख्यांस्त्रीन्गुणानाहुः। तत्र 'शृङ्गारे संयोगाख्ये यन्माधुर्यं ततोऽतिशयितं करुणे ताभ्यां विप्रलम्भे तेभ्योऽपि शान्ते। उत्तरोत्तरमतिशयितायाश्चित्तद्रुतेर्जननात्' इति केचित्। संयोगशृङ्गारात्करुणशान्तयोस्ताभ्यामपि विप्रलम्भे' इत्यपरे। संयोगशृङ्गारात्करुणविप्रलम्भशान्तेष्वतिशयितमेव न पुनस्तत्रापि तारतम्यम्' इत्यन्ये। तत्र प्रथमचरमयोर्मतयोः 'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्' इति प्राचां सूत्रमनुकूलम्। तस्योत्तरसूत्रगतस्य क्रमेणेति पदस्यापकर्षानपकर्षाभ्यां व्याख्याद्वयस्य संभवात्। मध्यस्थे तु मते करुणशान्ताभ्यां विप्रलम्भस्य माधुर्यातिशये यदि सहृदयानामनुभवोऽस्ति साक्षो तदा स प्रमाणम्। वीरबीभत्सरौद्रेष्वोजसो यथोत्तर-

ग्रन्थिभिर्निर्मिता या अक्षमालातस्याः परिवर्तनमात्रेण न तु साधुभावेन श्रद्धालुतां प्रापितं बालविधवानामन्तःकरणं यैः। तत्तथा ॰ तदनौचित्यं तथा दोषो न।

॥ रसविशेषेषु गुणविशेषव्यवस्थापनम् ॥

ताभ्याम् ॰ संभोगकरुणाभ्याम्, एवं तेभ्यः संभोगकरुणविप्रलम्भेभ्यः। ताभ्यामपि ॰ करुणशान्ताभ्यामपि। पूर्वमते शान्तस्य मधुरतमत्वमत्र तु विप्रलम्भस्येति फलितम् पुनस्तत्रापि ॰ करुणविप्रलम्भशान्तेषु। सूत्रगतस्य ॰ दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण तु इत्युत्तरसूत्रम्। क्रमेण पदस्यापकर्षे तन्माधुर्यं करुणे विप्रलम्भे शान्ते च क्रमेण अतिशययुक्तम्। अन्यरसापेक्षया संभोगशृङ्गारस्य माधुर्यं प्रागेवागतम्। तेन प्रथममतमायाति। क्रमेणेति पदस्यानपकर्षपक्षे संभोगशृङ्गारापेक्षया करुणे विप्रलम्भे शान्ते च तन्माधुर्यमतिशययुक्तमित्यर्थो जायते। तेन चरममतसिद्धिः। मध्यमते न किमपि प्राचां वचनं प्रमाणमपि तु अनुभव एव, व्याख्याभेदेऽपि स एवेत्याह मध्ये तु ॰ एवं माधुर्यविचारं समाप्य ओजसो विषयमाह वीरबीभत्स ॰ अतिशयस्तु तस्याधिक्यं प्रतीयते इत्यनेन कारिकायामेवोक्तम्।

मतिशयः। उत्तरोत्तरमतिशयितायाश्चित्तदीप्तेर्जननात्। अद्भुतहास्य-भयानकानां गुणद्वययोगित्वं केचिदिच्छन्ति। अपरे तु प्रसादमात्रम्। प्रसादस्तु सर्वेषु रसेषु सर्वासु रचनासु च साधारणः।

ओजो माधुर्यञ्च गुणद्वयम्। **प्रसादमात्रम्** ● मात्रशब्देन ओजोमाधुर्ययोर्व्यावृत्तिः। प्रसादस्यापि नियतविषयताभ्रमं निराकर्तुमाह **प्रसादस्तु** ●।

॥ अथ गुणनिरूपणम् ॥

प्राक्कथनम्—

यद्यपि काव्यप्रकाशादौ आलङ्कारिकनिवन्धे दोषनिरूपणानन्तरमेव गुणनिरूपणं दृश्यते। दोषसत्त्वे चमत्कारापकर्षे सति गुणानामकिञ्चित्करत्वमिति दोषपरिज्ञानाधीन-तत्परिहारप्रयोज्यत्वाद्गुणचमत्कृतेर्गुणनिरूपणात् प्राग्दोषनिरूपणे हेतुमपि ददते तद्व्याख्यातारस्तथापि दोषनिरूपणस्य पूर्वतनैरेव सम्यग्विहितत्वात्, तत्र विशेषविवक्षाया अभावात् मुधैव साहित्यदर्पणादिवदनुकरणदोषभागित्वग्रन्थविस्तरभयाच्च न निरुरूपिपितं दोषप्रकरणं पण्डितराजेनेति गुणनिरूपणमेवारभ्यत इति प्रतिभाति। तथा चाभ्युपगमसिद्धान्तेन स्वग्रन्थे अविहिता अप्रतिषिद्धाश्च दोषाः काव्यप्रकाशसाहित्यदर्पण-निरूपणपथेनावसेया इति सूचितम्।

इदन्त्ववधेयम्—यदत्र शब्दालङ्कारस्यापि निरूपणाभावात्तद्विषयेऽपि न्यायोऽयं प्रसरति। यद्यपि परमप्राचां गुणादिनिरूपणप्रक्रियां दृष्ट्वा शब्दसंघटनात्मकस्य शब्दा-लङ्कारस्य तेषां मतरीत्या गुणविशेषरूपतैवेति मतमुत्तिष्ठते तथापि तादृशमतस्यान्यत्रात्र च ग्रन्थे स्फुटतयाऽनुपलब्धेर्ग्रन्थकृदभिमतत्वं कल्पितुं न प्रभूयते।

यद्यपि गङ्गाधरेतिग्रन्थनाम्ना आननेतिप्रकरणनाम्ना च ग्रन्थस्य पञ्चाननतां संभाव्य तृतीयाद्याननेषु एषां निरूपणसम्भावनोत्तिष्ठते। परं गुणनिरूपणात् प्राग्दोषनिरूपण-स्याभावेन अश्रव्यत्वदोषस्य च गुणनिरूपणादनन्तरमेव सम्यग्विवेचनतया च बाधिता भवति।

अत्र गुणप्रकरणे एव प्रायः कृतलक्षणाः ग्राम्य-वैषम्य-भग्नप्रक्रम-पारुष्या-नवीकृता-श्लीलामङ्गलाधिकपदत्वापुष्टार्था दोषाः प्रतिपादिताः।

प्रतिवस्तूपमाप्रकरणे उपासनामेत्येत्यादिनैषधीयपद्यविवेचनमुखेन असंस्थुलतापि दोषः प्रतिपादितोऽत्र परं सोऽपि क्लृप्तकतिपयदोषसम्मेलनरूप एव नातिरिक्तः प्रतिभाति।

काव्यप्रकाशसाहित्यदर्पणादिमूलव्याख्यादिभ्यः साक्षात्परम्परया वा रसादीनां सम्यक्प्रतीतिप्रतिबन्धकत्वे सति काव्यवृत्तित्वमिति दोषस्य सामान्यलक्षणमायाति। पण्डितराजेन तु न किमपि लक्षणं प्रदर्शितम्। तत्र तत्र प्रसङ्गे "परिपाकभङ्गः स्यात्, दोषो रसादेः पङ्गुत्वमिव सम्पादयति" इत्युक्तम्।

तद्रीत्या विवेचने काव्यवृत्तित्वे सति काव्यप्रयोज्यचमत्कृत्यपकर्षकत्वम्, स्वाभावविशिष्टकाव्यप्रयोज्यचमत्कृतेः प्रतिबन्धकत्वमिति वा दोषसामान्यलक्षणं पर्यवस्यति। काव्यवृत्तित्वञ्च साक्षात्परम्परया वा तत्तन्नियतसम्बन्धेन, येन अर्थरसादिवृत्तिदोषाणां नासङ्ग्रहः। इत्यलं प्रसङ्गापतितविवेचनेन।

॥ अथ गुणसामान्यलक्षणम् ॥

वामनमते 'काव्यशोभायाः कर्तारो गुणास्तदतिशयहेतवस्त्वलङ्काराः' इति वचसा काव्यसौन्दर्यसाधकाः सुन्दरं काव्यमिति व्यवहारस्य साधका वा गुणा इति गुणलक्षणं पर्यवस्यति। अलङ्कारयोगेन तु सुन्दरतमं काव्यमिति व्यवहारः, गुणमात्रेण सुन्दरमेतावदेव। शोभाशब्दस्वारस्येन तु सौन्दर्यमेवायाति तच्च सौन्दर्यं काव्यस्य चमत्कारितया यथाऽन्येषां मते तथाऽत्रापि।

वामनमते रीतेः काव्यात्मतया शब्दार्थौ शरीरं काव्यस्येति सिद्धमेव अत एव शब्दवृत्तितया शब्दगुणा अर्थवृत्तितया अर्थगुणा इति तेषां मतम्।

लक्षणमप्यस्य वक्ष्यमाणं गुणानां शब्दार्थवृत्तितया व्याख्यातम्। शौर्यादयो गुणा यथोत्कर्षसाधका न स्वरूपान्तर्भूतास्तथा इमे गुणा अपि न काव्यशरीरान्तर्भूता अपि तु काव्यस्योत्कर्षका एव। तथापि न जाने केन मूलेन काव्यप्रकाशकृता, काव्यव्यवहारनिमित्तत्वं गुणत्वमित्यर्थं परिकल्प्य 'अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूम, इत्यत्रौजोगुणसत्त्वादतिव्याप्तिः, स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी। अस्या रदच्छदरसोन्यक्करोतितरां सुधाम् इत्यत्र गुणाभावादव्याप्तिश्चोदाहृता।

यद्यप्यव्याप्तिप्रदानं काव्यरसस्य काव्यत्वस्य च गुणनियतत्ववादिनां तेषामपि मते न समन्वयं भजते काव्यत्वे गुणस्यावश्यं भावात्तथापि तत्कथान्तरम्। यदपि तद्व्याख्यात्रा प्रसादस्य सत्त्वात्काव्यत्वं समस्तगुणाभावादव्याप्तिप्रदानमिति समाहितं तदपि न सम्यक्प्रतिभाति समस्तगुणानां काव्यत्वप्रयोजकत्वेऽसम्भवस्य वैरल्यस्य वा आपत्तेर्दातुमुचितत्वात्।

अद्रावत्रेत्यादावपि यदि गुणानां स्वरूपानन्तर्भूततयाऽन्येषां निर्गुणं काव्यमिति व्यवहारविषयतां भजते तदा वामनेनापीष्यते, नो चेत् तादृशोपयोग्यर्थाभावेन वामनमतेऽपि तथैवेत्यलं पल्लवितेन।

॥ अथ काव्यप्रकाशमते लक्षणम् ॥

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥

इति कारिकामनुसृत्य व्याख्यातारः 'रसस्योत्कर्षहेतुत्वे सति रसधर्मत्वम्, रसस्योत्कर्षहेतुत्वे सति रसाव्यभिचारिस्थितिकत्वम्, वा अयोगव्यवच्छेदेन रसोपकारकत्वमिति लक्षणत्रयं व्याचक्षते । कारिका-पूर्वार्द्धेन रसधर्मत्वमायाति । उत्कर्षहेतुत्वं स्फुटमेव ।]

यद्यपि अचलस्थितय इत्यस्य सगुणत्वघटितं काव्यत्वमपेक्ष्य काव्ये नियतस्थितय इति व्याख्यानमपि ग्रन्थानुकूलं सम्भवति तथापि रसेनैव नियतस्थितिः प्रायः सर्वैर्व्याख्यायते । नैयत्यञ्च रसेन तदुपकारेण च । यत्र रसो नास्ति तत्र गुणोऽपि नास्ति इति रसनैयत्यम्, रसाभावव्यापकीभूताभावप्रतियोगित्वमिति यावत् । अवस्थिताश्च गुणा अवश्यं रसमुपकुर्वन्ति इति रसोपकारनैयत्यं स्वस्थितिव्यापकरसोपकृतिकत्वमिति यावत् । इत्येव अयोगव्यवच्छेदेनेत्यादिनाऽभिहितम् । रसधर्मत्वञ्चाग्रेऽपि काव्यप्रकाशमूले द्रुतिकारणं माधुर्यमित्यादिना द्रुत्यादीनां रसकार्यत्वादुक्तप्रायत्वमेव । द्रुतिकारणं माधुर्यम्, चेतसो विस्ताररूपस्य दीप्तत्वस्य जनकमोजः, चेतसो व्याप्तेर्जनकः प्रसाद इति विशेषलक्षणमपि कृतप्रायमेव । परं काव्यप्रकाशकृतायामपरिष्कृतभाषायां वस्तुस्वरूपनिर्णये भूयान् सन्देहो जागर्ति । तथाहि आह्लादकत्वं माधुर्यं द्रुतिकारणम्, दीप्त्यात्मविस्तृतेर्हेतुरोज इत्याद्युक्त्या आह्लादकत्वमित्यत्र त्वप्रत्ययेन द्रुतिकारणत्वं माधुर्यम्, दीप्तिजनकत्वमोज इत्यायाति । अन्यत्र त्वप्रत्ययाप्रयोगेण द्रुत्यादिकारणमित्यायाति । ततश्च महान् पदार्थभेदः । प्रथमपक्षे द्रुतिकारणत्वं माधुर्यस्य स्वरूपं सत्यं निर्णीतं भवति परं कारणत्वस्याभिव्यञ्जकं न किञ्चित् कुत्रचिदङ्गीक्रियते कैश्चित् । तथा चाभिव्यञ्जकोक्तिर्वृथैव जायेत ।

कथञ्चिदङ्गीक्रियेत सामग्र्येव कारणत्वव्यञ्जिका नान्यत् । द्वितीये द्रुत्यादिकारणं माधुर्यादीति माधुर्यादेः स्वरूपनिर्णयो न जायते द्रुतिं जनयद् रचनादिभिरभिव्यज्यमानं किं वस्तु रसगतमित्याङ्क्षोदेत्येव । किञ्च द्रुतिं प्रति शृङ्गारस्य माधुर्यस्य च कारणत्वे मिलितयोः सहकारिभावेन वा कारणत्वमिति विकल्पः प्रसज्यते । मिलितयोः कारणत्वे गुणं विना रसो द्रुतिं करोति न वा ? प्रथमे गुणैः किं कृतम् ? यदि गुणं विना रसो रसास्वादमात्रं जनयति गुणविशिष्टस्तु द्रुतिमपीति चेत् हन्त गुणकार्यमेव द्रुतिं रसकार्यतयाऽभिमन्यसे, तथा च गुणानामेव कारणत्वं द्रुत्यादिं प्रति न रसानाम् । द्वितीयेऽप्येष दोषः । किञ्च पृथङ्माधुर्यादीनां किञ्चित्कार्यं प्रति कारणत्वासिद्ध्या स्वरूपसिद्ध्यभावेन सहकारिकारणत्वमपि न स्यात् । अत एव वक्ति विचारधुरन्धरः पण्डितराजः—दाहादेः कार्यादनलगतस्य उष्णस्पर्शस्य यथा भिन्नतयाऽनुभवस्तथा द्रुत्यादिचित्तवृत्तिभ्यो रस-

कार्येभ्योऽन्येषां रसगतगुणानामननुभवात् इति। तस्माद् द्रुत्यादिकारणत्वमेव माधुर्यादि न तु द्रुत्यादिकारणं किञ्चित्।

काव्यप्रकाशे द्रुतिकारणमित्यादौ द्रुतिकारणत्वमिति त्वप्रत्ययान्ततया व्याख्येयम् आह्लादकत्वशब्दवत्। तथा च सिद्धं शृङ्गारे या द्रुतिकारणता अस्ति तस्या एव नाम माधुर्यम्। परं कारणत्वस्य कथमभिव्यङ्ग्यत्वम् ? इत्यवशिष्यते। तत्रेत्थं प्रतिभाति मधुररचनयाऽभिव्यक्तः शृङ्गारो द्रुतिं जनयति न शुद्धः। तेन या द्रुतिकारणता शृङ्गारनिष्ठा सा शृङ्गारगतं रचनाऽभिव्यङ्ग्यत्वमपेक्ष्यैव। मधुरा रचना द्रुतिकारणत्वविशिष्टशृङ्गारस्याभिव्यञ्जिकेत्यर्थः। एवं रीत्यैव काव्यप्रकाशमूलयोजना कार्या। माधुर्यस्य नाभिव्यञ्जिकाऽपि तु मधुरस्य रसस्याभिव्यञ्जिका रचनेत्यवधेयम्।

इत्थञ्च साक्षाद् द्रुतिकारणे रसे द्रुतिकारणत्वरूपस्य माधुर्यस्य विद्यमानत्वाद् रसधर्मत्वं माधुर्यादेः। परम्परया प्रयोजके रचनादावभावात् भाक्तः प्रयोगो मधुर इति तन्मतनिष्कर्षोऽपि समन्वयं भजेत।

रचनादेः स्वातन्त्र्येण द्रुत्यादिजनकत्वं तु न वक्तुं शक्यते रसं विना द्रुत्यादीनामननुभवात्।

ननु रचनादिरेव रससहकारेण द्रुत्यादि जनयतीति कथन्न वाच्यम्, तथा च द्रुत्यादिकारणत्वस्य शब्दार्थगतत्वस्यापि सम्भवेन वामनादिमतमपि परिष्क्रियेतेति चेन्न— द्रुत्यादयो रसास्वादकुक्षौ प्रविष्टा एव न स्वतन्त्रास्तथा च रसास्वादं प्रति रसस्य कारणताया अवश्यं वाच्यत्वाद् रसाभावे द्रुत्यादीनामनुपलब्धेः। रसास्वादे वैशिष्ट्यमेव रचनादिभिः सम्पाद्यते वैशिष्ट्यञ्चार्थसमाजग्रस्तमिति भावः।

रसस्योत्कर्षो रसोपकारश्चान्ततो गत्वा समानार्थक एव ज्ञेयः। रसस्य स्वरूपतो रत्याद्यवच्छिन्नचैतन्यादेर्न कश्चिदुत्कर्षोऽपि तु रसास्वादस्येत्यवधेयम्।

रसास्वादश्च रत्याद्यवच्छिन्नचैतन्यस्वरूपरसाकारा चित्तवृत्तिरेव। रसास्वादात्प्राक् पश्चाद्वा द्रुत्यादेरङ्गीकारे रचनादीनामेव द्रुत्यादिकारणत्वमापद्यते। रसाभिव्यञ्जकसामग्रीतो रत्यवच्छिन्नचैतन्याकारा या वृत्तिरुदेति तस्यामेव मधुररचनया द्रुतत्वं सम्पाद्यते तेन च समीचीनो रसास्वादो जायते। द्रुतिर्गलितमिवेति तन्मूलम्, यथा घृतस्य द्रुतिर्गलितस्वरूपा काठिन्याभाव इत्यर्थ इति संक्षेपः।

अथ साहित्यदर्पणमतम्

रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा गुणाः। धर्मा इत्यस्य स्वरूपविशेषा इति तद्वृत्तौ। यद्यपि मूले स्थिरत्वबोधकशब्दो नास्ति तथापि स्थिरत्वे सति रसादीनां साक्षादुत्कर्षजनकधर्मत्वं गुणत्वम्। स्थिरत्वे सतीत्यभिधानाद् रसवदाद्यलङ्कारेषु, साक्षा-

दित्यनेन रीतिषु उभयाभावाच्चालङ्कारेषु, नातिप्रसङ्ग इति तट्टीकाकृतो व्याचक्षते। एषां मते द्रुतिर्माधुर्यम्, दीप्तिरोजः, व्याप्तिः प्रसादो न तु तत्कारणत्वम्। तद्वादिनां काव्यप्रकाशकृतां मतं खण्डितमनेन। द्रुतिरपि आस्वादस्वरूपाह्लादभिन्नेति ब्रुवत एते। काव्यप्रकाशमते रसाद् रसास्वादो भिन्न इति कृत्वा द्रुत्यादिकारणत्वं समर्थितमत्र तु रसो रसास्वादश्चैक एवेति तृतीयपरिच्छेदे प्रतिपादितम्। तथा चैषां मते द्रुति-कारणता न रसेष्विति काव्यप्रकाशाद्विशेषः। आस्वादरूपतायां रसस्येत्थ वासना प्रतिभाति। तथाहि जडस्वरूपाणां घटादीनां प्रत्यक्षे घटाकारापि चित्तवृत्तिर्घटं प्रकाश-यितुं न प्रभवति स्वयमपि जडत्वादेव, किन्तु घटाकारवृत्तौ चैतन्यच्छाया प्रकाशिका चैतन्यमात्रस्यैव स्वयं प्रकाशरूपत्वात्। विषयाकारवृत्तौ च सत्यां तदाकारतां प्रतिपन्नाः चैतन्यच्छायैव फलव्याप्तिरित्युच्यते। तथा च स्वयंप्रकाशरूपरसाकारवृत्तौ चैतन्यच्छाया न संभवति इति फलव्याप्तेरभावान्न कश्चिद् रसास्वादो रसात् पृथक् इति। साहित्यदर्पणे गुणनिरूपणे द्रवीभावश्चेत्यादिनाऽऽरभ्य 'रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्ताद्र-प्रायत्वम्, इत्युपलभ्यते। अत्रत्या हरिदासटीका तु अशुद्धा काव्यप्रकाशवासनया रस-कार्यत्वस्यापि द्रवीभावे व्याख्यातत्वात्।

अत्रोद्बोधान्तेन रसास्वाद एवाभिमतो भवेदन्यविषयस्य रसोद्बोधस्य निर्वक्तुम-शक्यत्वात्। तदा तृतीया यदि हेतौ तदा रसोद्बोधजन्यत्वेन प्रतीयमाना चित्ताद्रता रसास्वादादनन्तरं जायेत तदा चित्ताद्रताव्यञ्जकानां रचनादीनां रसास्वादे कश्चिदुपयोगो न स्यात्। काव्यप्रकाशमतचर्चितरीत्या आपत्तय आविर्भवेयुश्च। अतः प्रकृत्यादित्वाद-भेदे तृतीययैव ग्रन्थसङ्गतिर्विधेया, रसास्वादाभिन्ना या चित्ताद्रता इत्यर्थः।

चित्ताद्रता च गलितत्वेनानुभूयमानश्चित्तवृत्तिविशेष एव। तथा च रसास्वाद-स्यापि चित्तवृत्तिता ग्रन्थादेवायाति सा च द्रुता रसजन्येत्यायात्येवेति काव्यप्रकाशमत एवास्य प्रवेशः।

वेदान्तिग्रन्थेषु स्वप्रकाशाकारा वृत्तिव्याप्तिशब्दवाच्या चित्तवृत्तिरेवाङ्गिक्रियते न फलव्याप्तिः। स्वप्रकाशचिन्मयस्यापि तादृशी चित्तवृत्तिरेव रसास्वादः। चित्तद्रवीभावमय आह्लादो—माधुर्यमुच्यत इत्यादिग्रन्थसमन्वयस्तु आनन्दरूपरसाकारा चित्तवृत्तिरपि आनन्द एव विषयवृत्त्योः समानाकारापन्नत्वात्। अथवा घटरूपाज्जडाद्विषयाद् घटज्ञानं घटाकारवृत्त्यवच्छिन्नचैतन्यरूपं पृथगस्तु अत्र तु चैतन्यरूपाद् रसाद् रसास्वादस्य पार्थक्ये न मानम्। भासकभास्यचैतन्ययोरेकत्वादिति मतविशेषेण। इत्यलं विस्तरेण।

अथ रसगङ्गाधरमतम्

अन्ये पदार्थाः प्रायः काव्यप्रकाशसदृशा एव। गुणानां रचनादिवृत्तित्वं वर्ण-यिष्यते मूल एव। एषां मते द्रुत्याद्यन्यतमचित्तवृत्तिप्रयोजकत्वं गुणसामान्यलक्षणं फलति।

गुणानां चैषां द्रुतिदीप्तिविकासाख्यास्तिस्रश्चित्तवृत्तयः क्रमेण प्रयोज्याः। तत्तद्गुणविशिष्टरसचर्वणाजन्या इति यावत्। एवमेतेषु गुणेषु रसमात्रधर्मेषु व्यवसितेषु मधुरा रचना, ओजस्वी बन्ध इत्यादयो व्यवहारा आकारोऽस्य शूर इत्यादिव्यवहारवदौपचारिका इति मम्मटभट्टादयः। येऽमी माधुर्यौजःप्रसादा रसमात्रधर्मतयोक्तास्तेषां रसधर्मत्वे किं मानम्, प्रत्यक्षमेवेति चेत्, न। दाहादेः कार्यादनल-

---

अन्यस्य लक्षणस्याकरणात्। काव्यप्रयोज्यचमत्कृतिप्रयोजकतात्वं गुणत्वम्। रसालङ्कार-रीतिरचनादयश्चमत्कृतेः प्रयोजका न तु प्रयोजकतारूपाः। प्रयोजकतावत्त्वात्तेष्वपि मधुरादिव्यवहार इष्यत एव। ननु काव्यप्रकाशमते द्रुतिजनके मधुरपदस्य शक्तिः, पण्डितराजमते च द्रुतिप्रयोजक इत्यनयोः कतरः श्रेयानिति जिज्ञासा चेत् मधुरा रचने-त्यादौ लक्षणाकल्पनाभावरूपलाघवेन पण्डितराजमतस्यैव ज्यायस्त्वात्। यथा रसेषु मधुरादिस्वारसिको व्यवहारस्तथा रचनादिष्वपीति किमनुरुद्धय चैकत्र शक्तिरन्यत्र च लक्षणा कल्प्येत। जनकत्वमन्यथासिद्धिशून्यत्वघटितम्, प्रयोजकत्वन्तु तदघटितमिति शक्यतावच्छेदकेऽपि लाघवम्।

इदं मतचतुष्टयमवश्यमनुसन्धेयं पाठकैर्येनाग्रिमरसगङ्गाधरगुणप्रकरणस्य स्फुटता स्यात् तदर्थमेव निवेशितमत्र।

अथ मूलव्याख्यानम्

गुणानाञ्चैषाम् ● माधुर्यौजःप्रसादानाम्। विकासः काव्यप्रकाशे व्याप्ति-पदेनोक्तः प्रसादप्रयोज्यः। **गुणविशिष्ट** ● द्रुतिकारणत्वरूपादेर्माधुर्यादेः स्वरूप-सम्बन्धेन वैशिष्ट्यं वोध्यम्। **शूर इत्या** ● शौर्यं ज्ञानविशेष आत्मवृत्तिरूपचारेणाभि-व्यञ्जके शरीरे यथा व्यवह्रियते। औपचारिका लक्षणामूलाः। **मम्मटभट्टादयः** ● अनेन लाक्षणिकव्यवहारेऽरुचिः सूचिता।

तद्बिजमेवोपपादयितुं प्रक्रमते **येऽमी** ●। प्रत्यक्षमेवेत्यत्र प्रत्यक्षपदमनुभवपरं तथैवोत्तरकरणात्। मानसप्रत्यक्षपरं वा। रसास्वादसमये मधुरो रस इत्यनुभूयत इत्यभिमानः। अनलस्य कार्यं वस्तुदाहादि चक्षुषा गृह्यते, अनलगत उष्णस्पर्शश्च त्वचा पृथग् गृह्यते। अत्र च गुणविशिष्टरसास्वाददशायां रसकार्याणि द्रुत्यादिचित्तवृत्तय एव गृह्यन्ते न कश्चिद् रसगतो धर्मो माधुर्यनामाऽनुभूयते। द्रुत्यादिजनकत्वमृते माधुर्यादि-स्वीकारे प्रागुक्तकाव्यप्रकाशमतविवेचनदिशा दोषा अनुसन्धेयाः।

गतस्योष्णस्पर्शस्य यथा भिन्नतयानुभवस्तथा द्रुत्यादिचित्तवृत्तिभ्यो रसकार्येभ्योऽन्येषां रसगतगुणानामननुभवात्। तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात्कारणतावच्छेदकतया गुणानामनुमानमिति चेत्, प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुणकल्पने गौरवात्।

ननु केवलेभ्यो रसेभ्यो द्रुत्यादयो न जायन्ते अपि तु माधुर्यादिविशिष्टेभ्यः, तथा च यद्विना रसो द्रुत्यादिं न जनयति येन युक्तश्च जनयति तेन केनापि वस्तुना भाव्यम्, तथा च रसोऽस्वाभाविकेन केनचिदतिशयेन विशिष्टः कादाचित्कद्रुत्यादिकार्यजनकत्वात्, बीजवत्। यथा बीजेऽङ्कुरोत्पादाय धरणिजलसंयोगस्यापेक्षा अतएव कुसूलस्थात्तस्मान्नाङ्कुरम्।

तथाविधश्चात्रातिशयो माधुर्यादिनामा सिद्धयतीत्याह तादृशगुण ० गुणवन्तो रसाः कारणं कारणता तादृशेषु रसेषु कारणतावच्छेदका रसगता गुणाः। प्रातिस्विक ० स्वं स्वं प्रति प्रतिस्वं तत्र गतं रूपं प्रातिस्विकम्। द्रुतिव्यक्तिं प्रति रसव्यक्तेस्तद्व्यक्तित्वेनैव कारणता न तु माधुर्यादिविशिष्टरसत्वेन। किञ्च प्रकाशमतेनापि माधुर्यादेः कारणतावच्छेदकता न सम्भवति द्रुततरद्रुततमादिव्यक्तिभेदेन द्रुत्यादिव्यक्तेर्नानात्वेन तत्तत्कारणरूपस्य माधुर्यस्यैकस्याभावेन कारणतावच्छेदकत्वासंभवात्।

अन्यत्र माधुर्यं द्रुतिकारणं द्रुतिकारणविशिष्टो रसो द्रुतिं जनयति इति कार्यकारणभावस्यान्यत्र क्वापि अदृष्टत्वादवहेलितत्वाच्च। तर्हि रसमात्रस्य द्रुत्यादिकारणत्वं गुणैः क्रियते किमिति चेद् गुणा न कानिचिद्वस्तूनि येन तैः किञ्चित्क्रियताम्, द्रुत्यादिकारणत्वस्यैव गुणनामत्वात्।

तथापि तदभिव्यञ्जकत्वेनाङ्गीक्रियमाणैरचनादिभिः किं क्रियताम्? द्रुतिकारणरसाभिव्यक्तिमन्तरा न किञ्चित्। रचनाविशिष्टरसत्वेनापि कारणता न सम्भवति रचनाया अननुगतायाः कारणतावच्छेदकताया माधुर्यादेरिवासम्भवात्। तस्मादनुगतरूपेण कार्यकारणभावो न सम्भवतीति भावः।

एतेन कार्यकारणभावे संख्यानेन लाघवप्रदर्शनं केषाञ्चिद्व्यर्थमेव, कविशेखरमहोदया अपि प्रातिस्विकस्वारस्ये मुह्यन्ति। मधुरतारतम्यस्येव द्रुतितारतम्यस्यानन्तत्वात्। अत्र प्रातिस्विकेति प्रतीके मर्मप्रकाशे शृङ्गारत्वादिनेति भाव इत्युपलभ्यते। द्रुतिं प्रति शृङ्गारः कारणम्, दीप्तिं प्रति वीर इत्यादिरीत्या रसभेदेनाष्टौ नव वा कार्यकारणभाव इति तदभिप्रायः प्रतिभाति परं न तद्ग्रन्थस्वारस्यं वहति संभोगेन वियोगेन च विजातीयद्रुतिजनकत्वेन शृङ्गारत्वेन द्रुतिं प्रति कारणताया असंभवात्। द्रुतिजनकत्वसामान्यस्याभावेनोक्तानुमाने हेत्वसिद्धिः।

शृङ्गारकरुणशान्तानां माधुर्यवत्त्वेन द्रुतिकारणत्वं प्रातिस्विकरूपेण कारणत्वकल्पनापेक्षया लघुभूतमिति तु न वाच्यम्। परेण मधुरतरादिगुणानां पृथग्द्रुततरत्वादिकार्यतारतम्यप्रयोजकतयाभ्युपगमेन माधुर्यवत्त्वेन कारणतया गडुभूतत्वात्। इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवम्। किं चात्मनो निर्गुणतयात्मरूपरसगुणत्वं

ननु तत्तद्व्यक्तित्वेन कार्यकारणभावे आनन्त्यम्, तदपेक्षया लघूभूतं कार्यकारणभावत्रयम्, द्रुतिजनकानां रसानां मधुरत्वेन, दीप्तिजनकानामोजस्वित्वेन विकासजनकानाञ्च प्रसादित्वेनानुगमात् तदाह **शृङ्गार**॰। पूर्वोक्तदिशाऽनुगतकार्यकारणभावासंभवं दर्शयति **परेण** ॰ **मम्मटभट्टादिना**। संभोगशृङ्गारापेक्षया करुणस्य तदपेक्षया च विप्रलम्भस्येत्यादिना प्रागेव मूलेऽभिहितम्। पृथक् पार्थक्येन। मधुराद् द्रुतिः मधुरतराद् द्रुततरत्वमित्यादिना कार्यतारतम्येन कार्याणां तदनुरोधेन कारणानाञ्च भिन्नतया सामान्यरूपेण कार्यकारणभावो न संभवति। अयं भावः। मधुरो रसो द्रुतिं प्रति कारणमित्येव माधुर्यवत्त्वेन कारणता, सा च तदा भवेद् यदा संभोग-करुण-विप्रलम्भ-शान्तेभ्य एकविधैव द्रुतिर्जायेत तथा च नास्ति अत एव न तादृशः कार्यकारणभावः। **गडुभूतत्वात्** ॰ व्यर्थत्वात्। अजागलस्तनाभिप्रायेण गडुरित्युक्तं भवेत्। केचन मनुष्याणामपि गले ग्रन्थिरेका जायते तस्य नामेति वदन्ति। विश्वकोशे गडुः पृष्ठगुडे कुब्जे इत्युपलभ्यते। अत्र मधुसूदन्या महती धृष्टता, ससमर्थनं पाठं परिवर्तयति, सन्दर्भार्थं नाववुध्यते।

अन्ते तत्तद्व्यक्तित्वेन कारणताया अवश्यंवाच्यत्वान्मध्ये माधुर्यवत्त्वेन कारणताया व्यर्थत्वादिति भावः। **लाघवम्** ॰ ननु तत्तद्विशेषद्रुतीरनुगमय्य, तादृशतादृशद्रुतिं प्रति संभोग-करुणशान्त-विप्रलम्भानां चत्वारः कार्यकारणभावाः।

एवं दीप्ति-दीप्ततरत्वादिविशेषदीप्तिं प्रति वीर-बीभत्स-रौद्र-भयानक-अद्भुत-हास्यानां षट्, विकाशं प्रति तु रसत्वेन नवानामेक इति एकादश कार्यकारणभावाः, प्रातिस्विकरूपेण कारणतायान्तु अनन्ता इति कथं परित्यागो लघुभूतस्येति चेन्न माधुर्यानभिव्यञ्जिकायां प्रसादप्रसन्नायां रचनायां सत्यां विकाशवृत्त्या शृङ्गारास्वादो जायते द्रुतिश्च न जायते तत्र शृङ्गारकारणस्य भावाद् द्रुतेरभावाच्च तादृशकार्यकारणभावस्यैवासंभवात्। माधुर्यविशिष्टशृङ्गारत्वेन रचनाविशिष्टशृङ्गारत्वेन वा कारणताऽसम्भविनीति अनुपदमेव प्रतिपादितम्।

आत्मरूप ॰ निर्गुणः शुद्धश्चैतन्यस्वरूपो य आत्मा तद्रूपो यो रसस्तस्य गुणत्वम्। रसस्य गुणित्वे सति एव रसगुणत्वं माधुर्यादीनां सम्भवति रसश्च निर्गुण-

माधुर्यादीनामनुपपन्नम् । एवं तदुपाधिरत्यादिगुणत्वमपि । मानाभावात्, परीत्या गुणे गुणान्तरस्यानौचित्याच्च । अथ शृङ्गारो मधुर इत्यादिव्यवहारः कथमिति चेत्, एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयोजकत्वम्, प्रयोजकतासंबन्धेन द्रुत्यादिकमेव वा माधुर्यादिकमस्तु । व्यवहारस्तु

आत्मरूपः । एवम् अनुपपन्नमित्यर्थः, तदुपाधी रसोपाधिः, रत्यादिः, यदि माधुर्यादिगुणा रत्यादौ स्युस्तदा रसतामप्राप्तायामपि रतौ द्रुतिरनुभूयेत न च तथा, तथा च केन प्रमाणेन रत्यादिगुणत्वं माधुर्यादीनामङ्गीकार्यमिति मानाभावात् इत्यनेनोक्तम् ।

ननु मधुररचनाऽभिव्यक्तशृङ्गारतो रतौ माधुर्यं गुण समुत्पद्यत इति चेत्तत्राप्याह परीत्या ० नैयायिकैर्गुणेषु गुणा नाङ्गीक्रियन्ते । अत्र रत्यादयोऽन्तःकरणस्य गुणास्तत्र कथन्नाम माधुर्यादयो गुणा अवतिष्ठेरन् ? शृङ्गारे माधुर्यानङ्गीकारे शङ्कते अथ ० जलं मधुरम्, शर्करा मधुरा इत्यादिव्यवहारे साक्षात्सम्बन्धेन समवायेन स्वरूपेण वा जलशर्करयोर्माधुर्यवत्त्वं निमित्तं तथैव तादृशव्यवहारेण शृङ्गारेऽपि माधुर्येण भाव्यमित्यर्थः । प्राक्प्रतिपादितरीत्या माधुर्यादीनां रसगुणत्वाभावे साधिते रसगुणत्वावभासको व्यवहारो वादिप्रतिवादिभ्यामुभाभ्यामपि संमील्यैवोपपादनीय इत्यभिप्रायेणाह एवं तर्हि ० अत्रायमभिसन्धिः । न जलादिमाधुर्यमिवेदं माधुर्यं प्रसिद्धगुणस्वरूपमपि तु कविपरम्परया पारिभाषिकम्, अन्तःकरणस्य सूक्ष्मविशेषान् द्रुत्यादीन् प्रयोजयतां माधुर्यादीनाम् । द्रुतिप्रयोजकत्वं माधुर्यम्, दीप्तिप्रयोजकत्वमोजः, विकाशप्रयोजकत्वं प्रसादः, तच्च शृङ्गारादौ वर्ततेऽतः शृङ्गारो मधुर इत्यादिव्यवहारा उपपन्नाः । द्रुतिप्रयोजकत्वं स्वरूपसम्बन्धेन शृङ्गारादौ । द्रुतिश्च प्रयोजकतासम्बन्धेन, शृङ्गारः प्रयोजकतासम्बन्धेन द्रुतिमान् द्रुतिमत्त्वं शृङ्गारे । द्रुतिमत्त्वञ्च द्रुतिरेव यथा घटशब्दस्य घटत्वं समवायसम्बन्धेन प्रवृत्तिनिमित्तं भवति न तु कालिकेन पटेऽपि घटशब्दप्रवृत्त्यापत्तेः ।

तथैवात्र प्रथमपक्षे स्वरूपं द्वितीये प्रयोजकतासम्बन्धः, एवं शक्यतावच्छेदकधर्मकोटौ प्रयोजकतात्वस्य प्रवेशाप्रवेशावनुसन्धाय पक्षद्वयमुक्तं नात्र सरलमतिभिः पदार्थभेदानुसन्धाने क्लिश्यताम् । ननु द्रुतिमत्त्वं यदि माधुर्यं तदा साहित्यदर्पणमतप्रवेश इति चेन्न तेषां मते प्रयोजकतासम्बन्धेन द्रुतिमत्त्वस्याविवक्षणात्, द्रुतिप्रयोजकताया अपि रसेऽनङ्गीकारात् ।

नन्वेवं प्रयोजकतासम्बन्धस्य वृत्त्यनियामकतया कथं तेन सम्बन्धेन द्रुतिमत्त्वं माधुर्यव्यवहारनियामकं स्यादित्याशङ्क्य प्रयोजकतासम्बन्धस्यापि वृत्तिनियामकत्वं दृष्टान्तेन

वाजिगन्धोष्णेतिव्यवहारवदवतः। प्रयोजकत्वं चादृष्टादिभिन्नत्वं शब्दार्थ-रसरचनागतमेव ग्राह्यम्। अतो न व्यवहारातिप्रसक्तिः। तथा च शब्दार्थ-योरपि माधुर्यादेरीदृशस्य सत्त्वादुपचारो नैव कल्प्य इति तु मादृशाः।

जरत्तरास्तु —

'श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः॥'

इति दश शब्दगुणान्, दशैव चार्थगुणानामनन्ति। नामानि पुनस्तान्येव, लक्षणं तु भिन्नम्।

स्फोरयति **वाजिगन्धोष्णेति** • अश्वगन्धा नाम्नी औषधिर्भक्षणादुष्णतां करोति अतस्तत्र प्रयोजकतासम्बन्धेनोष्णत्वमादाय तादृशो व्यवहारः। अत्रत्यभाषानुवादे माधुर्य-प्रयोजकतेत्यादि प्रतिभाति तत्र द्रुतिप्रयोजकत्वेत्यनुसन्धेयम्। अत्र प्रकरणे एवं तदुपाधीति प्रतीके रसस्य गुणा रत्यादय इत्यादि लिखन्ती सरला न मनागपि आदरणीया। न केनापि रसगुणत्वं रत्यादीनामङ्गीक्रियते। ननु द्रुत्यादिप्रयोजकत्वं सर्वप्रयोजकेषु अदृष्ट-पदवाच्यधर्माधर्मकालादिष्वपि इति कालो मधुर इति व्यवहारोऽप्यापतेदित्यत आह **प्रयोजकत्वम्** • अदृष्टादिषु कार्यत्वावच्छिन्नकार्यताप्रयोजकत्वं तद्भिन्नत्वं समवायि-कारणत्वभिन्नत्वञ्च प्रयोजकत्वे विशेषणं देयम्। अन्तःकरणस्य द्रुतिसमवायिकारणस्य न माधूर्यातिप्रसङ्गः। शब्दार्थेत्यादौ चतुर्णां द्वन्द्वः। तेषु व्यवहारस्येष्टत्वात्। व्यवहारा-तीत्यादेः कालो मधुर इत्यादिः शेषः।

रीदृशस्य • द्रुतिप्रयोजकत्वरूपस्य। **अत्र मर्मप्रकाशः**—इदमपरमत्र बोध्यम्, आह्लादकत्वरूपमाधुर्यस्याह्लादकत्वरूपे रसे स्थितिः कथं वक्तुं शक्या?। शब्दवृत्तिता-नये गुणालङ्कारयोर्भेदस्त्वयम्—काव्यशोभाकारिणो गुणास्तदतिशयहेतवोऽलङ्काराः इति।

अत एव वामनः—

युवतेरिव सर्वभङ्गकानां स्वदते शब्दगुणं तदप्यतीव।
विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः॥ इति।

जरत्तरास्तु • त्रिगुणवादिनो काव्यप्रकाशकृदादयो जरसः, दशगुणवादिनो वामनादयो जरत्तराः, यद्यपि प्राचीनो भामहोऽपि त्रिगुणवादी तथापि तन्मतस्यानति-प्रसिद्धेर्न तत्परिगणितम्। अन्यः पारम्परिको भेदो भाषानुवादभूमिकायां वर्णित इति नेह प्रतन्यते। एते दशगुणा अपि यद्यपि काव्यप्रकाशादौ, वर्णितास्तथापि स्फुटतया प्रतिपादयितुं व्याचष्टे। **तान्येव** • शब्दार्थगुणयोः समानमेव नाम।

तथा हि—

शब्दानां भिन्नानामप्येकत्वप्रतिभानप्रयोजकः संहितयैकजातीयवर्ण-विन्यासविशेषो गाढत्वापरपर्यायः श्लेषः ॥

यदाहुः—'श्लिष्टमस्पष्टशैथिल्यम्' इति। यथा—'अनवरतविद्वद्द्रुम-द्रोहिदारिद्र्यमाद्यद्द्विपोद्दामदर्पौघविद्रावणप्रौढपञ्चाननः' इति।

गाढत्वशैथिल्याभ्यां व्युत्क्रमेण मिश्रणं बन्धस्य प्रसादः ॥

यथा—

'किं ब्रूमस्तव वीरतां वयममी यस्मिन्धराखण्डल
क्रीडाकुण्डलितभ्रुशोणनयने दोर्मण्डलं पश्यति।
माणिक्यावलिकान्तिदन्तुरतरैर्भूषासहस्रोत्करै-
र्विन्ध्यारण्यगुहागृहावनिरुहास्तत्कालमुल्लासिताः ॥'

श्लेष-लक्षणमाह **शब्दानाम्** • एकत्वं सादृश्यं प्रतिभानं ज्ञानम्, संहितया पूर्ववर्णानां परसान्निध्येन श्लिष्टं श्लेषः, अस्पष्टशैथिल्यम् एकत्वभानप्रयोजकं न स्पष्टं शैथिल्यं भिन्नता यत्र, यथा च वामनः यत्रैकपदवद्भावः पदानां भूयसामपि अनालक्षित-सन्धीनां सश्लेषः परमो गुण इति। **अनवरत** • विद्वद्विषये उदारस्य राज्ञो वर्णनमिदम्। विद्वद्द्रुमाणां तद्रूपाणामनवरतं यथा स्यात्तथा द्रोग्धुं शीलं येषां तेषां दारिद्र्यरूपाणां माद्यतां द्विपानामुत्कृष्टानां गर्वाणां समूहस्य नाशने प्रौढः सिंहः। **व्युत्क्रमेण** • आदौ शैथिल्यम् पश्चाद् गाढत्वम्। शैथिल्यगाढत्वाभ्यां क्रमेणेति वाच्ये समाधिलक्षणे क्रमेणेत्यनुरुद्धयात्र व्युत्क्रमेणेति प्रयोगः।

राज्ञो वीरतावर्णनमुदाहरति **किं ब्रूमस्तव** • क्रीडावशादपि भ्रुवोर्वक्रतां गत-योर्नयनयोश्च शोणितयोः सतोर्भीत्या शत्रवो पलाय्य विन्ध्यपर्वते गताः, तत्र च तेषां भूषणकान्तिभिर्विन्ध्यस्य वनं गुहा, गृहम्, वृक्षाश्च चत्वारः प्रकाशिताः सुशोभिता वा इति सरलार्थः। हे पृथ्वीन्द्र यस्मिन्त्वयि क्रीडया क्रीडायामत्रा कुण्डलिते भ्रुवौ यस्य क्रिया-विशेषणं वा स चासौ शोणनयनस्तस्मिन् बाहुयुगलञ्च पश्यति सति, भावलक्षणसप्तम्या तादृशदर्शनादिसमकालमेवार्थः पुनस्तत्कालमिति तु सर्वथानन्तर्यस्य निवारणद्वाराऽति-शयोक्तिदार्ढ्याय, मणिसमूहशोभायुक्तैर्भूषणसहस्रसमूहैर्विन्ध्यस्य अरण्यं गुहा गृहम् अवनि-रुहाश्चोल्लासिताः अन्ये अवनिरुहानेवोल्लसितान् व्याख्यान्ति। अमी वयं तव वीरतां

अत्र यस्मिन्नित्यन्तं शैथिल्यम्, भ्रूशब्दान्तं गाढत्वम्, पुनर्नयनेन्तं प्रथममित्यादि बोध्यम् ।

उपक्रमादासमाप्ते रीत्यभेदः समता ॥

यथा वक्ष्यमाणमाधुर्योदाहरणे । तत्र ह्युपनागरिकयैवोपक्रमसंहारौ ।

संयोगपरह्रस्वातिरिक्तवर्णाघटितत्वे सति पृथक्पदत्वं माधुर्यम् ॥

यथा—

'नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकानामथ का नाम कथापि पल्लवानाम् ॥'

किं ब्रूमः । कियता परिवर्तनेनेदमप्रस्तुतप्रशंसाप्रकरणेऽपि पद्यम् । मणिरेव मणिकस्तस्येदं मणिनिर्मितमित्यर्थः प्रतिभाति । मर्मप्रकाशो माणिक्यशब्दस्य रक्तमणिमर्थं लिखति । दन्तुरशब्दस्य मर्मप्रकाशमते मिश्रितमर्थः । सरलामते सुन्दरमर्थः । उभयत्र लक्षणैव शरणम् । उन्नतदन्ते नतोन्नते वा कोषेषु व्युत्पादनात् । उत्करः समूहः । मित्यादि • तदनन्तरं गाढत्वप्रायमित्यर्थः । उपक्रमा • उपक्रममारभ्य समाप्तिपर्यन्तं रीतेर्भेदाभावः । तथा च वामनः—

प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः ।
दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः ॥

ह्युपनागरि • अत्र मर्मप्रकाशः—रीतयश्चोपनागरिका परुषा कोमला च । एता एव क्रमेण वैदर्भीगौडीपञ्चाल्य उच्यन्ते । माधुर्यव्यञ्जकवर्णयुताद्या । ओजोव्यञ्जकवर्णयुता द्वितीया । माधुर्यौजोव्यञ्जकवर्णातिरिक्तकेवलप्रसादयुता अन्त्येति विवेकः । अन्त्याया एव ग्राम्येति संज्ञा केषाञ्चित् । इति ।

संयोग • संयोगः परो येभ्यस्ते ह्रस्वास्तद्भिन्नवर्णयुक्तत्वे समासाभावे च । संयोगश्चात्राश्रव्यत्वप्रयोजकः परसवर्णेनानिष्पन्नेन हला अघटितो ग्राह्योऽग्रे मूलेऽश्रव्यत्वनिरूपणप्रसङ्गे सवर्णनिष्पन्नसंयोगस्य श्रव्यत्ववर्णनात् ।

तथा च वामनः—बन्धे पृथक्पदत्वञ्च माधुर्यमुदितं बुधैः । नितरां परुषा • अप्रस्तुतप्रशंसायां व्याख्यास्यमानमिदम् । विचारपेशलानीत्यस्य लक्षणया विचारसहानीत्यर्थः, चारौ दक्षे च पेशल इति कोशार्थस्यासमन्वयात् ।

अपरुषवर्णघटितत्वं सुकुमारता ॥

यथा—

'स्वेदाम्बुसान्द्रकणशालिकपोलपालि-
दोलायितश्रवणकुण्डलवन्दनीया ।
आनन्दमङ्कुरयति स्मरणेन कापि
रम्या दशा मनसि मे मदिरेक्षणायाः ॥

अत्र पूर्वार्धे । उत्तरार्धे तु माधुर्यमपि ।

झटिति प्रतीयमानार्थान्वयकत्वमर्थव्यक्तिः ॥

यथा 'नितराम्' इत्यादौ ।

कठिनवर्णघटनारूपविकटत्वलक्षणोदारता ॥

सरला तु मुधैव नागेशं द्वेष्टि । पल्लवशब्दे संयोगपरह्रस्वस्यासकृदसत्त्वान्नाश्रव्यत्वम्, यदि पदो लव इत्यर्थो विवक्ष्यते तदा परसवर्णकृत एव संयोगः । सरला तु अत्रापि किमप्यशुद्धं लिखति ।

अपरुष • परुषा वर्णा अग्रेऽश्रव्यत्वेनोदाहरिष्यन्ते मूल एव । भोजदेवोप्याहैवमेव अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् ।

स्वेदाम्बु • मदिरेक्षणायाः स्वेदाम्बुनः सान्द्रैः कणैः शोभमाना या कपोलपालिस्तस्यां दोलां कृतवतो ये श्रवणकुण्डले ताभ्यां युक्ता कापि विलक्षणा रम्या दशा स्मरणद्वारा मे मनसि आनन्दमङ्कुरयति । शृङ्गारो रसः । पूर्वार्द्धे • सुकुमारतामात्रम् । माधुर्यमपीति अपि शब्देन सुकुमारता । अन्यस्य परुषस्यापि नासकृद्योजना । भुजगाङ्गार्थवारणस्य श्रवणपदम् ।

झटिति • शीघ्रम्, प्रतीयमानोऽर्थानामन्वयो यस्मिस्तत्त्वम् । तथा च वामनः—

पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ।
यत्रार्थव्यक्तिहेतुत्वात्सोऽर्थव्यक्तिः स्मृतो गुणः ॥

कठिनवर्ण • कठिनानां वर्णानां घटना रूपं यस्य तादृशं विकटत्वं लक्षणं स्वरूपं

यथा—

'प्रमोदभरतुन्दिलप्रमथदत्ततालावली-
विनोदिनि विनायके डमरुडिण्डिमध्वानिनि ।
ललाटतटविस्फुटन्नवकृपीटयोनिच्छटो
हठोद्धूतजटोद्भटो गतपटो नटो नृत्यति ॥'

'पदानां नृत्यत्प्रायत्वं विकटता' इति काव्यप्रकाशटीकाकारा व्याचक्षते । उदाहरन्ति च 'स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां झटिति रणितमासीत्' इत्यादि । तत्र तेषामेतादृशीं विकटत्वलक्षणामुदारतामोजस्यन्तर्भावयन्काव्यप्रकाशकारः कथमनुकूल इति त एव जानन्ति । नह्यत्रौजसो वैपुल्येन प्रतिभानमस्ति । 'विनिविष्टैर्नूपुरैर्नर्त—' इत्यत्र सन्नप्योजसो लवो न चमत्कारी · नापि तत्र नृत्यत्प्रायत्वं वर्णानामनुभवन्ति सहृदयाः । अंशान्तरे तु माधुर्यमेव ।

संयोगपरह्रस्वप्राचुर्यरूपं गाढत्वमोजः ॥

यथा—

'साहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः ।

यस्याः सा उदारता । शिवनृत्यं वर्णयति **प्रमोदभर** • प्रसन्ना गणास्तालान् कुर्वन्ति तेन विनोदी विनायको डमरूं वादयति, तदा ललाटतटादग्नेश्छटां निस्सारयन् जटाश्च विकीर्णाः विधाय दिगम्बरो नटो नृत्यति । प्रमोदभारेण पूरितानां प्रमथानां दत्ताभिस्तालावलीभिर्विनोदिनि, डमरोष्टंकृतिं कुर्वति, डिण्डिम इति डिम् डिम् शब्दानुकरणं वा वाद्यान्तरं वा । कृपीटयोनिरग्निः । ललाटतटात् स्फुरन्ती कृपीटयोनेश्छटा यस्य सः, हठेन उद्धताभिर्जटाभिर्विकटः ।

टीकाकारः • **दर्पणकृतोऽपि** । स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनाम् । झटिति रणितमासीत्तत्रं चित्रं कलञ्च । इति सम्पूर्णं पद्यम् । तेषां टीकाकाराणाम्, अंशान्तरे झटितीत्यादौ, तथा च नृत्यत्प्रायत्वं लक्षणे न निवेशनीयम् ।

संयोगपर • संयोगः परो येभ्यस्तादृशां ह्रस्वानां प्राचुर्यम्, संयोगश्च परसवर्णनिष्पन्नो ग्राह्यः । **साहङ्कार** • इदमग्रे शब्दशक्तिमूलकध्वनिनिरूपणे व्याख्यास्यमानम् ।

तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभूषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः ॥'

यथा वा 'अयं पततु निर्दयम्' इत्यादिप्रागुदाहृते।

अविदग्धवैदिकादिप्रयोगयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभारूपमौज्ज्वल्यं कान्तिः॥

यथा 'नितराम्' इत्यादि प्रागुदाहृते।

बन्धगाढत्वशिथिलत्वयोः क्रमेणावस्थापनं समाधिः॥

अनयोरेव प्राचीनैरारोहावरोहव्यपदेशः कृतः। क्रम एव हि तयोः प्रसादादस्य भेदकः। तत्र हि तयोर्व्युत्क्रमेण वृत्तेः।

यथा--

'स्वर्गनिर्गतनिरर्गलगङ्गातुङ्गभङ्गुरतरङ्गसखानाम्।
केवलामृतमुचां वचनानां यस्य लास्यगृहमास्यसरोजम्॥'

अत्रारोहः प्रथमेऽर्धे। तृतीयचरणे त्ववरोहः। गङ्गेत्यादौ माधुर्यस्य

अयं पततु - प्रागतस्य रौद्ररसोदाहरणस्य नवोच्छलितेत्यादेरुत्तरार्धमिदम्।

वामनस्त्वाह—

पदन्यासस्य गाढत्वं वदन्त्योजः कवीश्वराः।
अनेनाधिष्ठिताः प्रायः शब्दाः श्रोत्ररसायनम्॥

अविदग्ध • अविदग्धा कविसम्प्रदायापरिचिताः। यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते। इति भोजदेव आह।

प्राचीनैरा • आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत्। समाधिर्नाम स गुणस्तेन पूता सरस्वती इति वामनवचः।

राज्ञो वाग्मित्वस्य वर्णनम्। स्वर्गनिर्गत • यस्य नृपस्य मुखकमलं केवलसुधावर्षिणां वचनानां नृत्यशाला आसीत्। वचनानि स्वर्गनिर्गतायाः स्वैरं गच्छन्त्या गङ्गाया उन्नतैर्भङ्गुरैस्तरङ्गैः सदृशानि। तृतीयचरणे • तृतीयश्चरणो यस्मिन् द्वितीयेऽङ्के इति मर्मप्रकाशोऽभिप्रैति। सरला तु चतुर्थचरणेऽवरोहं नानुभवति। तत्सत्यं तृतीयचरणम-

व्यञ्जकेषु वर्णेषु सत्स्वपि दीर्घसमासान्तःपातितया न तस्य प्ररोहः। उत्तरार्धे तु सोऽपि । एते दश शब्दगुणाः ।

एवं क्रियापरम्परया विदग्धचेष्टितस्य तदस्फुटत्वस्य तदुपपादक-युक्तेश्च सामानाधिकरण्यरूपः संसर्गः श्लेषः ॥

यावदर्थकपदत्वरूपमर्थवैमल्यं प्रसादः ॥

यथा--'कमलानुकारि वदनं किल तस्याः' इत्यादि । प्रत्युदाहरणं तु 'कमलकान्त्यनुकारि वक्त्रम्' इत्यादि ।

पेक्ष्य नात्ररोहः परं प्रथमार्धमपेक्ष्य द्वितीयार्धेऽत्ररोहमनुभवन् मर्मप्रकाशः प्रायो नासमीचीन इति प्रतिभाति । तस्य ● माधुर्यस्य, सोऽपि माधुर्यप्ररोहोऽपि, तथा च माधुर्यसमाधि-संकरस्योदाहरणमिदम् ।

अथार्थगुणाः अथ श्लेषः

एवम् ● शब्दगुणश्लेष इवार्थश्लेष इत्यर्थः । क्रमशः क्रियाणां समावेशः क्रिया-परम्परा । चातुर्येण कस्यचित् समीहितस्यानुष्ठानं विदग्धचेष्टितं, तस्य चातुर्येणानुष्ठानस्य अस्फुटत्वं गोपनम्, तस्य गोपनस्य साधिका, युक्तिः, एषां चतुर्णां समाने स्थले वर्णनं सामानाधिकरण्यम् । क्रियापरम्परस्येति तृतीयान्तपाठे विदग्धचेष्टितत्वादीनां त्रयाणां क्रियापरम्परया सामानाधिकरण्यमित्यन्वयः कार्यः । उदाहरणन्तु पण्डितराजस्य कुतश्चित्परिभ्रष्टम् ।

अत्र मर्मप्रकाशः—

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकां प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥

इत्यमरुपद्ये यथा । अत्रैकामतिक्रम्यान्याचुम्बनं विदग्धचेष्टितम्, तस्याऽस्फुट-त्वमन्यया तदज्ञानात् । तत्रोपपत्तिश्च नयनापिधानपूर्वकं क्रीडानुबन्धः । एषाञ्च पश्चादा-गमन-नयनपिधान-क्रीडाकरणादिक्रियापरम्परया सामाधिकरण्यं काव्ये निबद्धम् । इत्याह ।

यावदर्थ ● यावन्तोऽर्थास्तावन्ति पदानि यत्र तत्त्वम्, अर्थवैमल्यम् अन्यूनाधिक-पदत्वम् इत्यर्थः । प्रत्युदाहरणे कान्तिपदमधिकम् । वक्त्रमिति दानान्मधुररचनाऽपि

प्रक्रमाभङ्गेनार्थघटनात्मकमवैषम्यं समता ॥

यथा--

'हरिः पिता हरिर्माता हरिर्भ्राता हरिः सुहृत् ।
हरिं सर्वत्र पश्यामि हरेरन्यन्न भाति मे ॥'

अत्र विष्णुर्भ्रातेत्यादिनिर्माणे प्रक्रमभङ्गात्मकं वैषम्यम् ।

एकस्या एवोक्तेर्भङ्ग्यन्तरेण पुनः कथनात्मकमुक्तिवैचित्र्यं माधुर्यम् ॥

यथा--

'विधत्तां निःशङ्कं निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥'

अत्र विध्यादिभिर्नास्ति किमपि प्रयोजनमित्येषोऽर्थः समाधिविधानादिप्रेरणारूपेणोक्तिवैचित्र्येणाभिहितः । अन्यथाऽनवीकृतत्वापत्तेः ।

प्रसादेऽपेक्ष्यते इति प्रतिभाति । **प्रक्रमाभ** ● उपक्रममनुरुद्ध्यैवार्थस्य संघटना ननु शब्दनिष्ठेन प्रक्रमभङ्गेनार्थानां वैषम्यं कथमायाति इति नाशङ्क्यम् । शब्दानामपि शाब्दबोधे भानात् । अत एव हरिराह ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

अग्रे मूलेऽपि प्रतिपादितमेवं **एकस्या एव** ● उक्तिवैचित्र्यं लक्षणं तस्य परिचायकं एकस्या एवोक्ते रीत्यन्तरेण प्रतिपादनम् ।

विधत्ताम् ● देवीं प्रति भक्तस्योक्तिरिति मर्मप्रकाशः । अन्ये पण्डितराजस्य गङ्गाभक्तिवशात् गङ्गां प्रतीति ब्रुवते । यदि भवती गङ्गा कामानां दात्री जगति जागर्ति तदान्यैर्देवैः क्रियाद्यनुष्ठानैश्च किमित्येतावन्मात्रं वक्तव्यम् । ब्रह्मा निरवधि समाधिं करोतु न किञ्चिद्विदधातु, तथैव हरिः शेतां हरो नृत्यतु, पापानां प्रायश्चित्तमपि व्यर्थम् । तपस्या दानं यज्ञश्च सर्वे व्यर्थाः । **अन्यथा** ● विधिना हरिणा हरेण च न किमपि प्रयोजन-

अकाण्डे शोकदायित्वाभावरूपमपारुष्यं सुकुमारता ॥

यथा—'त्वरया याति पान्थोऽयं प्रियाविरहकातर.' ।

'प्रियामरणकातरः' इत्यत्र तु शोकदायिनो मरणशब्दस्य सत्त्वा-त्पारुष्यम् । इदं चाश्लीलतादोषव्याप्यम् ।

वस्तुनो वर्णनीयस्यासाधारणक्रियारूपयोर्वर्णनमर्थव्यक्तिः ॥

यथा—

'गुरुमध्ये कमलाक्षी कमलाक्षेण प्रहर्तुकामं माम् ।
रदयन्त्रितरसनाग्रं तरलितनयनं निवारयांचक्रे ॥'

अयमेवेदानींतनैः स्वभावोक्त्यलंकार इति व्यपदिश्यते ।

'चुम्बनं देहि मे भार्ये कामचाण्डालतृप्तये' इत्यादिग्राम्यार्थपरिहार उदारता ॥

एकस्य पदार्थस्य बहुभिः पदैरभिधानं बहूनां चैकेन, तथैकस्य वाक्यार्थस्य बहुभिर्वाक्यैर्बहुवाक्यार्थस्यैकवाक्येनाभिधानं विशेषणानां साभिप्रायत्वं चेति पञ्चविधमोजः ॥

यदाहुः—

'पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा ।
प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च ॥' इति ।

मित्यादिना अभिधाने अनवीकृतत्वंदोषः । **दोषव्याप्यम्** • अश्लीलतादोषस्य भेदो योऽमङ्गलरूपस्तदन्तर्गतम् ।

क्रियारूपयोः • क्रियायाः स्वरूपस्य च कश्चिन्मित्रं प्रति नायिकां वर्णयति **गुरुमध्ये** • यदाऽहं क्रीडावशाद् आप्तजनानां समीप एव कमलाक्षेण तां प्रहर्तुमैच्छं तदा लज्जापरवशादविचारकारिणं मां दन्तैर्जिह्वां संपीड्य नयने च संघूर्णयन्ती निवारयाञ्चक्र इत्यभिप्रायः । प्रहर्तुं कामो यस्य, मकारलोपः, रदैर्यन्त्रितं रसनाग्रं यस्मिंस्तत्तथा तरलिते नयने यस्मिंस्तत्तथा, निवारणम् । कमलाक्षीत्यनेन स्वरूपम्, रदेत्यादिक्रिया-विशेषणाभ्यां क्रियाश्च प्रदर्शिताः । अयमेव अर्थव्यक्तिर्गुण एव, इदानीन्तनैर्गुणत्रये दश-गुणानन्तर्भावयद्भिः । **चुम्बनम्** • तृप्तयेऽन्तं ग्राम्याश्लीलस्योदाहरणम् । **एकस्य पदार्थस्य** • तथा अभिधानम्, द्वितीयमभिधानपदं पूर्वत्रापि अपकृष्यते । **समासौ च** •

पूर्वार्धप्रतिपाद्यं द्वयं व्यासप्रमासौ चेति चतुष्प्रकारा प्रौढिः, साभिप्रायत्वं चेति पञ्चप्रकारमोज इत्यर्थः । प्रौढिः प्रतिपादनवैचित्र्यम् ।

यथा—

'सरसिजवनबन्धुश्रीसमारम्भकाले
रजनिरमणराज्ये नाशमाशु प्रयाति ।
परमपुरुषवक्त्रादुद्गतानां नराणां
मधुमधुरगिरां च प्रादुरासीद्विनोदः ॥'

अत्रोपसीत्येकपदार्थस्याभिधानाय प्रथमचरणः । इत्याद्यग्रेऽपि बोध्यम् ।

'खण्डितानेत्रकञ्जालिमञ्जुरञ्जनपण्डिताः ।
मण्डिताखिलदिक्प्रान्ताश्चण्डांशोर्भान्ति भानवः ॥'

अत्र 'यस्याः पराङ्गनागेहात्पतिः प्रातर्गृहेऽव्रजति' इति वाक्यार्थे खण्डितापदाभिधानम् ।

एतावत्पर्यन्तं चतुर्धा प्रौढिः, व्यासो वाक्यरचनया विस्तरः, विस्तृतस्य संक्षेपेण प्रतिपादनं समासः, यद्यपीदं पदार्थेऽपि संभवति, तथापि वाक्यार्थे एव व्याससमासशब्दौ प्रयुक्ताविति ग्रन्थात्प्रतीयते । अस्य विशेषणस्य साभिप्रायत्वम् । प्रभातवर्णनमाह **सरसिज** • कमलवनबन्धोः सूर्यस्य शोभाप्रारम्भकाले रजनिरमणस्य चन्द्रस्य राज्ये शीघ्रं नाशं गच्छति सति परमपुरुषस्य ब्रह्मणो मुखादुदितानां ब्राह्मणानां गिरामित्यत्र सम्बन्धे षष्ठी, तादृशब्राह्मणमुखनिर्गतानां मधुवन्मधुराणां गिरां वेदानां च विनोद आसीत् । चशब्देन गीर्षु परमपुरुषमुखोद्गतत्वं समुच्चीयते । ह्रस्वदीर्घान्तावुभावपि रजनिशब्दौ समानार्थकौ । इत्यद्याग्रेऽपि • द्वितीयचरणोऽपि उषसीत्यर्थे । तृतीयचरणो ब्राह्मणरूपपदार्थे । चतुर्थश्च वेदार्थे । तथा चेदं पदार्थे वाक्यरचनाया उदाहरणम् । वाक्यार्थे पदरचनाया उदाहरणमाह **खण्डिता** • खण्डिताया नेत्रकज्जलसमूहस्य मञ्जुरक्तीकरणे प्रातःकाले प्रियदर्शनसम्पादनद्वारा कुशलाः, मण्डिता अखिला दिशां प्रान्ताः यैस्ते सूर्यस्य रश्मयः भान्ति । खण्डितापदार्थस्य वाक्यार्थतां दर्शयति अत्र • यस्याः पतिः प्रातः पराङ्गनागेहाद् गृहं गच्छति इत्यर्थयोजने ।

'अयाचितः सुखं दत्ते याचितश्च न यच्छति ।
सर्वस्वं चापि हरते विधिरुच्छृङ्खलो नृणाम् ॥'

अत्र दैवाधीनं सर्वमित्येकस्मिन्वाक्यार्थे नानावाक्यरचनात्मको व्यासपदवाच्यो विस्तरः ।

'तपस्यतः मुनेर्वक्त्राद्वेदार्थमधिगत्य सः ।
वासुदेवनिविष्टात्मा विवेश परमं पदम् ॥'

अत्र मुनिस्तपस्यति तद्वक्त्रात्स वेदार्थमधिगतवान्, तदनन्तरं वासुदेवे परब्रह्मणि मनः प्रावेशयत्, ततश्च मुक्तोऽभूदिति वाक्यार्थकलापः शतृ-क्त्वा-बहुव्रीहिभिस्तिङन्तेन चानुवाद्यविधेयभावेनैकवाक्यार्थीकृतः । साभिप्रायत्वं च प्रकृतार्थपोषकता ।

यथा--

'गणिकाजामिलमुख्यानवता भवता वताहमपि ।
सीदन्भवमरुगर्ते करुणामूर्ते न सर्वथोपेक्ष्यः ॥'

पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः ।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥

अयाचितः ० नृणां कृते दैवमव्यवस्थितम् । अनेकवाक्यार्थं एकवाक्यकल्पनं समुदाहरति तपस्यतो ० तपस्यत इति शत्रन्तस्य षष्ठ्यन्तम्, वेदार्थं सर्वेषां वेदान्तवाक्यानां ब्रह्मणि तात्पर्यनिर्णयरूपं श्रवणं कृतवान् । वासुदेवे ब्रह्मणि निविष्टं मनो यस्य, परमपदं मुक्तिः, तपस्यत इत्यत्र नः वधे इति नियमात्पदत्वाभावान्न रूत्वादिः । आदौ मुनिस्तपस्यति ततस्तद्वक्त्रादिति, अधिगत्येत्यत्र क्त्वा विवेशेति तिङन्तम् । भावप्रधानमाख्यातमिति नियमान्मुक्तिप्रवेशक्रियायाः प्राधान्यं विधेयत्वञ्च । अन्येषां नामार्थविशेषणतया अनुवाद्यत्वम् । तपःकर्तृमुनिमुखोपादानकवेदार्थाधिगत्युत्तरकालिकं वासुदेवाधिकरणकमनःकर्मकनिवेशनकर्तृकर्तृकामुक्तिकर्मिका भूतकालिकी प्रवेशक्रियेत्यादिरीत्या एकवाक्यता । अनुवाद्यभावेन विधेयभावेन चेत्यर्थः ।

गणिकाजा ० गणिका पिङ्गला या रमणप्रतीक्षया चिरं क्लिष्टा वैराग्यमुपगता भगवच्छरणं प्राप्ता यस्याः कथा एकादशस्कन्धे भागवते । अजामिलो दासीपतिर्यो

अत्रोपेक्षाभावे करुणामूर्तित्वं पोषकम्। पापिष्ठत्वात्करुणाया अभावे प्रकृतेऽस्याः संपादनाय गणिकेत्यादि सीदन्निति च।

दीप्तरसत्वं कान्तिः ॥

तच्च स्फुटप्रतीयमानरसत्वम्। उदाहरणं च वर्णितमेव रसप्रकरणे वर्णयिष्यते च।

अवर्णितपूर्वोऽयमर्थः पूर्ववर्णितच्छायो वेति कवेरालोचनं समाधिः ॥

ज्ञानस्य विषयतासंबन्धेनार्थनिष्ठत्वादर्थगुणता।

आद्यो यथा—'तनयमैनाकगवेषण–' (६१ पृष्ठे) इत्यादौ, द्वितीयस्तु प्रायशः सर्वत्रैवेत्याहुः। अपरे त्वेषु गुणेषु कतिपयान्

नारायणेतिनाममात्रेणैव भगवत्पार्षदैरन्वगृह्यत। षष्ठस्कन्धे भागवते कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः। इत्यादिना कथा प्रसिद्धा।

मर्मप्रकाशे अजामिलो नाम जार इत्यासीत्परं लेखकपरम्परया राजेति स्वरूपे परिणतम्। नागेशवैदुष्येणापरिचितायाः सरलायास्तदुपरि किं किं न कल्पनम्। तौ मुख्यौ येषान्तान्। अवतारक्षता भव एव मरुगर्तः। सीदन् दुःखमनुभवन्। हे करुणामूर्ते भगवन्। प्रकृते ● मयि वक्तरि अस्याः करुणायाः सम्पादनाय गणिकेति ● पापिष्ठेऽपि करुणायाः प्रदर्शनम्। सीदन्निति तु दुःखित्वेन करुणापात्रतासम्पादनाय।

दीप्तरसत्वम् दीप्तत्वमोजस्विरसेष्वेव न प्रतीयेतेत्यत आह **तच्च** ● दीप्तत्वमत्र रसनिष्ठं स्फुटेन प्रतीयमानत्वमेव विवक्षितं न तु चेतसो दीप्तिव्यञ्जकत्वमित्यर्थः। वर्णितमेव रसप्रकरण इत्यन्वयो बोध्यो रस प्रकरणस्य व्यतीतत्वात्।

अवर्णित ● सर्वथा प्राचीनस्य वर्णनेऽनवीकृतत्वदोषापत्तेः। इदं वस्तु अनया रीत्या पूर्वं न वर्णितं वा वर्णितमिति कवेरालोचनात्मकं ज्ञानम्। छाय इत्यस्य सदृशोऽर्थः। नन्वालोचनस्यात्मगुणत्वादन्तःकरणगुणत्वाद्वा अर्थगुणत्वं कथं सङ्गच्छेत इत्यत आह **ज्ञानस्य** ● ज्ञानं समवायेनात्मनि तिष्ठदपि विषयतासम्बन्धेन विषयेऽर्थे तिष्ठत्येव। **यमैनाक** ● यमुनावर्णनमिदं मध्यमकाव्यतया प्रागुदाहृतम्। **द्वितीयस्तु** ● पूर्ववर्णितच्छायस्तु, आहुरित्यस्य जरत्तरा इत्यत्रान्वयः। **अपरेत्वेषु** ● काव्यप्रकाशकारादयः। त्रिभिर्माधुर्योजःप्रसादैः, वक्ष्यमाणा ये दोषास्तेषामभावैरलङ्कारैश्च, दोषतया

प्रागुक्तैस्त्रिभिर्गुणैर्वक्ष्यमाणदोषाभावालंकारैश्च गतार्थयन्तः, कांश्चिद्वैचित्र्यमात्ररूपतया क्वचिद्दोषतया च मन्यमाना न तावतः स्वीकुर्वन्ति। तथाहि—श्लेषोदारताप्रसादसमाधीनामोजोव्यञ्जकघटनायामन्तर्भावः। न च श्लेषोदारतयोः सर्वांशे गाढबन्धात्मनोरोजोव्यञ्जकघटनान्तर्भावोस्तु नाम, प्रसादसमाध्योस्तु गाढशिथिलात्मनोरंशेनौजोव्यञ्जकान्तर्भावेऽप्यंशान्तरेण कुत्रान्तर्भाव इति वाच्यम्। माधुर्याभिव्यञ्जके प्रसादाभिव्यञ्जके वेति सुवचत्वात्। माधुर्यं तु परेषामस्मदभ्युपगतमाधुर्यव्यञ्जकमेव। एवं च सर्वत्र व्यञ्जके व्यङ्ग्यशब्दप्रयोगो भाक्तः। समता तु सर्वत्रानुचितैव। प्रतिपाद्योद्भटत्वानुद्भटत्वाभ्यामेकस्मिन्नेव पद्ये मार्गभेदस्येष्टत्वात्।

यथा—

'निर्माणे यदि मार्मिकोऽसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीहारोद्धुराणां गिराम्।
काव्यं तर्हि सखे सुखेन कथय त्वं संमुखे मादृशां
नो चेद्दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः॥'

अत्र पूर्वार्धे तृतीयचरणे च लोकोत्तरनिर्माणप्रतिपादके यो

समतायाः, तावतो दशगुणान्। शब्दगुणानां त्रिष्वन्तर्भावप्रकारः प्रारभ्यते तथाहि०। प्यंशान्तरेण० शिथिलांशेन। अस्मदभ्यु० परेषां वामनादीनाम्, मम्मटादयोस्मत्पदार्थः अत्र विषये मम्मटविरोधाभावात्, ग्रन्थकारोप्यस्मत्पदार्थः। वामनमते शब्दनिष्ठस्य माधुर्यस्य यल्लक्षणं तद्गुणत्रयवादिमते रसादिनिष्ठस्य माधुर्यस्य व्यञ्जकत्वपरिचायकम्। एवकारेण माधुर्यपदशक्यत्वं व्यवच्छिद्य शब्दादौ मधुरादिप्रयोगो भाक्त इति सूचयति। प्रतिपाद्यो० प्रतिपाद्यस्य विषयस्योद्भटत्वे गाढरचनायाः, अनुद्भटत्वे शिथिलायाश्चेष्टत्वेन प्रतिपाद्यभेदे समताया दूषणत्वात्।

निर्माणे० यदि अत्यन्तपाकेन द्रवतो द्राक्षामधुनो माधुरीमदस्य हरण उद्भटानां गिरां रचनायां नितरां मार्मिकोऽसि तर्हि आदरणीयतया हे सखे त्वं मादृशां प्रवीणानां सम्मुखं सुखेन काव्यं कथय। यदि नैवं निपुणः किन्तु कथमपि शब्दयोजनामात्रं करोषि

मार्गो न स चतुर्थचरणे कदर्यकाव्यप्रतिपादक इति वैषम्यमेव गुणः। ग्राम्यत्वकष्टत्वयोस्त्यागात्कान्तिसौकुमार्ययोर्गतार्थता। प्रसादेन चार्थव्यक्तेरिति। अर्थगुणेऽपि श्लेषः ओजस आद्याश्चत्वारो भेदाश्च वैचित्र्यमात्ररूपा न गुणान्तर्भावमर्हन्ति। अन्यथा प्रतिश्लोकमर्थवैचित्र्यवैलक्षण्याद्गुणभेदापत्तेः। अनधिकपदत्वात्मा प्रसादः, उक्तिवैचित्र्यवपुर्माधुर्यम्, अपारुष्यशरीरं सौकुमार्यम्, अग्राम्यरूपोदारता, वैषम्याभावलक्षणा समता, साभिप्रायत्वात्मकः पञ्चम ओजसः प्रकारः; स्वभावस्फुटत्वात्मिकार्थव्यक्तिः, स्फुटरसत्वरूपा कान्तिश्च अधिकपदत्वानवीकृतत्वामङ्गलरूपाश्लीलग्राम्यभग्नप्रक्रमापुष्टार्थरूपाणां दोषाणां निराकरणेन स्वभावोक्त्यलंकारस्य रसध्वनिरसवदलंकारयोश्च स्वीकरणेन च गतार्थानि। समाधिस्तु कविगतः काव्यस्य कारणं नतु गुणः। प्रतिभाया अपि काव्यगुणत्वापत्तेः। अतस्त्रय एव गुणा इति मम्मटभट्टादयः। तत्र टवर्गवर्जितानां

तदा आत्मना कृतं पापमिव आत्मना कृतं काव्यं हृदयाद्बहिर्मा कृथाः। ग्राम्यत्व ● ग्राम्यत्वाभावः कान्तिः, कष्टत्वाभावः सुकुमारता। अथ मर्मप्रकाशः—अत्रेदं चिन्त्यम् कष्टत्वमोजोव्यञ्जकवर्णत्वम्, सुकुमारत्वं माधुर्यव्यञ्जकवर्णत्वम्, तथाचानयोः परस्पराभावत्वाभावात्कथं तेनान्यस्यान्यथासिद्धिरित्याह। तदुपरि सरला वक्ति—।

कष्टत्वं श्रुत्युद्वेजकवर्णत्वम्, तत्त्वञ्च परुषवर्णत्वमेव। सुकुमारता च अपरुषवर्णघटनारूपा, तथा च मूल सम्यगेवेति। तत्त्वञ्च विद्वांसः स्वयमनुभवेयुः। व्यक्तेरिति ● गतार्थतेत्यस्यानुषङ्गः। इतिशब्दार्थः शब्दगुणान्तर्भावप्रक्रियायाः। भेदापत्तेः ● न च चमत्कारानुगुणत्वेन गुणत्वसाधनम् अलङ्कारादिषु व्यभिचारात्। गुणानन्त्यापत्तेश्च। कान्तिश्च ● गतार्थानीत्यनेनान्वयी। एतानि इति शेषः। क्रमश आह अधिकपद ● अधिकपदत्वरूपदोषाभावः प्रसादः एवम् अनवीकृतत्वाभावो माधुर्यम्, अमङ्गलत्वरूपाश्लीलाभावः सौकुमार्यम्, ग्राम्यत्वाभाव औदार्यम्, प्रक्रमभङ्गाभावः समता, अपुष्टार्थत्वाभावः साभिप्रायविशेषणत्वम्, अर्थव्यक्तिः स्वभावोक्तिरलङ्कारः, रसध्वनी रसवदलङ्कारश्च कान्तिः। रसप्राधान्ये ध्वनित्वम्, अप्राधान्ये रसवदलङ्कारत्वम्, इति विवेकः। कविगतः ● ज्ञानरूपत्वेनात्मगुणत्वात्। तुल्ययुक्त्या आपादयति प्रतिभाया ● तस्या

वर्गाणां प्रथमतृतीयैः शर्भिरन्तस्थैश्च घटिता, नैकट्येन प्रयुक्तैरनुस्वारपरसवर्णैः शुद्धानुनासिकैश्च शोभिता, वक्ष्यमाणैः सामान्यतो विशेषतश्च निषिद्धैः संयोगाद्यैरचुम्बिता, अवृत्तिर्मृदुवृत्तिर्वा रचनानुपूर्व्यात्मिका माधुर्यस्य व्यञ्जिका। द्वितीयचतुर्थास्तु वर्ग्या गुणस्यास्य नानुकूला नापि प्रतिकूलाः, दूरतया संनिवेशिताश्चेत्। नैकट्येन तु प्रतिकूला अपि भवन्ति। यदि तदायत्तोऽनुप्रासः। अन्ये तु वर्गस्थानां पञ्चानामप्यविशेषेण माधुर्यव्यञ्जकतामाहुः।

उदाहरणम्—

'तां तमालतरुकान्तिलङ्घिनीं किंकरीकृतनवाम्बुदत्विषम्।
स्वान्त मे कलय शान्तये चिरं नैचिकीनयनचुम्बितां श्रियम्॥'

यथा वा—

'स्वेदाम्बुसान्द्रकणशालिकपोलपालि-
रन्तःस्मितालसविलोकनवन्दनीया।
आनन्दमङ्कुरयति स्मरणेन कापि
रम्या दशा मनसि मे मदिरेक्षणायाः॥'

प्रथमे पद्येऽतिशयोक्त्यलंकृतस्य भगवद्ध्यानौत्सुक्यस्य

अपि आत्मगुणत्वाद्विषयितासम्बन्धेनार्थवृत्तित्वाच्च। **शर्भिः** • शषसाः शरः, यरलवा अन्तस्थाः, क्वचिदन्तस्थाभिरित्यपि पाठः। समासाभावोऽवृत्तिः, अल्पसमासो मृदुवृत्तिः, वर्गे भवा वर्ग्याः, गुणस्यास्य माधुर्यस्य, **अन्ये तु** • वर्गस्थाष्टवर्गभिन्ना ग्राह्याः। द्वितीयचतुर्थकृतानुप्रासस्यापि तदापत्तिरित्यस्वरसः। कस्यचिद्भक्तस्य भावनामाह **तां तमाल** • हे मे स्वान्त? शान्तये तां चिरं कृष्णस्य श्रियं कलय। तमालतरोः श्यामलकान्तेस्तिरस्कारिणीम्, दासीकृता नवाम्बुदानां त्विड् यया, नैचिकीनां गवां नयनाभ्यां चुम्बितां तां श्रियमित्यर्थः।

स्वेदाम्बु • सुकुमारतोदाहरणतया वर्णितमपि टवर्गमिश्रं द्वितीयं पादं विपरिणमय्य पुनरुदाहृतम्। अन्तःस्मितम अलसेन च विलोकनं ताभ्यां वन्दनीया। अत्र 'यथा वा स्मृतापि, इत्यपि पाठः क्वचिदुपलभ्यते परं सन्दर्भाशुद्ध तत्। **प्रथमे** • तां

भगवद्विषयकरतेर्वा व्यज्यमानायाः शान्त एव पर्यवसानात्तद्गतमाधुर्यस्याभिव्यञ्जिका रचनेयम्। द्वितीये तु स्मृत्युपष्टब्धशृङ्गारगतस्य। नैकट्येन द्वितीयचतुर्थवर्गवर्णटवर्गजिह्वामूलीयोपध्मानीयविसर्गसकारबहुलैर्वर्णैर्घटितो झय्रेफान्यतरघटितसंयोगपरह्रस्वैश्च नैकट्येन प्रयुक्तैरालिङ्गितो दीर्घवृत्त्यात्मा गुम्फ ओजसः। अस्मिन्पतिताः प्रथमतृतीयवर्ग्या गुणस्यास्य नानुकूला नापि प्रतिकूलाः संयोगाघटकाश्चेत्। तद्घटकास्त्वनुकूला एव। एवमनुस्वारपरसवर्णा अपि। यथा—'अयं पततु निर्दयं दलितदम्भ—' (१०६ पृष्ठे) इत्यादौ प्रागुदाहृते। श्रुतमात्रा वाक्यार्थं करतलबदरमिव निवेदयन्ती घटना प्रसादस्य। अयं च सर्वसाधारणो गुणः। उदाहरणान्यत्र प्रायशो मदीयानि सर्वाण्येव पद्यानि।

तथापि यथा—

'चिन्तामीलितमानसो मनसिजः सख्यो विहीनप्रभाः
प्राणेशः प्रणयाकुलः पुनरसावास्तां समस्ता कथा।
एतत्त्वां विनिवेदयामि मम चेदुक्तिं हितां मन्यसे
मुग्धे मा कुरु मानमाननमिदं राकापतिर्जेष्यति॥'

अत्र सर्वावच्छेदेन प्रसादाभिव्यञ्जकत्वमंशभेदेन तु माधुर्यौजोभिव्यञ्जकत्वमपि। मनसिजान्तस्य मा कुर्वादेश्च माधुर्याभिव्यक्ति-

---

तमालेत्यादौ पूर्वार्धेऽतिशयोक्तिः, औत्सुक्यं व्यभिचारिभावः, तद्गतमाधुर्यं शान्तगतमाधुर्यम्, द्वितीय ० स्वेदाम्बुसान्द्रेत्यादौ, उपष्टब्धो विषयः पोषितः। बहुलैरित्यनेनैषां बाहुल्येन, तेनान्येऽपि वर्णा विरला भवेयुरेवेति सूचितम्। गुम्फो रचना, ओजसो व्यञ्जिकेत्यर्थः। गुणस्यास्य ओजसः। अयं पततु ० रौद्ररसोदाहरणस्य नवोच्छलितेत्यादेरुत्तरार्धरूपम्। प्रसादस्य व्यञ्जिकेति शेषः।

चिन्तामीलितः ० मानापनोदाय नायिकां दूती वक्ति—कामः किमपि कर्तुमशक्नुवन् चिन्तयाऽवरुद्धं मानसं यस्य सः, असौ समस्ता कथा आस्ताम्। अस्त्वेतदि-

हेतुत्वात्। सख्य तदादेरोजोगमकत्वात्। नन्वत्र शृङ्गाराश्रयस्य माधुर्यस्याभिव्यक्तये तदनुकूलास्तु नाम रचना, ओजसस्तु कः प्रसङ्गो यदर्थं तदनुकूलवर्णविन्यास इति चेत्। नायिकामानोपशान्तये कृतानेकयत्नायास्तदीयं हितमुपदिशन्त्याः सख्याः सक्रोधत्वस्य व्यञ्जनीयतया तथाविन्यासस्य साफल्यात्। किं बहुना रसस्योजस्विनोऽमर्षादेर्भावस्य चाविवक्षायामपि वक्तरि क्रुद्धतया प्रसिद्धे वाच्ये वा क्रूरतरे आख्यायिकादौ प्रबन्धे वा परुषवर्णघटनेष्यते। यथा वा—

'वाचा निर्मलया सुधामधुरया यां नाथ शिक्षामदा-
स्तां स्वप्नेऽपि न संस्पृशाम्यहमहंभावावृतो निस्त्रपः।
इत्यागःशतशालिनं पुनरपि स्वीयेषु मां बिभ्रत-
स्त्वत्तो नास्ति दयानिधिर्यदुपते मत्तो न मत्तः परः॥'

अत्र गुणान्तरासमानाधिकरणः प्रसादः।

सामान्यतो वर्जनीयरचनानिरूपणम्।

इदानीं तत्तद्गुणव्यञ्जनक्षमाया निर्मितेः परिचयाय सामान्यतो विशेषतश्च वर्जनीयं किंचिन्निरूप्यते—वर्णानां स्वानन्तर्यं सकृदेकपदगतत्वे किंचिदश्रव्यम्। यथा—'ककुभसुरभिः, विततगात्रः,

---

त्यर्थः। राका पूर्णिमा अन्यचन्द्रस्य सादृश्याप्रसिद्धेः। जयश्च पीडादानेन। अथवा कलङ्कसदृशेन कालुष्येणोपमानत्ववारणेन। सर्वावच्छेदेन सर्वस्मिन्नंशे। **वाचा निर्मलया** ● भगवन्तं प्रति भक्तो ब्रवीति। अहं भावो अहङ्कारः। संस्पृशामि स्मरामि आचरामि वा। आगोऽपराधः। स्वीयेषु भक्तेषु। बिभ्रतो धारयतः पञ्चम्यन्तं पञ्चमीविभक्तेः। त्वत्तः, मत्तः, पञ्चम्यन्तात्तसिल्। मत्त उन्मत्तः। अथवा परेति दिग्योगे पञ्चमी। उदाहरणान्तरदानबीजमाह **गुणान्तराऽस** ●।

इति गुणनिरूपणम्।

सामान्यतो वर्जनीयरचनानिरूपणम्।

तत्तद्गुण ● माधुर्यादिगुणाः, निर्मिती रचना। किञ्चिद् ईषत्। **ककुभ** ●

पललमिवाभाति' इत्यादौ। असकृच्चेदधिकम्। यथा—'विततरस्तरुरेव भाति भूमौ'। एवं भिन्नपदगतत्वेऽपि। यथा—'शुक करोषि कथं विजने रुचिम्' इत्यादौ। असकृद्भिन्नपदगतत्वे ततोऽप्यधिकम्। यथा—'पिक ककुभो मुखरीकुरु प्रकामम्'। एवं स्वसमानवर्ग्यानन्तर्यं सकृदेकपदगतत्वे किंचिदश्रव्यम्। यथा—'वितथस्ते मनोरथः'। असकृच्चेदधिकम्। यथा—'वितथतरं वचनं तव प्रतीमः'। एवं भिन्नपदगतत्वे। यथा—'अथ तस्य वचः श्रुत्वा' इत्यादौ। असकृद्भिन्नपदगतत्वे तु ततोऽप्यधिकम्। 'अथ तथा कुरु येन सुखं लभे'। एतच्च वर्गाणां प्रथमद्वितीययोस्तृतीयचतुर्थयोरानन्तर्यम्। प्रथमतृतीययोर्द्वितीयतृतीययोर्वानन्तर्यं तु तथा नाश्राव्यम्। किं त्वीषन्निर्माणमार्मिकैकवेद्यम्। एतदप्यसकृच्चेत्ततोऽधिकत्वात्साधारणैरपि वेद्यम्। 'खग कलानिधिरेष विजृम्भते'। 'इति वदति दिवानिशं धन्यः'। पञ्चमानां मधुरत्वेन स्ववर्ग्यानन्तर्यं न तथा। यथा—'तनुते तनुतां तनौ'। स्वानन्तर्यं त्वश्रव्यमेव। यथा—'मम महती मनसि व्यथाविरासीत्'। एतानि चाश्रव्यत्वानि

ककारयोस्तकारयोर्लकारयोश्च स्वानन्तर्यमश्रव्यत्वदोषस्य त्रीण्युदाहरणानि असकृच्चे ● एकं स्वानन्तर्यमीषद्दोषः। एकाधिकं स्वानन्तर्यमधिको दोषः। तथा च विततरेत्यादौ तकारमकाराणां द्वे द्वे आनन्तर्ये अधिको दोषः। ततोप्य ● एकपदगतं स्वानन्तर्यमपेक्ष्य भिन्नपदगतं स्वानन्तर्यमधिकमश्रव्यत्वमापादयति। ककुभो दिशः। एवं स्व ● यथा वर्णयोः स्वानन्तर्यं दोषस्तथा स्वस्मिन् स्वसमाने वर्गे समागतस्य स्वभिन्नस्य वर्णस्य आनन्तर्यमपि पूर्ववद्दोषः। उदाहरणे तकारथकारयोस्तवर्गगतयोः स्वानन्तर्यं सकृदसकृच्च दोषावहम्।

एतच्च ● स्वसमानवर्गस्थितवर्णस्य स्वस्मिन्नानन्तर्यं दोषावहत्वेन प्रथमद्वितीययोस्तृतीयचतुर्थयोरेव वर्गस्थयोर्ग्राह्यम् न तु प्रथमतृतीययोर्द्वितोयतृतीययोस्तथा दोपावहत्वम् अपि तु अतिस्वल्पदोषत्वम्। अतिस्वल्पत्वञ्च अतिकुशलमात्रकविवेद्यत्वम्। तथा स्वानान्तर्यसदृशम्। निर्माणं रचना तन्मर्म जानाति, केवलार्थकेनैकशब्देन साधारणस्य व्यावृत्तिः। साधारणैरित्यादौ अपिना मार्मिकः समुच्चीयते। प्रथमे उदाहरणे

गुरुव्यवायेनापोद्यन्ते । 'संजायतां कथंकारं काके केकाकलस्वनः' ।

यथा वा—

'यथा यथा तामरसायतेक्षणा मया सरागं नितरां निषेविता ।
तथा तथा तत्त्वकथेव सर्वतो विकृष्य मामेकरसं चकार सा ।'

इदं तु दीर्घव्यवाये । संयोगपरव्यवाये तु—

'सदा जयानुषङ्गाणामङ्गानां संगरस्थलम् ।
रङ्गाङ्गणमिवाभाति तत्तत्तुरगताण्डवैः ॥'

इदं तु बोध्यम्—गुरुर्ययोर्व्यवधायकस्तयोरेव वर्णयोरानन्तर्यकृतमश्रव्यत्वमपवदति । तेनात्र थकारतकारानन्तर्यकृतदोषापवादेऽपि तकारथकारानन्तर्यकृतमश्रव्यत्वमनपोदितमेव । एवं

खगकानां द्वितीये तदघानाम् । **स्वानन्तर्यं** ● वर्गपञ्चमानामपीति शेषः । **गुरुव्य** ● गुरुसंज्ञकैरक्षरैर्व्यवधानं कृत्वा स्वसजातीयानां स्वसमानवर्गकाणाञ्च सन्निवेशश्चेन्नाश्रव्यत्वदोषः । उदाहरणे ककारयोर्गुरुरज्व्यवधायकः । काकेति सम्बोधनपाठोऽप्युपलभ्यते तदा काकं प्रत्युक्तिः । सम्यक् च ससम्यन्तपाठः केकावाणी मयूरस्य । कलस्वनो मधुरध्वनिः । गुरुरिह द्विधा दीर्घः स्वरः संयोगपरह्रस्वश्चेति । प्रथमस्योदाहरणं यथा यथा, द्वितीयस्य सदाजयेत्यत्र । कश्चिन्नायिकायामासक्तो मित्रं वक्ति । यथा ब्रह्मविचारशास्त्रं स्वस्मिन् प्रवर्तमानं सर्वेभ्यो विषयेभ्यो व्यावर्त्य ब्रह्ममयं करोति तथा इयं नायिका मया निषेव्यमाणा सर्वतो मां पृथक् कृत्वा स्वमयं करोति ! इत्याह **यथा यथा** ● तामरसं कमलामेव दीर्घे ईक्षणे यस्याः सा । सरागम् इत्यत्र रागः प्रेमा, तत्त्वकथापक्षे श्रद्धा । एकरसम् एका सैव रस आस्वादनीया यस्य । एकं ब्रह्मैव रस आनन्दो यस्य । अथवा शृङ्गारमयं शान्तमयञ्चार्थः । अत्र तथा तथेत्यत्र थकारतकारयोरानन्तर्यकृतमश्रव्यत्वदूषणं दीर्घाकारेण मध्यवर्तिना अपसारितम् ।

कविरङ्गदेशाधिपानां संग्रामस्थलं वर्णयति **सदाजया** ● संग्रामस्थले तुरगा अश्वा नृत्यन्ति नाटकशालायामपि नृत्यं जायतेऽतः संग्रामस्थलं नाट्यशाला इवेति । जयस्य अनुषङ्गसम्बन्धो येषाम् । संगरः संग्रामः । अत्र तत्तत्तु इत्यत्र तकाराणां स्वानन्तर्यकृतमश्रव्यत्वं संयोगपरह्रस्वाकारेण निरस्यते । यथा यथेत्यस्य विषयं सामान्यतश्चाह **इदन्तु**● तकारथकारो

त्र्यादीनां संयोगोऽपि प्रायेणाश्रव्यः। 'राष्ट्रे तवोष्ट्र्यः परितश्चरन्ति' इत्येवमादयः श्रुतिकाटवभेदा अन्येऽप्यनुभवानुसारेण बोध्याः। अथ दीर्घानन्तर्यं संयोगस्य भिन्नपदगतस्य सकृदप्यश्रव्यम्। असकृत्तु सुतराम्।

'हरिणीप्रेक्षणा यत्र गृहिणी न विलोक्यते।
सेवितं सर्वसंपद्भिरपि तद्भवनं वनम्॥"

एकपदगतस्य तु तथा नाश्रव्यम्। यथा—'जाग्रता विजितः पन्थाः शात्रवाणां वृथोद्यमः'। परसवर्णकृतस्य तु संयोगस्य सर्वथा दीर्घाद्भिन्नपदगतत्वाभावान्मधुरत्वाच्चानन्तर्यं न मनागप्यश्रव्यम्। यथा—'तान्तमालतरुकान्ति'—इत्यादिपद्ये (१६० पृष्ठे)। अत्र तामित्यत्र नीमित्यत्र च परसवर्णस्य पूर्वपदभक्ततया न संयोगो भिन्नपदगतः। प्रत्येकं संयोगसंज्ञेति पक्षेऽपि भिन्नपदगतः संयोगो न दीर्घादव्यवहितपरः। नवाम्बुदेत्यत्र त्वेकादेशस्य पदद्वयभक्ततया

तथाशब्दे। दूषणान्तरस्वरूपमाह एवं त्र्यादीनाम सुतराम् ● साधारणैरपि वेद्यम्। प्रथमस्य दीर्घानन्तरसंयोगस्योदाहरणम्। हरिणीप्रेक्षणा ● प्रशब्दस्य दीर्घानन्तरत्वाद-श्रव्यत्वम् मृगनयनी गृहपत्नी यदि यत्र गृहे न दृश्यते तद्गृहमन्याभिः सर्वसम्पद्भिः सेवित-मपि वनमेव। परं तादृशं वनं यत्र हरिणीप्रेक्षणा न भवतीति विचार्यम्। एकपदगतस्य● दीर्घानन्तरस्य संयोगस्य। तथा स्फुटं किन्तु निर्माणमार्मिककवेर्वेद्यन्तु ईषद्वर्तत एव। जाग्रता शतुस्तृतीयान्तम्। विचित इत्यपि पाठ उपलभ्यते। गतत्वाभावात् ● अनुस्वारः पूर्व-पदगतस्तस्य स्थाने जायमानः परसवर्णस्य सवर्णोऽपि सन् पूर्वपदग एव। एकपदगतत्वेऽपि संयोगस्य किञ्चिदश्रव्यत्वं स्यात् किन्तु नायं संयोगः सर्वथा पूर्वपदग उत्तरपदगो वा प्रथमः पूर्वपदस्य वर्णः पर उत्तरपदस्य। अवयवतो भिन्नपदगतत्वेऽपि सर्वांशेन भिन्नपदगतत्वं नास्तीति सर्वथेत्युक्तम्। मनागीषत्। सर्वथा अश्रव्यत्वदोषाभावे मधुरत्वाच्चेति हेतुः। पद्ये ● गुणोदाहरणप्रसङ्गे प्रागुदाहृतम्। नीमिति प्रथम-पादान्तस्य द्वितीयपादिस्थेन सह सन्धिकरणे। प्रत्येकं ● व्याकरणमहाभाष्ये प्रत्येकं संयोगसंज्ञा समुदायस्य वा संयोगसंज्ञेति पक्षद्वयमुपक्रान्तं समुदायस्य तु संयोगसंज्ञेति पक्षो राद्धान्तः। यथा तान्तमालेत्यत्र नकारः संयोगस्तकारः संयोग इति प्रत्येकमित्यस्यार्थः।

दीर्घाद्भिन्नपदगतत्वे सत्यव्यवहितोत्तरत्वं यद्यपि परसवर्णकृत-संयोगस्य भवति तथाप्यत्र भिन्नपदगत्वमेकपदगतभिन्नत्वं विवक्षित-मित्यदोषः। असकृत्तु सुतराम्। यथा—'एषा प्रिया मे क्व गता त्रपाकुला'। इदं चाश्रव्यत्वं काव्यस्य पङ्गुत्वमिव प्रतीयते। अथ स्वेच्छया संध्यकरणं सकृदप्यश्रव्यम्। यथा—'रम्याणि इन्दुमुखि

नकारतकारौ समुदितौ संयोग द्वितीय-पक्षः। प्रथमपक्षे द्वितीयपदगस्तकारः संयोगो नकारेण परसवर्णाक्षरेण व्यवहितत्वान्न दीर्घानन्तर इति भावः। तस्यैव पद्यस्य द्वितीय-पादस्य नवाम्बुदपदेऽश्रव्यत्वसंदेहः संयोगस्य दीर्घात्परत्वाद्भिन्नपदगतत्वाच्च। तथाहि अत्र सवर्णदीर्घ एकादेशः स च 'अन्तादिवच्च' इति सूत्रेण पूर्वसमुदायस्यान्तावयववत् पर-समुदायस्याद्यवयववद्भवति। आकारः कदाचित्पूर्वपदगः कदाचनोत्तरपदगश्चेति भावः। तथा च नवा म्बुदेति विभागं कृत्वा संयोगस्य दीर्घात्परत्वं भिन्नपदगतत्वञ्च। अविशब्दे इति म्त्र.दिस्थघात्तोरुणादावुप्रत्यये इदित्वान्नुमि अनुस्वारे परसवर्णे चाम्बुदशब्दः सिध्यतीति परसवर्णकृतेत्युक्तम्। भवतीत्यन्तं शङ्का। तत उत्तरम्, भिन्नं पदं तद्गृह्यते यदेकपद-घटकं न भवेदिति, अत्र तु समस्तत्वादेकपदगतमेवेति भावः। ननु एकं पदं न्दु इति तद्गतो यः संयोगस्तद्भिन्नत्वं म्बुसंयोगेऽपि अक्षतम्, सामान्यत एकत्वन्तु केवलान्वयि अव्यावर्तकम् किञ्च एकं पदं हरिणीप्रेक्षणेति तद्गतत्वमेवास्ति संयोगस्येत्यव्याप्तिः। यद्यपि नवाम्बुदेत्यत्र 'अन्तादिवच्च' इत्यतिदेशापेक्षा हरिणीप्रेक्षणेत्यत्र तु नेत्यभिप्रायो ग्रन्थकारस्योहितुं शक्यते, अत एव अदोष इति प्रतीके 'वस्तुत एकपदगतत्वेन तत्त्वा-भावादिति भावः। इति मर्मप्रकाश आह, तथापि तेन किं स्यादिति स्फुटं नायातीति चेन्न दीर्घघटितं यदनतिदिष्टं पदं तद्घटकत्वस्य संयोगे विवक्षितत्वात्। हरिणीप्रेक्षणेत्यत्र दीर्घाघटितमनतिदिष्टं पदं प्रेक्षणेति तद्घटकत्वं संयोगस्येति नाव्याप्तिः। नवाम्बुदेत्यत्र दीर्घघटितं पदमुदासीनमेव, म्बु इति तु अतिदिष्टं तथा च तद्घटकत्वाच्च न दोषः।

एवञ्च दीर्घविशिष्टः संयोगोऽश्रव्यत्वापादक इति फलति, वैशिष्ट्यञ्च स्वा-व्यवहितोत्तरत्वम्। स्वाघटितानतिदिष्टपदघटकत्वञ्चेति द्वाभ्यां सम्बन्धाभ्यामित्यलमति-विस्तरेण।

असकृत्तु • पूर्वोक्तः संयोगोऽसकृच्चेदधिको दोषः। उदाहरणे त्रयः संयोगास्ता-दृशाः। इदञ्चाश्रव्यत्वम् • यथा शरीरस्यांशे पादे स्थितं पङ्गुत्वं शरीरस्य कार्य-कारित्वं प्रतिबध्नाति तथा काव्यस्य कस्मिंश्चिदंशेऽश्रव्यत्वं चमत्कारित्वमपहन्तीति भावः।

अथ • दूषणान्तरप्रारम्भोऽथशब्दार्थः। स्वेच्छया प्रकृतिभावादिशास्त्रमनादृत्य।

ते किलकिञ्चितानि'। प्रगृह्यताप्रयुक्तं त्वसकृदेव। 'अहो अमी इन्दुमुखीविलासाः'। एवमेव च य-व-लोपप्रयुक्तम्। 'अपर इषत्र एते कामिनीनां दृगन्ताः'।

कथं तर्हि—

'भुजगाहितप्रकृतयो गारुडमन्त्रा इवावनीरमण।
तारा इव तुरगा इव सुखलीना मन्त्रिणो भवतः ॥'

इति भवदीयं काव्यमिति चेदकृत्वैव यलोपं पाठान्न दोषः। एवं रोरुत्वस्य हलि लोपस्य यण्गुणवृद्धिसवर्णदीर्घपूर्वरूपादीनां नैकट्येन वाहुल्यमश्रव्यताहेतुः। एवमिमे सर्वेऽप्यश्रव्यभेदाः काव्यसामान्ये वर्जनीयाः।

अथ विशेषतो वर्जनीयाः। तत्र मधुररसेषु ये विशेषतो वर्जनीया अनुपदं वक्ष्यन्ते त एवौजस्विष्वनुकूलाः, ये चानुकूलतयोक्तास्ते प्रतिकूला इति सामान्यतो निर्णयः। मधुररसेषु दीर्घसमासं झय्-

---

किलकिञ्चितानि हावविशेषाः। प्रगृह्यताप्रयुक्तं प्रगृह्यसञ्ज्ञया प्रकृतिभावरूपं सन्ध्यकरणमनेकवारञ्चेदश्रव्यत्वम्। सकृदपि दोषत्वे शास्त्रस्याननुष्ठानापत्तेः।

उदाहरणे अहो अमी इति च पदद्वयं प्रगृह्यसंज्ञम्। **एवमेव** ● यथा प्रगृह्यादिनाऽसकृत् सन्ध्यकरणं दोषस्तथा यवयोर्लोपे सति तदसिद्धत्वात्सन्ध्यकरणमपि असकृच्चेद् दोषः। उदाहरणे अपरे, इषवः, एते, इति पदच्छेदः। उभयत्रापि 'लोपः शाकल्यस्येति' सूत्रेण यलोपः। अपर इषव इव ते एतादृशोऽपि कुत्रचित्पाठः। यवलोपस्यासकृदुपादाने भवतः पण्डितराजस्यापि पद्यं दूषितमित्याशङ्कते **कथं तर्हि** ● कविर्भूमिपं वक्ति। हे अवनिरमण ? भवतः मन्त्रिणो गारुडमन्त्रा इव, सर्पविषापहन्तारो गारुडमन्त्राः। भुजगानामहिता प्रकृतिर्येषान्ते। भुजगाः सर्पा मन्त्रपक्षे, मन्त्रिपक्षे विटाः। सुखे लीना मन्त्रिणः सुष्ठु खे, गगने लीनास्तारा इव सुष्ठु खलीनं मुखरज्जुर्येषां तादृशा अश्वा इवेत्यर्थः। अत्र इवशब्दपरत्वस्त्रिर्यलोपः। मन्त्रा इव, तारा इव, तुरगा इव, इति पाठे न दोषः। **लोपस्य** ● यवयोरिति शेषः। **तयोक्ता** ● तान्तमालेति पद्यात्प्राक् 'तत्र टवर्गवर्जितानां वर्गाणाम्' इत्यादिना प्रतिपादिताः। ये च मधुररसे अनुकूलास्ते ओजस्विरसेषु प्रतिकूला इति योजना। **दीर्घसमासम्** ● वर्जयेदित्यत्रान्वयि। षण्णां षष्ठ्यन्तानामसकृत्प्रयोगमित्य-

घटितसंयोगपरह्रस्वस्य विसर्जनीयादेशसकारजिह्वामूलीयोपध्मानीयानां टवर्गझयां रेफहकारान्यतरघटितसंयोगस्य हलां ल-म-न-भिन्नानां स्वात्मना संयोगस्य झयुद्धयघटितसंयोगस्य चासकृत्प्रयोगं नैकट्येन वर्जयेत्। सवर्णझयुद्धयघटितसंयोगस्य शर्भिन्नमहाप्राण-घटितसंयोगस्य सकृदपीति संक्षेपः।

दीर्घसमासो यथा—

'लोलालकावलिवलन्नयनारविन्द-
लीलावशंवदितलोकविलोचनायाः।
सायाहनि प्रणयिनो भवनं व्रजन्त्या-
श्चेतो न कस्य हरते गतिरङ्गनायाः॥

झयुघटितसंयोगपरह्रस्वानां प्राचुर्यं नैकट्येन यथा—

त्रान्वयः। झया घटितो थः संयोगः स परो यस्यैवंभूतस्य ह्रस्वस्य। विसर्जनीयादेशेत्यत्र विसर्जनीयो विसर्जनीयादेशसकारादयश्चेति प्रतिभाति व्याख्यायते च केनचित् सानुरागा इत्यादि पद्यस्यावतरणे, 'विसर्गप्राचुर्यं यथा' इति मूले प्रतिपादितमपि परं तत्रत्यशकार-द्वयसंयोगान्तेत्यादिग्रन्थेन विसर्गप्राचुर्यं तत्र नाभिमतं ग्रन्थकारस्य अपि तु विसर्जनीया-देशस्यैव प्राचुर्यमिति भासते। विसर्गस्यापि विसर्गादेशेन विसर्गादेशप्राचुर्यमिति आयाति। अथवा प्रथमविसर्गस्यापि सकारं कृत्वा पाठो बोध्यः। टवर्गझयामित्यत्र टवर्गा झयश्चेत्यर्थः। टवर्गसामान्यस्य निषिद्धत्वाट्टवर्गस्य झय इति नार्थः। चतुर्णां टवर्गाणां झया संगृहीतत्वे णकारग्रहणार्थं टवर्गोपादानम्। झयि प्रथमतृतीययोः संग्राह्ययोरपि यद्यपि निषेध आयाति तथापि नैकट्येन प्रयोगाभिप्राये दूषणताऽभिधानम्।

सवर्ण० ययोर्झयोः समानं स्थानं समान आभ्यन्तरप्रयत्नश्च तयोर्झयोः संयोगः। अस्योदाहरणप्रसङ्गे पूर्वेरगतार्थतामुपपादयिष्यति स्वयमेव ग्रन्थकारः। पादद्वयस्य समस्त-तामुदाहरति लोलालका० लोला या केशानामवलिस्तया युक्तं द्वन्द्वो वा वलत् चलत् नयनकमलं यस्य लीलाभिर्वशंवदितानि स्वाधीनीकृतानि लोकानां लोचनानि यया तस्यास्तथा सायंकाले प्रियस्य भवनं गच्छन्त्या अङ्गनाया लोला गतिः कस्य चेतो न हरते। वलन् इत्यत्र चलन् इत्यपि समानार्थक एव पाठः। एकस्मिन्पादे त्रीन् संयोगपरह्रस्वान्

'हीरस्फुरद्रदनशुभ्रिमशोभि किं च
सान्द्रामृतं वदनमेणविलोचनायाः ।
वेधा विधाय पुनरुक्तमिवेन्दुबिम्बं
दूरीकरोति न कथं विदुषां वरेण्यः ॥'

अत्र भ्रिशब्दपर्यन्तं शृङ्गारानुगुणम् । शिष्टं तु रमणीयम् । उत्तरार्धे ककारतकाररूपझयद्वयसंयोगस्य सत्त्वेऽपि प्राचुर्याभावान्न दोषः । यदि तु 'दन्तांशुकान्तमरविन्दरमापहारि सान्द्रामृतम्' इत्यादि क्रियते तदा सर्वमेव रमणीयम् ।

विसर्गप्राचुर्यं यथा—

'सानुरागाः सानुकम्पाश्चतुराश्शीलशीतलाः ।
हरन्ति हृदयं हन्त कान्तायाः स्वान्तवृत्तयः ॥'

अत्र शकारद्वयसंयोगान्तं पूर्वार्धं माधुर्याननुगुणम् ।

उदाहरति हीरस्फुर ० हीरा इव स्फुरन्तो रदनास्तेषां शुभ्रिम्णा शुभ्रत्वेन शोभनशीलं किञ्च सान्द्रं घनममृतं यस्मिंस्तत् मृगनयनाया मुखं विधाय विदुषां प्रवरोऽपि ब्रह्मा पुनरुक्तमिव चन्द्रबिम्बं कथं न दूरीकरोति ।

अदूरीकरणे न तस्य वैदुष्यम् । यद्वा नञः काकुतया परिभ्रमणच्छलेन दूरीकरोत्येव अतएव विदुषां वरेण्यः। शुभ्रशब्दादिमनिच् । शोभीत्यत्र ताच्छील्ये णिनिः । वरेण्य इत्यत्र वृञ् वरणे इत्यतः एण्यप्रत्ययः । ककारतकार ० पुनरुक्तमित्यत्र । अत एव तत्र असकृत्प्रयोग इत्युक्तम् । दन्तांशु ० दन्तकिरणैः सुन्दरं कमलशोभाविजयि वदनम् ।

सानुरागा ० कान्ताया मनोवृत्तयोऽनुरागदयासहिताश्चातुर्यशालिन्यः शीलेन सदाचारेण शीतलाः । अत्र विषये प्रागुक्तम् । पूर्वार्द्धम् ० पूर्वार्द्धावयवभूतमिति मर्मप्रकाश आह । शकारद्वयसंयोगान्तं न पूर्वार्धमपि तु शीतलान्तमिति तदभिप्रायः प्रतिभाति तदा वृथैवात्र सरलापहसति तम् ।

जिह्वामूलीयप्राचुर्यं यथा—

'कलितकुलिशघाता ᳵकेऽपि खेलन्ति वाता ᳵ
कुशलमिह कथं वा जायतां जीविते मे ।
अयमपि बत गुञ्जन्नालि माकन्दमौलौ
चुलुकयति मदीयां चेतनां चञ्चरीकः ॥'

अत्र द्वितीयजिह्वामूलीयपर्यन्तमननुगुणं माधुर्यस्य । यदि च 'कथय कथमिवाशा जायतां जीविते मे मलयभुजगवान्ता वान्ति वाताः कृतान्ताः' इति विधीयते, तदा नायं दोषः ।

उपध्मानीयप्राचुर्यं यथा—

'अलकाः फणिशावतुल्यशीला नयनान्ताः परिपुङ्खितेषुलीलाः ।
चपलोपमिता खलु स्वयं या बत लोके सुखसाधनं कथं सा ॥'

अत्र द्वावुपध्मानीयावेव न शान्तानुगुणौ ।

विरहिणी नायिका सखीं प्रति विप्रलम्भोद्दीपनानि ब्रूते **कलितकुलिश** • केऽपि विलक्षणा मलयजाः कृतो वज्रवद्घातो यैरेवंभूता वायवः पीडयन्तः क्रीडन्ति । एतादृशे स्थाने मम प्राणरक्षणे कथमिव कुशलं जायताम् ।

वाशब्दः पादपूरणार्थे इवार्थे वा । एवं वायोरुद्दीपकत्वं वर्णयित्वा रसालमञ्जर्यां भ्रमरगुञ्जनस्य उद्दीपकत्वं दर्शयति हे सखि आम्रतरुशिखरे गुञ्जन् अयं भ्रमरो बत खेदे मदीयां चेतनां चुलुके कृत्वा पिबतीव । प्रथमांशे ककारपरतो जिह्वामूलीयद्वयम् **मलयभुजगा** • मलयाचलसर्पैरुद्गीर्णा वायवः ।

अलकाः • केशाः सर्पशिशुसदृशाः पीडाकारिणः, कटाक्षाः पुङ्खसहितबाणसदृशाः । इयञ्च नायिका स्वयं चपला विद्युदिव तदा सा लोके सुखसाधनमिति कथं संभवेत् पीडाकारिसामग्रीरूपत्वात्तस्याः ?।

उपध्मानीयौ • एवकारेणान्यांशस्य समीचीनत्वं सूच्यते । शान्तपददानादनुभूतनायिकासुखस्य विरहावस्थायां कष्टमनुभवतः कस्यचिद्विरक्तस्योक्तिः । एतेन विरहिण उक्तिकथनमनुवादकृतां कथमिवेति चिन्तनीयम् ।

टवर्गझयां प्राचुर्यं यथा—

'वचने तव यत्र माधुरी सा हृदि पूर्णा करुणा च कोमलेऽभूत् ।
अधुना हरिणाक्षि हा कथं वा कटुता तत्र कठोरताविरासीत् ॥'

'अधुना सखि तत्र हा कथं वा गतिरन्यैव विलोक्यते गुणानाम्'
इति त्वनुगुणम् ।

रेफघटितसंयोगस्यासकृत्प्रयोगो यथा—

'तुलामनालोक्य निजामखर्वं गौराङ्गि गर्वं न कदापि कुर्याः ।
लसन्ति नानाफलभारवत्यो लताः कियत्यो गहनान्तरेषु ॥'

यदि तु 'तुलामनालोक्य महीतलेऽस्मिन्' इति निर्मीयते तदा साधु ।

हलां ल-म-न-भिन्नानां स्वात्मना संयोगस्यासकृत्प्रयोगो

मानिनीं प्रति नायकोक्तिः वचने तव • हे हरिणाक्षि ? पूर्वं प्रसन्नावस्थायां तव वचने सा अवर्णनीया माधुरी आसीत् । तथा कोमले हृदि परिपूर्णा करुणाऽभूत् । अधुना कोपावस्थायां हा कथं वचने कटुता तत्र कठोरता प्राकटत् । कटुता कठोरतेत्यत्र टवर्गः टवर्गसान्निध्येन तकारादिझयां प्रयोगः । हरिणाक्षिपदेऽपि कटुत्वं प्रतीत्य तत्परित्यागेनोत्तरार्धमाह अधुना सखि ? • माधुर्यादिगुणानामन्यथागतिः कटुत्वादिरूपैः परिणामः । कोमले इत्यस्य सम्बोधनान्तं मर्मप्रकाशो मनुते, सरला च तमाक्षिपति । मर्मप्रकाशाभिप्रायस्त्वेवं प्रतिभाति यद्यप्युत्तरार्धे सम्बोधनं वर्तते तथापि तस्य वाक्यान्तरत्वात्पूर्वार्द्धे सम्बोधनं विना नायिकां प्रति वाक्यस्य संस्थुलता न जायते । किञ्च करुणायाः कोमल एव हृदि सम्भवात् कोमलत्वस्य हृदि प्रतिपादनं साक्षात्पुनरुक्तमिवाभाति । परं तन्मते कठोरताशब्दस्य कारुण्यप्रतिद्वन्द्वि दारुण्यमर्थः कल्प्यताम् । सम्बोधनपक्षे कोमल इत्यस्य सरल इत्यर्थः सम्यक् । सखी नायिका वा वक्ति तुला मना • हे गौराङ्गि ? स्वीयं सादृश्यमन्यत्रादृष्ट्वा मम सदृशं नान्यदित्यधिकं गर्वं कदापि न कुर्याः। यतस्त्वत्सदृशाः वनमध्येषु नानाफलानां भारैर्युक्ता न एका अपि तु कियत्यो लताः शोभन्ते । प्रथमपादं विपरिणमयति तुलाम • द्वितीयपादे गर्वं कुर्यारित्यादेः सत्त्वेऽपि प्राचुर्याभावान्नाश्रव्यत्वम् । हकारघटितसंयोगस्य कविप्रयोगे भूयसा प्रसिद्धेरभावान्नोदाहृतमिति

यथा—'विगणय्य मे निकाय्यं तामनुयातोऽसि नैव तन्न्याय्यम्'। ल-म-नानां स्वात्मनासंयोगस्तु न तथा पारुष्यमावहति । यथा—

'इयमुल्लसिता मुखस्य शोभा परिफुल्लं नयनाम्बुजद्वयं ते ।
जलदालिमयं जगद्वितन्वन्कलितः क्वापि किमालि नीलमेघः ॥'

झयुद्वयघटितसंयोगस्य यथा--

'आ सायं सलिलभरे सवितारमुपास्य सादरं तपसा ।
अधुनाब्जेन मनाक्तव मानिनि तुलना मुखस्याप्ता ॥'

अत्र द्वितीयार्धमरम्यम् । 'सरसिजकुलेन संप्रति भामिनि ते मुखतुलाधिगता' इति तु साधु ।

सवर्णझयुद्वयघटितसंयोगस्य सकृत्प्रयोगो यथा--

'अयि मन्दस्मितमधुरं वदनं तन्वङ्गि यदि मनाक्कुरुषे ।
अधुनैव कलय शमितं राकारमणस्य हन्त साम्राज्यम् ॥'

प्रतिभाति । अथवा त्रुटितमिति मर्मप्रकाशो लिखति । **विगणय्य** • अगणयित्वा अनादृत्येति यावत् । ल्यबन्तं ल्यपि लघुपूर्वादिति णेरयादेशः । निचीयतेऽस्मिन्धान्यादिकं निकाय्यं गृहम्, गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः इति कोषात् । पाय्यसानाय्ये-त्यादिपाणिनिसूत्रेण निपातितम् । न्याय्यमिति युक्तपर्यायेऽमरकोषे । न्यायादनपेतम् इति तदर्थः । धर्मपथ्यर्थेत्यादिना यत् । तां सपत्नीम् । काचित् खण्डिता नायकं प्रत्युक्तवती ।

काचिद्गोपी अन्यां श्रीकृष्णविलासचिह्नितां दृष्ट्वा तां प्रति वक्ति **इयमुल्लसिता** • इयं विचित्रा तव मुखस्य अदृष्टपूर्वा हर्षातिशयहेतुका उल्लासयुक्ता शोभा । नयनकमलद्वयमपि विकसितम् । हे अलि किं श्यामतया जगत् मेघमयं कुर्वन् क्वापि नीलमेघः कृष्णोः दृष्टः । पूर्वार्धे लमसंयोगस्य वितन्वन् न इत्यत्र नकारसंयोगस्य च चारुत्वम् । **आसायम्** • पूर्वदिने कमलेन जले प्रातरारम्य सायंकालपर्यन्तं सादरं सूर्यमुपास्य तपस्तेपे । द्वितीयेऽह्न्यधुना तत्तपःफलरूपम् ईषत्तव मुखसादृश्यमाप्तमित्यर्थः । मर्यादायामाङ् समस्तो असमस्तो वा । अब्जेन कमलेन । मनाक् ईषत् । ककारतकारयोः पकारतकारयोश्च झयोः संयोगः । तत्परित्यागेनाह **सरसिजकुलेन** । **सवर्णझयु** • सवर्णयोर्द्वयोर्झयोः संयोगः सकृदपि प्रयुक्तोऽश्रव्यताऽऽपादकः ।

अयि मन्दस्मित • अयि तन्वङ्गि यदि वदनं मनागपि मन्दहासेन सुन्दरं

नन्वत्र ककारद्वयसंयोगस्य हल्घटितस्वात्मसंयोगत्वेनैव निषेधात्क्खसंयोगस्य महाप्राणसंयोगनिषेधविषयत्वात्तृतीयसंयोगस्य चासंभवात्सवर्णझय्द्वयसंयोगनिषेधो निरवकाश इति चेत्, न। सकृत्प्रयोगविषयत्वेनास्य पार्थक्यात्। अन्यथा मनाक्कुरुष इति निर्दोषं स्यात्।

महाप्राणघटितसंयोगो यथा—

'अयि मृगमदबिन्दु' चेद्भाले बाले समातनुषे।'

उत्तरार्धं तु प्राचीनमेव।

एवं त्वप्रत्ययं यङन्तानि यङ्लुगन्तान्यन्यानि च शाब्दिकप्रियाण्यपि मधुररसे न प्रयुञ्जीत। एवं व्यङ्ग्यचर्वणातिरिक्तयोजनाविशेषापेक्षानापततोऽधिकचमत्कारिणोऽनुप्रासनिचयान्यमकादींश्च संभवतोऽपि कविर्न निबध्नीयात्। यतो हि ते रसचर्वणायामनन्तर्भवन्तः सहृदहृदयं स्वाभिमुखं विदधाना रसपराङ्मुखं विदधीरन्।

कुरुषे तदा हन्त विस्मयेऽधुना एव चन्द्रस्य शोभासाम्राज्यं शान्तमिति जानीहि। शमितं शान्ति गतमिति ण्यन्ताद् बोध्यम्। ककारद्वयसंयोगप्रयोगो दोषः सवर्णझय्द्वयघटितसंयोगस्य दोषान्तरैर्गतार्थतां संदिग्धे **नन्वत्र** •। **क ख** • खादिधातुघटितप्रयोगं सम्भाव्य ककारखकारसंयोगस्य। **अन्यथा** • सवर्णझय्द्वयसंयोगस्यापि असकृत्प्रयोग एव दोषत्वे सकृत्प्रयोगस्य दोषत्वं न स्यात्। **महाप्राण** • सकृत्प्रयोगविषयोऽपीत्यादि शेषः। **अयि मृग** • मृगमदः कस्तूरिका। महाप्राणभकारेण दकारस्य संयोगो दोषः। **प्राचीनमेव** • अधुनैव कलयेत्यादि। **व्यङ्ग्यचर्वणा** • व्यङ्ग्यस्यास्वादादन्यो यः पदानां पदार्थानां वा योजनाविशेषस्तमपेक्षन्ते ये तान्। ये रसं नाभिनिविशन्ते तेषाम्, मनस आह्लादका ये तु रसाभिनिविष्टास्तेषां कृते तु व्यङ्ग्यास्वादे प्रतिबन्धका विलम्बकारिण इत्यत आपातत इत्याह। कारिणो द्वितीयाबहुवचनान्तम्। सम्भवत इत्यपि द्वितीयाबहुवचनान्तम्। यतो हीति निपातसमुदायोऽपि हेतावेव। रसचर्वणायां विभावाद्यङ्गानामास्वादोऽन्तर्भवति न त्वनुप्रासादीनां भावना। स्वाभिमुखम् अनुप्रासादि-

विप्रलम्भे तु सुतराम्। यतो मधुरतमत्वेनास्य निर्मलसितानिर्मित-पानकरसस्येव तनीयानपि स्वातन्त्र्यमावहन्पदार्थः सहृदयहृदयारुंतुदतया न सर्वथैव सामानाधिकरण्यमर्हति।

यदाहुः—

'ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥'

ये तु पुनरक्लिष्टतयानुन्नतस्कन्धतया च न पृथग्भावनामपेक्षन्ते, किं तु रसचर्वणायामेव सुसुखं गोचरीकर्तुं शक्याः, न तेषामनुप्रासादीनां त्यागो युक्तः।

चमत्कारास्वादे संलग्नतां रचयन्तः। यथा शुनो मांसं मधुरं मिष्टान्नात्, क्रमेलकस्य च ववुलपर्णानि सरसहरितदूर्वादिभ्यः। **सुतराम्** ० न निवध्नीयादिति पूर्वतोऽनुवर्तते। अस्य विप्रलम्भस्य, पानकरसस्येव पानकरसे यत्किञ्चिदपि प्रक्षिप्तं सितारसेन न तिरोहितमपि तु रजःकणाः, स्वाद्यतया प्रतिभासन्ते तदा पानकर्तुः पीडा जायते एवमेव रसास्वादे तदनुकूलः पदार्थः स्वातन्त्र्येण भावनां जनयति तदा मर्मव्यथामुत्पादयति। यथा वाद्यसंगीतरसिकस्य गहनग्रन्थग्रन्थिश्लथनतत्परस्य विदुषः समयान्तरे चेतश्चमत्कारि अपि वाद्यसंगीतादि। मर्मपीडा अरुन्तुदता। अरुन्तुदस्तु मर्मस्पृगिति कोषः। 'विध्वरुषोस्तुद' इति खच्, 'अरुर्द्विषदित्यादिना मुम्। सामानाधिकरण्यं विप्रलम्भस्वतन्त्रपदार्थयोरेककाव्यविषयत्वेन। **ध्वन्यात्मभूते** ० शृङ्गारे रसे ध्वन्यमाने यमकादिरचना यद्यपि कवेर्यमकादिरचनाकौशलमभिव्यनक्ति तथापि तत्कौशलस्य अस्थाने निवेशनं प्रमादो यथा विवाहसभायां गरुडपुराणादिना प्रेत्यभावादिपरिस्थितिपाण्डित्यस्य। अतिकोमले विप्रलम्भे तु विशेषतः प्रमादः। अनुप्रासविशेषस्य मधुररसेऽप्युपादेयतां विशेषयति **ये तु** ० क्लिष्टा विलम्बेनास्वादपथमवतीर्णाः, उन्नतस्कन्धा रसमनपेक्ष्यापि स्वातन्त्र्येणानुभवयोग्यास्तद्भिन्ना अत एव रसभावनातः पृथग् भावनां नापेक्षन्ते।

गोचरीकर्तुं स्वातन्त्र्यविरहेण रसभावनाक्रोडीकृतभावनाः सन्तो रसास्वादविषयीकर्तुं शक्याः। अक्लिष्टा अत एव सुसुखम्। क्वचित्सुखमिति अपि पाठः। सखी नायिकां शृङ्गारितां कृत्वा कस्तूरिकातिलकं कर्तुमाग्रहिला 'तच्छोभाविशेषं' वर्णयन्ती वक्ति

यथा—

'कस्तूरिकातिलकमालि विधाय सायं
स्मेरानना सपदि शीलय सौधमौलिम् ।
प्रौढिं भजन्तु कुमुदानि मुदामुदारा-
मुल्लासयन्तु परितो हरितो मुखानि ॥'

इत्थमेते प्रसङ्गतो मधुररसाभिव्यञ्जिकायां रचनायां संक्षेपेण निरूपिता दोषाः ।

'एभिर्विशेषविषयैः सामान्यैरपि च दूषणै रहिता ।
माधुर्यभारभङ्गुरसुन्दरपदवर्णविन्यासा ॥
व्युत्पत्तिमुद्गिरन्ती निर्मातुर्या प्रसादयुता ।
तां विबुधा वैदर्भीं वदन्ति वृत्तिं गृहीतपरिपाकाम् ॥

अस्यामुदाहृतान्येव कियन्त्यपि पद्यानि ।

यथा वा—

'आयातैव निशा निशापतिकरैः कीर्णं दिशामन्तरं
भामिन्यो भवनेषु भूषणगणैरुल्लासयन्ति श्रियम् ।

कस्तूरिका ● हे आलि कस्तूरिकातिलकं विधाय स्मितवदना सती सायं चन्द्रोदयवेलायां सुधाधवलितसद्मशेखरे परिभ्रमतेन चन्द्रोदयस्य कार्याणि भविष्यन्ति यथा कुमुदानि हर्षाणामुदारां प्रौढिं भजन्तु सम्यग्विकासं यान्तु । अन्धकारवशादवगुण्ठिता इव दिशो मुखानि विकसितानि कुर्युः । मधुररसस्य कृते वैदर्भीरीतिरितिफलिते प्रसङ्गाद् वैदर्भीरीतिं लक्षयति **एभिर्विशेष** ● मधुररसेषु दीर्घसमासमित्यादिनोपवर्णिता मधुररसविषया दोषा विशेषाः । ततः प्राक् वर्णानां स्वानन्तर्यं 'सकृदेकपदगतत्वे' इत्यादिना प्रक्रान्ताः सामान्यदोषा एभिर्द्विविधैरपि दोषै रहिता माधुर्यभारेण भङ्गुरा मधुरतया सुन्दराणां पदानां वर्णानाञ्च सुन्दरो विन्यासो यस्यां सा, प्रसादगुणेन पूर्वमुपदर्शितेन सनाथा, एवंविधत्वादेव कवेः काव्यनिर्माणकौशलं प्रकटयन्ती या वृत्तिस्तां गृहीतः परिपाकः प्रौढिर्यया तां वैदर्भीं वदन्ति । परिपाको रसचर्वणेति मर्मप्रकाशः । नायको मानिनीं नायिकामनुनयति **आयातैव निशा** ● उद्दीपनान्याह निशा आयाता एव, चन्द्रकिरणैर्दिशां मध्यं व्याप्तम्, सम्यक्

वामे मानमपाकरोषि न मनागद्यापि रोषेण ते
हा हा बालमृणालतोऽप्यतितमां तन्वी तनुस्ताम्यति ॥'

अस्याश्च रीतेर्निर्माणे कविना नितरामवहितेन भाव्यम् । अन्यथा तु परिपाकभङ्गः स्यात् ।

यथामरुककविपद्ये—

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥'

चन्द्रोदयो जात एव । कामिन्यो भूषणादीनि परिधाय शोभां वर्धयन्त्येव, संभोगार्थं सज्जीभावेनोद्दीपनफलान्यपि जातान्येवेति भावः । हे वामे ईषदपि मानं न न्यूनीकरोषि, हा हा शोके पश्य अद्यापि ते रोषेण बालमृणालमपेक्ष्यापि अत्यन्तं कृशा ते तनुः क्लिश्यत्येव, रोषापरित्यागे शरीरक्षतिरपि संभावितेति भावः । अस्याश्च वैदर्भ्याश्च । परिपाकभङ्गो रसास्वादस्य सम्यक्त्वाभावः । सलज्जायाः संभोगशृङ्गारं वर्णयति शून्यं वासगृहम् ॰ केलिगृहात् सख्यादीनां गमनान्तरं रात्रौ लज्जाजनकान्यकर्तृकदर्शनेन शून्यं शयनागारं दृष्ट्वा एकान्तस्थानं ज्ञात्वेति यावत् । पत्युर्जागरणभिया शनैः किञ्चित् शयनादुदतिष्ठत् । तदनन्तरं चिरकालं सुप्तो न वेति संदिहानया छलेन निद्रितस्यापि पत्युर्मुखं निर्वर्णयामास । तदनन्तरं तस्य सुषुप्तौ कृतविश्वासा सम्यक् चुम्बितवती । परं चुम्बनानन्तरं वस्तुतो जाग्रतो नायकस्य रसास्वादजनितं गण्डस्थले पुलकं दृष्ट्वा भृशं लज्जया नम्रमुखीबभूव । तदनन्तरं नायिकारतिसाक्षात्कारादुद्बुद्धरतिना हसता प्रियेण सा बाला चिरं चुम्बिता । अत्र लज्जेति पृथक्पदं तेन समानकर्तृकत्वोपपत्तिरिति मर्मप्रकाशः । तस्यायमभिप्रायः प्रतिभाति विलोक्येत्यादौ पञ्चानां ल्यपां स्थानी क्त्वा 'समानकर्तृकयोः पूर्वकाले' इति सूत्रेण समानकर्तृकायां क्रियायामुपपदे भवति, क्त्वाप्रकृत्यर्थक्रियाया यः कर्ता तत्कर्तृकायां क्रियायामुपपद इति यावत् । क्त्वाप्रकृत्यर्थक्रियाकर्त्री बाला न तत्कर्तृकक्रियोपपदम्, चुम्बितेति क्रिया तु प्रियकर्तृका तथा च कथं क्त्वा प्रत्यय इति ग्राशङ्का । उत्तरन्तु लज्जाशब्दस्य लज्जितार्थं कथञ्चित्कृत्वा गण्डस्थलीमालोक्य लज्जिताऽभूदित्यर्थः । ततश्च नम्रमुखी सती चुम्बितेति क्रमेणार्थः । तथा च विलोकनादिक्रियाकर्त्री या बाला तत्कर्तृका लज्जाभवनक्रियैवोपपदमिति । अथवा लज्जाशालिनी सा

अत्रोत्थाय किंचिच्छनैरित्यत्र सवर्णझयुद्वयसंयोगस्तत्रापि नैकट्येनेति सुतरामश्रव्यः। एवं झयुघटितसंयोगपरह्रस्वस्यापि। तथा शनैर्निद्रेत्यत्र, निर्वर्ण्य पत्युर्मुखमित्यत्र च रेफघटितसंयोगस्य, झयुघटितसंयोगपरह्रस्वस्य च प्राचुर्यम्। विस्रब्धमित्यत्र महाप्राणघटितस्य, लज्जेत्यत्र स्वात्मसवर्णझयुद्वयघटितस्य, मुखी प्रियेणेत्यत्र भिन्नपदगतदीर्घानन्तरस्य संयोगस्य, तथा क्त्वाप्रत्ययस्य पञ्चकृत्वः, लोकतेश्च धातोर्द्विः प्रयोगः कवेर्निर्माणसामग्रीदारिद्र्यं प्रकाशयति। इत्यलं परकीयकाव्यविमर्शनेन। इति संक्षेपेण निरूपिता रसाः।

भावध्वनिनिरूपणम्

अथ किं भावत्वम्। विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमिति

बाला 'शून्यं वासगृहं विलोक्य' इत्यादि क्रमेणालोक्यान्तस्यान्वयानन्तरं नम्रमुखो बभूवेति क्रमेणार्थः। यदि ओलस्जीधातोर्भावार्थकाकारप्रत्ययनिष्पन्नस्य लज्जाशब्दस्य लज्जावती अर्थो न युज्यत इति विभाव्यते तदा तयेति तृतीयान्तं कर्तृपदमध्याहृत्य ल्यबन्तानामन्वय विधाय लज्जा क्रियतइत्यर्थेन कृधातोरध्याहार इति।

वस्तुतो बाला शून्यं वासगृहं विलोक्येत्यादिरीत्या समेषां ल्यबन्तानामन्वये लज्जाहेतुकनम्रमुखीभावरूपायाः क्रियाया उपपदत्वेऽपि न क्षतिः प्रतिभाति। न च लज्जाकार्याणि ल्यबन्तार्थरूपाणि प्रथमं लज्जान्वयं विना नोपपद्यन्त इति वाच्यम्, बाल्यप्रयुक्तत्वेनाप्युपपत्तेरिति समस्तत्त्वेऽपि न क्षतिः। अत्रोत्थाय • तकारथकारौ चकारच्छकारौ सवर्णझयौ। नैकट्येनासकृच्चेत्यपि बोध्यम्। उत्थायेत्यत्रोकारः किञ्चिदित्यत्र चिशब्दस्य झयुघटितसंयोगपरह्रस्वः। सप्त रेफघटितसंयोगाः। उत्थाय, किञ्चिच्छनैः, निद्रा, निर्वर्ण्य, परिचुम्ब्य, गण्ड, लज्जा, चुम्बिता, एषु नव झयुघटितसंयोगपरह्रस्वा अत एव प्राचुर्यमित्युक्तन्तेन चाश्रव्यत्वम्। लोकतेश्च विलोक्य आलोक्येत्यत्र च। दारिद्र्यमत एवान्यानि पदानि नोपस्थितानि इति।

अथ भावध्वनिनिरूपणम्।

तत्र भावलक्षणविचारः।

व्यभिचारिपदेन 'सञ्चारिपदेन वा व्यवह्रियमाणस्य भावस्य लक्षणमिति ध्येयम्। साधारणं भावत्वं विभावेऽनुभावे च भावे सङ्क्रान्तमिति तद्भिन्नत्वेन लक्षणमारभते **विभावा •** रसव्यञ्जकत्वमिति विशेष्यानुक्तौ घटपटादावतिप्रसज्येत।

चेत् । रसकाव्यवाक्येऽतिव्याप्त्यापत्तेः । अर्थद्वारा शब्दस्यापि व्यञ्जकत्वात् । द्वारान्तरनिरपेक्षत्वेन व्यञ्जकत्वे विशेषिते त्वसंभवः प्रसज्येत। भावस्यापि भावनाद्वारैव व्यञ्जकत्वात् । भावनायामतिव्याप्त्यापत्तेश्च । अत एव च विभावानुभावभिन्नत्वस्येव शब्दभिन्नत्वस्यापि तद्विशेषणत्वे न निस्तारः । प्रधानध्वन्यमानभावे रसव्यञ्जकताभावादव्याप्त्यापत्तेश्च । न च तत्रापि प्रान्ते रसोऽभिव्यज्यत एवेति वाच्यम् । भावध्वनिविलोपप्रसङ्गात् । भावचमत्कारप्रकर्षाद्धि भावध्वनित्वम् । रसस्तु तत्र व्यज्यमानोऽप्यचमत्कारित्वान्न ध्वनिव्यपदेशहेतुरित्यपि न शक्यं वदितुम् । चमत्काररहितरसव्यक्तौ मानाभावात् । रसे हि धर्मिग्राहकमानेनानन्दांशाविनाभावस्य प्रागेवावेदनात् ।

व्यञ्जकत्वात् ● रसव्यञ्जकत्वादित्यर्थः। शब्दस्य विभावानुभावभिन्नत्वाच्चेत्यपि बोध्यम्। ननु शब्देऽतिव्याप्तिवारणाय साक्षाद् रसव्यञ्जकत्वं निवेशनीयं शब्दस्तु अर्थोपस्थितिद्वारा तथेति न दोष इत्याशङ्क्य समाधत्ते **द्वारान्तर** ● अस्य साक्षादर्थः। असम्भवमेवोपपादयति **भावस्यापि** ● न स्वरूपतो भावो रसव्यञ्जकोऽपि तु भावस्य भावना। तथा च लब्धो भावो भावनां द्वारीकृत्यैव रसव्यञ्जको न तु साक्षात्। कुत्राऽपि भावेऽसमन्वयाच्चासम्भवः। भावना च पुनः पुनश्चानुसन्धानम् । **अतिव्याप्तेश्च** ● भावभावनायाः साक्षाद्रसव्यञ्जकत्वात् । **अत एव** ● भावभावनायामतिव्याप्तेरेव । ननु विभावानुभावभिन्नत्वे सति शब्दभिन्नत्वे सति भावनाविषयत्वेन रसव्यञ्जकत्वमित्येव लक्षणमस्तु भावनाविषयभावनाया अनवस्थाभियाऽनङ्गीकारेण भावनायामतिव्याप्तेर्दूरापास्तत्वादित्यस्वरसादाह **प्रधानध्वन्यमान** ● प्रधानो रसस्यागुणीभूतोऽत एव ध्वनिविषयो यो लक्ष्यीभूतो व्यभिचारी भावस्तस्मिन्नव्याप्तिः । तस्य रसव्यञ्जकत्वे प्राधान्यं ध्वन्यमानत्वञ्च न सम्भवतीति भावः। रसाभिव्यक्तिं विना भावत्वमेव न सम्भवतीत्यभिप्रेत आशङ्कते **न च तत्रापि** ● प्रान्ते भावाभिव्यक्तेरनन्तरम् । भावरसाभिव्यक्त्योर्नाविनाभाव इत्यभिप्रायेण अविनाभावाङ्गीकारे दूषणमाह **भावध्वनि** ● रसव्यञ्जकत्वे रसाङ्गत्वापत्त्या सर्वथाप्राधान्यप्रयुक्तं ध्वनित्वं न स्यादिति भावः । **भावचमत्कार** ● इतो वदितुं यावच्छङ्काग्रन्थः। अयं भावः—भावरसाभिव्यक्त्योरविनाभाव एव, भावध्वनिस्तु न रसानङ्गत्वमपेक्षतेऽपि तु रसचमत्कारापेक्षयोत्कृष्टं भावचमत्कारमिति । अपकृष्टश्चमत्कारो रसश्चेति विप्रतिषिद्धमित्यभिप्रायेण समाधत्ते **चमत्कार** ● चमत्कारश्च आनन्दविशेषः, आनन्दांशं विना रसत्वमेव न सम्भवतीत्याह **धर्मिग्राहक** ● धर्मिणो रसस्य ग्राहकं मानं सहृदयहृदयं

अस्तु वा प्राधान्येन ध्वन्यमानस्यापि भावस्य प्रान्ते रसाभिव्यञ्जकत्वम्। तथापि देशकालवयोऽवस्थादिनानापदार्थघटिते पद्यवाक्यार्थे तथाप्यतिव्याप्तिः। तस्य विभावानुभावभिन्नत्वे सति रसाभिव्यञ्जकत्वात्। नापि रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्तित्वं तत्त्वम्। भावादिचर्वणाया-मतिप्रसङ्गवारणाय चर्वणाविषयतेति चित्तवृत्तिविशेषणमिति वाच्यम्।

'कालागुरुद्रवं सा हालाहलवद्विजानती नितराम्।
अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुते ॥'

इत्यत्र हालाहलसदृशत्वप्रकारकज्ञाने अतिव्याप्तेः। तस्य विप्रलम्भानुभावत्वेन रसाभिव्यञ्जकचर्वणाविषयत्वात्, चित्तवृत्तित्वाच्च। नाप्यखण्डम् तत्त्वे मानाभावात्! अत्रोच्यते—

तन्निष्ठा चर्वणा भावना वा, तेनैवानन्दविषयकत्वस्यापि सिद्धिः। रसस्य चर्वणा आनन्दविषयिण्येव। तुष्यतु दुर्जन इति न्यायेनाभ्युपेत्याह **अस्तु वा** ● अत्र मर्मप्रकाश इत्थमस्व-रसमुद्भावयति-रसं प्रति गुणीभूतत्वेऽपि वाच्यातिशायित्वाद्ध्वनित्वम्, राजानुगम्यमान-विवहनप्रवृत्तभृत्यस्येव रसापेक्षयाऽपि हि अस्य प्राधान्यमस्ति। अत एव न भावध्वनि-विलोप इति। ग्रन्थकृतस्तु प्राधान्याभावे नोत्कृष्ट आनन्दांश इत्यभिप्रेतं प्रतिभाति। **तथापि** ● ध्वन्यमानभावेऽव्याप्त्यभावेऽपि। देशकालादी रहस्य, निशा-नवयौवनादीनां वाक्यार्थ उपादानं वाक्यार्थस्य रसाभिव्यञ्जकत्वव्यञ्जनार्थम्। **तथाप्य** ● विभावानुभाव-भिन्नत्वे सति शब्दभिन्नत्वे सति रसव्यञ्जकत्वमित्युक्तावपि। **भिन्नत्वे सति** ● शब्द-भिन्नत्वे सति इत्यस्याप्युपलक्षणम्, पद्यवाक्यार्थस्य शब्दभिन्नत्वात्। **नापि** ● वाच्य-मित्यनेनान्वयः। तावान् शङ्काग्रन्थः। चर्वणा आस्वादः। लक्ष्यत्वेन समीहिताः सर्वे भावाश्चित्तवृत्तिस्वरूपाः। शब्दार्थयोश्चित्तवृत्तित्वाभावाद्व्यावृत्तिः। **चर्वणाविषयतेति**● चर्वणाविषयचर्वणाया अनवस्थाभियाऽनङ्गीकारेण चर्वणायां न चर्वणाविषयता, चित्त-वृत्तित्वन्तु वर्तत एव।

विप्रलब्धाया वर्णनमिदं **कालागुरु** ● सा वियोगिनी शीतलं सौन्दर्यसाधनमपि शरीरलेपनं कालागुरुद्रवं विरहोद्दीपकत्वाद् हालाहलविषसदृशं विजानती सती बाला कमल-मालामपि सर्पमालां मनुते किल। **विप्रलम्भानुभाव** ● विप्रलम्भस्य तादृशं ज्ञानं कार्यमित्यनुभावः। विप्रलम्भशृङ्गारास्वाददशायां तादृशं ज्ञानमप्यास्वाद्यत इति चर्वणा-विषयत्वम्। ज्ञानमात्रस्यैव विषयाकारचित्तपरिणामरूपत्वाच्चित्तवृत्तित्वमक्षतम्। **तत्त्वे**●

विभावादिव्यज्यमानहर्षाद्यन्यतमत्वं तत्त्वम् ॥

यदाहुः—'व्यभिचार्यञ्जितो भावः' इति । हर्षादीनां च सामाजिकगतानामेव स्थायिभावन्यायेनाभिव्यक्तिः, सापि रसन्यायेनेति केचित् ।

व्यङ्ग्यान्तरन्यायेनेत्यपरे मन्यन्ते । विभावानुभावौ चात्र व्यञ्जकौ । न त्वेकस्मिन्व्यभिचारिणि ध्वन्यमाने व्यभिचार्यन्तरं व्यञ्जकतयाऽवश्यम-

---

भावत्वस्याखण्डोपाधित्वे । जातिसमशीलो धर्म उपाधिभूतोऽरवरार्डमित्युच्यते । जाति साधकयुक्तिभिरनुगतप्रतीतिकारणतावच्छेदकत्वादिभिरस्य सिद्धिः, परं जातिबाधकसाङ्कर्यादिप्रसङ्गाज्जातित्वं नाभ्युपेयते । अत्र हर्षादिषु भाव इत्याकारिकाऽनुगतप्रतीतिर्नास्ति, भावत्वे कारणतावच्छेदकत्वं कार्यतावच्छेदकत्वं वा नास्ति । कविसम्प्रदाय एव अस्य व्यवह्रियमाणतया अनादिसिद्धायाः शक्यताया अपि अवच्छेदकत्वं न सम्भवतीति माना-भावादित्युक्तम् । अत्र चितवृत्तित्वाच्चेतिप्रतीके मर्मप्रकाश इत्थमुपलभ्यते = अत्रैवानुभाव-भिन्नत्वे सति इति विशेषणदाने को दोष इति चिन्त्यमिति । तत्रेत्थं मम प्रतिभाति अत्रैव ग्रन्थे मूलेऽग्रे भावसंख्यानियमोपसंहारे एषु च सञ्चारिभावेषु मध्ये केचन केषाञ्चन विभावा अनुभावाश्च इत्यादि तथा चानुभावभिन्नत्वे सतीति विशेषणेऽव्याप्तिः स्फुटैव । **विभावादि** • हर्षादीनामन्यतमाभावाः । परं लौकिका हर्षादयोऽपि न भवेयुरेतदर्थं विभावैरनुभावैश्च व्यज्यमानत्वं विशेषणमित्युक्तम् । विभावादिव्यज्यमानत्वं रसेऽप्यति-प्रसक्तमतो विशेष्यदलम् । **व्यभिचार्य** • अञ्चितोऽभिव्यक्तो भाव व्यभिचारीभाव इत्यर्थः । **स्थायिभाव** • यथा स्थायिभावाः प्रागेव सामाजिकानां हृदि सूक्ष्मरूपेण विद्यमाना विभावादिव्यञ्जकसामग्रीसमवधाने अङ्कुरिताः क्रमशः स्फुटतां यान्ति यथा हर्षादयोऽपि संस्कारात्मना सामाजिकानां हृदि वर्तमाना लौकिकप्राया अलौकिकव्यञ्जक-विभावादिसमवधानेऽलौकिकाः सन्तो भावाः भवन्ति । तत्राऽपि मतद्वयम् । तत्र प्रथमं मतमाह **सापि** • रसन्यायो यथाऽनुपदमुपपादितः । यथा रत्यादय एव स्थायिभावा-श्चित्तसम्पर्केण रसतां यान्ति न नूतनो रसः । तथा सामाजिकहृदि स्थिता लौकिका एव हर्षादयो विभावादिव्यञ्जकसम्पर्कें भावहर्षादितया परिणमन्ति । द्वितीयमतमाह **व्यङ्ग्या-न्तर** • एकं व्यङ्ग्यं यथा व्यङ्ग्यान्तरं व्यञ्जयति तथा वर्तमाना लौकिकहर्षादयो विभावादिव्यञ्जकसमवधाने नूतनं हर्षादिभावमभिव्यञ्जन्ति । अत्र मर्मप्रकाश इत्थं टीकते । रसापेक्षया भिन्नं यद्व्यङ्ग्यवस्त्वलङ्कारादि तद्रीत्या ।

तथा च रसापेक्षयाऽपकर्षः सूचित इति । **अवश्यम्** • अवश्यं तु नापेक्षतंपर

पेक्ष्यते। तस्यैव प्राधान्यापत्तेः। वस्तुतस्तु प्रकरणादिवशात्प्राधान्यमनुभवति कस्मिंश्चिद्भावे तदीयसामग्रीव्यङ्ग्यत्वेन नान्तरीयकतया तन्निमानमावहतो व्यभिचार्यन्तरस्याङ्गत्वेऽपि न क्षतिः। यथा गर्वादावमर्षस्य, अमर्षादौ वा गर्वस्य। न चैवं सति गुणीभूतव्यङ्ग्यत्वापत्तिः। पृथग्विभावानुभावाभिव्यक्तस्य, अत एवाऽनान्तरीयकस्य भावस्य,

---

क्वचित्सम्भवन्तं न निवारयति। **तस्यैव** ॰ व्यभिचार्यन्तरस्यैव। अवश्यमपेक्षणीयता प्राधान्यप्रयोजिका। अपेक्षमाणस्तु परमुखापेक्षितया व्यज्यमानोऽपि गुणतां भजेत्। प्राधान्याप्राधान्ये प्रकरणादिना निर्णेष्यत इत्यभिप्रायेणाह **वस्तुतस्तु** ॰ भवतीति सप्तम्यन्तं भावे इत्यस्य विशेषणम्। तदीयसामग्रीप्रधानीभूतभावव्यञ्जकसामग्री। तन्निमानम्, प्रधानाङ्गत्वेन प्रधानचमत्कारापेक्षया अपकृष्टचमत्कारतया कृशत्वम्। नान्तरीयकतया यथा गर्वमन्तरा आमर्षो न संभवति एवमेवामर्षमन्तरा गर्वः। प्रकरणादिवशाच्चान्यतरस्य प्राधान्यम्। प्रधानव्यञ्जकसामग्र्या प्रधाने व्यज्यमानेऽन्योऽपि योऽप्रधानो व्यज्यते स नान्तरीयकः। **न चैवं** ॰ व्यङ्ग्यस्य गुणीभूतत्वे। अत्रेदं चिन्तनीयं सुधीभिः-अङ्गस्य नान्तरीयकस्य भावस्य गुणीभूतत्वेऽपि प्रधानस्य ध्वनने का क्षतिः? अङ्गस्य गुणीभूतत्वं प्रधानस्य ध्वननं प्रतिबध्नातीत्यङ्गीकरणे प्रायो बहूनां ध्वनीनां विलोप इत्यादि। **पृथग्विभाव** ॰ भिन्नाभ्यां विभावानुभावाभ्यां तद्घटितसामग्र्येतियावदभिव्यक्तस्य। नान्तरीयकस्य तु विभावानुभावावपि संकीर्णौ प्रधानसामग्र्यैवाभिव्यक्तिः। **अत एव** ॰ विभिन्नसामग्र्यभिव्यक्तत्वादेव, अनान्तरीयकत्वे हेतुः।

निर्णयसागरीये दुर्गाप्रसादसंशोधिते 'नान्तरीयकस्य' इति अकाररहितः प्रायोऽशुद्धः पाठः। सरलासम्मतस्तु पृथग्विभावानुभावाभिव्यक्तस्यैव भावस्य गुणीभूतव्यङ्ग्यव्यपदेशहेतुत्वात्। अत एव नान्तरीयकस्य भावस्य ध्वननं भवति। अन्यथा गर्वादिध्वनेरुच्छेद एव भवेत्। इति पाठः। काशीमुद्रितस्तु 'पृथग्विभावानुभावाभिव्यक्तस्य अत एवानान्तरीयकस्य भावस्य भावान्तरगुणीभूतव्यङ्ग्यव्यपदेशहेतुत्वात्' इति पाठः। अध्यायकैः परीक्षणीय इति न वितायते।

पूर्वोक्तचिन्तनीयतायां पाठभेदे च काशीस्थाः कवितार्किकचक्रवर्तिनः पं॰ श्री महादेवपाण्डेयशास्त्रिणो वदन्ति—चित्रं महानेष नवावतार इत्यादौ, अयं स रसनोत्कर्षीत्यादौ च आन्तरालिकव्यंङ्ग्यमादायापि ध्वनिगुणीभूतव्यङ्ग्ययोर्व्यवहारस्य मम्मटादिभिः प्रायेण कृतत्वात् पूर्वपक्षः। पाठ्यमपि समानाऽभिप्रायमेवेति नवीनतमपाठोऽपि समीचीन एव। गुणीभूतव्यङ्ग्यस्याऽपि स्वव्यवहारसम्पादनी चमत्कारकलाऽपेक्ष्यते। ततस्तन्निमान-

भावान्तरगुणीभूतस्यैव गुणीभूतव्यङ्ग्यव्यपदेशहेतुत्वात् अन्यथा गर्वादिध्वनेरुच्छेद एव भवेत्। विभावस्त्वत्र व्यभिचारिणो निमित्तकारण-

---

मावहतो नान्तरीयकस्य तदभावान्न तथा व्यवहारः। अन्यस्य तु वैलक्षण्यमिति। ध्वननमित्यस्य व्यञ्जनमित्यर्थो न पारिभाषिकमिति। अत्र नवीनतमपाठपदेन सरलासम्मतः पाठः, तत्रैव च ध्वननमिति पदमपि वर्तते।

अस्येदमभिप्रेतं प्रतिभाति। तथाहि एकस्यापि काव्यस्य स्वस्वयोग्यमर्थमादाय ध्वनिकाव्यत्वेन गुणीभूतव्यङ्ग्यकाव्यत्वेन च व्यवहार इष्यते, अत्र भावध्वनौ तु न तथा, अत एव मूले प्रश्नः न चैवमित्यादिना। इति। तदनुसारि उत्तराभिप्राय उह्यताम्। अत्रापि ग्रन्यत्रेवार्थभेदेन ध्वनित्वं गुणीभूतव्यङ्ग्यत्वञ्च काव्यस्य कथन्नेष्यत इति जिज्ञासायां ग्रन्थकृदभिप्रेतः कश्चिदालङ्कारिकसम्प्रदाय एव शरणं कल्प्यताम्। इदन्त्वत्र पक्षे चिन्त्यताम् प्रागुक्तप्रहरविरतावित्यादिपद्यस्थमूलमिवान्यमपि मूलग्रन्थमनुरुध्य प्रधानीभूतस्य चमत्कारिणो वाच्यादिसिद्ध्यङ्गतामप्राप्तस्य कस्यापि अर्थस्य सम्भवे काव्यस्य ध्वनित्वमेव न तु आन्तरालिकस्य गुणीभूतार्थस्यानुरोधेन गुणीभूतव्यङ्ग्यत्वमिति मूलस्याभिप्रेतं प्रतिभाति, तथा च शङ्कायास्तथाभिप्रायवर्णनं ग्रन्थान्तरानुरोधेनैवेति। तथाभिप्रायवर्णने सरलयाङ्गीकृतः पाठोऽपि समन्वयं न भजते। तथाहि ध्वननमित्यस्य व्यञ्जनमित्यर्थो न समीचीनतां भजते व्यङ्ग्यतायाः पूर्वोत्तरपद्ययोरुभयत्राङ्गीकाराद्धेतुत्वानुपपत्तेः, अव्यङ्ग्यत्वस्यानापादनाच्च। गर्वादिध्वनेरुच्छेद इत्यापत्तिरपि न संघटते, अर्थभेदेन गुणीभूतत्वादिव्यवहारस्य ध्वनित्वविरोधित्वाभावात्। गुणीभूतव्यवहारयोग्यस्य कस्यचिदर्थस्य सम्भवे नार्थान्तरमादायापि ध्वनित्वं काव्यस्येति ग्रन्थकृदसम्मतमपि स्वीक्रियते तदाऽपि ध्वननमित्यस्य पारिभाषिकमेवार्थो युज्यते न व्यञ्जनमात्रम्। भाषानुवादकर्ता पुरुषोत्तमचतुर्वेदमहोदयस्तु ब्रूते यत्सरलाऽङ्गीकृतः पाठो न साम्प्रदायिकोऽपि तु स्वयं कल्पित इति त्वन्यत्। इत्थन्तु मम स्फुरणमालोच्यतां विद्वद्भिः—न क्षतिरित्यन्तेन प्रधानीभूतस्य अप्रधानापेक्षित्वेऽपि ध्वनित्वमङ्गीकृतम्, तत्कथं संगच्छेत, तस्य द्वितीयकाव्यभेदयोग्यत्वात्, ततः पूर्वपक्षः न चैवमित्यादिना। उत्तरन्तु अनान्तरीयकस्थले प्रधानीभूतभावस्य भावान्तरापेक्षत्वे गुणीभूतव्यङ्ग्यत्वं नान्तरीयकस्थले तु तथाऽपेक्षायामपि ध्वनित्वमेवेति। एवं कल्पनायां बीजन्तु गर्वादिध्वनेरुच्छेद एव। ध्वननमित्यस्य पारिभाषिकमेवार्थः। इत्थञ्च कल्पितोऽपि भवेत्परं सरलासम्मतः पाठः स्फुटत्वाय सम्यगेवेतिदिक्। अन्यथा ● नान्तरीयकं गुणीभूतांशमप्यादाय गुणीभूतत्वे।

ननु विभाव आलम्बनोद्दीपने, सञ्चारिभावस्य यद्यप्युद्दीपकं किमपि संभवति परमालम्बनं कथं भवेत् आलम्बनस्य विषयरूपतया सविषयकपदार्थेष्वेव सम्भवाद् भावानाञ्चातथात्वादित्याशङ्क्याह **विभावस्तु** ● यथाकथमपि कारणतां भजेत् न तु

सामान्यम्। न तु रसस्येव सर्वथैवालम्बनोद्दीपने अपेक्षिते। यदि तु क्वचित्संभवतस्तदा न वार्येते। हर्षादयस्तु—हर्षस्मृतिव्रीडामोहधृति-शङ्काग्लानिदैन्यचिन्तामदश्रमगर्वनिद्रामतिव्याधित्रासमुप्तविबोधामर्षाव - हित्थोग्रतोन्मादमरणवितर्कविषादौत्सुक्यावेगजडतालस्यासूयापस्मारचप - लताः। प्रतिपक्षकृतधिक्कारादिजन्मा निर्वेदश्चेति त्रयस्त्रिंशद्व्यभि-चारिणः। गुरुदेवनृपपुत्रादिविषया रतिश्चेति चतुस्त्रिंशत्। एतेन वात्सल्याख्यं पुत्राद्यालम्बनं रसान्तरमिति परास्तम्। उच्छृङ्खलताया मुनिवचनपराहतत्वात्।

तत्र

इष्टप्राप्त्यादि जन्मा सुखविशेषो हर्षः॥

तदुक्तम्—

'देवभर्तृगुरुस्वामिप्रसादः प्रियसंगमः।
मनोरथाप्तिरप्राप्यमनोहरधनागमः।
तथोत्पत्तिश्च पुत्रादेर्विभावो यत्र जायते।
नेत्रवक्त्रप्रसादश्च प्रियोक्तिः पुलकोद्गमः॥
अश्रुस्वेदादयश्चानुभावा हर्षं तमादिशेत्॥' इति।

विषयतयैव क्वचित् ० सविषयकशङ्काचिन्तादिभावस्थले एतेन ० वात्सल्यादेर्भावत्वेन परिगणनादेव वैपरीत्ये विनिगमकमाह उच्छृङ्खलतायाः ०।

अथ हर्षध्वनिनिरूपणम्

तत्र ० हर्षादीनां मध्ये प्रथमं हर्षस्य निरूपणमुपक्रमते। यद्यपि प्रकाशादिषु निर्वेदादिनोपक्रमो विहितस्तथापि माङ्गलिकतया हर्षनिरूपणं रोचते पण्डितराजाय। इष्टप्रा ० इष्टस्य प्राप्त्या अनिष्टस्य निवृत्त्यादिना वा जन्म यस्यैवंभूतः सुखविशेषः। सामान्यभावशरीरप्रविष्टं विभावादिव्यज्यमानत्वमनुवर्तते एव। सम्वादं प्रदर्शयति देवभर्तृ ० देवादीनां प्रसादः, प्रियस्य संगमः, मनोरथस्य विषयसिद्धिः, दुर्लभस्य सुन्दरस्य धनस्यागमः, पुत्रादेरुत्पत्तिः, यत्र विभावो जायते, नेत्रमुखप्रसन्नता, प्रियवचनं रोमाञ्चः, अश्रुस्वेदादयश्च यत्रानुभावा जायन्ते तं हर्षं भावमादिशेत्।

उदाहरणम्—

'अवधौ दिवसावसानकाले भवनद्वारि विलोचने दधाना ।
अवलोक्य समागतं तदा मामथ रामा विकसन्मुखी बभूव ॥'

अत्रावधिकाले प्रियागमनं विभावः । मुखविकासोऽनुभावः ।

संस्कारजन्यं ज्ञानं स्मृतिः ॥

यथा--

'तन्मञ्जु मन्दहसितं श्वसितानि तानि
सा वै कलङ्कविधुरा मधुराननश्रीः ।
अद्यापि मे हृदयमुन्मदयन्ति हन्त
सायंतनाम्बुजसहोदरलोचनायाः ॥'

चिन्ताविशेषोऽत्र विभावः । भ्रून्नतिगात्रनिश्चलत्वादय आक्षेपगम्या अनुभावाः । यद्यप्यत्रास्या एव स्मृतेः संचारिण्या नायिकारूपस्य विभावस्य हन्तपदगम्यस्य हृदयवैकल्यरूपानुभावस्य संयोगाद्विप्रलम्भ-

---

अवधौ • नायकः स्वीयां नायिकां वर्णयति । सायंकाले आयास्यामीति प्रतिज्ञाय गतः । अत एव दिवसावसानकालोऽवधिः । विलोचने द्विवचनान्तम् । तदा अवधिसमये, मुखविकासेन हर्षो गम्यते । संस्कार • भावनात्मना संस्कारेण जन्यं ज्ञानमित्यर्थः। ज्ञानमात्रोक्तौ सर्वस्मिन् ज्ञानेऽतिव्याप्तिः । संस्कारजन्यत्वमात्रोक्तौ संस्कारध्वंसेऽतिव्याप्तिः । यद्यपि प्रत्यभिज्ञाया ज्ञानान्तरत्वमते तस्याः संस्कारजन्यत्वादतिव्याप्तिस्तथापि संस्कारमात्रजन्यत्वे तात्पर्यमूहनीयम् । तन्मञ्जु • सायंतनस्य सायंकालिकस्य संकोचशालिनोऽम्बुजस्य सदृशे लोचने यस्यास्तस्याः, तत्पदानि प्रागनुभूतत्वं द्योतयन्ति । विधुरा रहिता श्रीः शोभा, अत्र चेति शेषो बोध्यः ।

चिन्ताविशेषः • नायिकाविषयकः भ्रुव उन्नतिर्भ्रून्नतिः । वाचकशब्दाभावादाक्षेपगम्या इति । नन्वत्र विप्रलम्भो रस एव ध्वन्यते यस्येयं स्मृतिः सञ्चारीभावः, नायिका विभावः, हन्तपदव्यङ्ग्यं हृदयवैकल्यादिकमनुभाव इत्याशङ्कते यद्यपीत्यादिना वक्तुमित्यन्तेन ।

रसाभिव्यक्ते रसध्वनित्वं शक्यते वक्तुम्। तथापि स्मृतेरेवात्र पुरः-स्फूर्तिकत्वाच्चमत्कारित्वाच्च तद्ध्वनित्वमुक्तम्। तदादेर्बुद्धिस्थ-प्रकारावच्छिन्ने शक्तिरिति नये बुद्धेः शक्यतावच्छेदकानुगमकतया न वाच्यतासंस्पर्शः। बुद्धिस्थत्वं शक्यतावच्छेदकमिति नयेऽपि स्मृतित्वेन स्मृतेर्व्यक्तिवेद्यतैव। तस्याश्चात्र वाक्यवेद्यत्वेऽपि पदस्यैव कुर्वद्रूपत्वात्पद-

---

समाधानमाह तथापि • स्मृतिः पुरस्तात्स्फुरति अतस्तस्या एव ध्वनित्वं युक्त-मित्यर्थः। ननु स्फुरतु सा प्रथमं परं सञ्चारितयैव न प्राधान्येनेत्यशङ्कामाह चमत्का-रित्वाच्च • यथा स्मृतिश्चत्कारिणी न तथा विप्रलम्भः, तस्माद् राजानुगम्यमान-विवहनप्रवृतभृत्यस्येव रसाङ्गभूताया अपि स्मृतेः प्राधान्याद् ध्वनित्वम्। ननु स्मृति-र्बुद्धिविशेषः, बुद्धिश्च तच्छब्दस्य शक्यकोटौ निविष्टा, तथा च बुद्धित्वेन वाच्यप्रायायाः स्मृतेः कथं ध्वनित्वमित्याशङ्कां द्विधोपपाद्य समाधत्ते तदादे • बुद्धिस्थो बुद्धिविषयः प्रकारो घटपटत्वादिस्तदवच्छिन्ने घटपटादौ तदादिपदस्य शक्तिः। तत्र शक्यो घटपटादिः शक्यतावच्छेदको घटत्वपटत्वादिः, न तु बुद्धिस्थत्वं शक्यं शक्यतावच्छेदकम्वा, किन्तु शक्यतावच्छेदकानामनुगमकम्। अन्यथा घटपटत्वादिशक्यतावच्छेदकभेदेन शक्तेर्भेदात् नानाशक्तिकतया तदादिपदानां नानार्थकता आपद्येत। बुद्धिस्थत्वेन शक्यतावच्छेदका-नामनुगमे तु शक्तेरैक्यान्नानार्थकत्वं नायाति। तथा च बुद्धिस्थत्वे शक्तिविषयताया अभावान्न बुद्धेः स्मृतेर्वा केनापि रूपेण वाच्यतास्पर्शः शक्यशक्यतावच्छेदकतत्सम्बन्धानां सर्वत्रैव वाच्यता। क्वचिच्च शक्यतावच्छेदकविशेषणतया उपस्थितौ शाब्दबोधे च भासमानस्यापि वाच्यत्वमायाति परमत्र बुद्धिस्थत्वं शाब्दबोधे उपस्थितौ वा न भासत इति न तस्य कथमपि वाच्यतास्पर्शः। शक्यतावच्छेदकमेव बुद्धिस्थत्वमतो वाच्यताऽ-वश्यमायातीति द्वितीयं मतम्। तथापि बुद्धित्वेनैव स्मृतेर्वाच्यता न तु स्मृतित्वेन स्मृतित्वेन तु व्यञ्जनावेद्यतैवेत्याह बुद्धिस्थत्वम् • परमिदं मतं सर्वथाऽसङ्गतमेव। यतः सर्वत्रैवोपस्थितौ शक्यतावच्छेदकं भासते बुद्धिस्थत्वन्तु न कुत्रापि घटापदादिजन्योप-स्थिताविति।

अत्र मर्मप्रकाशः—व्यङ्ग्यस्य कथमपि वाच्यवृत्यनालिङ्गितस्य चमत्कारित्व-मिति आलङ्कारिकसमय इति शयिता सविध इति पद्यविषयकपूर्वग्रन्थविरोधाच्चिन्त्य-मिदम्। व्यङ्ग्यतावच्छेदकतया भासमानजात्यादिरूपेण यत्र वाच्यता तत्रैवाचमत्कारिता। पूर्वोदाहरणे हि मनोरथत्वेच्छात्वयोर्घटत्वकलशत्ववदेकतया तेनैव रूपेण वाच्यताऽ-स्तीति न दोषः। तस्याश्च • स्मृतेश्च। पदस्यैव • तत् तानि सा पदानां स्मृतिव्यञ्जने

ङ्ग्निविषयत्वम् । एतेन भावानां पदव्यङ्ग्यत्वे न वैचित्र्यमिति परास्तम् । सायंतनाम्बुजोपमानेन नयनयोरुत्तरोत्तराधिकनिमीलनोन्मुखत्वध्वननद्वारा तस्या आनन्दमग्नताप्रकाशः ।

'दरानमत्कंधरबन्धमीषन्निमीलितस्निग्धविलोचनाब्जम् ।
अनल्पनिःश्वासभरालसाङ्गं स्मरामि सङ्गं चिरमङ्गनायाः ॥'

इत्यत्र स्मृतिर्न भावः । स्वशब्देन निवेदनादव्यङ्ग्यत्वात् । नापि स्मरणालंकारः । सादृश्यामूलकत्वात् । सादृश्यमूलकस्यैव स्मरणस्यालंकारत्वम्, अन्यस्य तु व्यञ्जितस्य भावत्वमिति सिद्धान्तात् । किं तु विभाव एव सुन्दरत्वात्कथंचिद्रसपर्यवसायी ।

स्त्रीणां पुरुषमुखावलोकनादेः पुंसां च प्रतिज्ञाभङ्गपराभवादेरुत्पन्नो वैवर्ण्याधोमुखत्वादिकारणीभूतश्चित्तवृत्तिविशेषो व्रीडा ॥

यथा—

'कुचकलशयुगान्तर्मामकीनं नखाङ्क
सपुलकतनु मन्दं मन्दमालोकमाना ।
विनिहितवदनं मां वीक्ष्य बाला गवाक्षे
चकितनतनताङ्गी सद्म सद्यो विवेश ॥'

उद्भूतशक्तिमत्वात् । एतेन ● अत्र पदव्यङ्ग्यस्यापि चमत्कारित्वेन । तस्या आनन्द ● नायिकाया आनन्दमग्नता ध्वन्यते । आनन्दातिशयेनापि नयनयोर्निमीलनं जायते सायन्तनाम्बुजस्यापि ।

शिष्यव्युत्पत्तये प्रत्युदाहरणमप्याह दरानमत्कन्धर ● अस्य व्याख्यानं स्मरणालङ्कारप्रकरणे द्रष्टव्यम् स्वशब्देन ● स्मरामिशब्देन । सादृश्यामूल ● अत्र च स्मरणस्य नायिकविषयकभावनाजन्यत्वात् । अन्यस्य ● नायिकारूपमालम्बनमेव क्रमशो विप्रलम्भव्यञ्जकतया पर्यवस्यति अन्यभावव्यञ्जकसामग्र्यभावात्कथञ्चिदिति । कुचकलश ● कश्चित्स्वीयां नायिकां मित्रं प्रति वर्णयति । सपुलकतनुरोमाञ्चसहितमित्यालोकनक्रियाविशेषणम् । रोमाञ्चो हर्षेण हर्षश्च नखक्षतावलोकनस्मृतप्रियविलासस्मरणात् । आलोकने मन्दतापि आनन्दानुभवेन । गवाक्षे निहितवदनं मामित्यन्वयः । वीक्षणविभावेन

अत्र प्रियस्य दर्शनं तेन नायिकाकर्तृकतत्कुचान्तर्वर्तिप्रियनखक्षतावलोकनजन्यहर्षवेदकतत्पुलकादेर्दर्शनं च विभावः। सद्यः सदनप्रवेशोऽनुभावः।

यथा वा—

'निरुद्ध्य यान्तीं तरसा कपोतीं कूजत्कपोतस्य पुरो ददाने।
मयि स्मितार्द्रं वदनारविन्दं सा मन्दमन्दं नमयांबभूव॥'

पूर्वत्र त्रास इवात्रापि हर्षो लेशतया सन्नपि व्रीडाया अनुगुण एव। प्रियकर्तृकं कपोतस्याग्रे कपोत्याः समर्पणं विभावः। वदननमनमनुभावः।

भयवियोगादिप्रयोज्या वस्तुतत्त्वानवधारिणी चित्तवृत्तिर्मोहः।

'अवस्थान्तरशबलिता सा तथा' इति तु नव्याः।

लज्जोदयानन्तरं लज्जावशाच्चकिता नता सङ्कुचितशरीरावयवा च सद्य विवेश। मामकीनं मया कृतं नखक्षतम्। तेन ० प्रियेण, दर्शनमित्यस्य कर्तृपदम्। मित्रं प्रति नायिकाया वर्णनम् निरुद्ध्य ० कपोतं विहाय कपोती शीघ्रमन्यत्र गन्तुं प्रवृत्ता कपोतश्च तद्विरहादकूजत्। तत्कष्टं कपोतस्य दृष्ट्वा कपोतीमवरुध्य कपोतस्याग्रे यदाऽदान्तदा सा मम प्रिया स्मितयुक्तं स्वमुखकमलं शनैः शनैर्नम्रं चकार। ददाने इति शानजन्तस्य मयीति कर्तृपदम्, यस्य च भावेन भावलक्षणमिति सप्तमी। यस्याः सति सप्तमीति नामान्तरम्। कपोतीदानमुखनमनयोः समानसमयत्वं द्योत्यते। उदाहरणयोर्विशेषं दर्शयति पूर्वत्र त्रास ० पूर्वत्र चकितशब्देन त्रासोऽत्र च स्मितशब्देन हर्षः। लेशता च व्रीडाया अनुभावस्य वर्णनात्तयोश्चानुभावस्यावर्णनात्। वस्तुतत्त्वानव ० मनसोऽलसतया असाधारणधर्मादिविशेषाणामस्पर्शात्स्थूलविषया चिरं स्थायिनी। अवस्थान्तर ० उन्मादपूर्वया चेतसः शैथिल्यसम्पादिन्या अवस्थया युक्ता चितवृत्तिर्मोह इत्यर्थः। अत्रोदाहरणे चक्षुसन्निकृष्टमपि प्रियं मनसः शैथिल्येन चक्षुषा सम्बन्धाभावान्न परिचिनोतीति प्रतीयते। अत्र प्रियसत्त्वेऽपि प्रियावभासो न भवति। उन्मादे तु प्रियभिन्नस्य प्रियत्वेन ग्रहणमुदाहृतम्। तत्र मनसः शैथिल्यात् प्रियभिन्नवृत्तिविशेषस्याग्रहणमस्ति तत्र स्फुटं भ्रमोऽत्र तु न। चिन्तया तु न। चिन्तया तु वस्तुतत्त्वं स्पृश्यते नातश्च मनसः शैथिल्यम्, अपि तु एकस्यैव विषयस्य पुनः पुनरनुसन्धानम्। अतश्चिन्ताविशेषो मोह इति कतिपयानां व्याख्यानं न मे रोचत

उदाहरणम्—

'विरहेण विकलहृदया विलपन्ती दयित दयितेति ।
आगतमपि तं सविधे परिचयहीनेव वीक्षते बाला ॥'

अत्र कान्तवियोगो विभावः । इन्द्रियवैकल्यं लज्जाद्यभाव-श्चानुभावः ।

यथा वा—

'शुण्डादण्डं कुण्डलीकृत्य कूले कल्लोलिन्याः किंचिदाकुञ्चिताक्षः ।
नैवाकर्षत्यम्बु नैवाम्बुजालिं कान्तापेतः कृत्यशून्यो गजेन्द्रः ॥'

लोभशोकभयादिजनितोपप्लवनिवारणकारणीभूतश्चित्तवृत्ति-विशेषो धृतिः ।

उदाहरणम्—

'संतापयामि हृदयं धावं धावं धरातले किमहम् ।
अस्ति मम शिरसि सततं नन्दकुमारः प्रभुः परमः ॥'

इति सुधियो विभावयन्तु । **विरहेण विकल** • वैकल्यावस्थोद्भवात् सन्निकृष्टमपि न परिचिनुयात् दयितसम्मुखे दयितदयितेति विलपनाद् लज्जाया अभावः ।

शुण्डादण्डम् • कान्तावियोगेन मुग्धोऽत एव चेतसः शैथिल्यात् कर्तव्याकर्तव्यविचारशून्यत्वेन कर्तव्यशून्यश्च गजेन्द्रो मोहादेवेषत्सकुचितनेत्रः शुण्डं घनुर्वन्मण्डलितं विधायापि नैव पातुं जलम् आगृह्णाति नापि कमलपङ्क्तिमपि आकर्षति । अत्र कान्तापेतता विभावः, कृत्यशून्यतादयोऽनुभावाः ।

लोभशोक • भयादिना जनितो य उपद्रवश्चेतश्चाञ्चल्यं तत्प्रयुक्तं शरीरादिचाञ्चल्यं वा तन्निवारिका विलक्षणा चित्तवृत्तिः ।

सन्तापयामि • धावमिति णमुलन्तं धावित्वेति तदर्थः । लोभवशाद् धावनेन चेतसः सन्तापः । तन्निवृत्तिः **'योगक्षेमौ वहाम्यहम्'** इत्यादिगीतादिश्रवणजन्यश्रीकृष्णोपरि निर्भरत्वज्ञानात् ।

अत्र विवेकश्रुतसंपत्त्यादिर्विभावः। चापलाद्युपशमोऽनुभावः। ननु चोत्तरार्धे चिन्ता नास्तीति वस्तुनोऽभिव्यक्तेः कथमस्य धृतिभावध्वनित्वमिति चेत्, तस्य धृत्युपयोगितयैवाभिव्यक्तेः।

किमनिष्टं मम भविष्यतीत्याकारश्चित्तवृत्तिविशेषः शङ्का ॥

उदाहरणम्—

'विधिवञ्चितया मया न यातं सखि संकेतनिकेतनं प्रियस्य।
अधुना बत किं विधातुकामो मयि कामो नृपतिः पुनर्न जाने ॥'

अत्र राजापराधो विभावः। मुखवैवर्ण्यादय आक्षेप्या अनुभावाः। इयं तु भयाद्युत्पादनेन कम्पादिकारिणी, न तु चिन्ता।

आधिव्याधिजन्यबलहानिप्रभवो वैवर्ण्यशिथिलाङ्गत्वदृग्भ्रमणादिहेतुर्दुःखविशेषो ग्लानिः ॥

यथा—

'शयिता शैवलशयने सुषमाशेषा नवेन्दुलेखेव।
प्रियमागतमपि सविधे सत्कुरुते मधुरवीक्षणैरेव ॥'

विवेक • विचारशास्त्रादिसम्पत्तिः। **तस्य** • चिन्ताया अभावस्य धृतिभावपोषकतयाऽपि चमत्कारित्वम्।

किमनिष्टं मे • अनेकानिष्टविषयकः संदेहः। **विधिवञ्चितया** • काचित्सखीं प्रति कामोद्वेगं वर्णयति। हे सखि न विवेकेन अपितु दैववशादेव मया प्रियस्य संकेतस्थानं न यातम्। ततः क्रुद्धः कामो नृपतिर्मयि किं विधातुं समीहत इति न जाने। 'तुं काममनसोः' इत्यादिवार्तिकेन मकारलोपः। आक्षेप्याः कारणं ज्ञात्वा कार्यरूपा अनुभावा अनुमेयाः। चिन्तया वैलक्षण्यं दर्शयति **इयन्तु** • इयमेव।

हानिप्रभवः • हानिरुत्पादिका यस्य।

शयिताशैवल • रोगादिवशादतिकृशशरीरावयवाशीतोपचारार्थं कठिनविस्तरस्पर्शस्यासहनाद्वा शैवालशैय्यायां शयिता शरीरावयवनामदृश्यत्वाद् द्वितीया चन्द्ररेखा इव शोभामात्रेणावशिष्टा सविधे समागतमपि प्रियं प्रत्युत्थानादिशक्तेरभावान्मधुरावलोक-

अत्र प्रियविरहो विभावः। मधुरवीक्षणैरेवेत्येवकारेण बोध्यमाना प्रत्युद्गमचरणनिपतनाश्लेषादीनां निवृत्तिरनुभावः। न चात्र श्रमः शङ्क्यः। कारणाभावात्। केचित्तु व्याध्यादिप्रभव-बलनाशं ग्लानिमाहुः। तेषां मते चित्तवृत्त्यात्मकेषु भावेषु नाश-रूपायाः ग्लानेः कथं समावेश इति ध्येयम्। यद्यपि 'बलस्यापचयो ग्लानिराधिव्याधिसमुद्भवः।' इति लक्षणवाक्यादपचयशब्देन नाश एव प्रतीयते, तथापि प्रागुक्तानुपपत्त्या बलनाशजन्यं दुःखमेव बलापचयशब्देन विवक्षितम्।

दुःखदारिद्र्यापराधादिजनितः स्वापकर्षभाषणादिहेतुश्चित्त-वृत्तिविशेषो दैन्यम्॥

उदाहरणम्—

'हतकेन मया वनान्तरे वनजाक्षी सहसा विवासिता।
अधुना मम कुत्र सा सती पतितस्येव परा सरस्वती॥'

सीतां परित्यक्तवतो भगवतः श्रीरामभद्रस्येयमुक्तिः। अत्र

नैरेव सत्कुरुते। रोगश्चात्र प्रियविरहजन्मा ग्रन्थकृतोऽभिप्रेतः। मुनिवचनविरोधमा-शङ्कमानः समाधत्ते यद्यपि ०। दुःखमेव ० दुःखस्य चित्तवृत्तिविशेषतया न सामान्य-भावत्वाप्रसक्तिः। यद्यपि भावलक्षणे ग्रन्थकाराभिमते न चित्तवृत्तेर्निवेशः परमन्येषां लक्षणे निवेशो वर्तत एव। अथवा चित्तवृत्तिभूतानां बहूनां मध्येऽस्यापि चित्तवृत्ति-विशेषत्वमेवोचितमित्याशयः।

अथ दैन्यनिरूपणम्

स्वापकर्ष ० अहमपकृष्टो नीचो हतक इत्यादिशब्दैर्वक्तुरपकर्षस्य स्वयमेव वर्णनस्य हेतुः।

हतकेन मया ० हत इव हतकस्तेन भाग्यरहितेनेति यावत्। मया रामचन्द्रेण वनमध्ये सा सीता कमलनयना सहसा अविचारितमेव निस्सारिता। अधुना पतितस्य श्रुतिरिव सा सती सीता मम कुत्र। स्वस्य पतितोपमानकतया वर्णनेन पतितवृत्त्यप-

सीतापरित्यागरूपोऽपराधस्तज्जन्यं दुःखं वा विभावः। पतितसाम्यरूपस्वापकर्षभाषणमनुभावः।

यदाहुः—

'चिन्तौत्सुक्यान्मनस्तापाद्दौर्गत्याच्च विभावतः।
अनुभावात्तु शिरसोऽप्यावृत्तेर्गात्रगौरवात्॥
देहोपस्करणत्यागाद्दैन्यं भावं विभावयेत्॥' इति।
'दौर्गत्यादेरनौजस्यं दैन्यं मलिनतादिकृत्।' इति च।

अत्र हतकेन मया विवासिता न तु विधिनेत्येतस्यार्थस्य पतितोपमयैव परिपोषः, न तु शूद्राद्युपमया। यतः शूद्रस्य जात्यैव श्रुतिदौर्लभ्यं विधिना कृतम्। पतितस्य तु ब्राह्मणादेर्विधिना श्रुतिसुलभत्वे स्वभावेन कृतेऽपि तेनैव तथाविधं पापमाचरता स्वतः श्रुतिर्दूरीकृतेति तस्य पतितेन साम्यम्। तस्याश्च श्रुत्येत्युपमालंकारो दैन्यमेवालंकुरुते। तथा मयेति सेति चोपादानलक्षणामूलध्वनिभ्यां

कर्षः स्वस्मिन् सिध्यति। तद्रीत्यैवाह **पतितसाम्य** •। **चिन्तौत्सुक्यात्** • समाहारद्वन्द्वादेकवचनम्। चिन्ताया अपि विभावत्वं नानुचितम्। चित्तौत्सुक्यादित्यपि पाठः चित्तस्यौत्सुक्यादिति तदर्थः।

देहस्योपस्करणं भूषणादिनाऽलङ्करणम्। ल्यब्लोपे पञ्चमी। इत्यादिकं विभावमनुभावञ्च विज्ञाय दैन्यं भावं विभावयेदित्यर्थः।

वचनान्तरमाह **दौर्गत्यादे** • दुर्गत्यादिविभावाज्जायमानमोजसोऽभावरूपं दैन्यं मलिनताद्यनुभावस्य कारणम्। सर्वं वाक्यं सावधारणमिति न्यायलभ्यं व्यञ्जनालभ्यं वा आह न तु **विधिना** •। **जात्यैव** शूद्रजातेः श्रुत्यनधिकृतत्वात्। मया च अपकृष्टत्वादेव। **तेनैव** • पतितेनैव आचरतेत्यन्वयानुरोधात्। तथाविधं पातित्यप्रयोजकम्। तस्य रामस्य। **तस्याश्च** •, तस्याः सीतायाः श्रुत्या साम्यमित्यन्वयः। अत्र पवित्रता निष्कारणपरित्यागकर्मत्वं वा साम्यप्रयोजकम्। **दैन्यमेव** • अलङ्कार एव न तु प्राधान्याद् ध्वनिव्यपदेशः। **चोपादानलक्षणा** • शक्यार्थान्वितान्यार्थबोधजनिका लक्षणा। तया चाहमत्यक्त इति मयापदस्य, वनवासे सहचरीत्यादिः सा पदस्य च

कृतघ्नत्वकृतज्ञात्वनिर्दयत्वदयाव्रतीत्वाद्यनेकधर्मप्रकाशनद्वारा तदेव परिपोष्यते। सेति स्मृत्या च लेशतः प्रतीयमानया।

इष्टाप्राप्त्यनिष्टप्राप्त्यादिजनिता ध्यानापरपर्याया वैवर्ण्यभूलेखनाधोमुखत्वादिहेतुश्चित्तवृत्तिविशेषश्चिन्ता ॥

यदाहुः—

'विभावा यत्र दारिद्र्यमैश्वर्यभ्रंशनं तथा।
इष्टार्थापहृतिः शश्वच्छ्वासोच्छ्वासावधो मुखम् ॥
संतापः स्मरणं चैव कार्श्यं देहानुपस्कृतिः।
अधृतिश्चानुभावाः स्युः सा चिन्ता परिकीर्तिता ॥
वितर्कोऽस्याः क्षणे पूर्वे पाश्चात्येवोपजायते ॥' इति।
'ध्यानं चिन्ता हितानाप्तेः संतापादिकरी मता।' इति च।

उदाहरणम्—

'अधरद्युतिरस्तपल्लवा मुखशोभा शशिकान्तिलङ्घिनी।
अकृतप्रतिमा तनुः कृता विधिना कस्य कृते मृगीदृशः ॥'

लक्ष्यः। व्यङ्ग्यन्तु क्रमशः कृतघ्नत्वादिः। प्रथमं श्रीरामनिष्ठं सीतानिष्ठं द्वितीयम्। **तदेव** • दैन्यं परिपोष्यत एव। **प्रतीयमानया** • परिपोष्यत इत्यर्थः। लेशता चानुभावाद्यस्फूर्तेः।

ततश्च प्राधान्याभावात् न स्मृतेर्ध्वनित्वम्। **इष्टाप्राप्त्य** • इष्टस्याप्राप्तिरनिष्टस्य प्राप्त्यादयो विभावाः, वैवर्ण्यं भूमिलेखनं नीचैर्मुखत्वादयोऽनुभावाश्चिन्ताया इत्यर्थः। तथैव प्राचीनसम्मतिं प्रदर्शयति **विभावा यत्र** • अपहृत्यन्ता विभावाः, अधृत्यन्ता अनुभावाः। अस्याश्चिन्तायाः पूर्वस्मिन् पश्चाद्भवे वा क्षणे वितर्को जायत इति पञ्चमांशस्यार्थः। वितर्कश्च संदेहाद्यनन्तरमित्यादिना वक्ष्यमाणलक्षणः। सम्वादान्तरं दर्शयति **ध्यानं चिन्ता** • हितानाप्तिर्विभावः संतापोऽनुभावः। **अधरद्युति** • मृगीदृश एताः कस्य कृते कृताः। अस्ता अस्तं गता पल्लवशोभा यस्या इति पञ्चम्यर्थे बहुव्रीहिः। चन्द्रशोभातिरस्कारिणी मुखशोभा। अनुपमाना तनुश्च। तदप्राप्तिनायिकाया अप्राप्तिः।

अत्र तदप्राप्तिर्विभावः । अनुतापादय आक्षेप्या अनुभावाः । न चात्रौत्सुक्यध्वनिरिति वाच्यम् । कस्य कृत इत्यनिर्धारितधर्म्यालम्बनायाश्चिन्ताया एव प्रतीयमानतया सतोऽप्यौत्सुक्यस्यैतद्वाक्येन प्राधान्येनाबोधनात् ।

मद्याद्युपयोगजन्मा उल्लासाख्यः शयनहसितादिहेतुश्चित्तवृत्तिविशेषो मदः ॥

यदाहुः—'संमोहानन्दसंदोहो मदो मद्योपयोगजः ।' इति । तत्रोत्तमे पुरुषे स्वापोऽनुभावः । मध्यमे हसितगाने । नीचे तु रोदनपरुषोक्त्यादि । अयं च मदस्त्रिविधः । तरुणमध्यमाधमभेदात् । अव्यक्तासंगतवाक्यैः सुकुमारस्खलद्गत्या च योऽभिनीयते स आद्यः । भुजाक्षेपस्खलितघूर्णितादिभिर्मध्यमः । गतिभङ्गस्मृतिनाशहिक्काछर्द्यादिभिरधमः ।

शब्दत उपादानाभावादाक्षेप्या इति । न चात्रौत्सुक्य ● नायिकायाः प्राप्तेरिच्छाया अवगमात्, चिन्तानुभावत्वाच्च । औत्सुक्यं त्वरया प्राप्तेरिच्छारूपं वक्ष्यते मूले । कस्य कृते ● औत्सुक्यं मम प्राप्तिर्भवत्विति इच्छा । अत्र तु प्राप्तेर्धर्मिणोऽनिर्णयादौत्सुक्यं शनैः शनैर्विलम्बेन भासते । चिन्ता तु प्रागेव प्राधान्येन प्रतीयते इत्यत्र चिन्ताया एव प्राधान्यम् ।

अथ मदनिरूपणम् ।

मद्याद्युप ● मद्यादीनां पानेन जनितः । **संमोहानन्द** ● संमोहस्य आनन्दस्य च संदोहो व्यामिश्रणं यत्र । **अव्यक्ता** ● अव्यक्तमस्पष्टाक्षरम्, असंगतं पूर्वपरयोरसम्बद्धम् । **सुकुमारा** ● सुकुमारा न तु हस्तपादप्रक्षेपयुक्त स्खलन्ती गतिस्तया । अत्रत्यानुभावविवरणे मर्मप्रकाशः—उत्तमसत्त्वः प्रहसति गायति तद्वच्च मध्यमप्रकृतिः । परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः । इति प्रदीपविरुद्धमेतदित्याह अत्रान्ये उत्तमे जने मदस्य स्वापानुभावतामेव सहृदयानुभवानुमोदितां मन्यन्ते । प्रदीपस्यप्रहसतिपदस्य मधुरहासे तात्पर्यम् । उत्तमसत्त्वेऽपि स्मितमनुभूयने अधिके मदे तु स्वापः । मध्ये-हसितश्चोच्चैरिति मम प्रतिभाति ।

उदाहरणम्—

‘मधुरतरं स्मयमानः स्वस्मिन्नेवालपञ्शनैः किमपि ।
कोकनदयंस्त्रिलोकीमालम्बनशून्यमीक्षते क्षीबः ॥’

अत्र मादकद्रव्यसेवनं विभावः । अव्यक्तालापाद्यनुभावः । अत्र मत्तस्वभाववर्णनस्य तन्निष्ठमदव्यञ्जनार्थत्वान्मदभाव एव प्रधानमिति न स्वभावोक्त्यलंकारस्य प्राधान्यम्, अपि तु तद्ध्वन्युपस्कारकत्वमेव ।

इदं वा पुनरुदाहरणम्—

‘मधुरसान्मधुरं हि तवाधरं तरुणि मद्वदने विनिवेशय ।
मम गृहाण करेण कराम्बुजं पपपतामि हहा भभभूतले ॥’

अत्रापि स एव विभावः । अधिकवर्णोच्चारणादिरनुभावः । पूर्वार्धगता ग्राम्योक्तिरुत्तरार्धे च तरुणीकरेऽम्बुजोपमेयतया निरूपणीये स्वकरस्य तदुपमेयतया निरूपणं च मदमेव पोषयतः ।

मत्तस्य वर्णनं **मधुरतरं** • क्षीबो मत्तः । स्मयमानः स्मितं कुर्वाणः, स्वस्मिन्नेव अन्यं श्रोतारं विनैव; शनैरित्यनेन अस्पष्टम्, किमपीत्यनेन संगतिरहितम् । नेत्ररक्तिमातिशयेन तत्किरणवशात् त्रिभुवनमेव रक्तकमलमिव कुर्वन् पश्यति परं तदपि दर्शनं विषयशून्यमेव किं पश्यतीति स्वयमपि निर्णयं न करोति । **मदव्यञ्जनार्थं** • मत्तस्वभाववर्णनं मदव्यञ्जकं स्यादेवेति मदोपस्कारकत्वमेव स्वभावोक्तेः । स्वभावोक्त्यानालिङ्गितमुदाहरति **मधुरसान्मधुरं** • मर्मप्रकाशस्त्वित्थमवतारयति—ननु क्षीबपदेन विशेषणविधया वाच्यस्य मदस्य कथं ध्वनितास्पदत्वम्, कथमपि वाच्यवृत्त्यनालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वमिति स्वयमेव प्रागावेदनात् । एवञ्च स्वभावोक्त्यलङ्कार एवायमत आह इदं वा पुनरिति । अनुसरति चेदं भाषानुवादः । इदन्त्ववधेयं सहृदयैः । यत्र विभावानुभावौ न प्रतीयेते साधारणे व्यवहारेऽपि क्षीबशब्दस्योपयोगो दृश्यते न तत्र मनागपि मदभावः । अतः क्षीबशब्दार्थविशेषणं मदोऽन्योऽन्यश्च मदभाव इति ।

स एव • पूर्वोक्तो मादकद्रव्यसेवनरूपः । अधिको वर्णः पतामीत्यत्र पकारद्वयं भूतल इत्यत्र भकारद्वयम्, आदिपदेन ग्राम्योक्त्यादयः । अधरस्य मुखे विवेशनोक्तिर्ग्राम्या । **पोषयतः** • ग्राम्योक्तिरेवं निरूपणञ्चोभे इति शेषः ।

बहुतरशारीरव्यापारजन्मा निःश्वासाङ्गसंमर्दनिद्रादिकारणीभूतः खेदविशेषः श्रमः ॥

यदाहुः—

'अध्वव्यायामसेवाद्यैर्विभावैरनुभावकैः ।
गात्रसंवाहनैरास्यसंकोचैरङ्गमोटनैः ॥
निःश्वासैर्जृम्भितैर्मन्दैः पादोत्क्षेपैः श्रमो मतः ॥' इति ।
'श्रमः खेदोऽध्वगत्यादेर्निद्राश्वासादिकृन्मतः ।' इति च ।

अयं च सत्यपि बले जायते । शारीरव्यापारादेव च जायते । न तु ग्लानिः । अतो ग्लानेः श्रमस्य भेदः ।

उदाहरणम्—

'विधाय सा मद्वदनानुकूलं कपोलमूलं हृदये शयाना ।
चिराय चित्रे लिखितेव तन्वी न स्पन्दितुं मन्दमपि क्षमासीत् ॥'

अत्र विपरीतसुरतरूपः शारीरव्यापारो विभावः । स्पन्दराहित्य-शयनादयोऽनुभावाः । न चात्र निद्राभावध्वननेन गतार्थतेति शङ्क्यम् ।

अथ श्रमनिरूपणम् ।

बहुतर ● अङ्गसंमर्दोऽङ्गमोटनम् । अध्वपदस्य मार्गश्रमे लक्षणा । त्रयाणां द्वन्द्वं विधाय आद्यशब्देन बहुव्रीहिः आदिशब्दो वा तथापि पाठः । अनुभावकैरित्यस्याग्रेतनैस्तृतीयान्तैरन्वयः । गात्रसंवाहनं शरीरसेवा । मोटनं मोडनमिति भाषाप्रसिद्धम् । मन्दैः पादप्रक्षेपैरित्यन्वयः । सम्वादान्तरमप्याह श्रमः खेदो ● । न तु ग्लानिः ● सा तु बलहानावेव आधिव्याधिभिश्च जायते । कश्चिन्मित्रं प्रति नायिकाऽवस्थां वर्णयति विधाय सा● अधस्तात्पतिरुपरिष्टाच्च पत्नी इत्थं शयाना विपरीतां रतिं विधाय सुप्ता । सा तन्वी मम वदनसविधे कपोलमूलं कृत्वा हृदये शयाना एवं श्रान्ता आसीद्येन चिरं चित्रलिखितेव ईषदपि चेष्टितुं नाशकत् । अत्र स्पन्दाद्यभावान्निद्राया एव प्रतीतिमुद्भाव्य शङ्कासमाधाने उपक्रमेते न चात्र ● निद्रा हि चेतःसंमीलनाच्चेतोवृत्तिरूपज्ञानाभाववती सुषुप्तिरूपा । यत्नं प्रति ज्ञानस्य कारणत्वाद् यत्नचेष्टाद्यभावस्य स्वयंसिद्धेः स्पन्दितुं

सुषुप्तौ हि ज्ञानराहित्येनैव यत्नराहित्यान्मन्दमपि स्पन्दितुं न क्षमासीदित्यस्यानतिप्रयोजनकत्वापत्तेः। शीङाभिहिततया तस्या व्यङ्ग्यत्वानुपपत्तेश्च। श्रमे त्वानुगुण्यमुचितम्।

रूपधनविद्यादिप्रयुक्तात्मोत्कर्षज्ञानाधीनपरावहेलनं गर्वः ॥

उदाहरणम्—

'आ मूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधे-
र्यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु।
मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः ॥'

अत्र स्वकीयकविताया अनन्यसाधारणताज्ञानं विभावः।

नक्षमासीदित्यस्य वैयर्थ्यं स्यात्। श्रमानुभावतया चोपयुज्यतेऽभिधानं तस्य। निद्रायाः स्फुटं प्रतिपादनाय तदभिधानमुच्यते तदापि नातिप्रयोजनमित्याह अनतिप्रयोजनकत्वापत्ते-रित्यनेन। तादृशस्फुटताया ध्वनित्वासाधकत्वाच्च। शयानापदेन निद्राया उक्तत्वाच्च न ध्वनित्वमित्यप्याह **शीङाभिहिततया०**। **त्वानुगुण्यम्०** श्रमे निद्राया अनुभावत्वात्। तथा च प्राधान्यं श्रमस्यैवेति भावः।

गर्वनिरूपणम्।

रूपधन- ० रूपेण धनेन विद्यया वा अहमुत्कृष्ट इत्याकारकादिज्ञानम्। अव-हेलनं तिरस्कारो भर्त्सना वा।

पाण्डित्यगर्वमुदाहरति **आमूलाद्** ० सुमेरुपर्वतस्य मूलमभिव्याप्य, मलयाचलो-वलयः संजातोऽस्य एवंभूतं समुद्रस्य तटमभिव्याप्य च यावन्तः कवयस्ते स्फुटं वदन्तु यत्सत्कविताया आचार्यपदवीमनुभवितुं मदन्यः को धन्यः। कीदृशो वा च इत्याह **मृद्विका** ० द्राक्षाफलस्य मध्यान्निःसरन् यो रसस्य प्रवाहस्तद्भाग्यवन्त्यस्तत्सदृशमधुरा इत्यर्थः। आङ् मर्यादावचने इत्यनेनाभिविधौ कर्मप्रवचनीयसंज्ञा, पञ्चम्यपाङ्परिभि-रित्यनेन पञ्चमी। मसृणश्चिक्कणः। ननु कस्यचित्प्रसिद्धकवेः प्रसृतं यशोऽसहमानेनेद-मुक्तमित्यसूययाऽत्र भाव्यमिति चेन्न तस्य लेशतः सत्त्वेऽपि प्राधान्येनास्फुरणाद् गर्वस्यैव

पराधिक्षेपपरैतादृशवाक्यप्रयोगोऽनुभावः। इमं चासूयापि लेशतः पुष्णाति। उत्साहप्रधानो गूढगर्वो हि वीररसध्वनिः, अयं तु गर्वप्रधान इति तस्मादस्य विशेषः। तथा हि वीररसप्रसङ्गे प्रागुदाहृते 'यदि वक्ति—' इत्यादि पद्ये गीष्पतिना गिरामधिदेवतयापि साकमहं वदिष्यामीति वचनेनाभिव्यक्तस्योत्साहस्य परिपोषकतया स्थितः सर्वेभ्यः पण्डितेभ्योऽहमधिक इति गर्वः। न तु प्रकृतपद्य इव नास्त्येव महीतले मदन्य इति स्फुटोदितेन सोल्लुण्ठवचनेनानुभावेन प्राधान्येन प्रतीयमानः।

श्रमादिप्रयोज्यं चेतःसंमीलनं निद्रा ॥

नेत्रनिमीलनगात्रनिष्क्रियत्वादयोऽस्यानुभावाः।

उदाहरणम्——

'सा मदागमनबृंहिततोषा जागरेण गमिताखिलदोषा।
बोधितापि बुबुधे मधुपैर्न प्रातराननजसौरभलुब्धैः॥'

रात्रिजागरणश्रमोऽत्र विभावः। मधुपैर्बोधाभावोऽनुभावः।

शास्त्रादिविचारजन्यमर्थनिर्धारणं मतिः ॥

प्राधान्येन प्रतीतेरित्याह इमं च ● नन्वत्र पाण्डित्यवीरस्यैव कथन्न ध्वनिरित्याशङ्क्य समाधत्ते उत्साह = ● सोल्लुण्ठं साभिप्रायम्।

अथ निद्रा।

चेतः सम्मीलनं नाम बहिरिन्द्रियसहकारेण स्वतो वा वृत्तिरूपेण परिणामाभावः। यथा न्यायनये पुरीतति नाड्यां चेतसः प्रवेशः सुषुप्तिरिति भावः। सुप्ते तु स्वप्नरूपे चेतसो वृत्तिर्भवत्येव।

नायिकाया निद्रावर्णनं सामदागमन ● पूर्वार्धेन विभावस्य वर्णनम्। सुषुप्तिर्हि शारीरिकश्रमेण चिन्ताया अभावेन जायते, अतो मम विरहवशादखिला रात्रिर्जागरणेन क्षपिता तया, ममागमनजन्यसुखेनाधिकं सन्तुष्टा एवं सुषुप्ता येन प्रभाते मुखकमलसौरभार्थिभिर्भ्रमरै बोधिताऽपि न जागृतवती।

अत्र निःशङ्कतदर्थानुष्ठानसंशयोच्छेदादयोऽनुभावाः ।

उदाहरणम्—

'निखिलं जगदेव नश्वरं पुनरस्मिन्नितरां कलेवरम् ।
अथ तस्य कृते कियानयं क्रियते हन्त मया परिश्रमः ॥'

'शरीरमेतज्जलबुद्बुदोपमं—' इत्यादिशास्त्रपर्यालोचनमत्र विभावः । हन्तपदगम्या स्वनिन्दा राजसेवादिविरतिर्वितृष्णता चानुभावः । झगिति मतेरेव चमत्काराद्ध्वनिव्यपदेशहेतुता, न शान्तस्य । विलम्बेन प्रतीतेः ।

रोगविरहादिप्रभवो मनस्तापो व्याधिः ॥

गात्रशैथिल्यश्वासादयोऽत्रानुभावाः ।

यदाहुः—

'एकैकशो द्वन्द्वशो वा त्रयाणां वा प्रकोपतः ।
वातपित्तकफानां स्युर्व्याधयो ये ज्वरादयः ॥
इह तत्प्रभवो भावो व्याधिरित्यभिधीयते ॥'

उदाहरणम्—

'हृदये कृतशैवलानुषङ्गा मुहुरङ्गानि यतस्ततः क्षिपन्ती ।
तदुदन्तपरे मुखे सखीनामतिदीनामियमादधाति दृष्टिम् ॥'

अथ मतिः ।

निखिलम् • नश्वरं विनाशशीलम्, शरीरमत्यन्तं नश्वरम्, तस्य शरीरस्य, शान्तध्वनिशङ्कां निवारयति **झगिति** • । **विलम्बेन** • शरीरं क्षणिकप्रायमिति मतेरनन्तरं शान्तस्याभिव्यक्तिः ।

अथ व्याधिः ।

रोगविरहा• रोगैर्ज्वरादिभिः, विरहादिभिश्च प्रभव उत्पत्तिर्यस्य ।

एकैकशः • वातपित्तकफानामन्यतमस्य द्वयोस्त्रयाणां वा कोपेन ये चिकित्साशास्त्रे ज्वरादयो व्याधय उक्ता इह काव्यमार्गे तैः संजातो व्याधिभावोऽभिधीयते ।

विरहजं व्याधिमुदाहरति **हृदये** • शीतोपचाराय शैवलसम्बन्धः, तथापि तापः

विरहोऽत्र विभावः । अङ्गक्षेपादिरनुभावः ।

भीरोर्घोरसत्त्वदर्शनस्फूर्जथुश्रवणादिजन्मा चित्तवृत्तिविशेषस्त्रासः॥

अनुभावाश्चास्य रोमाञ्चकम्पस्तम्भभ्रमादयः ।

यदाहुः--

'औत्पातिकैर्मनःक्षेपस्त्रासः कम्पादिकारकः ।'

उदाहरणम्--

'आलीषु केलीरभसेन बाला मुहुर्ममालापमुपालपन्ती ।
आरादुपाकर्ण्य गिरं मदीयां सौदामिनीयां सुषुमामयासीत् ।।'

अत्र पत्या स्ववचनाकर्णनं विभावः । पलायनमनुभावः । न चात्र लज्जाया व्यङ्ग्यत्वमाशङ्कनीयम् । शैशवेनैव तस्या निरासात् ।

शान्ति नैतीति अङ्गानि प्रक्षिपति । विरहालम्बनस्य नायकस्य वार्तायां तत्परे सखीनां मुखे नायकस्यालाभादतिदीनां दृष्टिं दधाति । मुखशब्दैकवचनेन सर्वासां मुखेषु एका नायकस्यैव चर्चासीदिति ध्वन्यते ।

अथ त्रासः

भीरोर्घोर ● भयशीलस्य चित्तवृत्तिविशेष इत्यन्वयः । भयङ्करस्य प्राणिनः सिंहादेर्दर्शनं वज्रनिर्घोषस्य च श्रवणम् । **औत्पातिकैः** ● उत्पातं निमित्तीकृत्य जायमानैरुत्पातसूचकैरित्यर्थः । मनःक्षेपश्चित्तवृत्तिविशेषः ।

आलीषु ● नायको नायिकां वक्ति--सखी मण्डले क्रीडावशान्मुहुर्मम सम्बन्धिनं वार्तालापं कुर्वन्ती दूर एव सति मम वाणीं श्रुत्वा मम वचनं प्रियोऽश्रौषीदिति भीत्या एवं त्वरया प्रासर्पद्येन विद्युत्सम्बन्धिनीं शोभां प्रापत् । सौदामिनी विद्युत् । सुषमा परमा शोभा । अचिरस्थायित्वेन विद्युदिव अशोभतेत्यर्थः । **पत्या** ● पतिकर्तृकं स्ववचनकर्मकमाकर्णनम् । नन्वत्र कृद्योगे कर्तरि षष्ठी कथन्न, उभयप्राप्तावित्यादिना कर्मणि षष्ठीविधाने कर्मणि चेत्यनेन समासप्रतिषेधापत्तेरिति चेदत्राहुः--स्ववचनशब्दात्कर्मणः शेषत्वविवक्षायां षष्ठी । कर्मणि चेत्यत्र च शब्दस्येत्यर्थकतया कर्मशब्दमुच्चार्य कर्मषष्ठ्या सहैव समासनिषेधात् । अन्ये तु सिद्धान्तकौमुद्यां विहितेन शेषे विभाषेति योगेन विभाषा प्रवृत्त्या साध्विति वदन्ति । ननु पत्युः श्रवणेन लज्जावशादेव तस्याः पलायनं न त्रासवशादित्याशङ्कते **न चात्र** ● । **शैशवेनैव** ● बालापदादायाते शैशवे लज्जाया

इदं वा विविक्तमुदाहरणम्--

'मा कुरु कशां कराब्जे करुणावति कम्पते मम स्वान्तम् ।
खेलन्न जातु गोपैरम्ब विलम्बं करिष्यामि ॥'

एषा भगवतो लीलागोपकिशोरस्योक्तिः ।

निद्राविभावोत्थज्ञानं सुप्तम् ॥

स्वप्न इति यावत् । अस्यानुभावः प्रलापादिः । नेत्रनिमीलनादयस्तु निद्राया एवानुभावा न त्वस्य । अनिदंजन्यत्वात् । यत्तु प्राचीनैः 'अस्यानुभावा निभृतगात्रनेत्रनिमीलनं—' इत्याद्युक्तं तदन्यथासिद्धानामपि तेषामेतद्भावव्यापकत्वादिति ध्येयम् ।

उदाहरणम्--

'अकरुण मृषाभाषासिन्धो विमुञ्च ममाञ्चलं
तव परिचितः स्नेहः सम्यङ्मयेत्यनुभाषिणीम् ।

असंभवात् त्रासस्य च संभवात् । तस्या लज्जायाः । ननु बालापदं न शैशवाऽवस्थारूपं सूचयितुमपि तु चापल्यमात्रद्योतकम्, कथमन्यथा प्रियविषयक आलाप इत्याशङ्क्याह **इदं वा** • प्रियविषयकालापस्यापि शैशववशात्संभवे लज्जया त्वसम्भवे पूर्वोक्तमपि सम्यक् । श्रीकृष्णस्य यशोदां प्रत्युक्तिः, क्रीडावशाद्विलम्बेन गृहमागतस्य शासनविषयकम् । कशाताडनरज्जुः, करुणावति इति सम्बोधनम्, स्वान्तं हृदयम्, भगवतो वस्तुतः त्रासाभावाद्विवरणे लीलापदम् ।

अथ सुप्तम्

ज्ञानं बोधश्च चित्तवृत्तिविशेषः इति ध्येयम् । सुप्ते निद्रायाः प्रवेशान्निद्राया अनुभावा निद्रावशादेव गृहीताः स्युः पुनस्तेषामुपादानं व्यर्थमित्याह **नेत्रनिमीलन** • । किञ्च तेषामुपादानमनुचितमपि यतो नेत्रनिमीलनादेर्निद्राजन्यत्वात् सुप्ताजन्यत्वाच्चेत्याह **अनिदं** • । ननु तर्हि तादृशपरिगणनपरः प्राचां ग्रन्थो विरुध्यतेऽत आह **यत्तु प्राचीनैः** • । **एतदन्यथा** • निद्रया गतार्थानामपि । **तद्भाव** • निद्रावशात्सुप्तं ते व्याप्नुवन्ति अतएव सुषुप्तेऽपि उपलभ्यन्ते । मया तु सुप्ताजन्यत्वान्न तथोक्तमिति भावः ।

कश्चित्प्रवासगतः सुप्तः स्वप्न एवमवस्थाविशिष्टां नायिकां पश्यति **अकरुण** •

अविरलगलद्बाष्पां तन्वीं निरस्तविभूषणां
क इह भवतीं भद्रे निद्रे विना विनिवेदयेत् ॥'

एषा प्रवासगतस्य स्वप्नेऽपि प्रियामेवंभाषिणीं दृष्टवतो निद्रां प्रति कस्यचिदुक्तिः। यद्यप्येवंभूतायाः प्रियतमावस्थाया निवेदनेन निद्रे मम भवत्या महानुपकारः कृत इति वस्तु, विप्रलम्भशृङ्गारश्चात्र प्रतीतिपथमवतरति, तथापि पुरः स्फूर्तिकतया स्वप्नध्वननमत्रोदाहृतं न प्रान्ते तयोर्ध्वननं निरोद्धुमीष्टे।

निद्रानाशोत्तरं जायमानो बोधो विबोधः॥

निद्रानाशश्च तत्पूर्तिस्त्वप्नान्तबलवच्छब्दस्पर्शादिभिर्जायत इति त एवात्र विभावाः। अक्षिमर्दनगात्रमर्दनादयोऽनुभावाः।

तत्र संक्षेपेणोदाहरणम्—

'नितरां हितयाद्य निद्रया मे बत यामे चरमे निवेदितायाः।
सुदृशो वचनं शृणोमि यावन्मयि तावत्प्रचुकोप वारिवाहः॥'

अत्र गर्जितश्रवणं विभावः। प्रियावचनश्रवणोल्लासनाशोऽनुभावस्तून्नेयः। केचिदविद्याध्वंसजन्यमप्यमुमामनन्ति। तेषां मते—

हे भद्रे निद्रे भवतीं विना इह प्रवासेऽपि एवंविधां प्रियां को विनिवेदयेत्? प्रवासित्वाद् हे निर्दयः त्वां विना न जीविष्यामीति प्रभृति मिथ्यावचनसागर ममाञ्चलं मुञ्च। तव स्नेहो मया सम्यक् परिचित इति अनुभाषिणीम्, पुना रुदन्तीं त्यक्तभूषणां तन्वीम्। प्रतीतिपथ● व्यङ्ग्यतयेत्यादिः शेषः। तयोः● वस्तुविप्रलम्भयोः। तथा चैषां साङ्कर्यमिति भावः।

अथ विबोधः

तत्पूर्ति● निद्रायाः पूर्तिः स्वप्नस्य समाप्तिः; बलवान् शब्दः स्पर्शश्च तत्प्रभृतिभिः।

नितरां हितयां● कश्चित्प्रवासी स्वप्ने प्रियावचनं शृण्वन् सहसा मेघगर्जनेन प्रतिबोधितः। चरमे यामे चतुर्थप्रहरे। वारिवाहो मेघः। तून्नेयः● शब्दाभावादगम्यः। अविद्या● अविद्यानाशोत्तरं जायमानः आत्मसाक्षात्कारोऽपि विबोधः।

'नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥'

इति गीतापद्यमुदाहार्यम् । न तु वारिवाहविषयाया असूयाया एवात्र वाक्यार्थतेति शङ्क्यम् । विबोधप्रतीतौ हि सत्यां तस्मिन्ननौचित्यावगमे सत्यनुचितविबोधजनकत्वेन वारिवाहेऽसूयाया विलम्बेन प्रतीतेः परमुखनिरीक्षकत्वात् । स्यादपि तस्या अपि प्राधान्यम्, यदि वारिवाहे निष्करुणत्वादिबोधकं किंचिदपि स्यात् । नापि स्वप्नस्य । वारिवाहनादेन तन्नाशस्यैव प्रतिपत्तेः । अस्तु वा स्वप्नभावप्रशमेनासूयया च सहास्य संकरः ।

इदं तु नोदाहार्यम् –

'गाढमालिङ्गय सकलां यामिनीं सह तस्थुषीम् ।
निद्रां विहाय स प्रातरालिलिङ्गाथ चेतनाम् ॥'

विबोधस्य चेतनापदवाच्यत्वात् । यथा कश्चित्सत्यप्रतिज्ञो द्वाभ्यां नायिकाभ्यां द्वौ कालावुपभोगार्थं दत्त्वा यथोचिते काल एकामुपभुज्य कालान्तरे प्रवृत्ते तां विहायापरां भुङ्क्ते, तथैवायं रात्रौ निद्रां प्रातश्चेतनामिति समासोक्तेरेवेह प्रकाशनात् ।

परकृतावज्ञादिनानापराधजन्यो मौनवाक्पारुष्यादिकारणीभूतश्चित्तवृत्तिविशेषोऽमर्षः ॥

प्राग्वत्कारणानां कार्याणां च क्रमेण विभावानुभावत्वम् ।

नष्टो मोहः ● अज्ञानं नष्टम्, तत्त्वज्ञानमुपलब्धम्। अत्र श्रीकृष्णोपदेशजन्यमात्मनोऽकर्तृत्वादिज्ञानं विभावः, संदेहनिवृत्तिः कर्मणि प्रवृत्तिप्रभृतयोऽनुभावाः । **परमुख** ● विबोधप्रतीतिसापेक्षत्वात् । **नापि स्वप्नस्य** ● वाक्यार्थतेत्यनुवर्तते । सहृदयहृदयेनानुमोद्यते चेत्तदाप्याह **अस्तु वा** ● इदं तु वक्ष्यमाणं चेतनाशब्दसम्बलितम् । तस्थुषीं स्थितवतीम् ।

अथामर्षः

जन्यशब्दपूर्वोक्तानां विभावत्वं कारणीशब्दप्राक्पठितानामनुभावत्वमित्याह **प्राग्वत्** ● विबोधवत् ।

उदाहरणम्—

'वक्षोजाग्रं पाणिनामृष्य दूरे यातस्य द्रागाननाब्जं प्रियस्य ।
शोणाग्राभ्यां भामिनी लोचनाभ्यां जोषं जोषं जोषमेवावतस्थे ॥'

इह त्वाकस्मिकस्तनाग्रस्पर्शो विभावः । नयनारुण्यनिर्निमेषनिरीक्षणे अनुभावौ । ननु क्रोधामर्षयोः स्थायिसंचारिणोर्भावयोः किं भेदकमिति चेत्, विषयतावैलक्षण्यमेवेति गृहाण । तत्र तु गमकं झटिति परविनाशादौ प्रवृत्तिर्वचनवैमुख्यादिकं चेति कार्यवैलक्षण्यम् ।

व्रीडादिभिर्निमित्तैर्हर्षाद्यनुभावानां गोपनाय जनितो भावविशेषोऽवहित्थम् ।

तदुक्तम्—

'अनुभावपिधानार्थोऽवहित्थं भाव उच्यते ।
तद्विभाव्यं भयव्रीडाधार्ष्ट्यकौटिल्यगौरवैः ॥'

यथा—

'प्रसङ्गे गोपानां गुरुषु महिमानं यदुपते-
रुपाकर्ण्य स्विद्यत्पुलकितकपोला कुलवधूः ।
विषज्वालाजालं झगिति वमतः पन्नगपतेः
फणायां साश्चर्यं कथयतितरां ताण्डवविधिम् ॥'

वक्षोजाग्रम् • भामिनी नायिका हस्तेन स्तनाग्रं संस्पृश्य शीघ्रं दूरे यातस्य प्रियस्य मुखकमलं रक्तशोणाभ्रां नयनाभ्यां दृष्ट्वा दृष्ट्वा तूष्णीमेव अवतस्थे । आदिपदग्राह्यं विभावं सूचयितुमाह **इह त्वा** • । **स्थायिसं** • क्रोधः स्थायी आमर्षश्च संचारी । **विषयता** • चित्तवृत्तिगतधर्मविशेषः । **तत्र तु** • विषयवैलक्षण्ये तु । क्रोधेन परविनाशादौ प्रवृत्तिः, आमर्षेण तु वचनवैमुख्यादिकम् । तथानुभावभेदाद्भेद इति ।

अथावहित्थम् ।

व्रीडादिभिः • आदिपदेन भयादयः । विभावरूपैः । **अनुभाव** • हर्षाद्यनुभावपिधानप्रयोजनाय । तद् **अवहित्थम्** भयव्रीडादिभिर्विभावनीयम् । एते तस्य विभावा इत्यर्थः ।

प्रसङ्गे गोपानाम् • गोपानां कीर्तिवर्णनप्रसङ्गे श्वसुरादिसविधे कश्चित्

अत्र व्रीडा विभावः। तादृशकाव्यिकथाप्रसङ्गोऽनुभावः। एवं भयादिप्रयोज्यमप्युदाहार्यम्।

अधिक्षेपापमानादिप्रभवा किमस्य करोमीत्याद्याकारा चित्तवृत्तिरुग्रता।

यदाहुः—

'नृपापराधोऽसद्दोषकीर्तनं चोरधारणम्।
विभावाः स्युरथो बन्धो वधस्ताडनभर्त्सने॥
एते यत्रानुभावास्तदौग्र्यं निर्दयतात्मकम्॥' इति॥

यथा—

'अवाप्य भङ्गं खलु संगराङ्गणे नितान्तमङ्गाधिपतेरमङ्गलम्।
परप्रभावं मम गाण्डिवं धनुर्विनिन्दतस्ते हृदयं न कम्पते॥'

एषा कर्णेन पराभूतं गाण्डिवं निन्दन्तं युधिष्ठिरं प्रति धनंजयस्योक्तिः। युधिष्ठिरकर्तृका गाण्डिवनिन्दात्र विभावः। वधेच्छानु-

---

श्रीकृष्णस्य प्रभावमवर्णयत्। तच्छ्रुत्वा कस्याश्चिद् वध्वाः श्रीकृष्णविषयकप्रेमोद्रेकात् कपोले स्वेदरोमाञ्चादयः प्रादुरभूवन्। कुलवध्वा ममानुचितमिदम् आसजनाः किं विचारयिष्यन्तीति प्रादुर्भूतां लज्जां गोपयितुं सहसा सा नायिका नेमे स्वेदादयः शृङ्गारानुभावा अपि तु विषपुञ्जं वमतः कालियस्य फणायां कथं नृत्यमकारि भगवतेत्याश्चर्यजन्या इत्यपलपितुं तादृशं नृत्यविधिं वर्णयितुं प्रावर्तत। स्विद्यत् स्वेदं प्राप्नुवत्, पुलकितं रोमाञ्चयुक्तम्। पन्नगपतिः कालियः।

अथोग्रता

अधिक्षेप ● अधिक्षेपादयो विभावाः। असद्दोषोऽविद्यमानो दोषः। चोरस्य धारणं ग्रहणम्। कुत्रचिच् चोरधारणमित्यपि पाठः। अर्थो न भिद्यते। निर्दयता किमपकरोम्यस्येत्याकारा दयारहिता चित्तवृत्तिः। अवाप्य भङ्गम्● अमङ्गलं पराजयम्।

समराङ्गणं युद्धभूमिः। अङ्गाधिपतिः कर्णः। परप्रभाव उत्कृष्टप्रभावः। पराभूतं युधिष्ठिरमित्यस्य विशेषणम्। परकृतापमानादितोऽमर्षस्य उग्रतायाश्च प्रादुर्भावाद्विभावै-

भावः। न चामर्षोग्रतयोर्नास्ति भेद इति वाच्यम्। प्रागुदाहृतेऽमर्षध्वनावुग्रताया अप्रतीतेः। नाप्यसौ क्रोधः। तस्य स्थायित्वेनास्याः संचारिणीत्वेनैव भेदात्।

विप्रलम्भमहापत्तिपरमानन्दादिजन्मान्यस्मिन्नन्यावभास उन्मादः॥

शुक्तिरजतादिज्ञानव्यावृत्तये जन्मान्तम्।

उदाहरणम्—

'अकरुणहृदय प्रियतम मुञ्चामि त्वामितः परं नाहम्।
इत्यालपति कराम्बुजमादायालीजनस्य विकला सा॥'

एषा प्रवासगतं स्वनायिकावृत्तान्तं नायकं प्रति कस्याश्चित्संदेशहारिण्या उक्तिः। प्रियविरहोऽत्र विभावः। असंबद्धोक्तिरनुभावः। उन्मादस्य व्याधावन्तर्भावे संभवत्यपि पृथगुपादानं व्याध्यन्तरापेक्षया वैचित्र्यविशेषस्फोरणाय।

रोगादिजन्या मूर्छारूपा मरणप्रागवस्था मरणम्॥

वधादमर्षोग्रतयोरैक्यमाशङ्कमानोऽनुभावभेदाद् भेदं साधयति **न चामर्षो** •। **उग्रताया** • वधादीच्छानुभाविताया निर्दयतात्मिकाया उग्रतायाः। अमर्षे न वधादीच्छानुभाव इति भावः। असौ उग्रता। **भेदात्** • युधिष्ठिरं प्रति अर्जुनस्य क्रोधो न स्थायितां भजते।

अथोन्मादः।

जन्मपूर्वोपाता विभावाः। अन्यस्मिन् वस्तुनि अन्यस्य ज्ञानम्। **व्यावृत्तये** • शुक्त्यादिज्ञाने उन्मादत्ववारणाय। तादृशज्ञानस्य चाकचिक्यलोभादिदोषजन्यत्वात्। सखीजने प्रियज्ञानमुदाहरति **अकरुणहृदय** • विरहविकला सा नायिका सखीजनस्य करकमलं प्रियकरधिया गृहीत्वा प्रवासप्रियत्वाद् हे अकरुणहृदय प्रियतम त्वाम् इतः परमहं न मुञ्चामि इत्यादिकं विलपति। **विशेषस्फोरणाय** • व्याध्यन्तरे शय्यायां पातः, भ्रमणे तु इतस्ततो भ्रमणमित्यादयो विशेषाः।

न चात्र प्राणवियोगात्मकं मुख्यं मरणमुचितं ग्रहीतुम्। चित्त-वृत्त्यात्मकेषु भावेषु तस्याप्रसक्तेः। भावेषु च सर्वेषु कार्यसहवर्तितया शरीरप्राणसंयोगस्य हेतुत्वात्।

उदाहरणम्—

'दयितस्य गुणाननुस्मरन्ती शयने संप्रति या विलोकितासीत्।
अधुना खलु हन्त सा कृशाङ्गी गिरमङ्गीकुरुते न भाषितापि॥'

प्रियविरहोऽत्र विभावः। वचनविरामोऽनुभावः। हन्तपदस्यात्रा-त्यन्तमुपकारकत्वाद्वाक्यव्यङ्ग्योऽप्ययं भावः पदव्यङ्ग्यतामावहति। एतेन भावस्य पदव्यङ्ग्यतायां नात्यन्तं वैचित्र्यमिति परास्तम्। दयितस्य गुणाननुस्मरन्तीत्यनेन व्यज्यमानं चरमावस्थायामपि तस्या दयितगुणविस्मरणं नाभूदिति वस्तु विप्रलम्भस्य शोकस्य वा चरम-

---

अथ मरणम्।

प्राणवियोग ● शरीरप्राणवियोगात्मकम्। **तस्याप्रसक्तेः** ● तस्य मुख्य-मरणस्य। मुख्यमरणे चित्तवृत्तेरेवाभावात्। चित्तवृत्तिविशेषरूपं भावं प्रति शरीरप्राण-संयोगस्य हेतुत्वात्। नन्वस्तु तथा कार्यकारणभावः परं घटेन दण्डस्य आघातो घट-नाशहेतुर्घटनाशक्षणात्प्राक्क्षणे वर्तते घटनाशक्षणे च नास्ति तथैव पूर्वोक्तं मरणमपि स्वप्राक्क्षणवर्तिनः शरीरप्राणसंयोगाज्जायमानाया भावात्मिकायाश्चित्तवृत्ते रूपतां प्रति-पत्स्यत इत्याशङ्कां निवारयितुं प्राह **कार्यसहवर्तितया** ● सर्वेषां कारणानां कार्या-व्यवहितप्राक्क्षणवर्तित्वमावश्यकम् परं केषाञ्चित्कारणानां कार्योत्पत्तिक्षणेऽपि वर्तमानत्व-मवश्यमपेक्षितम्। घटे दण्डाघातस्तु घटनाशक्षणे घटस्यैवाभावान्न वर्तते, एवं घटकारण-दण्डचक्रकुलालादेरपि घटोत्पत्तिप्राक्क्षण एवावस्थानमपेक्षितम् परं कपालतत्संयोगयो-र्घटकारणयोर्घटोत्पत्तिक्षणेऽपि वर्तमानत्वमवश्यं समीहते। तथैव शरीरप्राणसंयोगस्यापि चित्तवृत्तिरूपकार्यकालेऽपि वृत्तिताऽपेक्ष्यतेऽन्यथा मरणक्षणेऽपि ज्ञानेच्छादयः प्रादुर्भवेयुः।

विरहमूर्च्छिता काचित् सख्या वर्ण्यते **दयितस्य** ● अधुनैव या कृशाङ्गी प्रियस्य गुणान् अनुस्मरन्ती 'अनेन प्रियवियोग आयातः' शय्यायां दृष्टा सा अचिरादेव हन्त बहुकथिताऽपि उत्तरं न ददाति। **हन्तपदस्य** ● दुःखातिशयबोधकत्वात्। **एतेन** ● अत्र पदव्यङ्ग्यतायां वैचित्र्यानुभवेन। विप्रलम्भस्य शोकस्य वेति विकल्पाभिप्रायमेव

मभिव्यक्तस्य पोषकम् । अयं च भावः स्वव्यञ्जकवाक्योत्तरवर्तिना वाक्यान्तरेण संदर्भघटकेन नायिकादेः प्रत्युज्जीवनवर्णने विप्रलम्भस्य, अन्यथा तु करुणस्य पोषक इति विवेकः । कवयः पुनरमुं प्राधान्येन न वर्णयन्ति । अमङ्गलप्रायत्वात् ।

संदेहाद्यनन्तरं जायमान ऊहो वितर्कः ।

स च निश्चयानुकूलः ।

'यदि सा मिथिलेन्द्रनन्दिनी नितरामेव न विद्यते भुवि ।
अथ मे कथमस्ति जीवितं न विनालम्बनमाश्रितस्थितिः ॥'

स्वात्मनि भगवतो रामस्यैषोक्तिः । भुवि सीतास्ति न वेति संदेहोऽत्र विभावः । भ्रूक्षेपशिरोङ्गुलिनर्तनमाक्षिप्तमनुभावः । न चासौ चिन्तेति शक्यं वदितुम् । चिन्ताया नियमेन निश्चयं प्रत्यप्रयोजकत्वात् । किं भविष्यति कथं भविष्यतीत्याद्याकारायाश्चिन्ताया इदमित्थं भवितुमर्हति प्रायश इत्याकारस्य वितर्कस्य विषयवैलक्षण्योपलम्भाच्च । न विनेत्यादिनोक्तोऽर्थान्तरन्यासोऽप्यस्मिन्नेवानुकूलः ।

इष्टासिद्धिराजगुर्वाद्यपराधादिजन्योऽनुतापो विषादः ।

स्फोरयति अयं भावः ० स्वं वस्तु । अन्यथा ० संयोगसम्भावनायामेव विप्रलम्भाङ्गीकारात् । तथा च प्रकरणमनुरुध्य विप्रलम्भस्य शोकस्य वोदाहरणमिदमितिभावः । ननु भावान्तरध्वनेरिव मरणध्वनेरुदाहरणादानेन न्यूनता स्यादिति परिहरति कवयः पुनः ० प्राधान्याभावे ध्वनित्वानुपपत्तेः ।

अथ वितर्कः ।

संदेहाद्य ० आदिपदेन विपर्ययस्य ग्रहणम् । स च वितर्कश्च । अत एव न्यायनये व्याप्तिनिर्णयद्वारा अनुमितिहेतुत्वमुक्तम् । यदि भुवि सीता न स्यात्तदा मम जीवितं न स्यादिति सीतां परित्यक्तवतो रामस्य वितर्कमुदाहरति यदि सा ० आलम्बनं विना आश्रितस्य स्थितिर्न भवति । सीता च मम जीवितस्यालम्बनम् । सामान्येन विशेषस्य समर्थनम् । अस्मिन्नेव ० वितर्कध्वनेरङ्गतां भजतेऽर्थान्तरन्यास इति भावः ।

अथ विषादः ।

इष्टासिद्धिः ० इष्टस्यासिद्धिः, राज्ञो गुरोर्वा अपराधादयो विभावाः । उदाहरणविवरणे वर्णिताश्चानुभावाः ।

उदाहरणम्—

'भास्करसूनावस्तं याते जाते च पाण्डवोत्कर्षे ।
दुर्योधनस्य जीवित कथमिव नाद्यापि निर्यासि ॥'

अत्र स्वापकर्षपरोत्कर्षयोर्दर्शनं विभावः । जीवितनिर्याणाशंसा, तदाक्षिप्तं वदननमनादि चानुभावः । अस्मिन्नेव च विषादध्वनौ दुर्योधनस्येत्यर्थान्तरसंक्रमितवाच्यध्वनिरनुग्राहकः । न चात्र त्रासभावध्वनित्वं शङ्क्यम् । परवीरस्य दुर्योधनस्य त्रासलेशस्याप्ययोगात् । नापि चिन्ताध्वनित्वम् । युद्ध्वा मरिष्यामीति तस्य व्यवसायात् । नापि दैन्यध्वनित्वम् । सकलसैन्यक्षयेऽपि विपदस्तेनागणनात् । न वा वीररसध्वनित्वम् । मरणस्य शरणीकरणे परापकर्षजीवितस्योत्साहस्याभावात् ।

इदं पुनरत्र नोदाहार्यम्—

'अयि पवनरयाणां निर्दयानां हयानां
श्लथय गतिमहं नो संगरं द्रष्टुमीहे ।

भास्करसूना ● हे दुर्योधनस्य जीवित कर्णे मृते पाण्डवानां विजये च जाते कथमद्यापि न निर्गच्छसि । स्वस्य दुर्योधनस्यापकर्षः पाण्डवानामुत्कर्षः । अर्थान्तर ● दुर्योधनस्य यः प्रसिद्धोऽर्थस्तदपेक्षया अन्यो लक्षणया कर्णदर्शनावधिजीवी, एकादशाक्षौहिणीपतिबन्धः । प्रतापेनागणितपाण्डवतेजाः; पाण्डवानां कृते वनवासस्य दाता, इत्यादिरर्थः । तत्र संक्रान्तं तत्परं जातं दुर्योधनपदं तेन व्यज्यते दुःखातिशयो न प्रधानोऽपि तु विषादध्वनेरनुग्राहकः । परवीरस्य उत्कृष्टवीरस्य । व्यवसायात् ● किं भविष्यतीत्याकारायाश्चित्तवृत्तेरभावात् । नागणनात् ● महापत्तिर्मम शिरसि इति विचार एव दैन्यमायाति । परापकर्ष ● कथमयं तुच्छो मम समक्षं समराङ्गणे स्थास्यतीतियावत् परस्यापकर्षभावना तावदेवोत्साहस्तिष्ठति । अत्र तु पाण्डवोत्कर्षो वर्णितः । परापकर्षो जीवितं यस्य परापकर्षेण वा जीवितः । उत्साहस्य स्थायिभावस्याभावे न वीररसशङ्का ।

कौरवैः सह युद्धप्रसङ्गे भीरुर्विराट्पुत्र उत्तरो वृहन्नलावेषधारिणम् अर्जुनं प्रत्याह तत्प्रत्युदाहरणत्वेनोपन्यस्यति अयि पवनरयाणाम् ● अयीति कोमलसम्बोधने । तदानीं

श्रुतिविवरममी मे दारयन्ति प्रकुप्यद्-
भुजगनिभभुजानां बाहुजानां निनादाः॥'

अत्र त्रासस्यैव प्रतीयमानत्वेन विषादस्याप्रतीतेः, लेशतया प्रतीतौ वा त्रास एव आनुगुण्यौचित्येन ध्वनिव्यपदेशायोग्यत्वात्।

अधुनैवास्य लाभो ममास्त्वितीच्छा औत्सुक्यम्।
इष्टविरहादिरत्र विभावः। त्वराचिन्तादयोऽनुभावाः।

यदाहुः—

'संजातमिष्टविरहादुद्दीप्तं प्रियसंस्मृतेः।
निद्रया तन्द्रया गात्रगौरवेण च चिन्तया॥'
अनुभावितमाख्यातमौत्सुक्यं भावकोविदैः॥' इति।

उदाहरणम्—

'निपतद्बाष्पसंरोधमुक्तचाञ्चल्यतारकम्।
कदा नयननीलाब्जमालोकेय मृगीदृशः॥'

अनर्थातिशयजनिता चित्तस्य संभ्रमाख्या वृत्तिरावेगः।

बृहन्नलासारथिरासीत्। युद्धोन्मुखत्वेन दयारहितानामश्वानां गतिं शिथिलां कुरु। अहं संग्रामं द्रष्टुं नेच्छामि। अमी सर्पसदृशबाहूनां क्षत्रियाणां बाणध्वनयो मम कर्णविवरं विदारयन्ति। प्रकुप्यद्भिः सर्पैः सदृशा इतिरीत्या समासः। त्रासस्यैव ● भीरुतया निनादश्रवणरूपविभावजन्यतया च। ननु इष्टासिद्धेर्विभावस्य जीवितनिर्गमनाशंसाया अनुभावस्य च प्रतीतेः कथन्न विषादस्य प्रतीतिरित्यत आह लेशतया ● सर्वथाऽभिव्यक्तस्य त्रासस्यैव प्राधान्यप्रतीतेस्तदनुग्राहकतयैव विषादोऽप्युपयुज्यत इति भावः।

अथौत्सुक्यम्।

सञ्जातमिति● इष्टविरहो विभावः, प्रियस्मरणमुद्दीपकम्। निद्रातन्द्रादयोऽनुभावाः।

निपतद्बा ● प्रिये प्रवासोन्मुखे विरहोद्रेकात्समागतान्यश्रूणि निपातेनाप्यशकुनभिया निश्चले तारके विधाय याऽरुधत् तस्यास्तादृशं नयननीलसरोजं कदा पश्येयम्। निपततां बाष्पाणां संरोधेन मुक्तं चाञ्चल्यं याभ्यां ते तादृशे तारके यस्य तत्। अत्र प्रियाविरहो विभावः, प्रियास्मरणमुद्दीपकम्, तत्प्रियाविषयकचिन्ताऽनुभावः।

उदाहरणम्—

'लीलया विहितसिन्धुबन्धनः सोऽयमेति रघुवंशनन्दनः ।
दर्पदुर्विलसितो दशाननः कुत्र यामि निकटे कुलक्षयः ॥'

एषा स्वात्मनि मन्दोदर्या उक्तिः । रघुनन्दनागमनमत्र विभावः । कुत्र यामीत्येतद्व्यङ्ग्यस्थैर्याभावोऽनुभावः । न चात्र चिन्ता प्राधान्येन व्यज्यत इति शक्यते वक्तुम् । कुत्र यामीति स्फुटं प्रतीतेन स्थैर्याभावेनोद्वेगस्येव चिन्ताया अप्रत्यायनात् । परं त्वावेगचर्वणायां तत्परिपोषकतया गुणत्वेन चिन्तापि विषयीभवति ।

चिन्तोत्कण्ठाभयविरहेष्टानिष्टदर्शनश्रवणादिजन्यावश्यकर्तव्यार्थप्रतिसंधानविकला चित्तवृत्तिर्जडता ।

इयं च मोहात्पूर्वतः परतश्च जायते ।

यदाहुः—

'कार्याविवेको जडता पश्यतः शृण्वतोऽपि वा ।
तद्विभावाः प्रियानिष्टदर्शनश्रवणे रुजा ॥
अनुभावास्त्वमी तूष्णींभावविस्मरणादयः ।
सा पूर्वं परतो वा स्यान्मोहादिति विदां मतम् ॥'

अथावेगः ।

अनर्थातिशयो विभावः, स्थैर्याऽभावोऽनुभावः । लीलया विहितं ० सागरसेतुबन्धनः । रघुवंशनन्दनो रामचन्द्रः । दर्पेण दुर्विलसितो दुष्टाचारी । नोद्वेगस्येव ० उद्वेग एव आवेगः । अप्रत्ययनादित्यस्य प्राधान्येनेत्यादिः । तत्परिपोषकतया आवेगपरिपोषकतया ।

अथ जडता ।

चिन्तोत्कण्ठा ० चिन्तोत्कर्षेत्याद्यपि पाठान्तरम् । इष्टानिष्टयोर्दर्शनश्रवणे । अवश्यं कर्तव्यस्य ज्ञानशून्या किं कर्तव्यविमूढता यदुच्यते ।

कार्याविवेको ० पश्यतः शृण्वतो वा जनस्य कर्तव्यस्याज्ञानं जडता । जडता विभावाः प्रियस्य अनिष्टस्य वा दर्शनश्रवणे रोगश्च ।

उदाहरणम्—

'यदवधि दयितो विलोचनाभ्यां सहचरि दैववशेन दूरतोऽभूत् ।
तदवधि शिथिलीकृतो मदीयैरथ करणैः प्रणयो निजक्रियासु ॥'

प्रियविरहोऽत्र विभावः । करणैश्चक्षुःश्रवणादिभिः क्रियासु तत्तत्प्रमितिषु प्रणयस्य शिथिलीकरणमनुभावः । मोहे चक्षुरादिभिश्चाक्षुषादेरजननम्, इह तु प्रकारविशेषवैशिष्ट्येन वाहुल्येनाजननमिति तस्मादस्य विशेषः । अत एवोदाहरणे शिथिलीकृत इत्युक्तम्, न तु त्यक्त इति ।

अतितृप्तिगर्भव्याधिश्रमादिजन्या चेतसः क्रियानुन्मुखतालस्यम् ॥

अत्र च नासामर्थ्यम् । नापि कार्याकार्यविवेकशून्यत्वम् । तेन कार्याकरणरूपस्यानुभावस्य तुल्यत्वेऽपि ग्लानेर्जडतायाश्चास्य भेदः ।

उदाहरणम्—

'निखिलां रजनीं प्रियेण दूरादुपयातेन विबोधिता कथाभिः ।
अधिकं नहि पारयामि वक्तुं सखि मा जल्प तवायसी रसज्ञा ॥'

प्रोषितभर्तृकाया विरहिण्या उक्तिः, यदवधि दयितो • हे सहचरि यस्मात्कालादारभ्य मम प्रियो भाग्यवशात् लोचनाभ्यां दूरं गतस्तस्मात्कालादेव ममेन्द्रियाणि स्वव्यापारे प्रणयमत्यजुः । प्रकारविशेषः • तत्तदसाधारणरूपेण । मोहे चक्षुरादिभिर्विषयसम्बन्धेऽपि सर्वथा ज्ञानस्याजननम् । जडतायान्तु स्थूलस्वरूपेण ज्ञानं जायते । वाहुल्येन • प्रकारबाहुल्येन ।

अथालस्यम् ।

अतितृप्ति • अधिकसन्तोषः, गर्भेणापि द्वन्द्व एव । नासामर्थ्यम् • ग्लानौ तु सामर्थ्याभावः । विवेकशून्यत्वम् • जडतायां वर्तते आलस्ये नास्ति । चास्य आलस्यस्य ।

निखिलां रजनीम् • हे सखि दूरादागतेन प्रियेण कथाभिः सुरतादिप्रसङ्गैरखिलां रजनीं जागरिता । अत्यन्तसंयोगे द्वितीया । तव जिह्वा लोहस्यातो न श्रान्ता भवति । नन्वत्र सुरतव्यापारः कथाभिरित्यनेन गोप्यते तथा च शरीरव्यापारजन्यत्वया

एषा हि प्रियागमनद्वितीयदिवसे मुहुर्निशावृत्तान्तं पृच्छन्तीं सखीं प्रति रजनिजागरणजनितालस्यायाः कस्याश्चिदुक्तिः। अत्र रजनिजागरणं विभावः। अधिकसंभाषणाभावोऽनुभावः। जडतायां मोहात्पूर्ववर्तित्वमुत्तरवर्तित्वं वा नियतम्, न त्वत्रेत्यपरो विशेषः। गोपनीयविषयत्वाद्यदि कथाभिरित्यविवक्षितवाच्यं तदा श्रमोऽस्तु परिपोषकः। श्रमजन्ये ह्यालस्ये श्रमस्य पोषकताया अवार्यत्वात्। अतितृप्त्यादिजनिते त्वालस्ये श्रमाद्विविक्तविषयत्वं बोध्यम्।

परोत्कर्षदर्शनादिजन्यः परनिन्दादिकारणीभूतश्चित्तवृत्तिविशेषोऽसूया॥

इमामेवासहनादिशब्दैर्व्यवहरन्ति।

यथा—

'कुत्र शैवं धनुरिदं क्व चायं प्राकृतः शिशुः।
भङ्गस्तु सर्वसंहर्त्रा कालेनैव विनिर्मितः॥'

एषा भग्नहरकार्मुकस्य भगवतो रामस्य पराक्रममसहमानानां तत्रत्यानां राज्ञामुक्तिः। अत्र च श्रीमद्दाशरथिबलस्य सर्वोत्कृष्टताया दर्शनं विभावः। प्राकृतशिशुपदगम्या निन्दानुभावः।

श्रमस्य व्यङ्ग्यताऽस्तु इत्याशङ्क्य अस्तु नाम परमालस्यस्य परिपोषकतयेति समाधत्ते गोपनीय ● कथाशब्दस्य कथा वाच्यार्थो न विवक्षितोऽपितु सुरतव्यापारो लक्ष्यार्थः, भूयान् श्रमो व्यज्यते। ननु तर्हि सर्वत्र श्रमसंकीर्णमेवोदाहरणमित्यतो विविक्तं दर्शयति अतितृप्त्या ●।

अथासूया

परोत्कर्षदर्शनं विभावः, परनिन्दाद्यनुभावः।

कुत्र शैवम् ● प्राकृतो वैशिष्ट्यरहितः साधारणः। भङ्गः शिवधनुषः। तत्रत्यानां सीतास्वयम्बरसदसि परिणयार्थं समागतानाम्।

'तृष्णालोलविलोचने कलयति प्राचीं चकोरव्रजे
मौनं मुञ्चति किं च कैरवकुले कामे धनुर्धुन्वति ।
माने मानवतीजनस्य सपदि प्रस्थातुकामेऽधुना
धातः किं तु विधौ विधातुमुचितो धाराधराडम्बरः ॥'

अत्रापि यद्यपि तदीयोच्छृङ्खलतादिदर्शनजन्या अनुचितकारित्वरूपनिन्दाप्रकाशानुभाविता कविगता विधात्रालम्बनासूया व्यज्यत इति शक्यते वक्तुम्, तथापि कार्यकारणयोस्तुल्यत्वादभिव्यक्तेनामर्षेण शबलितैवासौ न विविक्ततया प्रतीयते । नहि विधातुरपराध इव भगवतो रामस्यापराधोऽस्ति येन कवेरिव वीराणामप्यमर्षोऽभिव्यज्येत । स्वभावो हि महोन्नतक्रियानिष्पादनं वीराणाम् । अत्राप्रस्तुतचन्द्रवृत्तान्तेन प्रस्तुतराजकुमारादिवृत्तान्तस्य ध्वननान्नास्त्यसूयाध्वनित्वमिति तु न वाच्यम् । एकध्वनेर्ध्वन्यन्तराविरोधित्वात् । अन्यथा महावाक्यध्वनेरवान्तरवाक्यध्वनिभिः, तेषां च पदध्वनिभिः सह सामानाधिकरण्यं कुत्रापि न स्यात् ।

प्रकृतं कुमारस्यागमनं कुतश्चित्कारणादवरुद्धं ध्वनितुं चन्द्रवृत्तान्त प्रकृतानुकूलममर्षशवलितमुदाहरति तृष्णालोल ० चन्द्रोदयवर्णनम् । तदानीञ्च मेघाडम्बरः । कलयतीति सप्तम्यन्तम् । चन्द्रिकापानतृष्णया लोलानि लोचनानि यस्यैवंभूते चकोरकुले प्राच्यां दिशि दृष्टिपातं कुर्वति सति कुमुदिनीसमूहे विकसति सति कामे धनुष्टङ्कारयति सति सपदि उद्दीपनातिशयेन मानिनीजनस्य माने गन्तुमिच्छति सति हे धातः किं चन्द्रे मेघाडम्बर उचितः । तदीयोच्छृङ्खल ० धातुरुच्छृङ्खलतादिदर्शनं विभावः, निन्दाप्रकाशोऽनुभावः, आलम्बनं विषयः कार्यकारणयोरसूयाऽमर्षयोरुभयोर्विभावानुभावयोरत्र विद्यमानत्वात् । आमर्षस्य धातुरपराधो विभावः, अधिक्षेपवचनमनुभावः । असौ असूया । तथा च विविक्तोदाजिहीर्षया कुत्र शैत्यमित्याद्युदाहृतम् । ननु तत्रापि श्रीरामे राज्ञाममर्ष इत्यत आह नहि विधातु ० ननु पिनाकभङ्गे राज्ञां मानापनोदनमेवापराध इत्याशङ्कां मनसि निधाय श्रीरामस्य न मानापनोदाय प्रवृत्तिरपि तु स्वभावतो मानापनोदनं जातं नतु तेन कृतमित्याशयेनाह स्वभावो हि ० अत्राप्रस्तुतप्रशंसैवास्तु इति मतं निराचष्टे एकध्वनेर् ० असूयाऽमर्षयोः प्राप्तयोस्त्यक्तुमशक्यत्वात् । अङ्गाङ्गित्वं गौणं प्राधान्यञ्चोभयध्वनित्वविरोधि न तु सामानाधिकरण्यं व्यभिचारादित्याशयेनाह अन्यथा ० ।

वियोगशोकभयजुगुप्सादीनामतिशयाद्ग्रहावेशादेश्चोत्पन्नो व्याधिविशेषोऽपस्मारः ॥

व्याधित्वेनास्य कथनेऽपि विशेषाकारेण पुनः कथनं बीभत्सभयानकयोरस्यैव व्याधेरङ्गत्वं नान्यस्येति स्फोरणाय। विप्रलम्भे तु व्याध्यन्तरस्यास्यापि च।

उदाहरणम्—

'हरिमागतमाकर्ण्य मथुरामन्तकान्तकम्।
कम्पमानः श्वसन्कंसो निपपात महीतले ॥'

अत्र भयं विभावः। कम्पनिःश्वासपतनादयोऽनुभावाः।

अमर्षादिजन्यवाक्पारुष्यादिकारणीभूता चित्तवृत्तिश्चपलता ॥

यदाहुः—

'अमर्षप्रातिकूल्येर्ष्यारागद्वेषाश्च मत्सरः।
इति यत्र विभावाः स्युरनुभावस्तु भर्त्सनम् ॥
वाक्पारुष्यं प्रहारश्च ताडनं वधबन्धने।
तच्चापलमनालोच्य कार्यकारित्वमिष्यते ॥' इति।

अथापस्मारः।

ननु व्याधिर्भावो वर्णित एव व्याधित्वेनापस्मारस्यापि व्यभिचारित्वमायातमेव, तत्तद्विशेषरूपेण वर्णने तु बहूनां वर्णनीयतापत्तिरित्याशङ्क्य समाधत्ते व्याधित्वेनास्य • कमपि विशेषं वर्णयितुं विशेषरूपेणापस्मारस्यापि वर्णनम्। विशेषश्च बीभत्सभयानकयोरपस्मार एव व्याधिरङ्गं नान्ये व्याधयः, विप्रलम्भशृङ्गारे तु व्याध्यन्तराणि अपस्मारश्चाङ्गमिति। तथाचापस्मारत्वेन वर्णनमन्तरा अपस्मारत्वेनैव न तु व्याधित्वेन बीभत्सभयानकयोरुपयोगो न संघटेत तदर्थं तथावर्णनमिति भावः। श्रीकृष्णभयात्कंसस्य अपस्मारं वर्णयति हरिमागत • अन्तकस्य यमराजस्याप्यन्तकं नाशकम्।

अथ चपलता।

अमर्षादि • आदिपदेन द्वेषादयः। अमर्षप्रा • अमर्षः, प्रातिकूल्यम्, ईर्ष्या रागो द्वेषो मत्सरश्च विभावः। चापल्यस्वरूपमाह अनालोच्य कार्यकारित्वम्।

उदाहरणम्—

'अहितव्रत पापात्मन्मैवं मे दर्शयाननम् ।
आत्मानं हन्तुमिच्छामि येन त्वमसि भावितः ।'

एषा भगवदनुरक्तिविघटनोपायमपश्यतः प्रह्लादं प्रति हिरण्यकशिपोरुक्तिः । भगवद्द्वेषोत्थापितः पुत्रद्वेषोऽत्र विभावः । आत्मवधेच्छा परुषवचनं चानुभावः । न चामर्ष एवात्र व्यज्यत इति वाच्यम् । सदैव भगवदनुरागिणि प्रह्लादे हिरण्यकशिपोरमर्षस्य चिरकालसंभृतत्वेनात्मवधेच्छाया इदंप्रथमतानुपपत्तेः । इदंप्रथमकार्यस्य चेदंप्रथमकारणप्रयोज्यतया प्राचीनचित्तवृत्तिविलक्षणाया एव चपलताख्यचित्तवृत्तेः सिद्धेः । न चामर्षप्रकर्ष एवात्मवधेच्छादिकारणमभिव्यज्यतामिति वाच्यम् । प्रकर्षस्यापि स्वाभाविकविलक्षणलक्षणताया आवश्यकतया तस्यैव चपलतापदार्थत्वात् ।

नीचपुरुषेष्वाक्रोशनाधिक्षेपव्याधिताडनदारिद्र्येष्टविरहपरसंपद्दर्शनादिभिः, उत्तमेषु त्ववज्ञादिभिर्जनिता विषयद्वेषाख्या रोदनदीर्घश्वासदीनमुखतादिकारिणी चित्तवृत्तिर्निर्वेदः ॥

अहितव्रत ॰ अहितं व्रतं यस्य तत्सम्बुद्धौ, पापात्मन् एवं मे मुखं मा दर्शय । भावित उत्पादितः । चिरकाल ॰ चिरात्स्थितत्वेन । इदंप्रथमता ॰ इयमेव प्रथमा आत्मवधेच्छा न तु प्राक्कदाचिदन्या । तस्य भावस्तत्ता तस्या अनुपपत्तेः । यदि प्रह्लादालम्बनो हिरण्यकशिपोरमर्ष एवात्मवधेच्छायाः कारणमभविष्यत् ततः प्रागपि उदपत्स्यत्, नोदपादि तस्मान्नामर्षजन्या अपि तु चापल्यजन्या इत्येवाह इदंप्रथम ॰ इदानीं प्रथममिव जायमानं कार्यं स्वप्राक् सद्यो जायमानेन कारणेन प्रयोज्यम् । चित्तवृत्तिरमर्षाकारा । माभूदमर्षस्तादृशेच्छाकारणमुक्तव्यभिचारात् किन्तु अमर्षस्य प्रकर्षः स तु इदानीमेव जातो न तु प्राक्, प्राक् तु अमर्ष एवासीदित्याशयेनाह न चामर्ष ॰ स्वाभाविक ॰ अमर्षस्वभावस्तु चिरन्तनो न कारणमपि तु अमर्षगतो विलक्षणः प्रकर्ष इति कथ्यमाने अमर्षविलक्षणमात्मवधेच्छायाः कारणमित्यनिच्छताऽपि उक्तमेव, तथा च नाममात्रे विवादः, त्वयोच्यते अमर्षो न कारणमपितु अमर्षप्रकर्षः, मयोच्यते अमर्षो न कारणमपि तु चापल्यं वस्तु तदेव ।

उदाहरणम्—

'यदि लक्ष्मण सा मृगेक्षणा न मदीक्षासरणिं समेष्यति ।
अमुना जडजीवितेन मे जगता वा विफलेन किं फलम् ॥'

नित्यानित्यवस्तुविवेकजन्यत्वाभावान्नासौ रसव्यपदेशहेतुः । देवादिविषया रतिर्यथा—

'भवद्द्वारि क्रुध्यज्जयविजयदण्डाहतिदल-
त्किरीटास्ते कीटा इव विधिमहेन्द्रप्रभृतयः ।
वितिष्ठन्ते युष्मन्नयनपरिपातोत्कलिकया
वराकाः के तत्र क्षपितमुर नाकाधिपतयः ॥'

अत्रापमानसहनभगवद्द्वारनिषेवणभगवत्कटाक्षपाताभिलाषादिभिर्ब्रह्मादिगता भगवदालम्बना रतिर्नाभिव्यज्यते । अपि तु भगवदैश्वर्यम-

---

अथ निर्वेदः ।

नीचपुरुषेषु भर्त्सनगालीश्रवणादिना तिरस्कारेण व्याधिना ताडनेन दारिद्र्येण इष्टस्य विरहेण परकीयसम्पद उत्कर्षस्य दर्शनश्रवणादिना च निर्वेदो जायते । उत्तमपुरुषेषु अपमानादिना च निर्वेदो जायते । रोदनं दीर्घनिश्वासः, मुखाकृत्या लक्ष्यमाणदैन्यप्रभृतयोऽनुभावाः । विषयविद्वेषाकारा चित्तवृत्तिर्निर्वेदः ।

सीताविरहिणो रामस्य लक्ष्मणं प्रत्युक्तिः **यदि लक्ष्मण सा** ● हे लक्ष्मण यदि सा मृगनयनी सीता मम नेत्रसमक्षं नायास्यति तदा मम जीवनं जगच्च व्यर्थम् इत्यर्थः । ननु निर्वेदस्य शान्तस्थायितया शान्तरस एव ध्वन्यतामित्याशङ्क्य नित्यानित्यवस्तुविचारजन्मैव निर्वेदः शान्तस्थायी न तु विरहादिजन्यः । तथा चास्य व्यभिचारित्वमेवेत्याशयेनाह **नित्यानित्य** ● प्राक् प्रतिज्ञातं रतिरूपं चतुस्त्रिंशं व्यभिचारिभावमुदाहरति **भवद्वारि** ● विष्णु प्रति भक्तस्य कवेरुक्तिः। हे मुरारे भवतां द्वारि कामपि समाहामासाद्य ब्रह्ममहेन्द्रादिमहान्तो देवा गच्छन्ति तदा भवद्द्वारपालाभ्यां जयविजयाभ्यां तिरस्क्रियमाणाः कीटा इव लघवः सन्तस्तत्र सन्ति तदा स्वर्गैकैकभागाधिपतीनां न्यूनैश्वर्याणां कुबेरादीनां का कथा । तेऽपि ब्रह्ममहेन्द्रादयश्चिरं व्यवहर्तुं तु न प्रभवन्ति किन्तु भवन्नयनयोस्तेषामुपरि परितः पातमात्रस्योत्कण्ठया चिरं द्वारे तिष्ठन्ति । क्रुध्यतोजयविजययोर्दण्डाघातेन भज्यमानं किरीटं येषान्ते, वराका दीनाः, क्षपितमुर मुरारे, कुबेरादयो नाकराजाः शक्रस्तु महेन्द्रः । **नाभिव्यज्यते** ● अधिकैश्वर्यादिसमीहयाऽपि अपमान-

वाङ्मनसगोचर इति चेत्तथापि तादृशभगवदैश्वर्यवर्णनानुभावितया कविगतभगवदालम्बनरत्या ध्वनित्वमक्षतमेव ।

इदं वोदाहरणम्—

'न धनं न च राज्यसंपदं नहि विद्यामिदमेकमर्थये ।
मयि धेहि मनागपि प्रभो करुणाभङ्गितरङ्गितां दृशम् ॥'

अत्र धनाद्यपेक्षाशून्यस्य भगवद्दृगन्तपाताभिलाषो हि भगवत्यनुरक्तिं व्यनक्ति । एवं संक्षेपेण निरूपिता भावाः ॥

अथ कथमस्य संख्यानियमः मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकुतुकोत्कण्ठाविनयसंशयधाष्टर्यादीनामपि तत्र तत्र लक्ष्येषु दर्शनात् इति चेत्, न । उक्तेष्वेवैषामन्तर्भावेण संख्यान्तरानुपपत्तेः । असूयातो मात्सर्यस्य, त्रासादुद्वेगस्य, अवहित्थाख्याद्भावाद्दम्भस्य, अमर्षादीर्ष्यायाः, मतेर्विवेकनिर्णययोः, दैन्यात्क्लैब्यस्य, धृतेः क्षमायाः, औत्सुक्यात्कुतुकोत्कण्ठयोः, लज्जाया विनयस्य, तर्कात्संशयस्य, चापलाद्धाष्टर्यस्य च वस्तुतः सूक्ष्मे भेदेऽपि नान्तरीयकतया तदनतिरिक्तस्यैवाध्यवसायात् । मुनिवचनानुपालनस्य संभव उच्छृङ्खलताया अनौचित्यात् । एषु च संचारिभावेषु मध्ये केचन केषांचन विभावा अनुभावाश्च भवन्ति । तथा हि—ईर्ष्याया निर्वेदं प्रति विभावत्वम्, असूयां प्रति चानुभावत्वम् । चिन्ताया निद्रां प्रति विभावत्वम्,

---

सहनादीनां सम्भवात् । किन्तु महान्त ऐश्वर्यशालिनोऽपि यमेवं कीटा इव निषेवन्ते तस्य कीदृशमैश्वर्यमित्याह अपि तु । नन्वैश्वर्यस्यावाङ्मनसगोचरत्वं वस्तु व्यज्यमानं प्रधानं न तु कविगता रतिरिति कश्चित्प्रत्यवतिष्ठेत तदाप्याह इदं वो० । करुणा० दयालहर्यास्तरङ्गेण युक्ताम् । नान्तरीयकतया० तेनोदाहरणेऽपि संकरः । तदनतिरिक्तस्यैवाध्यवसायात० अयं भावः असूयातो मात्सर्यस्य भेदेऽपि मात्सर्यव्यावर्तकं विशेषणमसूयालक्षणे न निवेश्यते तत्साधारणञ्च निवेश्यते तेन असूयालक्षणेन मात्सर्यमपि संगृह्यते । एवमन्येष्वपि बोध्यम् । सञ्चारिभावेषु० षष्ठ्यर्थे सप्तमी । निद्रां प्रति०

औत्सुक्यं प्रति चानुभावतेत्यादि स्वयमूह्यम् ।

रसाभासनिरूपणम्

तत्र—अनुचितविभावालम्बनत्वं रसाभासत्वम् ॥

विभावादावनौचित्यं पुनर्लोकानां व्यवहारतो विज्ञेयम् । यत्र तेषामयुक्तमिति धीरिति केचिदाहुः । तदपरे न क्षमन्ते । मुनिपत्न्यादिविषयकरत्यादेः संग्रहेऽपि बहुनायकविषयाया अनुभयनिष्ठायाश्च रतेरसंग्रहात् । तत्र विभावगतस्यानौचित्यस्याभावात् । तस्मादनौचित्येन रत्यादिर्विशेषणीयः । इत्थं चानुचितविभावालम्बनाया बहुनायक-

---

क्वाचित्कमनुरुध्य । क्वचिच्चिन्तया रहस्यनिषेवणेन निद्रा जायते । अथवा निद्रापदं स्वप्नपरं स्वप्नस्तु चिन्तया जायते एव विशेष तस्तु चिन्तया निद्रा नागतेति व्यवहारः ।

अथ रसाभासनिरूपणम् ।

प्राचीनरीत्या लक्षणमाह **अनुचित** • विभावो द्वेधा आलम्बनमुद्दीपनञ्च । यस्य रसस्यालम्बनविभावोऽनुचितः स रसाभासस्तत्त्वं रसाभासत्वम् । **व्यवहारतः** • यथा पुरुषस्यास्यां रतिरयुक्ता एवं स्त्रियोऽप्यस्मिन् पुरुषे रतिरयुक्ता इति व्यवहारो बुद्धिर्वा तदालम्बनमनुचितम् । **केचिदाहुः** • आलम्बने अनौचित्यं निवेशयन्तः केचिदित्यर्थः । अपरे स्थायिभाव एव अनौचित्यं निविविक्षवो न तु विभावे । **संग्र ऽपि** • मुनिपत्न्यादीनामालम्बनत्वस्यानौचित्यात् । **तस्माद्** • तथा चानुचितस्थायिकत्वं लक्षणं फलितम् । यस्य रसस्य स्थायिभावो रत्यादिरनुचित स रसो रसाभासस्तत्त्वं रसाभासत्वम् ।

अत्र वदन्ति । लोकस्य युक्तता धीस्तु विभावं स्थायिभावं स्थायिभावाश्रयञ्च समीक्ष्यैव जायते न तु इयं रतिरयुक्ता इति धी; परमत्रैतद्रतिरयुक्तेति धीः । तथा च रत्यादौ न युक्तत्वमयुक्तत्वं वा लोकव्यवहारतो निर्णेतुं प्रभूयते किन्तु विभावस्यानौचित्यादेव रत्यादावपि अनुचितता । बहुनायकविषयायामपि रतौ नायकनिष्ठं बहुत्वमालम्बनगतानौचित्यप्रयोजकम् आलम्बनानौचित्येन च रतेरनुचितता । एवमनुभयनिष्ठयामपि रतेरालम्बनत्वस्य रत्यनाश्रयत्वमेवानौचित्यप्रयोजकम् । एवञ्च सर्वत्रालम्बनस्यापि अनौचित्यात् सूत्रलक्षणेनापि सर्वासां रतीनां संग्रहात् प्राचां लक्षणमपि सम्यगेवेति । अत्रत्यमर्मप्रकाशे तस्मादिति प्रतीक एव 'तथा चानुचितविभावालम्बनकरतित्वं तत्त्वं ज्ञेयमित्युपलभ्यते । तत्र रतिपदस्य स्थायिभावमात्रोपलक्षकत्वे विभावालम्बनपदस्य प्रयोजन न पश्यामि ।

विषयाया अनुभयनिष्ठायाश्च संग्रह इति। अनौचित्यं च प्राग्वदेव। तत्र रसाद्याभासत्वं रसत्वादिना न समानाधिकरणम्। निर्मलस्यैव रसादित्वात्। 'हेत्वाभासत्वमिव हेतुत्वेन' इत्येके। 'नह्यनुचितत्वेनात्महानिः, अपि तु सदोषत्वादाभासव्यवहारः। अश्वाभासादिव्यवहारवत्' इत्यपरे।

उदाहरणम्--

'शतेनोपायानां कथमपि गतः सौधशिखरं
सुधाफेनस्वच्छे रहसि शयितां पुष्पशयने।
विबोध्य क्षामाङ्गीं चकितनयनां स्मेरवदनां
सनिश्वासं श्लिष्यत्यहह सुकृती राजरमणीम्॥'

यदि च तत्त्वं पदेन रतिगतानौचित्यं ध्रियते तदा प्राचीनरीतिः प्रतिभाति परं तादृशं सन्दर्भं नावलोकयामीति चिन्तनीयम्। प्राग्वदेव • लोकबुद्ध्यनुसारादेव। रसाभासो न रसः किन्तु भिन्न एव रसवदवभासते रसस्य आभास इति समासः। यथा व्याप्तिपक्षधर्मतादिविशिष्टो हेतुः भवति हेत्वाभासस्तु व्याप्तिपक्षधर्मत्वादीनां कस्यचित्सर्वेषां वाऽभावेन विशिष्टः। तथा च विशेषणविरोधात् हेतुहेत्वभासयोर्भेदः। तयोर्भेदः। तद्धर्मयोर्नैकत्र स्थितिरिति न सामानाधिकरण्यम्। निर्मलस्यैव • आलम्बने स्थायिभावे वाऽनौचित्येन रहितस्यैव। रसाभासे तु तयोरनौचित्यं तिष्ठत्येव। तथा च धर्मविरोधान्न सामानाधिकरण्यम्। रसादीत्यत्रादिपदेन भावादिः। हेतुत्वेन न समानाधिकरणमित्यनेनान्वयि। अथ रसलक्षणे स्थायिभावयोरनुचितयोर्व्यावर्तकं विशेषणं नोपात्तं तेन पूर्वोक्तेन अनौचित्येन सहितोऽपि रस एव। रसत्वं रसरसाभासगतं साधारणम्। सामान्यतो रसो द्विधा अनौचित्यदोषेण रहितः सहितश्च। तथा च तादृगानौचित्यविशिष्टो रसाभासो रस एव। दृष्टान्तोऽपि दृष्टान्ताभास एव व्याप्तिपक्षधर्मत्वादिविशिष्टस्यैव हेतुत्वे दुष्टो हेतुरिति व्यवहारो न स्यात्। तथा च दुष्टो हेतुः सद्धेतुरिति व्यवहारात् हेतुत्वमपि साधारणमङ्गीकार्यम्, रसत्वमपि दुष्टो रस इति व्यवहारमनुरुद्ध्य। आभासो दोषो रसाभासो रसस्यानौचित्यं दोष इत्याह नह्यनुचित • आत्महानिः रसत्वहानिः। अश्वाभासो दुष्टोऽश्वः।

'साधारणस्य जनस्य राजरमण्यां शृङ्गाराभासमुदाहरति शतेनोपायानाम् • उपायानां शतेन कथमपि महता कष्टेन प्राणान् तृणीकृत्य सुधाधवलितस्य राजप्रासादस्य

अत्रा म्बनमनुचितप्रणाया राजरमणी। रहोरजन्याद्युद्दीपनम्। साहसेन राजान्त पुरे गमनम्, प्राणेषूपेक्षा, निःश्वासाश्लेषादयश्चानुभावाः। शङ्कादयः संचारिणः। निषिद्धालम्बनकत्वाच्चास्या रतेराभासत्वं रसस्य। न चात्र चकितनयनामित्यनेन परपुरुषस्पर्शत्रासाभिव्यक्त्या रतेरनुभयनिष्ठतेन्याभासताहेतुर्वाच्यः। अस्याश्च चिराय तस्मिन्नासक्ताया अन्तःपुरे परपुरुषागमनस्यात्यन्तमसंभावनया क एष मां बोधयतीत्यादावुचित एव त्रासः। अनन्तरं च परिचयाभिव्यक्त्या सोऽयं मत्प्रियो मदर्थं प्राणानपि तृणीकृत्यागत इति ज्ञानादुत्पन्नं हर्षमभिव्यञ्जयत्स्मेरवदनामिति विशेषणं रतिं तदीयामपि व्यनक्ति।

भागं गतः, सुधाफेनवदतिस्वच्छायां पुष्पशय्यायां रहसि शयितां कृशाङ्गीं राजरमणीं रहस्त्वादेव शङ्काभावाद्, जागरितां कृत्वा, दुर्गमे राजप्रासादे कस्य सहसाऽऽगमनमिति त्रासोद्रेकात् प्राक् चकितनयनाम्, पश्चाच्च प्रणयिनं प्रतीत्य प्रफुल्लवदनां पुण्यशाली सन् अहहेति शङ्कायां सनिश्वासमालिङ्गति। ननु नेदमनुचितालम्बनस्योदाहरणं किन्तु अनुभयनिष्ठायाः रतेः, नायिकायां रतेरभावात्, अतएव परपुरुषस्पर्शकृतस्य त्रासस्य व्यञ्जकं चकितनयनामिति विशेषणं सार्थकम् इत्याशङ्कने न चात्र०। समाधानमाह अस्याश्च० आसक्तावपि रतिसत्त्वेऽपि त्रासमुपपादयति अन्तःपुरे इत्यादिना। तदीयामपि० अत्र मर्मप्रकाशः। नायिकासम्बन्धिनीं रतिमपीत्यर्थः हर्षसमुच्चायकोऽपिः, इति लिखन् भिन्नक्रममपि योजयति। यद्यपि तदायामपि रतिमिति यथा स्थानमपिना नायकीया रतिः समुच्चीयमाना भाति, व्यञ्जने च सापि पद्येनेति निर्विवादमेव, सजातीयस्य समुच्चयोऽप्यनुगृह्यते रत्योः सजातीयत्वाद्हर्षस्य च भिन्नजातीयत्वात्, मनुते चैवमेव सरला टीका, आक्षिपति च भृशं नागेशम्, तथापि मर्मस्पृक् मर्मप्रकाश एव। तथाहि समुच्चीयमानस्य समानकर्तृकक्रियायामन्वयः प्राकृतिकः। चैत्रो धवं खदिरञ्च छिनत्ति इत्यादौ धवखदिरयोश्चैत्रकर्तृकक्रियायां छेदनेऽन्वयो न तु मैत्रकर्तृके छेदने। तथैव पद्यं व्यनक्तु नाम नायकसम्बन्धिनीं रतिं स्मेरवदनामिति विशेषणन्तु नायिकारतिमेव व्यनक्ति न कथमपि नायकरतिम्। तथाच कर्तृणा तेनैव विशेषणेन व्यज्यमानस्य हर्षस्यैव समुच्चयः सम्यक्। सन्निहितश्च हर्षः। हर्षस्य स्फुटोक्त्या समुच्चयाभावविवक्षा तु सरलाया मन्दाक्षायैव। नायिकारतिः समुच्चीयत इत्युक्तिरपि तथैव। धवं खदिरञ्चेत्यत्र स्फुटोक्तस्य समुच्चयात्, अन्यसमुच्चयस्यैव युक्तत्वात्। इदन्तु ध्येयम्।

परं तु प्राधान्यं नायकनिष्ठाया एव रतेः । सकलवाक्यार्थत्वात् ।

यथा वा—

भवनं करुणावती विशन्ती गमनाज्ञालवलाभलालसेषु ।
तरुणेषु विलोचनाब्जमालामथ बाला पथि पातयांबभूव ॥'

अत्र कुतश्चिदागच्छन्त्याः पथि तदीयरूपयौवनगृहीतमानसैर्युवभिरनुगम्यमानायाः कस्याश्चिद्भवनप्रवेशसमये निजसेवासार्थक्यविज्ञानाय गमनाज्ञापनरूपलाभलालसेषु तेषु परमपरिश्रमस्मरणसंजातकरुणाया गमनाज्ञादाननिवेदकस्य विलोचनाम्बुजमालापरिक्षेपस्यानुभावस्य वर्णनादभिव्यज्यमाना रतिर्बहुवचनेन बहुविषया गम्यत इति । भवत्ययमपि रसाभासः ।

यथा वा—

'भुजपञ्जरे गृहीता नवपरिणीता वरेण वधूः ।
तत्कालजालपतिता बालकुरङ्गीव वेपते नितराम् ॥'

विशेषणं हर्षं तदीयां रतिञ्च व्यनक्ति इतिरीत्या अनुक्त्वा हर्षमभिव्यञ्जयदित्युक्तिर्ग्रन्थकृतां हर्षाभिव्यक्तिद्वारैव नायिकारतेरभिव्यक्तिरिति सूचनायै । नायिकानायकरत्योः कस्या ध्वननमिति निर्णयति परन्तु • । सकल • नायिकारतेस्तु स्मेरवदनामित्येकदेशव्यङ्ग्यत्वात् । बहुनायकविषयां रतिम् उदाहरति भवनम् • परमसुन्दरीं कञ्चिन्मार्गं गच्छन्तीं बहवो युवानः सौन्दर्यलुब्धाः अन्वगमन् । तस्या भवनप्रवेशसमये स्वपरावर्तनस्य कृते आज्ञां समैहन्त । सा च यूनामेतावता श्रमेण समुदितकरुणा तेषामुपरि नयनकमलमालां कतिपयकटाक्षजालमपातयत् । असकृत् प्रीत्याऽवैक्षतेत्यर्थः । नयनपातेन नायिकारतिः यूनां रतिस्तु तेषां तदनुसरणेन व्यज्यतेऽतो नानुभयनिष्ठता । गमनाज्ञाया लवस्य लाभे लुब्धेषु तरुणेषु । निजसेवा • यूनां स्वकीयानुगमसेवास्वीकाराय नायिकाकर्तृकाय । परिश्रमस्तरुणकर्तृकः । अनुभावस्य • नायिकानिष्ठरतेरनुभावस्य । बहुवचनं तरुणेषु इति । नायिकारतिश्च प्रधानमित्यूह्यम् ।

अनुभयनिष्ठां रतिमुदाहरति भुजपञ्जरे • वरश्चानुरक्तो नववधूं भुजाभ्यामालिङ्गति वधूश्चाजातरतिः पञ्जरपतितेव त्रासात्कम्पते । भुजावेव पञ्जरामिति पञ्जरस्य

अत्र रतेर्नववध्वा मनागप्यस्पर्शादनुभयनिष्ठत्वेनाभासत्वम् ।

तथा चोक्तम्—

'उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च ।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ।' इति ।

अत्र मुनिगुरुशब्दयोरुपलक्षणपरतया राजादेरपि ग्रहणम् ।

अथात्र किं व्यङ्ग्यम्—

'व्यानम्राश्चलिताश्चैव स्फारिताः परमाकुलाः ।
पाण्डुपुत्रेषु पाञ्चाल्याः पतन्ति प्रथमा दृशः ॥'

अत्र व्यानम्रतया धर्मात्मताप्रयोज्यं युधिष्ठिरे सभक्तित्वम्, चलिततया स्थूलाकारताप्रयोज्यं भीमसेने सत्रासत्वम्, स्फारिततया अलौकिकशौर्यश्रवणप्रयोज्यमर्जुने सहर्षत्वम्, परमाकुलतया परमसौन्दर्यप्रयोज्यं नकुलसहदेवयोरौत्सुक्यं च व्यञ्जयन्तीभिर्दृग्भिः पाञ्चाल्या बहुविषयाया रतेरभिव्यञ्जनाद्रसाभास एवेति नव्याः ।

प्राधान्येन वेपने उपयोगात् । नवपरिणीततया शृङ्गारानभिज्ञा । बालकुरङ्गीवेत्युपमातो वालेति अप्राप्तस्मरशरस्पर्शा ।

तत्कालेत्यनेन प्रथममेव वरसमागमः सूच्यते । उपनायक० उपनायको जारादिः। आभासत्वमिति पद्यस्य शेषः । किं व्यङ्ग्यम् ० रसो रसाभासो वा, रसाभासश्च बहुनायकविषयतया रतेः । द्रौपद्याः पञ्चसु विवाहितप्रियेषु पाण्डुपुत्रेषु रतिमुदाहरति व्यानम्रा ० प्रथमा इत्यनेन पूर्वं दर्शनाभावः सूच्यते । वृत्तिग्रन्थेनैव स्फोरितार्थमिदं पद्यम् । पाञ्चाली द्रौपदी । व्यानम्रतया० दृशो विशेषेणासमन्तात् नम्रतया, सभक्तित्वमित्यादेर्व्यञ्जयन्तीभिरित्यत्रान्वयः । युधिष्ठिरे नम्रा दृष्टिर्युधिष्ठिरविषयिणीं भक्तिं व्यनक्तीत्यर्थः । एवमेव सत्रासत्वमित्यादावपि ऊह्यम् । एवेति ० एतेन रसत्वव्यवच्छेदः । व्यङ्ग्य इति शेषः । तथा स्वतन्त्रविचारशालिनः । अथारुचिबीजन्तु यद्यपि न अपरिणीतबहुनायकविषयकत्वमेव रते रसाभासत्वप्रयोजकं न तु परिणीतबहुनायकविषयकत्वमिति लक्षणे निवेशो येन परिणीतबहुनायकविषयकत्वेऽपि रस एव भवेत् किन्तु बहुनायकविषयकत्वादेव रतेरनौचित्याद् रसाभासत्वमिति वक्तुं शक्यते तथापि रतेरनौचित्य-

प्राञ्चस्त्वपरिणीतबहुनायकविषय एव रतेराभासतेत्याहुः । तत्र शृङ्गाररस इव शृङ्गाराभासोऽपि द्विविधः । संयोगविप्रलम्भभेदात् । संयोगाभासस्त्वनुपदमेवोदाहृतः ।

विप्रलम्भाभासो यथा—

'व्यत्यस्तं लपति क्षणं क्षणमथो मौनं समालम्बते
सर्वस्मिन्विदधाति किं च विषये दृष्टिं निरालम्बनाम् ।
श्वासं दीर्घमुरीकरोति न मनागङ्गेषु धत्ते धृतिं
वैदेहीकमनीयताकवलितो हा हन्त लङ्केश्वरः ॥'

अत्र सीतालम्बनेयं लङ्केशगता विप्रलम्भरतिरनुभयनिष्ठतया जगद्गुरुपत्नीविषयकतया चाभासतां गता, व्यत्यस्तं लपतीत्यादिभिरुक्तिभिर्व्यज्यमानैरुन्मादश्रममोहचिन्ताव्याधिभिस्तथैवाभासतां गतैः

प्रयोजकं न बहुनायकविषयकत्वं ग्रन्थकृदभिप्रेतम् । किन्तु लोकानामयुक्तत्वबुद्धिविषयत्वं, न भवति च लोकानां परिणीतविषयिणी रतिरयुक्तेति धीः ।

किन्तु अपरिणीतविषयिण्येव रतिरयुक्तेति । तथा च परिणीतविषयकतया न रतेरनौचित्यमिति । यद्यपीत्यादिनोक्तयुक्त्या मर्मप्रकाशः प्राचां मतेऽरुचिं प्रदर्शयति तत्तु लोकबुद्धिमुपेक्ष्य बहुनायकविषयकत्वं स्वतन्त्ररतेरनौचित्यप्रयोजकं यद्युच्येत तदैव सम्यक् ।

सम्यक् च साऽपि पन्थाः यथा अनन्यभक्तिः समीचीना भवति तथाऽनन्यप्रेमरूपा रतिरपि । अनेकविषया रतिर्नैकस्मिन्नपि पूर्णेति प्रत्ययात् रतेरनौचित्यम् । एवमनुभयनिष्ठाया अपि रतेर्गतिः परिणीतायामपि बालवध्वां वरस्य रतिरनुचिता गणिता । न च तस्यां रतेरयुक्तताधीर्लोकस्य परं शृङ्गारव्यापारस्यैव । तथा च तत्रापि रतेः फलोद्रेकाभावादनुद्भूतत्वेनाभासत्वं ज्ञेयम् इति सहृदयाश्चिन्वन्तु । मेवोदाहृतः • उपरितनशृङ्गाराभासोदाहरणत्रये ।

श्रीसीतायां विप्रलब्धस्य रावणस्यावस्थावर्णनं व्यभिचारिभावव्यञ्जकोदाहरणम् आह व्यत्यस्तं लपति • व्यत्यस्तमसम्बद्धं ब्रूते तेनोन्मादो व्यज्येत । क्षणमेकं पूर्ववाक्यं अपरञ्चापरवाक्येऽन्वेति । मौनेन श्रमः । किञ्च सर्वस्मिन् विषये । विषयाग्राहिणीं दृष्टिं विदधाति दृष्टिसम्बद्धस्यापि विषयस्य प्रत्यक्षं कर्तुं न प्रभवतीत्यर्थस्तेन मोहः । दीर्घश्वासस्वीकारेण चिन्ता । अङ्गेषु मनागपि धृतेरभावाद्व्याधिः । वैदेह्याः सीतायाः सौन्दर्येण ग्रस्तः । रनुभय • सीतायां रतेरभावात् । जगद्गुरुः श्रीरामः । तथैवाभा • अनुचित-

प्राधान्येन परिपोष्यमाणा ध्वनिव्यपदेशहेतुः । एवं कलहशीलकुपुत्राद्यालम्बनतया वीतरागादिनिष्ठतया च वर्ण्यमानः शोकः, ब्रह्मविद्यानधिकारिच एडालादिगतत्वेन च निर्वेदः, कदर्यकातरादिगतत्वेन पित्राद्यालम्बनत्वेन वा क्रोधोत्साहौ, ऐन्द्रजालिकाद्यालम्बनत्वेन च विस्मयः, गुर्वाद्यालम्बनतया च हासः, महावीरगतत्वेन भयम्, यज्ञीयपशुवसासृङ्मांसाद्यालम्बनतया वर्ण्यमाना जुगुप्सा च रसाभासाः । विस्तृतिभयाच्चामी नेहोदाहृताः सुधीभिरूह्याः । एवमेवानुचितविषया भावाभासाः ।

यथा—

'सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता
विद्यापि खेदकलिता विमुखीबभूव ।
सा केवलं हरिणशावकलोचना मे
नैवापयाति हृदयादधिदेवतेव ॥'

गुरुकुले विद्याभ्याससमये तदीयकन्यालावण्यगृहीतमानसस्यान्यस्य वा कस्यचिदतिप्रतिषिद्धगमनां स्मरतो देशान्तरं गतस्येयमुक्तिः । अत्र च स्वाभ्यस्त्यागात्यागाभ्यां स्रक्चन्दनादिषु विषयेषु चिरसेवितायां विद्यायां

विषयतया यथा रसानां रसाभासत्वं तथानुचितविषयतया भावानामप्येषां भावाभासत्वम् । तथैव अनुचितत्वेन । रतेरेव प्राधान्याद् ध्वनिर्न तु भावध्वनिरित्याह प्राधान्येन ०। शोकः ० कलहशीलकुपुत्रादिविषयतया आलम्बनौचित्याभावेनानुचितः । वीतरागादितदाश्रयानौचित्येनानुचितः । ब्रह्मविद्या ० वेदाधीनेत्यादिः शेषः । इतिहासपुराणादिना ब्रह्मविद्यायां समेषामधिकारवर्णनात् । कदर्यो निन्द्यः कातरो भीरुः । सर्वेऽपि ० जन्मप्रभृतिसेविताः शब्दादयः इन्द्रियविषया विस्मृताः ।

तैर्न सेवागणितेति कृतघ्नास्ते । तादृशीचिरसेविता विद्याऽपि विमुखीभूता । सा च लोकोत्तरसौन्दर्यशालिनी मृगनयना हृदयादधुनाऽपि नोपयाति न विमुखीभवति । अचिरसेविताऽपि कीदृक् सेवां गणयतीत्यहो कृतज्ञत्वमस्याः । विषयविद्ये अपेक्ष्य नायिकायां व्यतिरेकवर्णनम् । यथा पृथिव्याद्यधिष्ठात्रीदेवता पृथ्व्यादि न परित्यज्यति तथा मम हृदयस्याधिष्ठातृदेवतेव सेत्युपमा । त्यागात्यागा ० विषयविद्ययोस्त्यागो नायिका-

च कृतघ्नत्वम्, अस्यां च लोकोत्तरत्वमभिव्यज्यमानं व्यतिरेकवपुः स्मृतिमेव पुष्णातीति सैव प्रधानम्। एवं च त्यागाभावगतं सार्वदिकत्वं व्यञ्जयन्त्यधिदेवतोपमापि। एषा चानुचितविषयकत्वादनुभयनिष्ठत्वाच्च भावाभासः। यदि पुनरियं तत्परिणेतुरेवोक्तिस्तदा भावध्वनिरेव।

भावशान्त्यादिनिरूपणम्

अथ भावशान्तिः—

भावस्य प्रागुक्तस्वरूपस्य शान्तिर्नाशः॥

स चोत्पत्त्यवच्छिन्न एव ग्राह्यः। तस्यैव सहृदयचमत्कारित्वात्।

उदाहरणम्—

'मुञ्चसि नाद्यापि रुषं भामिनि मुदिरालिरुदियाय।
इति तन्व्याः पतिवचनैरपायि नयनाब्जकोणशोणरुचिः॥'

याञ्चात्यागः। स्मृतिमेव सा पदद्योतिताम्। सार्वदिकत्वं त्यागाभावः। सर्वदा त्यागाभावे सार्वदिकत्वम्। गुरुकन्याविषयकत्वेऽनुचितविषयकत्वम् अन्यविषयकत्वेऽनुभयनिष्ठत्वम्। ध्वनिरेव आभासत्वस्य व्यवच्छेदः।

अथ भावशान्त्यादिचतुष्टयोदाहरणम्।

प्रागुक्तस्वरूपस्य ● हर्षादिनाम्ना विभक्तस्य लक्षितस्य सञ्चारिभावस्य। स चो ● नाशश्च। नाशस्य नाशो न भवति तस्यानन्तत्वात्। परं भावनाश उत्पत्ति काल एव वर्ण्यमानश्चमत्कारी। उत्पत्तिः प्रथमक्षणसम्बन्धः। नाशस्य द्वितीयक्षणे तु प्रथमक्षणसम्बन्धस्य नाशान्नाश उत्पत्त्यवच्छिन्नो न भवति। तथा च यस्मिन् क्षणे भावनाश उत्पन्नस्तस्मिन् क्षणे एव वर्ण्यमानो भावशान्तिः काव्यमार्गे गण्यते अनन्तरन्तु न। नाशस्य प्रथमक्षणस्तु नाशक्षण ध्वंसानधिकरणम्।

मुञ्चसि ● हे भामिनि ? अधुनाऽपि रोषं न मुञ्चसि, मुदिरस्य मेघस्य पङ्क्तिः उदयं प्राप्ता। मेघपङ्क्तेरुद्दीपकसत्त्वेऽपि तव रोषस्य कियती स्थिरतेत्यभिप्रायकैः पतिवचनैः नायिकायाः नयनकमलयोः कोणस्य रोषाज्जायमानो रक्तिमा अपायि पीतः विनष्टं चक्र इतियावत्। पाधातोः कर्मणि लुङ्। रोषनाशेन प्रसादः प्रसादेन च शोण-

इह तादृशप्रियवचनश्रवणं विभावः। नयनकोणगतशोणरुचेर्नाशः, तदभिव्यक्तः प्रसादो वानुभावः। उत्पत्तिकालावच्छिन्नो रोषनाशो व्यङ्ग्यः। तथा—

भावोदयो भावस्योत्पत्तिः॥

उदाहरणम्—

'वीक्ष्य वक्षसि विपक्षकामिनीहारलक्ष्म दयितस्य भामिनी।
अंसदेशवलयीकृतां क्षणादाचकर्ष निजबाहुवल्लरीम्॥'

अत्रापि दयितवक्षोगतविपक्षकामिनीहारलक्ष्मदर्शनं विभावः। प्रियांसदेशवलयीकृतनिजबाहुलताकर्षणमनुभावः। रोषोदयो व्यङ्ग्यः। यद्यपि भावशान्तौ भावान्तरोदयस्य, भावोदये वा पूर्वं भावशान्तेरावश्यकत्वान्नानयोर्विविक्तो व्यवहारस्य विषयः, तथापि द्वयोरेकत्र चमत्कारविरहात्, चमत्काराधीनत्वाच्च व्यवहारस्य, अस्ति विषयविभागः।

एवम्—

भावसंधिरन्योन्यानभिभूतयोरन्योन्याभिभावनयोग्ययोः सामानाधिकरण्यम्॥

रुचेर्नाशस्तथा च प्राथम्याभिप्रायेणाह तदभिव्यक्तः ०। उत्पत्ति ०. उत्पद्यमान एव न चोत्पन्नो रोषनाशः। रोषेण चामर्षो व्यभिचारीभावः।

वीक्ष्य वक्षसि ० काचिन्नायिका शृङ्गारोन्मुखी आलिङ्गितुं प्रियस्यांसदेशे निजां बाहुलतां वलयितां प्रसारितां चकार, परन्तदानीमेव प्रियस्य वक्षसि सपत्न्या हारस्य चिह्नं दृष्ट्वा प्रियस्य सपत्नीप्रेमापराधेन सञ्जातामर्षा तथा कृतां बाहुलतां क्षणेनैव पृथक् कृतवती। वलयीत्यत्र च्विः।

रोदयस्य ० मुञ्चसीत्यादिपद्ये रोषशान्तौ हर्षोदयस्य, अस्मिंश्च रोषोदये हर्षविनाशस्य। विविक्तः परस्परमसामानाधिकरण्येन। तथापि नान्तरीयकतया सामानाधिकरण्येऽपि विषयविभाग इत्यत्र विषयो व्यावहारिकः।

उदाहरणम्—

'यौवनोद्गमनितान्तशङ्किताः शीलशौर्यबलकान्तिलोभिताः।
संकुचन्ति विकसन्ति राघवे जानकीनयननीरजश्रियः॥'

अत्र भगवद्दाशरथिगतस्य लोकोत्तरयौवनोद्गमस्य, तादृशस्यैव शीलशौर्यादेश्च दर्शनं विभावः। नयनगतसंकोचविकासावनुभावः। व्रीडौत्सुक्ययोः संधिर्व्यङ्ग्यः।

तथा—

भावशबलत्वं भावानां बाध्यबाधकभावमापन्नानामुदासीनानां वा व्यामिश्रणम्॥

एकचमत्कृतिजनकज्ञानगोचरत्वमिति यावत्।

भावसन्धिः

भावयोः सन्धिर्मेलनम् एकत्र समकालं तयोरवस्थानम्। कीदृशयोर्भावयोस्तत आह परस्परमतिरस्कृतयोः। तिरस्कारे भावत्वमेव न स्यात्। अभिभवनयोग्यता परस्परं ययोर्वर्तते। सामानाधिकरण्यमेकदेशवृत्तित्वविशिष्टैककालवृत्तित्वमिति **मर्मप्रकाशः**।

शवलतायामेकदेशवृत्तित्वमेव न त्वेककालवृत्तित्वम् इति स्मरणीयम्।

स्वयम्वरसमये रामचन्द्रस्य योवनोद्गमं सदाचारं शौर्यं वलं क्रान्तिञ्च पश्यन्त्याः सीतायाः भावयोर्वर्णनमाह **यौवनो** • श्रीसीताया नयनकमलशोभाः श्रीरामस्य लोकोत्तरयौवनस्य प्रादुर्भावं वीक्ष्य व्रीडोदयेन अत्यन्तं शङ्कायुक्ता संकुचन्ति। शीलादीन् दृष्ट्वा तु औत्सुक्यवशाल्लुब्धाः सत्यो विकसन्ति। **तादृशस्यैव** • लोकोत्तरस्यैव। **भावशबलत्वं** • शबलत्वं चित्रितत्त्वम्, यथा अनेकानि रूपाणि एकस्मिन् वर्तमानानि चित्रमित्युच्यते तथा अनेके भावाः परस्परं बाध्यमाना उदासीना वा एकत्र वर्तमानाः शवलतां चित्रतां वा भजन्ते। शबलत्वं व्यामिश्रणमित्युक्तं व्यामिश्रणशब्दार्थमप्याह **एकचमत्कृति** • गोचरत्वं विषयत्वम्। एकमिति ज्ञानस्य विशेषणम्। चमत्कृतेर्जनकं काव्यार्थस्य प्रधानीभूतं ज्ञानं तद्विषयत्वं सर्वेषां भावानाम्। काव्यार्थभावनायां सर्वे भावाः विषयीभवन्ति इत्यर्थः। रूपस्य चित्रत्वमपि अनेकेषां तेषाम् एकं रूपमितिज्ञानविषयत्वम्।

उदाहरणम्—

'पापं हन्त मया हतेन विहितं सीतापि यद्यापिता
सा मामिन्दुमुखी विना बत वने किं जीवितं धास्यति ।
आलोकेय कथं मुखानि कृतिनां किं ते वदिष्यन्ति मां
राज्यं यातु रसातलं पुनरिदं न प्राणितुं कामये ॥'

अत्र मत्यसूयाविषादस्मृतिवितर्कव्रीडाशङ्कानिर्वेदानां प्रागुक्त-स्वस्वविभावजन्मनां शबलता। यत्तु काव्यप्रकाशटीकाकारैः 'उत्तरोत्तरेण भावेन पूर्वपूर्वभावोपमर्दः शबलता' इत्यभ्यधीयत, तन्न। 'पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी हस्तालम्बं

वने सीतां परित्यक्तवतोऽनुतप्यमानस्य श्रीरामचन्द्रस्योक्तिः पापं हन्त • हन्त, हतजीवितेन मया यत्सीताऽपि त्यक्ता। अत्र हन्तहतपदाभ्यामसूया, सीताऽपि यापितेत्य-नेन विषादो व्यज्यते। पापं विहितमित्यनेन मतिर्व्यज्यते। बत सा चन्द्रमुखी मां विना किं जीवनं धरिष्यति। सा पदेन स्मृतिः किं शब्दघटितेन वितर्कश्च व्यज्यते। अहं पापी पुण्यशालिनां मुखानि कथं पश्यानि। अनेन लज्जा व्यज्यते। ते सुकृतिनः पापिनं मां किं वदिष्यन्तीति शङ्का। राज्यं विनष्टं भवतु जीवितुमपि नेच्छामि इत्यनेन निर्वेदो व्यज्यते। स्वस्वविभाव • यथा मते निर्दोषायाः सीतायाः परित्यागः पापमूल इति शास्त्रालोचनम्, असूयाया मम जीवितम् एतावत् निकृष्टम् इत्यादि भावनम्, विभाव इत्येवंरीत्या तल्लक्षणानि विचार्य ऊहनीयम्। स्वीयेन स्वीयेन विभावेन जन्म येषाम्। पूर्वपूर्व • उत्तरोत्तरेण पूर्वपूर्वस्याभिभवः। अभिभवे सर्वथा विनाशे वा चमत्कारो न स्यात्। नहि चित्ररूपे नीलादीनां विनाशः। पूर्वेषामुपमर्देनोत्तरस्यैकस्यावस्थाने शबलतैव विरुध्येत।

पश्येत्कश्चिच्च • अस्योत्तरार्धम् 'इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या कश्चित्फलकिसलयान्याददानाऽभिधत्ते'। हे पृथ्वीपते ? अरण्ये वर्तनं यस्यैवं-भूतस्य भवतो विद्विषः काचित्कन्या फलानि किसलयानि च गृह्णती कश्चिदित्थमभि-धत्ते। परस्परं कश्चित्पश्येत् इति शङ्का, रे चपलचल इत्यसूया, का त्वरा इति धृतिः, अहं कुमारी इति स्मृतिः, हस्तयोरालम्बनं देहि इति श्रमः, अहहा इति दैन्यम्, व्युत्क्रम इत्यपि दैन्यम्, क्व असि इति मतिः यासि इत्यौत्सुक्यम्। शङ्कादिभावद्योतकानां वाक्यपदानां परस्परालापे कस्मिन् प्रसङ्गे प्रयोग इति स्वयमूह्यम्।

वितर हहहा व्युत्क्रमः क्वासि यासि' इत्यत्र शङ्कासूयाधृतिस्मृतिश्रम-दैन्यमत्यौत्सुक्यानामुपमर्दलेशशून्यत्वेऽपि शबलताया राजस्तुति-गुणत्वेन पञ्चमोल्लासे मूलकृतैव निरूपणात्। स्वोत्तरविशेषगुणेन जायमानस्तु नाशो न व्यङ्ग्यः। न वोपमर्दपदवाच्यः। नापि चमत्कारी। तस्मात्—

'नारिकेलजलक्षीरसिताकदलमिश्रणे ।
विलक्षणो यथा स्वादो भावानां संहतौ तथा ॥'

अत्रेदं बोध्यम्—य एते भावशान्त्युदयसंधिशबलताध्वनय उदाहृतास्तेऽपि भावध्वनय एव। विद्यमानतया चर्व्यमाणेष्विवोत्प-

---

काश्चनोक्तयो भीतानां दुर्गमे पद्भ्यां गच्छन्तीनां कष्टप्रसङ्गे काश्चन तासामुपरि अनुरक्तस्य लम्पटस्य च प्रसङ्गे प्रतिभान्ति। उपमर्द • परस्परमनभिभूतत्वेऽपि।

राजस्तुति • राजविषयकरत्यङ्गत्वेन, मूलकृता काव्यप्रकाशकृता। नन्वेषां शबलता असंभविनी? चित्तवृत्तित्वेऽप्येषामेकविषयकवृत्तिविनाशोत्तरमेव विषयान्तर-विषयकवृत्तेः समुदयात्। नैयायिकानां नये ज्ञानेच्छादिवदात्मविशेषगुणत्वेऽपि योग्य-विभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वनियमाद् यौगपद्यासंभवात् इत्याशङ्क्य समा-धानमाह स्वोत्तर • अयं भावः। अस्तु बहिरर्थस्तथैव तथापि विलक्षणवृत्त्याऽनुभूयत एव भावानां शबलता बुद्धिस्था। अलौकिकोऽप्यर्थो व्यञ्जनया निवेद्यमानश्चमत्करोति न लौकिकस्तथा। तथा च लौकिकविनाशस्य वर्णने काव्यतात्पर्यविषयत्वाङ्गीकारे वा किं फलम्। न चासौ विमर्दशब्दार्थोऽपि येन मूलशैथिल्यं न स्यात्, उपमर्दो ह्यभिभवः स च सतो जायते न तु विनष्टस्य यथादिवसे विद्यमानस्य चन्द्रमसः सूर्यातपेन।

नारिकेल • नारिकेलजलं दुग्धं सितामिश्रीनाम्नी शर्कराविशेषः, कदलं रम्भाफलं यथैषां मिश्रणे विलक्षणो रसास्वादस्तथा भावानां मेलने। भावध्वनय • एवं शान्त्याद्यवस्थाविशिष्टानां भावानामेव ध्वनय इत्यर्थः। यथा विद्यमानया अवस्थया विशिष्टानां भावानां चर्वणायां विशेष्यत्वं प्राधान्यं भावानामेव न तु विद्यमानत्वस्य, अन्यथा कुत्रापि भावस्य प्राधान्येन चर्वणा न स्यात् सर्वत्र कस्याश्चिदवस्थायाः सत्त्वात्। तथा च विद्यमानभावचर्वणायां विद्यमानत्वावस्थाया विशेषणत्वमेव न तु विशेष्यत्व-मेवमुत्पत्त्यवच्छिन्नत्वरूपोदयावस्थाविशिष्टभावचर्वणायामुत्पत्त्यवच्छिन्नत्वरूपोदयावस्थाया विशेषणत्वमेव भावानाञ्च विशेष्यत्वमेवेत्यभिप्रायेण व्यवस्थापयति—विद्यमानतया •

त्त्यवच्छिन्नत्वविनश्यदवस्थत्वसंधीयमानत्वपरस्परसमानाधिकरणत्वैः प्रकारैश्चर्व्यमाणेषु भावेष्वेव प्राधान्यस्यौचित्यात्, चमत्कृतेस्तत्रैव विश्रान्तेः। यद्यप्युत्पत्तिविनाशसंधिशबलतानां तत्संबन्धिनां भावानां च समानायां चर्वणाविषयतायां न प्राधान्यं विनिगन्तुं शक्यते। तथापि स्थितौ भावेषु प्रधानतायाः क्लृप्तत्वात्, भावशान्त्यादिष्वपि तेष्वेव शान्तिप्रतियोगित्वादिभिर्व्यज्यमानेषु तस्याः कल्पयितुमौचित्यात्। किं च यदि भावशान्त्यादौ भावो न प्रधानम्, किं तु तदुपसर्जनकशान्त्यादिरेवेत्यभ्युपेयते तदा व्यज्यमानभावेष्वभिहिततत्प्रशमादिषु काव्येषु भावप्रशमादिध्वनित्वं न स्यात्।

उत्पत्त्यवच्छिन्नत्वं भावस्योदयः, विनश्यदवस्थत्वं शान्तिः, सन्धीयमानत्वं वर्तमानकालिकः सन्धिः, परस्परसमानाधिकरणत्वं शबलता। विनश्यदवस्थत्वविशिष्टचर्वणाविनश्यदवस्थत्वप्रकारिका भावविशेष्यिका, विशेषणत्वं प्रकारो विशेष्यत्वं प्राधान्यम्। एवमन्यावस्थाविशिष्टभावचर्वणायामपि समन्वयो बोध्यः।

तत्रैव • भावप्राधान्य एव। **न प्राधान्यं विनिगन्तुं** • विनिगमकं कर्तुमित्यर्थः। भावविशेष्यका चर्वणा अवस्थाविशेष्यका वा। विनिगमकमाह **तथापि** • **स्थितौ भावेषु** • विद्यमानतावस्थाविशिष्टेषु भावेषु। तेष्वेव भावेषु एव। शान्तिर्नाशरूपोऽभावः, यस्याभावः, स प्रतियोगी भावस्य शान्तौ भावः प्रतियोगी। प्रतियोगित्वं भावेषु विशेषणीभूतो धर्मः। शाम्यतो भावस्य व्यञ्जने शान्तिप्रतियोगित्वविशिष्टभावस्य, शान्तिप्रतियोगित्वेन भावस्य व्यञ्जनमिति व्यवहारो नार्थान्तरम्। तस्याः प्रधानतायाः। अनुभूयमानं शान्त्यादिकृतं चमत्कारवैलक्षण्यन्तु विशेषणतयाऽनुभूयमानेष्वपि शान्त्यादिषु न ह्रसतीति मूलकार एवोपसंहारे वक्ष्यति।

एवं शान्त्यादिमपेक्ष्यभावानां प्राधान्ये शमादीनां वाच्यत्वेऽपि भावस्य व्यङ्ग्यत्वे भावशमादीनां ध्वनिरुपपद्यते ध्वनिव्यपदेशस्य प्रधानानुरोधित्वात्।

भावापेक्षया शमादीनां प्राधान्याङ्गीकारे तु उक्तव्यवस्थानोपपद्यत इत्याह **किञ्च यदि** • सभावः उपसर्जनं विशेषणं यस्य शान्त्यादेः स शान्त्यादिः। तत्प्रशमो भावप्रशमः। काचिद् रात्रौ प्रियं प्रतीक्षमाणा अनागमनकारणं चिन्तयन्ती प्रातः सपत्नी-

तथाहि—

'उषसि प्रतिपक्षनायिकासदनादन्तिकमञ्चति प्रिये ।
सुदृशो नयनाब्जकोणयोरुदियाय त्वरयारुणद्युतिः ॥'

अत्रोत्पूर्वकेणैतिना भावोदयस्य वाच्यतयैव प्रत्यायनात्, उदयस्य वाच्यत्वेऽपि भावस्यावाच्यत्वाद्ध्वनित्वं सुस्थमिति चेत्, प्रधानस्य व्यपदेशानौपयिकत्वेऽप्रधानकृतव्यपदेशानुपपत्तेः। अस्मन्मते तूत्पत्तेर्वाच्यत्वेऽप्युत्पत्त्यवच्छिन्नस्यामर्षस्य प्रधानस्यावाच्यत्वाद्युक्त एव भावोदयध्वनिव्यपदेशः । एवं व्यज्यमानभावप्रतियोगिकस्य प्रशमस्य वाच्यत्वे भावशान्तिध्वनित्वं न स्यात् ।

यथा—

'क्षमापणैकपदयोः पदयोः पतति प्रिये ।
शेमुः सरोजनयनानयनारुणकान्तयः ॥'

गृहात्स्वसमीपमायान्तं प्रियं दृष्ट्वा रोषपूर्णाऽभवत्तस्यावर्णनमुदाहरति उषसि • उषा निशायाः शेषः अञ्चति शतुः सप्तम्यन्तम् । भावलक्षणे सप्तमी । सुदृशो नयनकमलकोणयोः सहसा रक्तद्युतिरुदयं प्राप । उत्-इण्-परोक्षभूतम् । एतिना • एतिना इण्धातुना, भावोदयस्य रोषोदयस्य । शानौपयि • प्रधानो यदि व्यवहारस्योपायो न भवति तदाऽप्रधानकृतो व्यवहारो नोपपद्यते इत्यर्थः ।

उपाय एवौपयिकः । विनयादिभ्यष्ठक् सूत्रस्थेन उपायो ह्रस्वत्वञ्चेति वार्तिकेन ठकि ह्रस्वे च सिद्धम् ।

औपयिक-शब्दो युक्तपर्याये पठ्यते तदा प्रधानो यदि व्यपदेशाय न युज्येत तदाऽप्रधानकृतो व्यपदेशो नोपपद्यत इति रीत्यार्थो विधेयः । भवन्मते प्रधानस्योदयस्य वाच्यत्वाद्ध्वनिव्यवहारानुपयुक्तत्वे व्यङ्ग्येनाप्यप्रधानेन भावेन ध्वनिव्यवहारो नोपपद्यते । तूत्पत्ते • उत्पत्तेरुदयस्य, उत्पत्त्यवच्छिन्नस्य उदयावस्थाविशिष्टस्य, व्यज्यमानो भावो नायिकाया रोषस्तत्प्रतियोगिकस्य तस्य प्रशमस्य ।

काचित्सखीं प्रति कथयति यत् तस्या मानिन्याः पदयोः प्रिये पतति सति एव नयनयोररुणकान्तयः शान्ता बभूवुः । तदुदाहरति क्षमापणैः • क्षमापणायाः प्रधानयोः

ननु शब्दवाच्यानां प्रशमादीनामरुणकान्त्यैवान्वयात्, अरुणकान्तिप्रशमादेरेव वाच्यत्वं पर्यवसितम्। न तु तादृशप्रशमादिव्यङ्ग्यस्य रोषप्रशमादेः। व्यङ्ग्यव्यञ्जकभेदस्यावश्यकत्वात्। न चारुणव्यङ्ग्यरोषस्यैव वाच्यीभूतप्रशमाद्यन्वय इति वाच्यम्। वाच्यव्यङ्ग्यप्रतीत्योरानुपूर्व्येण सिद्धतया वाच्यान्वयबोधवेलायां वाच्यैः सह व्यङ्ग्यान्वयानुपपत्तेः। अन्यथा 'सुदृशो नयनाब्जकोणयोः' इत्यस्यान्वयो न स्यात्। मैवम्। एवमपि—

'निर्वासयन्तीं धृतिमङ्गनानां शोभां हरेरेणदृशो धयन्त्याः।
चिरापराधस्मृतिमांसलोऽपि रोषः क्षणप्राघुणिको बभूव॥'

इत्यादावपि भावप्रशमध्वनित्वापत्तेः। भावस्य वाच्यत्वेऽपि प्रधानस्य तत्प्रशमस्य व्यङ्ग्यत्वात्। उभयोरप्यवाच्यत्वमपेक्षितमिति चेत्, प्रागुक्तपद्यद्वये शमत्वोदयत्वाभ्यां शमोदययोर्वाच्यत्वादनुदाहरणत्वापत्तेः। इष्टापत्तिस्तु सहृदयानामनुचितैव। तस्माद्भावप्रशमादिष्वपि प्राधान्येन भावानामेव चमत्कारित्वम्, प्रशमादेस्तूपसर्जनत्वमतो न तस्य वाच्यतादोषः। इदं पुनर्भावध्वनिभ्यो भाव-

---

स्थानयोः पदयोः। अत्रामर्षशान्तिध्वनिरिष्यते शान्तिर्वाच्या अमर्षो व्यज्यते। यद्यमर्षस्य प्राधान्यमङ्गीक्रियेत तदा शान्तिविशिष्टामर्षध्वनिरुपपद्यते शान्तेः प्राधान्ये तु नोपपद्यते। शमस्य वाच्यत्वेऽपि रोषशमस्यावाच्यत्वाद्भावशमध्वनिः कथन्नोपपद्यत इति पूर्वपक्षिणोपपाद्यते **ननु शब्द** • । **तादृशप्रशम** • अरुणकान्तिप्रशम। **आवश्यकत्वाद्** • तथा च व्यञ्जकं वाच्यं व्यङ्ग्यन्तु सर्वथा वाच्यतालेशशून्यम्।

आनुपूर्व्येण कार्यकारणयोरिव पौर्वापर्येण। **अन्यथा** • वाच्यैः सह व्यङ्ग्यान्वये। शेमुरित्यनेन रोषान्वितशमस्योपस्थापने सुदृशो नयनाब्जकोणयोः रोषः शशाम इत्यन्वयो न स्यात्। रोषदशायां सुदृक्त्वस्य बाधात्। अथवा चित्तवृत्तेरमर्षस्य नयनकोणयोः सम्बन्धस्यासम्भवात्। **एवमपि** • एवं समर्थनेऽपि अतिव्याप्तिः। **निर्वासयन्तीम्** • अङ्गनानां धैर्यं निस्सारयन्तीं हरेः शोभां पिबन्त्या पश्यन्त्या इति यावत्। कुरङ्गनयनायाश्चिरम् अपराधस्य स्मरणेन पुष्टोऽपि रोषः क्षणमात्रस्य अतिथिर्बभूव क्षणमात्रमेव तस्थौ अचिरेणैव प्रयात इति यावत्। रोषो विनष्टो बभूव। **प्रागुक्तपद्य** • उषसीत्यादौ

शान्त्यादिध्वनीनां चमत्कारवैलक्षण्ये निदानम्——यदेकत्र चर्वणायां भावेषु स्थित्यवच्छिन्नामर्षादित्वम्, अमर्षादित्वमेव वा प्रकारः। अन्यत्र तु प्रशमावस्थत्वादिरपीति। रसस्य तु स्थायिमूलकत्वात्प्रशमादेरसंभवः। संभवे वा न चमत्कारः। इति न स्म विचार्यते।

अलक्ष्यक्रमध्वनिनिरूपणम्

सोऽयं निगदितः सर्वोऽपि रत्यादिलक्षणो व्यङ्ग्यप्रपञ्चः स्फुटे प्रकरणे झगिति प्रतीतेषु विभावानुभावव्यभिचारिषु सहृदयतमेन प्रमात्रा सूक्ष्मेणैव समयेन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्यालक्षणादलक्ष्यक्रमो व्यपदिश्यते। यत्र तु विचारवेद्यं प्रकरणम्, उन्नेया वा विभावादयस्तत्र सामग्रीविलम्बाधीनं चमत्कृतेर्मान्थर्यमिति संलक्ष्यक्रमोऽप्येष भवति। यथा—'तल्पगतापि च सुतनुः' इति प्रागुदाहृते (४६ पृष्ठे) पद्ये 'संप्रति' इत्येतदर्थावगतिर्विलम्बेन। न खलु धर्मिग्राहकमानसिद्धं रत्यादिध्वनेरलक्ष्यक्रमव्यङ्ग्यत्वम्। अत एव लक्ष्यक्रमप्रसङ्गे—

उदयस्य, क्षमापयेत्यादौ शमस्य। यदेकत्र • एकत्र भावध्वनौ, विद्यमानत्वावस्थाविशिष्टामर्षादित्वम्, विद्यमानत्वस्य साधारण्येनाचमत्कारित्वादमर्षादित्वमेव। अन्यत्र भावप्रशमादिध्वनौ, भावो विशेष्यं प्रशमोऽमर्षत्वञ्च प्रकारः। नन्वेवं रसस्यापि शान्त्यादिचतुष्टयध्वनयः कथन्नेत्यत आह रसस्य तु• स्थायिभाव एव रसतामेति स्थायिभावानान्तु प्रशमोदयौ तु स्थायिताया विरोधिनौ। ननु आविर्भावतिरोभावावेव स्थायिनां प्रशमोदयावास्तामत आह सम्भवे वा • चमत्कारिवस्तुन एव वर्णनीयता आयाति।

अलक्ष्यक्रमध्वनिनिरूपणम्।

रसानां संलक्ष्यक्रमत्वालक्ष्यक्रमत्वे। अलक्ष्यक्रमो • न लक्ष्यते कार्यकारणयोः पौर्वापर्यरूपः क्रमो यत्र, एवं सम्यक् लक्ष्यते तादृशः क्रमो यत्रेति संलक्ष्यक्रमः। क्रमस्तूभयत्रापि वर्तते परमेकत्र सूक्ष्मतया न लक्ष्यते। अन्यत्र तु सामग्र्या रसव्यञ्जिकायाविलम्बेन सम्पद्यमानतया लक्ष्यत इति ग्रन्थसिद्धान्तः।

विलम्बेन • तदुपपादनञ्च मूले प्रागेव। धर्मिग्राहक • धर्मोऽलक्ष्यक्रमव्यङ्ग्यत्वं धर्मी रत्यादिध्वनिस्तद्ग्राहकेण मानेन चर्वणादिना अलक्ष्यक्रमव्यङ्ग्यत्वं न सिद्धं खलु।

'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥'

इत्यत्र कुमारीस्वाभाव्यादप्यधोमुखत्वविशिष्टस्य लीलाकमलपत्त्रगणनस्योपपत्त्या मनाग्विलम्बेन नारदकृतविवाहादिप्रसङ्गविज्ञानोत्तरं "व्रीडायाश्चमत्करणाल्लक्ष्यक्रमोऽयं ध्वनिः" इति प्राहुरानन्दवर्धनाचार्याः । "रसभावादिरर्थो ध्वन्यमान एव, न वाच्यः । तथापि न सर्वो लक्ष्यक्रमस्य विषयः" इति चाभिनवगुप्तपादाचार्याः । स्यादेतत्, यद्ययं रसादिः संलक्ष्यक्रमस्य विषयः स्यात् । अनुरणनभेदगणनप्रस्तावे "अर्थशक्तिमूलस्य द्वादशभेदाः" इत्यभिनवगुप्तोक्तिः, "तेनायं द्वादशात्मकः" इति मम्मटोक्तिश्च न संगच्छेत । वस्त्वलंकारात्मना द्विविधेन वाच्येन स्वतःसंभवित्वकविप्रौढोक्तिनिष्पन्नत्वकविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नत्वैस्त्रिभिरुपाधिभिस्त्रैविध्यमापन्नेन षडात्मना वस्त्वलंकारयोरिव रसादेरप्यभिव्यञ्जनादष्टादशत्वप्रसङ्गात् ।

रत्यादिध्वनेरलक्ष्यक्रमव्यङ्ग्यत्वं न स्वाभाविकमपि तु सामग्रीविशेषसमवधानादिकृतम् । सामग्री च सूक्ष्मतया क्रमस्याकलनम् ।

एवंवादिनि • तपश्चर्यया संतुष्टः शिवः पार्वत्यै त्वया सह परिणयाय तव पितुः सकाशाद् दूतमुखेन कन्यायाचनां करिष्य इति वरं प्रतिज्ञाय हिमालयसविधे कन्यायाचनायै नारदं प्राहिणोत् तत्संदर्भे कुमारसंभवस्थं पद्यमिदम् । देवर्षिर्नारदः । आनन्दवर्धनो ध्वन्यालोककारः, **अभिनवगुप्त** • तट्टीकालोचनकारः । एवं सिद्धान्ते लोचनकाव्यप्रकाशग्रन्थयोर्विरोधमुपपादयति **स्यादेतत्** • अनुसरणनभेदो ध्वनिभेदः । तद्विरोधमुपपादयति **वस्त्वलङ्कारात्मना** • व्यञ्जकौ द्वौ वस्तु अलङ्कारश्च । तौ च प्रत्येकं त्रिधा स्वतः सम्भविनौ कविप्रौढोक्तिनिष्पन्नौ कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नौ च । तथा च व्यञ्जकाः षट्सम्पन्नाः । प्रत्येकं व्यञ्जकेन वस्तु अलङ्कारश्च द्वौ व्यञ्जनीयौ तेन द्वादश व्यङ्ग्यानि सम्पद्यन्ते । रसादेरपि संलक्ष्यक्रमत्वे प्रत्येकं व्यञ्जकेन वस्तु अलङ्कारो रसादिश्चेति त्रयो व्यज्येरन् तदा व्यङ्ग्यानामष्टादशत्वमायात्येव । **षडात्मना** • व्यञ्जकेन । तथा च तेषां ग्रन्थविरोधः । पूर्वप्रदर्शितग्रन्थेन संलक्ष्यक्रमस्यापि स्वीकृतिस्तेषामायात्येव ।

अत्रोच्यते—प्रकटैर्विभावानुभावव्यभिचारिभिरलक्ष्यक्रमतयैव व्यज्यमानो रत्यादिः स्थायिभावो रसीभवति । न संलक्ष्यक्रमतया । रसीभावो हि नाम झगिति जायमानालौकिकचमत्कारविषयस्थायित्वम् । संलक्ष्यक्रमतया व्यज्यमानस्य रत्यादेस्तु वस्तुमात्रतैव, न रसादित्वमिति तेषामाशयस्य वर्णनेन न तदुक्तीनां विरोधः । उपपत्तिस्त्वर्थेऽस्मिन्विचारणीया । रसभावादिरर्थ इत्यत्र रसादिशब्दो रत्यादिपरः । तदित्थं निरूपितस्यास्य रसादिध्वनिप्रपञ्चस्य पदवर्ण-

---

अनेन ग्रन्थेन तु अस्वीकृतिस्तदा द्वितीयो ग्रन्थो मतविशेषमनुरुध्य । मतविशेषश्च संलक्ष्यक्रमविषये रत्यादीनां भावत्वमेव न रसत्वम् । असंलक्ष्यक्रमस्थल एव रत्यादीनां रसभावः इत्यन्ये विरोधं परिहरन्ति । पण्डितराजस्त्वेषामेवेदं मतम्, संलक्ष्यक्रमविषयकग्रन्थस्तु भावध्वनिमनुरुध्य न तु रसं विषयीकरोति । जायमानं ● शीघ्रं जायमानो योऽलौकिकश्चमत्कारस्तस्य विषयः स्थायिभावः । संलक्ष्यक्रमे तु न चमत्कारो झगिति जायते । अतएव चमत्कृतेर्मन्थिर्यमिति ग्रन्थकृताऽप्यनुपदमेवाङ्गीकृतम् । तेषाम् अभिनवगुप्तादीनाम् । किं युक्तमयुक्तं वेदं मतमिति जिज्ञासायामाह **उपपत्ति स्त्वर्थे** ● अर्थे संलक्ष्यक्रमस्थले रत्यादीनां न रसतेतिमते । ननु यदा रसः संलक्ष्यक्रमता सर्वथापि न भजते तदा 'रसभावादिः' 'सर्वो न संलक्ष्यक्रमस्य विषयः' इत्यभिनवगुप्तोक्तिः कथं सङ्गच्छतामित्यत आह **रसभावादि** ● तेषां ग्रन्थस्येति शेषः ।

उपपत्ति स्त्वर्थे इत्यत्र मर्मप्रकाशः उपपत्तिं दर्शयतीत्यम्—विभावादिप्रतीते रसप्रतीतेश्च विद्यमानस्य सूक्ष्मकालान्तरस्वरूपस्य सहृदयेनाकलने तस्य विगलितवेद्यान्तरत्वानापत्त्या रसत्वभङ्गापत्तिः । विगलितवेद्यान्तरत्वन्तु सकलसहृदयानुभवसाक्षिकमिति तवापि सम्मतमिति तदुपपत्तिर्बोध्या इति ।

आकलने इति पदच्छेदो बोध्यः । अत्र पण्डितराजास्वरसबीजन्तु सत्यं विगलितवेद्यान्तरत्वं ममापि सम्मतम् । तच्च विभावादिनाऽवश्यमपेक्षणीयेन सहितस्य विलक्षणस्थायिभावस्यास्वादावस्थायां रसीभावरूपायां विभावाद्यवश्यमपेक्षणीयवस्त्वन्तराविषयकत्वरूपम् । न रसास्वाददशायां संलक्ष्यक्रमे क्रमस्य वेदनमङ्गीक्रियते येन विगलितवेद्यान्तरत्वं न स्यादपि तु रसास्वादसामग्र्या विभावादिप्रतीतेः सम्पादने विलम्बेन क्रमोऽनुभूयते । तथा च विलम्बेन सहसा वा सम्पद्यमानया सामग्र्या रसास्वादे न कश्चिद्भेदः । इति । अत्रैव पुनरपि मर्मप्रकाश आह **नव्यास्तु** वक्तृवैशिष्ट्यप्रकरणादिज्ञानसहितस्यैव व्यञ्जकत्वात्तत्सहितविभावादिज्ञानोत्तरं जायमानरसप्रतीतेः विभावादिज्ञाना-

रचनावाक्यप्रबन्धैः पदैकदेशैरवर्णात्मके रागादिभिश्चाभिव्यक्तिमामनन्ति। तत्र वाक्यगतानां पदानां सर्वेषामपि स्वार्थोपस्थितिद्वारावाक्यार्थज्ञानोपायत्वे समानेऽपि कुर्वद्रूपतया चमत्कारायोगव्यवच्छिन्नत्वेन कस्यचिदेव ध्वनिव्यपदेशहेतुत्वम्। यथा 'मन्दमाक्षिपति' (४६ पृष्ठे) इत्यत्र मन्दमित्यस्य।

'पेक्षयाविद्यमानक्रमालक्षणेन चालक्ष्यक्रमत्वम्। तच्च प्रकरणादिज्ञानविलम्बेन विभावादिज्ञानविलम्बेऽपि पूर्वोदाहरणेऽक्षतमेव। नहि विभावादिज्ञानस्य तज्जनकस्य च क्रममादायालक्ष्यक्रमत्वम्। अपि तु तज्जन्यस्य। एतदेवाभिप्रेत्य 'अर्थशक्तिमूलस्य द्वादशभेदाः' इत्यभिनवगुप्तोक्तिः। यत्किंचिद्वाच्यार्थापेक्षया क्रमोऽपि गृह्यते इत्यभिप्रेत्य लक्ष्यक्रमोक्तिर्यथाकथञ्चिन्नेया। नहि विभावादिप्रतीतिरहितयत्किञ्चिद्वाच्यार्थमात्रप्रतीतौ विगलितवेद्यान्तरता सहृदयानुभवसाक्षिका येन तत्क्रमग्रहणेऽपि रसत्वहानिः स्यादित्याहुः। इति। इदमवधेयम्—नहि विभावादीत्यारभ्य मर्मप्रकाशोऽशुद्धः प्रतिभाति तदर्थः स्फुटतया नावभासते। भाषानुवादोऽपि यथाक्षरमनुवदन् नास्य स्वरूपस्फोरणाय प्रभवति। तत्क्रमग्रहणेऽपि इत्यंशस्य भाषानुवादतः 'वाच्यार्थस्य विभावादेश्च क्रमस्य ग्रहणेऽपि इत्यर्थः आयाति। विभावादिप्रतीतेः रसप्रतीतेश्च क्रमस्याग्रहणेन विगलितवेद्यान्तरता जायमाना वाच्यार्थविभावाद्योः क्रमे उदासीनेति तदंशस्य तात्पर्यं वर्णयति भाषानुवादः।

अत्रत्यस्य पूर्वोदाहरणेऽक्षतमेवेत्यस्य एवंवादिनि देवर्षौ इत्यत्रालक्ष्यक्रमत्वमक्षतमेवेत्यर्थः। तत्र कारणन्तु विभावादिप्रतीतिसामग्र्याविलम्बेऽपि विभावादिप्रतीतेरनन्तरं रसप्रतीतौ विलम्बाभावात्।

इदमेव मते विशेषः। पण्डितराजस्तु विभावादिप्रतीतिसामग्रीविलम्बाधीनचमत्कृतेर्मान्थर्यमनुभूय भेदं मनुते। नव्यास्तु उक्तसाग्र्या विलम्बेऽविलम्बे वाऽलक्ष्यक्रमत्वं व्यवस्थापयन्तः सर्वत्रालक्ष्यक्रमतामेवाङ्गीकुर्वन्ति ग्रन्थसमन्वये नाभिनिविशन्ते। केचन भावध्वनिनैव लज्जाध्वनिनालक्ष्यक्रमत्वं समनुगमयन्ति युक्तायुक्तत्वे सहृदयैराकलनीये स्वयमेव। **पदैकदेशै** ● पदैकदेशा वर्णाः अवर्णात्मका शब्दभिन्ना रागादयः। कुर्वद्रूपतेति बौद्धनये विलक्षणधर्मविशेषे प्रसिद्धमत्रग्रन्थे कार्योन्मुखतार्थे प्रयुज्यते यथा सेनायां सर्वे योद्धारो न समानाः परं कतिपयानामेव समुत्साहकौशलादिभिरन्येऽपि फलभाजो भवन्त्येव। यथा तत्र कार्योन्मुखता कतिपयानामेव ,तथैवात्रापि। चमत्कारस्य अयोगोऽसम्बन्धस्तद्रहितत्वेन अवश्यं चमत्कारितेत्यर्थः।

मन्दमित्यस्य ● अत्र शनैः स्वस्थान प्रापणात्मना मन्दाक्षेपेण रत्याख्यः स्थायी संलक्ष्यक्रमतया व्यज्यते इति प्राङ्मूले तल्पगतापीत्यादि पद्येऽभिहितम्।

रचनावर्णानां तु पदवाक्यान्तर्गतत्वेन व्यञ्जकतावच्छेदककोटिप्रविष्टत्वमेव न तु व्यञ्जकत्वमिति यद्यपि सुवचम्, तथापि पदवाक्यविशिष्टरचनात्वेन, रचनाविशिष्टपदवाक्यत्वेन वा व्यञ्जकत्वमिति विनिगमनाविरहेण घटादौ दण्डचक्रादेः कारणत्वस्येव प्रत्येकमेव व्यञ्जकतायाः सिद्धिरिति प्राञ्चः।

रचनावर्णानाम् • अत्र रचनायाः पूर्वनिपातोऽभ्यर्हितत्वात्। छेदककोटि • रचना वर्णानां पदानाम्वा सन्निवेशविशेषः, वर्णाः पदावयवतया वाक्यावयवतया वोपयुज्यन्ते न तु स्वतन्त्रतया। एवं रचनाऽपि पदवाक्यान्तर्गतत्वेनैवोपयुज्यते। रचनाविशिष्टं वर्णविशिष्टञ्च पदं वाक्यञ्च व्यञ्जकम्। व्यञ्जकता तादृशे पदे वाक्ये च। व्यञ्जकतावच्छेदका यथा तादृशपदवाक्यवर्तिनोऽन्ये धर्मास्तथा रचना वर्णाश्च। तथा व्यञ्जकतावच्छेदका इत्यायाति न व्यञ्जका इति च यद्यपि बहुत्रावच्छेदकविशेषणपरतया कोटिप्रविष्टत्वं प्रयुज्यते तथापि बहुषु अवच्छेदकेषु सत्सु एकस्य बोधनायापि प्रयुज्यते तथैवात्र प्रयोगः। अन्यानि च पदत्ववाक्यत्वादीनि अवच्छेदकानि बोध्यानि। पदवाक्यविशिष्ट• वृत्तित्वसम्बन्धेन वैशिष्टयम्। पदवृत्तिरचनात्वेन वाक्यवृत्तिरचनात्वेनेत्यर्थः। एवमग्रेऽपि रचनाविशिष्टपदत्वेनेत्यादि बोध्यम्। व्यञ्जनरूपकार्यस्थले रचनायाः पदवाक्ययोश्च समानतयोपलब्धेर्विशेषणविशेष्यभावेन विनिगमनाविरहात् कारणताद्वयप्रसक्तिः। उभयोर्विशिष्टयोः कारणत्वस्वीकारे कारणतावच्छेदके गुरुत्वम्। अयं भावः पदत्वेन रचनात्वेन च पृथगेव व्यञ्जकत्वाङ्गीकारे कारणताद्वयम्। रचनाविशिष्टपदत्वेन पदविशिष्टरचनात्वेन चाङ्गीकारेऽपि यद्यपि कारणताद्वयं तथापि विशिष्टकारणत्वपक्षे पदविशिष्टरचनात्वं रचनाविशिष्टं पदत्वञ्च गुरुभूतं व्यञ्जकतावच्छेदकं स्वतन्त्रकारणत्वपक्षे च पदत्वं रचनात्वञ्च लघुभूतं कारणतावच्छेदकम्। किं च घटं प्रति कारणतावच्छेदकानां दण्डत्वादीनामिव पदस्य रचनायाश्च कारणतावच्छेदकत्वे विशिष्टकारणतापक्षे प्रथमान्यथासिद्धत्वापत्या अनुभूयमानं व्यञ्जकत्वं विरुध्येत। एवं दृष्टान्तेऽप्यन्यथासिद्धत्वापत्तिर्द्रष्टव्या। ननु यथा घटं प्रति दण्डत्वस्य कारणत्वे तस्य दण्डविशेषणतया दण्डद्वारैव कारणत्वाङ्गीकारे कारणतावच्छेदकसम्बन्धस्य गुरुतया दण्ड एव कारणमित्यङ्गीक्रियते एवमत्र पदविशिष्टरचनायाः कारणत्वं न संभवति रचनायाः पदधर्मतया पदद्वारैव तस्याः सम्बन्धकल्पनेऽभिव्यञ्जकतावच्छेदकसम्बन्धस्य गुरुत्वापत्याऽन्यथासिद्धत्वात् रचनाविशिष्टपदस्य कारणतायान्तु न रचनामपेक्ष्य सम्बन्ध इति वाच्यम् अस्ति तादृशः प्रसङ्गः स्वरूपतः कारणत्वस्थले अत्र तु रचनाविशिष्टपदस्य पदविशिष्टरचनाया वा ज्ञानमेव समवायेन कारणमिति तादृशगौरवचर्चाया विषयाभावात्। सम्यग्विचारे पदस्यैव वर्णधर्मत्व-

वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यञ्जकत्वमेव न रसाभिव्यञ्जकत्वम्। गौरवान्मानाभावाच्च। नहि गुण्यभिव्यञ्जनं विना गुणाभिव्यञ्जकत्वं नास्तीत्यस्ति नियमः। इन्द्रियत्रये व्यभिचारात्। इत्थं च स्वस्वव्यञ्जकोपनीतानां गुणिनां गुणानामुदासीनानां च

प्रतीतेश्च। **घटादौ** ● घटं प्रति कुलालचक्रादिविशिष्टदण्डत्वेन, दण्डकुलालविशिष्टचक्रत्वेन वा कारणतेति विनिगमनाविरहात् गुरुधर्मावच्छिन्नकारणताद्वयमपेक्ष्य दण्डत्वेन चक्रत्वेन च लघुधर्मावच्छिन्ना विभिन्नैव कारणता प्रत्येकं दण्डचक्रादिष्वङ्गीक्रियते। तथा च रचनापदादिषु प्रत्येकमेव पर्याप्ता कारणता न तु विशिष्टे।

प्राङ्माधुर्यादिगुणानुकूला रचनाविशेषा वर्णिताः, अस्मिन् गुणे एतादृग्रचनावर्णानां सन्निवेशो वेति प्रतिपादितम्। तद्रीत्या साक्षाद्गुणानामेव रचनावर्णाद्यभिव्यङ्ग्यत्वमायाति न रसादीनाम्। वस्तुतः परम्परयाऽपि रसाभिव्यञ्जकत्वं न सम्यगपि तु गुणाभिव्यक्तिद्वारा रसकार्यद्रुत्यादिचित्तवृत्तिविशेषप्रयोजकत्वम् इत्यपि प्रागभिहितप्रायमेव तदनुसारं स्वमतमाह **वर्णरचना** ●। **गौरवात्** ● रसाभिव्यञ्जकसंख्यावर्धने गौरवमित्यन्ये व्याख्यातारः। वस्तुतस्तु एतादृशी रचना रसान् अभिव्यनक्तीति सामान्यरसाऽभिव्यञ्जकत्वमिति न वक्तुं शक्यते एकस्या रचनायाः सर्वरसानभिव्यञ्जकत्वात्। तत्तद्रचनायास्तत्तद्रसाभिव्यञ्जकत्वे रसभेदेन नवसंख्याककार्यकारणभावप्रसङ्गः। गुणाभिव्यञ्जकत्वे तु त्रिधैव कार्यकारणभाव इति गौरवम्। ननु गुणानां तत्तद्रसनियततया माधुर्यविशिष्टरसाभिव्यक्तिं प्रति अस्या रचनाया कारणत्वमितिरीत्या त्रिधैव कारणता इत्याशङ्कां मनसि निधायाह **मानाभावात्** ● तथा सत्यन्वयव्यतिरेकाभ्यां माधुर्यादिगुणाभिव्यक्तिं प्रत्येवकारणत्वसिद्धौ रसप्रवेशे मानाभावात्। गुणानां रसधर्मत्वस्य खण्डितत्वात् गुणवैशिष्ट्यस्य रसेषु दुर्वचत्वाच्च। ननु यथा चक्षुषा रूपादिगुणानां गुणिनो द्रव्यस्य च सहैवाभिव्यक्तिस्तथा गुणिनो रसस्याभिव्यक्तिमन्तरा गुणस्याभिव्यक्तिरसम्भाविनीत्येव मानमित्याशङ्कते **न हि गुण्य** ● नियमविरोधिनं व्यभिचारमाह **इन्द्रियत्रये** ● रसनया रसस्यैव न रसवतो जलादेर्नासिकया गन्धस्यैव न गन्धवतः पार्थिवद्रव्यस्य, श्रोत्रेण शब्दस्यैव न तु तद्वतो गगनस्याभिव्यक्तिरिति व्यभिचारात्, गुणिना सहैव गुणस्याभिव्यक्तिरिति नियमासंभवाद्रसं विनाऽपि माधुर्यादेरभिव्यक्तिः सम्भवतीति रचनादीनां केवलगुणाभिव्यञ्जकत्वं सुस्थमेव। **इत्थञ्च** ● गुणानां गुणिनाञ्च स्वातन्त्र्येणाभिव्यङ्गत्वे चेत्यर्थः। रसनया माधुर्यरसस्य ग्रहणे चक्षुषा त्वचाऽनुमानेन वा जलस्य ग्रहणे मधुरं जलमिति गुणगुणिनोः परस्परोपश्लेषेण विशेष्यविशेषणभावमापन्नतया एकज्ञानगोचरता। माधुर्यस्य जलस्य च समूहावलम्बने माधुर्यं जलञ्चेत्या-

यथा परस्परोपश्लेषेणौदासीन्येन वा तत्तत्प्रमितिगोचरता तथा रसानां तद्गुणानां चाभिव्यक्तिविषयतेति तु नव्याः। उदाहरणं तु 'तान्तमाल' इत्यादि प्रागुक्तमेव (१६० पृष्ठे) वाक्यस्य व्यञ्जकतायामपि 'आविर्भूता यदवधि' इत्यादि च (१०७पृष्ठे)। प्रबन्धस्य तु योगवासिष्ठरामायणे शान्तकरुणयोः, रत्नावल्यादीनि च शृङ्गारस्य व्यञ्जकत्वान्निदर्शनानि प्रसिद्धानि। मन्निर्मिताश्च पञ्च लहर्यो भावस्य। पदैकदेशस्य च 'निखिलमिदं जगदण्डकं वहामि' (११७ पृष्ठे) इति करूपतद्धितौ वीररसस्य प्रागेवोदाहृतः। एवं रागादिभिरपि व्यङ्ग्यत्वे सहृदयहृदयमेव प्रमाणम्। एवमेषां रसादीनां प्राधान्येन निरूपितान्युदाहरणानि। गुणीभावे तु वक्ष्यन्ते, नामानि च। तत्र प्राधान्य एवैषां रसादित्वम्। अन्यथा तु

कारके परस्परमुदासीनतया गुणगुणिनोर्ज्ञानगोचरता। चक्षुषा वाद्ययन्त्रस्य श्रोत्रेण च ध्वनेर्ग्रहणे वीणाशब्द इति ज्ञानगोचरता परस्परोपश्लेषेणोदासीनयोर्वा शब्दवाद्ययन्त्रयोः। स्वं गुणः स्वं गुणि। उपनीता उपस्थिताः। उदासीनानां गुणगुणिभावरहितानां परस्परोपश्लेषो विशेष्यविशेषणभावः। औदासीन्येन विशेषणविशेष्यभावराहित्येन। प्रागुक्तमेव माधुर्यगुणव्यञ्जकरचनोदाहरणम्। तत्रैव वर्णनं द्रष्टव्यम्। व्यञ्जकतायामपि ● विप्रलम्भशृङ्गारस्येति शेषः। रसनिरूपणे समुदाहृतमिदम्। शान्तकरुणयोः ● यथासङ्ख्यमन्वयः। भावस्य ● देवविषयकरतेः। पदैकदेशाः ● प्रकृतयः प्रत्ययाश्च। अल्पार्थकः कप्रत्ययः। प्रागेव रसनिरूपणे।

यद्यपि कुत्रचित्पुस्तके तत्र जगदल्पकमिति पाठो मुद्रितः परमनेन सन्दर्भेण ग्रन्थकारानभिप्रेतत्वं तस्य प्रतीयते। वक्ष्यन्ते ● ग्रन्थस्यासमाप्तेर्नोपलभ्यतेऽयमंशः। अन्यग्रन्थेषु तु सोदाहरणानि नामानि निर्दिष्टानि।

तथा च नामानि—रसस्यान्याङ्गत्वे रसवदलङ्कारः। भावस्यान्याङ्गत्वे प्रेयोऽलङ्कारः। रसाभासभावाभासयोरन्याङ्गत्वे ऊर्जस्विनामालङ्कारः। भावशान्तेरन्याङ्गत्वे समाहितालङ्कारः। भावोदयस्य भावशबलस्य च अन्याङ्गत्वे क्रमशो भावोदयो भावशबलश्चालङ्कारः। विस्तरभिया उदाहरणानि नोद्ध्रियन्ते। मतभेदमाह तत्र प्राधान्य ●

रत्यादित्वमेव । नामनि रसपदं तु रत्यादिपरमित्येके । अस्त्येव रसादित्वं किं तु न ध्वनिव्यपदेशहेतुत्वमित्यपरे ॥

इति महोपाध्यायपदवाक्यप्रमाणपारावारपारीणश्रीपेरमभट्ट य
सूरेः सूनुना पण्डितराजजगन्नाथेन निर्मिते रसगङ्गाधरे
रसनिरूपणात्मकं पूर्वमाननम् ।

गुणीभूतो रत्यादिर्न रसस्वरूपतां भजते किन्तु रत्यादिरूपत्वमेवेत्यर्थः । नामनि ० रसवदित्याद्यलङ्कारनामनि । रसत्वं गुणीभूतेऽपि वर्तते गुणीभावश्चमत्कारापकर्षको न तु स्वरूपनिवर्तक इत्याह अस्त्येव ० प्राधान्य एव ध्वनिव्यपदेशः । रसाभासे रसत्वारसत्वे इव युक्तायुक्तत्वे स्वयमूहनीये न वितन्यते ।

इति प्रथमाननम् ।

रसप्रकर्षं गुणभावपूर्णमलक्ष्यरूपक्रममाननं सद् ।
अलञ्चकाराद्यमनेकदोषाकरस्य कन्त्रा रसचन्द्रिकेयम् ॥ १ ॥

इति रसगङ्गाधरप्रथमाननस्य सरयूपारीकाश्यपश्रीरामगोविन्दसुतश्रीयमुना-
देवीगर्भजकेदारनाथोझाप्रसारिता रसचन्द्रिका ।

द्वितीयमाननम् ।

अथ संलक्ष्यक्रमध्वनिर्निरूप्यते—

स च तावद्द्विविधः, शब्दशक्तिमूलोऽर्थशक्तिमूलश्च । तत्राद्यो द्विविधः, व्यङ्ग्यस्य वस्तुत्वालंकारत्वाभ्यां द्वैविध्यात् । द्वितीयोऽपि वस्त्वलंकारात्मना लोकसिद्धेन तथाभूतेनैव प्रतिभामात्रनिर्वर्तितेन च व्यञ्जकेनार्थेन चतुर्विधेन वस्त्वलंकारात्मनो द्विविधस्य व्यङ्ग्यस्य प्रत्येकं व्यञ्जनादष्टमूर्तिः । प्रतिभानिर्वर्तितत्वाविशेषाच्च कविततदुम्भितवक्तृप्रौढोक्तिनिष्पन्नयोरर्थयोर्न पृथग्भावेन गणनोचिता । उम्भितोम्भितादेरपि

अथ संलक्ष्यक्रमध्वनिनिरूपणम् ।

गङ्गाधरस्याननमद्वितीयं द्वितीयमेमेनं क्रमशोऽभिद्रक्ष्यम् ।
अलङ्कृतीनां सदनं विलोक्य विलुप्तदोषा रसचन्द्रिकास्ताम् ।। १ ।।

द्वितीयोऽपि॰ अर्थशक्तिमूलोऽष्टमूर्तिरित्यर्थः । तत्र व्यञ्जकश्चतुर्विधो व्यङ्ग्यश्च द्विविधः । १ स्वतः सिद्धवस्तुना व्यङ्ग्यं वस्तु, २ स्वतः सिद्धवस्तुना व्यङ्ग्योऽलङ्कारः, ३ स्वतः सिद्धालङ्कारेण व्यङ्ग्यवस्तु. ४ स्वतः सिद्धालङ्कारेण व्यङ्ग्योऽलङ्कारः, इति लोकसिद्धा व्यञ्जकस्य चत्वारो भेदाः । एवं कविप्रतिभानिर्वर्तितव्यञ्जकस्य चत्वारो भेदा स्वतः सिद्धस्थाने कविप्रतिभानिर्वर्तितेति योजयित्वा कल्पनीयाः । निर्वर्तितं साधितम् । **तथाभूतेनैव॰** वस्त्वलङ्कारात्मना लोकसिद्धेन । शब्दशक्तिमूलस्तु व्यङ्ग्यस्य द्वैविध्यादेव द्विविधः । व्यङ्ग्यस्य द्वैविध्यन्तु वस्तुत्वेन अलङ्कारत्वेन च । काव्यप्रकाशादिषु कविनिबद्धवक्तृकल्पितस्य वस्तुनोऽलङ्कारस्य च व्यञ्जकत्वेन व्यञ्जकद्वयं प्रकल्प्य तादृशव्यङ्ग्यभेदेन चत्वारोऽर्थशक्तिमूला भेदा इतरे ऊहितास्ते च न युक्ता यथा कविप्रतिभानिर्वर्तितं प्रतिभानमात्रसिद्धं तथा कविनिबद्धवक्तृकल्पितमपि प्रतिभानमात्रसिद्धं भवत्येवेति नातिरिक्तं कल्पनीयमित्याशयेनाह **प्रतिभानिर्वर्तितत्वा॰** उम्भितं कलितम् । प्रौढोक्तिनिष्पन्नम् तदुक्तिवैचित्र्यादायातम् । **उम्भितोम्भितादेरपि॰** कविनिबद्धेन वक्त्रा निबद्धस्य वक्तुः प्रतिभानिर्वर्तितस्यापि । अस्य अन्यथेत्यादिः । अस्यार्थः प्रतिभानिर्वर्तितत्वेन संग्रहमनादृत्य वक्तृविशेषमन्तर्भाव्य भेदवर्णने । कविनिबद्धवक्तृत्वेन

भेदान्तरप्रयोजकतापत्तेः। न च तस्यापि कव्युम्भितत्वानपायात्तत्प्रयोज्यभेदान्तर्गतत्वमेवेति वाच्यम्। प्रथमोम्भितस्यापि लोकोत्तरवर्णनानिपुणत्वलक्षणकवित्वानपायात्पृथग्भेदप्रयोजकतानुपपत्तेः। एवं साकल्येन दशभेदोऽयम्। तत्र केचिदाहुः—नानार्थस्य शब्दस्य सर्वेष्वर्थेषु संकेतग्रहस्य तुल्यत्वाच्छ्रुतमात्र एव तस्मिन्सकलानामर्थानामुपस्थितौ, शब्दस्यास्य कस्मिन्नर्थे तात्पर्यमिति संदेहे च सति, प्रकरणादिकं तात्पर्यनिर्णायकं पर्यालोचयतः पुरुषस्य सति तन्निर्णये, तदात्मकपदज्ञानजाया एकार्थमात्रविषयायाः पुनः पदार्थोपस्थितेरनन्तरमन्वयबोध इति नये द्वितीयायाः पदार्थोपस्थितेः प्राथमिक्या इव न कुतो नानार्थ-

कविनिबद्धवक्तृकल्पितवक्तुरनुगमे तु कवित्वेनानुगमः श्रेयानिति शङ्कासमाधानाभ्यामाह न च तस्यापि० उम्भितोम्भितादेरपि। तत्प्रयोज्य० कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नादिभेदेषु। उम्भितस्यापि कविनिबद्धवक्तुरपि। अत्र मर्मप्रकाशः—वृद्धोक्तिविषयाच्छशूक्तिविषय इव कव्युक्तिविषयात्कविनिबद्धोक्तिविषये चमत्काराधिक्यानुभवात्पृथगुक्तिः। ततः परञ्च प्रतिनिधानसाध्यप्रतीतिकतया चमत्कारस्थगनान्नोत्तम्भितादेः पृथग् गणनेति तु नव्याः। इत्याह। प्रदीपोद्योतविलोकनेन प्रतिनिधानेत्यस्य स्थाने प्रणिधानेति पाठो युज्यते। तत्रेदं बोध्यम्। मूले वक्तृविशेषमनन्तर्भाव्य प्रतिभानिर्वर्तितत्वेनैव संग्रहः कृतः स च सम्यगेव न मर्मप्रकाशेन खण्ड्यते। परं चमत्कारविशेषमनुरुद्धय कथन्न भेदः कल्पितः पण्डितराजेन इत्याशङ्का जागर्ति।

अत्र केचित् कविनिबद्धवक्तुः प्रौढोक्तिसिद्धं वस्तु कविनिबद्धो वक्ताऽपि कविप्रतिभयैव निष्पन्नः। प्रतिभानिष्पन्नवस्तुनां भेदेन भेदवर्णने तु अनन्तभेदापत्तेरिति वदन्ति। अन्ये तु मर्मप्रकाशोक्तदृष्टान्तेऽवस्थाविशेषकृता चमत्कृतिः, तथाऽनुरुद्धय भेदवर्णने तु अत्रापि निबद्धवक्तुरवस्थाकृतभेदापत्तेः। निबद्धवक्तॄणामवस्थाविशेषाणां प्रतिभासम्पन्नत्वेनैव संग्रहः समीचीनः। इत्याहुः।

॥ नानार्थकस्थले व्यञ्जनावादिमतम् ॥

॥ तत्रैकार्थविषयकोपस्थितिवादिमतम् ॥

केचिदाहुः० द्वितीयामेकार्थविषयिणीमुपस्थितिं मन्यमानाः। तस्मिन्० नानार्थके शब्दे। तन्निर्णये० तात्पर्यनिर्णये। तदात्मकपद० क्षणद्वयस्थायिनः पूर्वस्य पदज्ञानस्य नानार्थोपस्थितिं कृत्वा विनाशेऽपि तात्पर्यज्ञानस्य पदविषयकतया तात्पर्य-

गोचरतेति प्रकरणादिज्ञानस्य तदधीनतात्पर्यनिर्णयस्य वा पदार्थोपस्थितौ प्रतिबन्धकत्वं वाच्यम् । अन्यथा शाब्दबुद्धेरपि नानार्थविषयत्वापत्तिः । अत एवोक्तम्—'अनवच्छेदे विशेषस्मृतिहेतवः' इति । अनवच्छेदे तात्पर्यसंदेहे । विशेषस्मृतिरेकार्थमात्रविषया स्मृतिः । इत्थं च सुरभिमांसं भक्षयतीत्यादेर्वाक्याज्जायमाना द्वितीया प्रतीतिर्गवाद्युपस्थितेरभावात्कथं स्यादिति तदुपस्थित्यर्थं व्यञ्जनव्यापारोऽभ्युपेयः । अथैकया शक्त्या प्राकरणिकार्थोपस्थितेरनन्तरं द्वितीयया शक्त्या द्वितीयार्थोपस्थितिस्तथापि स्यादिति चेत्, न स्यादेव, प्रकरणादिज्ञानस्य प्रतिबन्धकस्यानुपरमात् । अन्यथा प्राकरणिकार्थोपस्थितावेवाप्राकरणिकस्याप्यर्थस्य विषयत्वं स्यात् । न च प्रकरणादिज्ञानस्य तादृशपदजन्यार्थोपस्थितिसामान्य एव प्रतिबन्धकत्वाद्द्वचक्त्यापि कथमर्थान्तरोपस्थितिरिति शङ्क्यम् । धर्मिग्राहक-

---

ज्ञानमेव पदज्ञान तस्माज् जाता या एकार्थमात्रविषयिणी पदार्थोपस्थितिः । नये मते । न कुतो ० प्रथमोपस्थितिर्यथा नानार्थविषयिणी तथा द्वितीयाऽपि नानार्थविषयिणी कथं नेत्यर्थः । गोचरता विषयता । प्रतिबन्धकत्वम् अप्राकरणिकार्थविषयिणीमुपस्थितिं प्रति अर्थान्तरविषयकप्रकरणज्ञानं प्रतिबन्धकम् । प्रकरणस्याननुगतत्वे प्रकरणज्ञानस्य क्षणद्वयस्थायिनो विनाशे वा तादृशोपस्थितिं प्रति प्रकरणज्ञानजन्यस्तात्पर्यनिश्चयो हेतुरित्यर्थः । अन्यथा ० प्रतिबन्धकत्वानङ्गीकारे नानार्थविषयिण्या उपस्थितेरापत्तौ । त्वापत्ति ० उपस्थितार्थस्य शाब्दबोधविषयत्वाभावे कारणाभावात् । एवोक्तम् ० अग्रे व्याख्यास्यमानं संयोगो विप्रयोगश्चेत्यादि पद्यम् । तस्यैव चतुर्थांशोयम् । स्मृतिरुपस्थितिः । इत्थञ्च ० नानार्थकस्थले शक्त्या एकार्थमात्रविषयकशाब्दबोधजनने । सुगन्धि मांसं सुरभेर्गोर्वा मांसम् । प्रतीति ० गोमांसविषयिणी शाब्दबोधात्मिका । तदुपस्थित्यर्थं गवोपस्थितये । पूर्वं वर्णितस्यापि विस्मरणाशङ्कया शङ्कासमाधानाभ्यां प्रतिपादयति अथैकया ० प्रकरणादीति तात्पर्यस्य चोपलक्षकम् । अनुपरमात् सत्त्वात् । प्रतिबन्धकत्वानङ्गीकारे प्राकरणिकोपस्थितेरनन्तरमनेकार्थविषयिणीमुपस्थितिं किमाशङ्कसे प्रथमा प्राकरणिकार्थविषयिण्येषा अप्राकरणिकार्थविषयिण्यपि स्यादित्याह अन्यथा ० । सामान्ये ० यया कयाऽपि वृत्त्या प्रयोज्यायाम् । धर्मिग्राहक ० धर्मिणो व्यञ्जनारूपस्य ग्राहकं मानमनेकार्थशब्दस्थलेऽप्राकरणिकार्थविषयकस्य शाब्दबोधस्य व्यञ्जनातिरिक्तवृत्त्याऽनुपपत्तिः । एतादृशस्थले सरलाया अशुद्धिः सरलेवेति ध्येयम् । अप्राकरणिकार्थो-

मानेनाप्राकरणिकोपस्थापकतयैव तादृशव्यक्तेरुल्लासात्तद्जन्योपस्थितिं प्रत्येव प्रकरणादिज्ञानस्य प्रतिबन्धकत्वकल्पनात्। व्यक्तिज्ञानस्योत्तेजकत्वकल्पनाद्वा। एतदेव सर्वमभिसंधायोक्तम्—

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥'

यन्त्रणमपरार्थोपस्थापनप्रतिबन्ध इति। अपरे त्वाहुः—नानार्थशब्दजशाब्दबुद्धौ तात्पर्यनिर्णयहेतुताया अवश्यकल्प्यत्वात्प्रथमं नानार्थशब्दादनेकार्थोपस्थानेऽपि प्रकरणादिभिस्तात्पर्यनिर्णयहेतुभिरुत्पादिते तस्मिन्यत्र तात्पर्यनिर्णयस्तस्यैवार्थस्यान्वयबुद्धिर्जायते, नान्यस्येति सरणावाश्रीयमाणायां नैकमात्रगोचरस्मृत्यपेक्षा, नाप्यपरार्थोपस्थानप्रतिबन्धकत्वकल्पनम्। एवं च प्रागुपदर्शितनानार्थस्थले प्रकरणादिज्ञाना-

---

पस्थितिजनकत्वं व्यञ्जनायां धर्मः। **तदजन्यो** ● व्यक्तयजन्य। **कल्पनाद्वा** ● यस्याभावः प्रतिबन्धकविशेषणम् तदुत्तेजकं प्रतिबन्धकसत्तायामपि कार्यप्रयोजकमुच्यते। यथा दाहं प्रति शुद्धश्चन्द्रकान्तमणिर्न प्रतिबन्धकोऽपि तु सूर्यकान्तमणेरभावेन विशिष्टस्तत्र सूर्यकान्तमणिरुत्तेजक उच्यते। तथैवात्र शुद्धं तात्पर्यज्ञानं प्रकरणज्ञानं वा अनाप्रकारणिकार्थविषयिणीमुपस्थितिं प्रतिबध्नाति किन्तु व्यञ्जनाज्ञानस्याभावेन विशिष्टं तदा व्यञ्जनाज्ञानमुत्तेजकं संजातम्। अस्मिन्पक्षे उपस्थितौ प्रतिबध्यायां व्यक्त्यजन्यं विशेषणं न प्रविष्टमिति ध्येयम्। **योक्तम्** ● काव्यप्रकाशकृता। अत्र **मर्मप्रकाशः**। बोधकताविशेषः शक्तिः तद्विशेषो लक्षणा, तद्विशेषो व्यञ्जनेत्यालङ्कारिकसमयः। तज्ज्ञानं शाब्दबोधे हेतुरित्यभिप्राय इत्याह। परं रसगङ्गाधरमते तु बोधकताऽतिरिक्ता शक्तिः, वृत्तिज्ञानस्योपस्थितौ कारणतेत्यायाति। अस्य विशेषविवेचनन्तु विस्तरभयान्न क्रियते। यद्यपि वाचकत्वशब्दस्याभिधैव प्रसिद्धोऽर्थस्तथाऽपि ग्रन्थसन्दर्भवशादभिधाप्रयोज्योपस्थितिरर्थः संयोगाद्यैर्वक्ष्यमाणैर्नियन्त्रित इत्यन्वयः। अवाच्यार्थधीरप्राकरणिकार्थविषयिणी उपस्थितिः व्यापृतिर्व्यापारः। अञ्जनं व्यञ्जना। अपरार्थोपस्थापनम् अप्राकरणिकार्थोपस्थितिः।

अपरे ● अनेकार्थविषयिण्योपस्थित्यैवैकार्थविषयकशाब्दबोधः। न च प्रतिबन्धकत्वस्यावश्यकता, अप्राकरणिकार्थविषयकबोधाय व्यञ्जनाऽङ्गीकारश्चेति वादिनः। **तस्मिन्** ● तात्पर्यनिर्णये। अन्वयबुद्धिः शाब्दबोधः। नान्यस्य अतात्पर्यार्थस्य। कस्य

धीनात्तात्पर्यनिर्णयात्प्राकरणिकार्थशाब्दबुद्धौ जातायामतात्पर्यार्थविषयापि शाब्दबुद्धिस्तस्मादेव शब्दाज्जायमाना कस्य व्यापारस्य साध्यतामालम्बताम्, ऋते व्यञ्जनात्। न च शक्तिसाध्या सेति वाच्यम्। तदधीनबोधं प्रति तात्पर्यनिर्णयस्य हेतुत्वात्। व्यक्त्यधीनबोधस्तु नावश्यं तात्पर्यज्ञानमपेक्षते। नन्वेकमात्रगोचरस्मृतेस्तच्छाब्दबुद्धावनपेक्षितत्वे 'विशेषस्मृतिहेतवः' इति प्राचां ग्रन्थः कथं संगच्छते। कथं वा प्रकरणादिज्ञानस्यापरार्थोपस्थानप्रतिबन्धकत्वविरहे संयोगाद्यैरनेकार्थस्य शब्दस्य वाचकताया नियन्त्रणोक्तिश्चेति चेत्, इत्थम्——स्मृतिशब्दस्य निश्चयपरतया विशेषस्मृतिशब्देन विशेषविषयस्तात्पर्यनिर्णयो गृह्यते। संयोगाद्यैर्वाचकताया नियन्त्रणं चैकार्थमात्रविषयकतात्पर्यनिर्णयजननद्वारा शाब्दबुद्ध्यनुकूलत्वम्। अवाच्यार्थोऽतात्पर्यार्थः। एवं च न ग्रन्थासंगतिरित्यपि वदन्ति। अथ प्राकरणिकार्थबोधानन्तरं तादृशपदज्ञानस्योपरमात्कथं व्यक्तिवादिनाप्यर्थान्तरधीः सूपपादेति चेत्। मैवम्। प्रथमार्थप्रतीतेर्व्यापारस्य सत्त्वाददोष इत्येके। अर्थप्रतीतौ शक्यतावच्छेदकस्येव पदस्यापि विशेषणतया भानात्प्राथमिकशक्यार्थ-

---

व्यापारस्य ● अभिधया बोधस्य तात्पर्यनिर्णयेन नियन्त्रितत्वात्, मुख्यार्थबाधाद्यभावाल्लक्षणाया अप्रसरात्।

मपेक्षते ● धर्मिग्राहकमानेन अतात्पर्यार्थविषयतया व्यक्तेरङ्गीकारात् अस्मिन् मते तस्मादेव पदाज्जायमानेति कथं सङ्गच्छते? शब्दस्य क्षणिकत्वमते पदस्य क्षणद्वयस्थापिनः पदज्ञानस्य वा विनाशात् तदाशङ्क्यमतत्रयेण समाधत्ते इत्येके● कार्याव्यवहितपूर्वक्षणे कारणकारणव्यापारान्यतरसत्ता अपेक्ष्यते यथा स्वर्गकारणस्य यागस्य विध्वंसे स्वर्गप्राक्क्षणे यागव्यापारस्य सत्त्वन्तथाऽत्र कारणस्य पदज्ञानस्य विनाशेऽपि पदज्ञानव्यापारस्य प्राथमिकबोधस्य द्वितीयशाब्दबोधप्राक्क्षणे वर्तमानत्वान्न दोष इति प्रथममतम्। परमत्र प्रथमार्थबोधरूपस्य व्यापारस्य सर्वत्र सत्त्वादेकार्थकस्थले ऽप्येवंविधैवासकृत् समानविषयकबोधस्यापत्तिः। द्वितीयबोधं प्रति समानविषयकप्रथमबोधस्य प्रतिबन्धकत्वादिकं कल्पनीयम्। द्वितीयमतमाह अर्थप्रतीतौ ● बोधकस्य शब्दस्यापि बोध्यार्थस्येव शाब्दविषयता वैयाकरणभूषणसारे नामार्थप्रकरणे कार्यकारणभावप्रदर्शनपुरस्सरं

बोधस्यैव पदज्ञानत्वादित्यपरे। आवृत्त्या पदज्ञानं सुलभमित्यपि कश्चित्। तदित्थं नानार्थस्थलेऽनुरणनीयं व्यञ्जनं शब्दशक्तिमूलम्। शब्दस्य परिवृत्त्यसहत्वादिति ध्वनिकारानुयायिनो वर्णयन्ति। अन्ये त्वत्र प्रत्यवतिष्ठन्ते। यत्तावदुक्तमेकार्थमात्रविषया पदार्थोपस्थितिस्तदन्वयबोधेऽपेक्ष्यत इति तदसारम्। नानार्थादर्थद्वयोपस्थितावपि प्रकरणादिज्ञानाधीनतात्पर्यज्ञानमहिम्नैव विवक्षितार्थशाब्दबोधोपपत्तेः, एकार्थमात्रोपस्थित्यपेक्षायां मानाभावात्। अपरार्थोपस्थापकसामग्र्याः पदज्ञानस्य सत्त्वेन तदुपस्थितेरप्यौचित्याच्च। न च प्रकरणादिज्ञानं तदधीनतात्पर्यज्ञानं वा परार्थोपस्थाने प्रतिबन्धकमिति शक्यं वक्तुम्। संस्कारतदुद्बोधकयोः सत्त्वे स्मृतेः प्रतिबन्धस्य क्वाप्यदृष्टत्वात्। अत्रैव स्मृतावयं प्रतिबध्यप्रतिबन्धकभावः कल्प्यते, न स्मृत्यन्तरे इत्यप्यहृदयंगमम्। तादृशकल्पनाया निष्फलत्वात्, अनुभवविरुद्धत्वाच्च। तथा हि नानार्थ-

---

साधु प्रतिपादिता तत एव प्रदृश्यताम्। न सोऽस्ति प्रत्ययो लोक इत्यादिकारिकया, उदेति सविता ताम्र इत्यादि काव्यप्रकाशादिसम्वादेन चाग्रे मूले पण्डितराजो वाचकस्यापि वाच्यविशेषणतया भानं व्यवस्थापयति। मूलार्थस्तु यथा घटप्रतीतौ घटे घटत्वं प्रकारस्तथा घटपदमपि घटे प्रकारतया भासते तेन घटाद्यर्थज्ञानमेव घटपदज्ञानं सञ्जातमिति। यद्यपि वैयाकरणलघुमञ्जूषायामाकाङ्क्षाप्रकरणे एवं रीत्या बोधावृत्तिप्रसक्तिवारणाय प्राथमिकबोधस्य प्रतिबन्धकत्वं प्रतिपादितन्तथापि व्यक्त्यनधीनबोधं प्रत्येव प्रतिबन्धकत्वसङ्कोचे व्यञ्जनाज्ञानस्योत्तेजकत्वकल्पनया वा निर्वहतीयं व्यवस्था। उच्चारित एव प्रत्यायको नानुच्चारित इति सिद्धान्तमनुरुन्धानस्य तृतीयं मतमाह **आवृत्त्या** • अनुरणनीयं संलक्ष्यक्रमः। **परिवृत्य** परिवृत्तिः परिवर्तनम् पर्यायान्तरप्रयोगमुल्लासकतया न सहते व्यञ्जनाऽतः शब्दान्वयव्यतिरेकानुविधायित्वात् शब्दशक्तिमूला व्यञ्जना।

अन्येत्व • तात्पर्यज्ञानस्य न शाब्दकारणत्वं नत्रोपस्थितिप्रतिबन्धकत्वम्, नानार्थकस्थले व्यञ्जनां विनैवाभिधयैव द्वितीयार्थबोध इति वादिनः। यदपीत्यतः प्राक् प्रथमोदितस्य कस्यचिन्मतस्य खण्डनम्। **बोधोपपत्तेः** • अपरे तु मतरीत्या। **क्वाप्यदृष्टत्वात्** • यत्र न स्मृतिस्तत्रोद्बोधकमेव नास्ति। उद्बोधकसत्त्वे स्मृतेरवश्यंभावात् अत्र तु वादिना व्यञ्जनोल्लासकत्वेनाभिमत एवोद्बोधक इति भावः। **विरुद्धत्वाच्च** • शक्त्यधीनव्यञ्जनया द्वितीयार्थबोधवादिनाऽपि द्वितीयार्थस्मृतेः शक्त्युपयोगस्य चाङ्गी-

शक्तिविषयकदृढसंस्कारशालिनां प्रकरणज्ञानवतामपि पयो रमणीयमित्यादेर्वाक्यात्प्रथममर्थद्वयोपस्थितिरनुभवसिद्धा। अत एव पयो रमणीयमित्यादिवाक्यमकस्मादप्याकर्णितवद्भिः प्रकरणाद्यभिज्ञैरप्रकरणज्ञाः पांसुरपादा वक्तुस्तात्पर्यं बोध्यन्ते, नूनमस्य दुग्धे तात्पर्यं शब्दस्य, न तु जल इति। यदि च प्रकरणादिज्ञानं नानार्थशब्दाज्जायमानामप्राकरणिकार्थोपस्थितिं प्रतिबध्नीयात्तत्कथमेते तदानीमनुपस्थितजलाः प्रकरणज्ञा जलतात्पर्यं निषेधेयुरित्यहृदयंगम एवायमप्राकरणिकार्थोपस्थापनप्रतिबन्धकभावः प्रकरणादिज्ञानस्य। यदप्युच्यते प्रकरणादिज्ञानात्प्राकरणिकेऽर्थे तात्पर्यविषयतया निर्णीते तदीयशाब्दबोधानन्तरमतात्पर्यविषयीभूतार्थबोधो जायमानो व्यञ्जनव्यापारसाध्य इति। तत्र किमयं नानार्थस्थले सर्वत्रैव व्यञ्जनोल्लासः, आहोस्वित्क्वचिदेवेति संमतम्। नाद्यः। प्राकरणिकाप्राकरणिकयोरर्थयोः शाब्दबुद्धौ सर्वत्राभ्युपगम्यमानायां तात्पर्यज्ञानकारणतायाः कल्पनस्य नैरर्थक्यापत्तेः। न च शक्तिजबोधे सा कल्प्यते। व्यक्तिजबोधस्तु तात्पर्यज्ञानं विनापि भवतीति तत्स्थाने शक्तिजबोधवारणाय तत्कल्पनमिति वाच्यम्। अतात्पर्यार्थबोधस्य सार्वत्रिकत्वे तस्य शक्तिजतायामपि बाधकाभावात्। अथ नानार्थशब्दादर्थद्वयोपस्थितौ सत्यां प्रकरणादिना सत्येकस्मिन्नर्थे तात्पर्यनिर्णये तस्यैवार्थस्य प्रथमं शाब्दबुद्धिर्जायते, नापरस्यार्थस्येति नियमरक्षणाय शक्तिजतदर्थशाब्दबुद्धौ तदर्थतात्पर्यज्ञानं हेतुरिष्यते। अन्यथा तात्पर्यविषयतया निर्णीतस्यार्थस्येव तथाभूतस्यापरस्याप्यर्थस्य प्रथमं शाब्दधीः स्यात्। अनन्तरं तु तात्पर्यविषयार्थबोधादतात्पर्यविष-

---

कारात्। अनुभवमेव दर्शयति अत एव • द्वितीयार्थोपस्थानादेव। बोध्यन्ते • ण्यन्तात्कर्मणि प्रत्ययः। पांसुरपादा ग्रामीणा अण्यन्तकर्तारो ण्यन्ते कर्मतां गताः तिङाभिधीयन्ते।

अपरे तु मतं खण्डयति यदप्यु • तत्कल्पनम् • व्यक्त्यनधीनबोधं प्रति प्रकरणादिज्ञानं प्रतिबन्धकमिति पूर्वोक्तरीत्या सार्वत्रिकत्वे • द्वितीयार्थकतात्पर्याभावस्थलेऽपि। जतायामपि • यो व्यञ्जनया कार्यते स शक्त्यैव क्रियताम्।

यार्थविषयापि शाब्दधीरिष्यत इति तज्जन्यतावच्छेदककोटौ शक्तिजत्वं निवेश्यत इति चेत्। मैवम्। 'सोऽव्यादिष्टभुजंगहारवलयस्त्वां सर्वदो-माधवः' इत्यादौ श्लेषकाव्य इव प्रकृतेऽपि प्रकृताप्रकृतयोरर्थयोर्बोधस्य स्वीकारे बाधकाभावात्। न च दृष्टान्तेऽर्थद्वयेऽपि प्रकरणसाम्याता-त्पर्यज्ञानमस्तीति युगपद्द्वयोर्बोध उपपद्येत। दार्ष्टान्तिके त्वेकत्रैव प्रकरणादिवशात्तदिति न युगपदर्थद्वयबोधोपपत्तिरिति वाच्यम्। तात्पर्यज्ञानकारणताया एवासिद्धत्वेन युगपदर्थद्वयबोधानुपपत्तिवाचो-युक्तेररमणीयत्वात्। तादृशज्ञानहेतुतासिद्धौ तु शक्येतापीत्थं वक्तुम्। तर्हि तात्पर्यज्ञानस्य कुत्रोपयोग इति चेत्। अस्मिन्नर्थेऽयं शब्दः प्रमाणमयमर्थः प्रमाणवेद्य इत्यादिनिर्णये प्रवृत्त्याद्युप योगिनीति गृहाण। इत्थं च नानार्थस्थलेऽपि तात्पर्यधियः कारणतायां शिथिलीभवन्त्याम-तात्पर्यार्थविषयशाब्दबुद्धिसंपादनाय व्यक्तिस्वीकारोऽनुचित एव। शक्त्यैव बोधद्वयोपपत्तेः। नापि द्वितीयः। हेतोरभावात्। व्यङ्ग्यार्थ-विषयककवितात्पर्यज्ञानं तथेति चेत्, न, व्यक्तिजबोधे तात्पर्यज्ञान-

---

तज्जन्यताव ० प्रथमं तत्पर्यार्थस्यैव नातात्पर्यार्थस्येति नियमसंरक्षणाय शक्त्यधीन-बोधं प्रति तात्पर्यज्ञानं कारणमिति कल्प्यते। बोधमात्रं प्रति तात्पर्यज्ञानस्य कारण-त्वाङ्गीकारे तु व्यञ्जनयाऽपि अतात्पर्यार्थस्य बोधो न स्यात्। तथा च तात्पर्यनिर्णयजन्यः शक्तिजो बोधो जन्यता तादृशे बोधे जन्यतावच्छेदकं बोधत्वं शक्तिजत्वञ्च। अनया रीत्या जन्यतावच्छेदके शक्तिजत्वस्य प्रवेशः। **सोऽव्यादिष्ट** ० सर्वद उमाधवो माधवश्च त्वां रक्ष्यात्। इष्टे सर्पाणां मालाकटके यस्य स उमाधवः। माधवस्तु भुजङ्गानां संहाराय वलं यस्य तेन गरुडेन याति। याधातोः कप्रत्ययेन सिद्धः। **तदिति** ० वैयञ्जनि-कबोधोदाहरणे शक्यार्थे एव तत्तात्पर्यज्ञानमित्यर्थः। **प्रवृत्त्याद्युप** ० प्रवृत्तिं प्रति अप्रमात्वेन गृहीतं ज्ञानं कारणं न भवति यच्छाब्दज्ञानन्तात्पर्यविरुद्ध तत्र ज्ञानेऽप्रामाण्यग्रहः। तेन च न प्रवृत्तिर्नवा प्रतिबन्धकत्वम्। तात्पर्यार्थविषयके ज्ञाने तु प्रमात्वग्रहेण अप्रमात्व-ग्रहस्य निरासात्प्रवृत्तिः प्रतिबन्धकत्वञ्च। अत्र प्रवृत्तिपदार्थे सरलाया भ्रमः। **द्वितीयः** ० नानार्थस्थले क्वचिदेव व्यञ्जनोल्लासः। **रभावात्** ० अत्र व्यञ्जनोल्ला-सस्तत्र नेति विनिगमकस्याभावात्। वैयञ्जनिकबोधे तात्पर्यनिर्णयस्यानादृतत्वात्तस्य

कारणतायास्त्वयानभ्युपगमात । यत्राश्लीलं दोषस्तत्राप्राकरणिकेऽर्थे सकृज्ज्ञानुभवसिद्धे कवितात्पर्यस्य विरहात्तज्ज्ञानस्य तादृशबुद्धिहेतुताया व्यभिचाराद्दूषितत्वाच्च । अथ श्रोतुः शक्तिविशेषो व्यक्तेरुल्लासे हेतुः, स च फलबलाच्चमत्कारिण्येवार्थे व्यक्तिमुल्लासयति नाचमत्कारिणीति सिद्धं व्यञ्जनोल्लासस्य क्वाचित्कत्वमिति चेत् । न । हन्तैवं स नियन्त्रितशक्तेरेवोल्लासकोऽस्त्विति कृतं नानार्थस्थले व्यक्तिकल्पनया । किं च 'उल्लास्य कालकरवालमहाम्बुवाहम्' इत्यादि नानार्थव्यञ्जकस्थलेऽगृहीतद्वितीयार्थशक्तिकस्य गृहीतविस्मृतद्वितीयार्थशक्तिकस्य वा पुंसः सर्वथैव व्यञ्जनया द्वितीयार्थबोधानुदयात्तत्र तया तदापत्तिस्तव दुर्वारा, न च येन शब्देन योऽर्थो व्यज्यते तस्य शब्दस्य तदर्थगतशक्तिज्ञानं तदर्थव्यक्तेरुल्लासे हेतुरिति । वाच्यम् । 'निःशेषच्युत'—इत्यादौ रमणव्यक्त्यनापत्तेः । नह्य-

---

विनिगमकत्वेन कल्पयितुमशक्यत्वात् । **यत्राश्लीलम्** • दोषतया तत्र कवितात्पर्याभावः प्रतीयते । अप्राकरणिकोऽर्थोऽश्लीलार्थः । तज्ज्ञानस्य तात्पर्यज्ञानस्य । तादृशबुद्धिर्व्यञ्जनाधीनाश्लीलार्थबुद्धिः । तात्पर्यनिर्णयरूपकारणाभावेऽपि व्यक्तिजबोधरूपकार्यसत्त्वाद्व्यतिरेकव्यभिचारः । शक्तिविशेषः प्रतिभाविशेषः । क्वाचित्कत्वम् यत्र चमत्कारी अर्थस्तत्रैवोल्लासो यत्र चाचमत्कारी तत्रानुल्लासः । **हन्तैवम्** • शक्तिनियन्त्रितां विधाय व्यञ्जनयाऽपि बोधे कारणान्तरगवेषणाश्रमो वृथैव । तदपेक्षया द्वितीया शक्तिरुल्लसतीत्येव सम्यक् । अथवा शक्तेर्नियन्त्रणमेवैवं स्थले न सम्यक् । अनुचितमपि शक्तेर्नियन्त्रणं द्वितीयार्थबोधस्य शक्तिज्ञानान्वयव्यतिरेकानुविधायित्वादित्याह **किञ्च** • पद्यमिदमग्रे सम्पूर्णं सव्याख्यानं शब्दशक्तिमूलकध्वन्युदाहरणप्रसङ्गे प्रेक्षणीयम् । अगृहीता अज्ञाता द्वितीयेऽर्थे शक्तिर्येन, प्रथमं ज्ञाता तदनन्तरं विस्मृता द्वितीयार्थे शक्तिर्येन तादृशस्य । तथा च शक्तिज्ञान एव व्यञ्जनया बोधोदयात्, शक्तिज्ञानाभावे चानुदयाच्छक्तिज्ञानमेव द्वितीयार्थबोधे हेतुः । शक्तिज्ञानस्य वैयञ्जनिकबोधे कारणत्वानङ्गीकारे दूषणमप्याह **तत्र तया** • तत्र अगृहीतशक्तिके विस्मृतशक्तिके वा, तया व्यञ्जनया, तदापत्तिर्द्वितीयार्थबोधापत्तिः ।

तदर्थगत • शक्तिज्ञानव्यञ्जनोल्लासयोः समानविषयकत्वेन कार्यकारणभावः ।

निश्शेषच्युत • पद्यमिदं सम्पूर्णं प्राक् चित्रमीमांसाखण्डनमुखेन व्याख्यातमस्ति ।

धमपदस्य कस्यचिद्रमणे शक्तिग्रहोऽस्ति। सति वा तस्मिंस्तेनैवोपपत्तौ व्यक्तिकल्पनवैयर्थ्यापत्तेश्च। न च नानार्थव्यञ्जनस्थल एवंजातीयकः कार्यकारणभावः कल्प्यते। तत्र च शक्तेर्नियन्त्रितत्वेन तद्ग्रहस्याप्रयोजकतया व्यक्तिकल्पनौचित्यादिति वाच्यम्। नवीनकार्यकारणभावकल्पने गौरवप्रसङ्गात्। नियन्त्रणस्य पूर्वमेव दूषितत्वेन तद्धेतोरेवेति न्यायावताराच्च। अथास्त्वप्राकरणिकोऽप्यर्थः शक्तिवेद्य एवान्वयधीगोचरः, परंतु यत्र न बाधितः स्यात्। यत्र तु बाधितस्तत्र 'जैमिनीयमलं धत्ते रसनायामयं द्विजः' इत्यादौ जुगुप्सितोऽर्थः, वह्निना सिञ्चतीत्यादौ वह्निकरणकसेक इव बाधोपहत एव स्यात्। बाधनिश्चयस्य तद्वत्ताज्ञानं प्रति प्रतिबन्धकतायाः सर्वजनसिद्धत्वात्। व्यक्तेस्तु बाधितार्थबोधकत्वं धर्मिग्राहकमानसिद्धमिति व्यक्तिवादिनामदोष इति। मैवम्। 'गामवतीर्णा सत्यं सरस्वतीयं

न नु शक्तिभ्रम एवाङ्गीक्रियतामित्यत आह **सति वा** • उपपत्तिर्द्वितीयार्थबोधः। **स्याप्रयोजकतया** • शक्तिग्रहस्य द्वितीयार्थबोधाजनकत्व त्। **दूषितत्वेन** • पयो रमणीयमित्यादि सन्दर्भेण। **तद्धेतोरेव** • व्यक्त्युल्लासहेतोर्नियन्त्रितशक्तेरुल्लासस्यैव हेतुत्वापत्तिः। **जैमिनीय** • अयं द्विजो जिह्वायां जैमिनिना प्रवर्तितं पूर्वमीमांसाशास्त्रं पर्याप्तं धत्ते। कुत्सितार्थस्तु जैमिनिशास्त्राध्येतॄणां मलं विष्ठां धत्ते। **बाधोपहत** • सेके वह्निकरणत्वं यथा बाधितन्तथा रसनायां मलधारणम्। इवाबोधोपहत इति पाठो मुद्रित उपलभ्यते। बाधप्रयुक्तेन बोधाभावेन उपहत इति कथंचित्तदर्थः। परं संदर्भदृष्ट्या बाधप्रतिबद्ध इत्यर्थकः 'बाधोपहत इत्येव पाठ उचितः। **सर्वजन** • घटप्रकारकज्ञानं प्रति घटाभावप्रकारको निश्चयः प्रतिबन्धकः इति रीत्या। अत्र प्रतिबध्यदले अनाहार्यत्वलौकिकसन्निकर्षाजन्यत्वदोषविशेषाजन्यत्वानि, प्रतिबन्धकदले च अप्रामाण्यग्रहानास्कन्दि'तत्वादीनि निवेश्यानि भवन्ति। **धर्मिग्राहक** • अबाधितार्थस्य अभिधयैव बोधाद्बाधितार्थबोधायैव व्यञ्जनाङ्गीक्रियते यदि व्यञ्जनयाऽपि बाधितार्थस्य बोधो न सत्तदा व्यञ्जनैव व्यर्था भवेत्। धर्मो बाधितार्थबोधकत्वं व्यञ्जनायाम्। व्यञ्जनासाधकमानेन बाधितार्थप्रतीत्यनुपपत्तिलक्षणेन व्यञ्जनागतस्य बाधितार्थबोधजनकत्वधर्मस्यापि सिद्धिः। **मैवम्** • अभिधयाऽपि बाधितार्थस्य प्रतीतिरनुभवसिद्धा समीहिता च। तथा च बाधितार्थप्रतीत्यै व्यञ्जनाङ्गीकारो मुधैव। अभिधयाऽपि बाधितार्थप्रतीतिमुदाहरति **गामवतीर्णा** • इदं सौधानामिति च भिन्नयोः पद्ययोरंशौ। इयं सरस्वती

पतञ्जलिव्याजात्'। 'सौधानां नगरस्यास्य मिलन्त्यर्केण मौलयः।' इत्यादौ वाच्यार्थान्वयबोधोपपादनायानुसरणीयेन यत्नेन नानार्थस्थलेऽपि बाधितार्थबोधस्योपपत्तिः स्यात्। अन्यथा प्रायशः सर्वेष्वप्यलंकारेषु वाच्यार्थबोधोपपत्तये व्यञ्जनाङ्गीकरणीया स्यात्। तस्मान्नानार्थस्याप्राकरणिकेऽर्थे व्यञ्जनेति प्राचां सिद्धान्तः शिथिल एव। प्राकरणिकाप्राकरणिकयोरर्थयोरुपमायां तु सा कदाचित्स्यादपीत्यत्रास्माकं प्रतिभाति। एवमपि योगरूढिस्थले रूढिज्ञानेन योगापहरणस्य सकलतन्त्रसिद्धतया रूढ्यनधिकरणस्य योगार्थालिङ्गितस्यार्थान्तरस्य व्यक्तिं विना प्रतीतिर्दुरुपपादा।

पतञ्जलिरूपेण पृथ्वीमवतीर्णा। अत्र बाधितोऽपि पृथिव्यां सरस्वत्या अवतारोऽभिधया बोध्यते। अत्र सरला कैतवापह्नुतिं मनुते। कुवलयानन्दस्य सम्वादोऽपि तत्र। मर्मप्रकाशस्तु व्याजोक्तिं स्वीकरोति, तत्र स्फुटतया ग्रन्थान्तरसम्वादो न प्राप्तः। अस्य नगरस्य सौधानां मौलयः सूर्यसम्बन्धं कुर्वन्ति। अत्रोच्चैस्तरत्वद्योतनाय बाधितोऽर्कसम्बन्धोऽभिधया प्रतिपाद्यते। सम्बन्धातिशयोक्तिर्मर्मप्रकाशे प्रतिपादिता। **यत्नेन** ● यथा लौकिकं प्रत्यक्षं दोषविशेषजन्यमाहार्यञ्च ज्ञानं न प्रतिबध्यं तद्भिन्नत्वं प्रतिबध्यकोटौ निवेश्यते तथा शाब्दान्यत्वमपि प्रतिबध्यकोटौ निवेशनीयम्। अथवा आहार्य एव शाब्दः आहार्यत्वेनैव न प्रतिबध्यत्वम्। आहार्यादपि चमत्कारोदय इति प्रकारौ मूलेऽग्रे स्फुटीभविष्यतः। **अन्यथा** ● बाधितार्थबोधस्य व्यञ्जनामात्रायत्तत्वे। **शिथिल एव** ● शिथिलो न त्वसंभूतः ग्रन्थानुरोधेन व्यञ्जनायामङ्गीक्रियमाणायां तथैव नानार्थकस्थलेऽपि निर्वाहः समीचीन एवेति शिथिलशब्देन ध्वनितम्। व्यञ्जनाङ्गीकारेऽन्यानुरोध एव प्रारभ्यते। **प्रकरणिका** ● उपमाया अवाच्यत्वात् सा व्यञ्जना। अर्थापत्तेः प्रमाणान्तरत्वे तु उल्लासस्येत्यादिपद्ये करतलेत्यादिपद्ये वा असम्बद्धयोः प्रतिपादनानुपपत्त्या उपमा गम्यते परं तस्याः प्रमाणान्तरत्वं नाभ्युपगम्यते इत्यभिप्रायेण कदाचिदित्युक्तम्। ततोऽरुचेर्वा आह **एवमपि** ● नानार्थकस्थलेऽभिधया गतार्थत्वेऽपि। **सकलतन्त्र** ● रुढिर्योगापहारिणीत्यादिरूपेण। रूढिर्योगश्च शक्तिविशेषोऽग्रे मूले प्रतिपाद्यमानः। तत्पदविषयकं योगसमानाधिकरणरूढिशक्तिज्ञानं रूढ्यर्थाविषयकं योगार्थविषयकं बोधं प्रतिबध्नाति। तेन पङ्कजशब्दाद्योगशक्त्या कुमुदार्थस्य न बोधः। रूढ्यनधिकरणस्य रूढिशक्त्यनिरूपकस्य।

यथा—

'अबलानां श्रियं हृत्वा वारिवाहैः सहानिशम् ।
तिष्ठन्ति चपला यत्र स कालः समुपस्थितः ॥'

अत्राशक्तानां द्रव्यमपहृत्य जलवाहकैः पुरुषैः सह पुंश्चल्यो रमन्त इत्यर्थान्तरं न तावदबलावारिवाहचपलाशब्दैर्योगरूढ्या शक्यते बोधयितुम् । मेघत्वविद्युत्त्वाद्यघटितस्यैव तस्यार्थस्य प्रतीतेः। अन्यथा चमत्कारो न स्यात् । अत एव न योगशक्त्यापि केवलया। रूढ्यर्थासंवलितार्थबोधकत्वस्य तस्या रूढिसमानाधिकरणाया असंगतेः । पुंश्चलीत्यादेः सर्वथैव तदविषयत्वात् । एवं यौगिकरूढि-स्थलेऽपि बोध्यम् ।

यथा वा—

'चाञ्चल्ययोगिनयनं तव जलजानां श्रियं हरतु ।
विपिनेऽतिचञ्चलानामपि च मृगाणां कथं हरति ॥'

अबलानाम् ● यत्र विद्युतोऽबलानां नायिकानां शोभां हृत्वा नायिका इव शोभमाना इति यावत् मेघैः सह तिष्ठति स वर्षागमः कालः समुपस्थितः। द्वितीयार्थस्तु यत्र काले बलरहितानां पुरुषाणां धनमपहृत्य चञ्चलाः स्त्रियः पुंश्चल्य इति यावत् जलवाहकैर्भृत्यैः सह तिष्ठन्ति स कालः समुपागतः । अबलावारिवाहचपलाः शब्दा योगरूढाः । प्रथमस्य बलरहितासु स्त्रीषु द्वितीयस्य जलवाहकमेघेषु तृतीयस्य चाञ्चल्यविशिष्टविद्युत्सु योगरूढिः शक्तिः । प्रथमेषु अंशेषु योगशक्तिः द्वितीयेषु च रूढिः शक्तिः । रुढिर्योगापहारिणीतिन्यायेन रूढ्यर्थाना-लिङ्गितस्य योगार्थघटितस्य द्वितीयार्थस्य व्यञ्जनां विना भानं न संभवतीत्यभिप्रायः । प्रतीतेः ● योगरूढेस्तद्घटितस्यैव बोधने स्वभावात् । अन्यथा ● मेघत्वादिघटितस्य प्रथमार्थमात्रस्य प्रतीत्यङ्गीकारे । चमत्कार इत्यस्य इष्ट इत्यादिः । अत एव ● मेघ-त्वाद्यघटितत्वादेव । असंगतेः ● रूढिर्योगापहारिणीति न्यायमूलकपूर्वोक्तप्रतिबध्य-प्रतिबन्धकभावात् । रुढ्यर्थेन असंवलितोऽनन्वितो योगार्थः । सर्वथैव ● चपलाशब्दस्य योगशक्तिश्चाञ्चल्यमात्रविशिष्टे, रूढिर्विद्युन्मात्रे । पुंश्चलीत्वेन चपलाशब्दस्य न कापि शक्तिः । आदिना पुरुषत्वादिकं ग्राह्यम् । उदाहरणान्तरं योगरूढस्य दर्शयति चाञ्चल्य-योगि ● इतः प्रभृतिर्मिषितादस्माद्वापाराद् इति पर्यन्तो ग्रन्थभागः समानानुपूर्व्याश्लेष-

अत्र नैवाश्चर्यकारी चाञ्चल्यगुणरहितानां कमलानां चाञ्चल्यगुणाधिकेन तव लोचनेन शोभायास्तिरस्कारः, आश्चर्यकृत्तु हरिणानां तद्गुणयुक्तानां तस्याः स इति वाच्यार्थे पर्यवसन्नेऽपि रूढिनिर्मुक्तकेवलयोगमर्यादया मूर्खपुत्राणामत एव प्रमत्तानां नेतृभिश्चोराद्यैः श्रियो धनस्य हरणं सुशकम्, न तु गवेषकाणामत एवाप्रमत्तानामिति जलजनयनमृगशब्देभ्यः प्रतीयमानोऽर्थः कथं नाम व्यञ्जनाव्यापारं विनोपपादयितुं शक्यते। अत एव पङ्कजादिपदेभ्यः पङ्कजनिकर्तृत्वेन कुमुदाद्युपस्थितिर्लक्षणयैवेति नैयायिका मन्यन्ते। अत एव च 'ईशानो भूतभव्यस्य स एवाद्यः स उ श्वः' इति वेदान्तवाक्ये किमैश्वर्यविशिष्टः कश्चिज्जीवोऽत्र प्रतिपाद्यत उतेश्वर इति संशये जीव एवेति पूर्वपक्षे च 'शब्दादेव प्रमितः' इति सूत्रितमुत्तरमीमांसाकारैर्बादरायणचरणैः (ब्रह्मसूत्रे १।३।२४) तस्मादर्थान्तरमिह न शक्तिवेद्यम्। अपि तु व्यक्तिवेद्यमेव। यथाश्रुतार्थस्यैवोपपत्तेर्बाधाभावेन लक्ष्यमित्यपि न शक्यं वक्तुम्। तात्पर्यार्थबाधस्तु तदर्थबोधोत्तरं बोध्यः। स एव तु कथं स्यादित्युपायोऽयं विचिन्त्यते

प्रकरणस्य चरमे भागे आयास्यति। तत्रैव सम्यग्व्याख्यातमस्ति। वेदान्तसंदर्भस्यापि तत्रैव व्याख्यानं स्फुटम्। **मूर्खपुत्राणाम्** • डलयोरभेदाज्जलजानामित्यस्य जडजातानामित्यर्थेन। नेतृभिः = नीप्रापणेधातोर्निष्पन्नान्नयनशब्दान्निस्सरत्ययमर्थः। गवेषकाणाम् मृग अन्वेषणे धातोर्मृगाणामित्यस्यार्थः। ननु शक्तिवेद्यत्वाभावेऽपि लक्षणावेद्यत्वमस्त्वित्याशङ्क्य मुख्यार्थबाधाभावेन न लक्षणायाः प्रसर इत्याशयेन समाधत्ते **यथा श्रुत** • प्रथमार्थस्य शक्यस्य बाधाभावेन। ननु मास्तु मुख्यार्थबाधः, द्वितीयार्थे चमत्कारिणि तादृशशब्दप्रयोक्तुः कवेस्तात्पर्यात् तात्पर्यार्थस्य चाभिधया प्रतिपादनसंभवात् तात्पर्यार्थबाधादेव कारणाल्लक्षणाप्रसारोऽस्तु प्रसिद्धश्च मुख्यार्थबाधस्येव तात्पर्यार्थबाधस्यापि लक्षणाप्रयोजकत्वमित्याशङ्कां समाधत्ते। **तात्पर्यार्थे** • सत्यं तात्पर्यार्थबाधो लक्षणाप्रसारकः परं

नह्यपहर्तृव्यवहारो वक्त्रा विवक्षित इति श्रोतुर्बोधे कश्चिदुपायोऽस्ति ऋते सहृदयहृदयोन्मिषितादस्माद्व्यापारात्। एवमन्यत्राप्यूह्यम्। तादृशार्थप्रतिपत्तिरेव नास्तीति तु गाढतरशब्दार्थव्युत्पत्तिमसृणीकृतान्तःकरणैर्न शक्यते वक्तुम्।

तथा चेत्थं संग्रहः—

'योगरूढस्य शब्दस्य योगे रूढ्या नियन्त्रिते।
धियं योगस्पृशोऽर्थस्य या सूते व्यञ्जनैव सा॥'

एवं स्थिते नानार्थस्थलेऽप्युपमायाः प्राकरणिकाप्राकरणिकार्थगतायाः प्रतिपत्तयेऽवश्यं वाच्यया व्यञ्जनयैवाप्राकरणिकस्याप्यर्थस्य प्रतिपत्तावलं क्लिष्टकल्पनयेत्याशयेन प्राचीनैरुक्तं नानार्थव्यञ्जकत्वमपि न दुष्यति।

तात्पर्यन्तु मृतस्य कवेर्हृदि विलीनम्। तच्चैतादृशशब्दसंदर्भेणैव परिज्ञेयम्। तथा च पूर्वं तात्पर्यार्थस्य ज्ञानं भवेत्तदनन्तरं तात्पर्यार्थस्य बाधः प्रतिसन्धीयेत तदनन्तरं लक्षणा प्रसरेत्। किन्तु बाधप्रतिसन्धानात् प्राक् प्रभवस्तात्पर्यबोधोऽभिधया साध्यत्वाभावाद् व्यञ्जनयैव जायेतेति व्यञ्जनाङ्गीकारो गले पतितः। **व्यवहारो** ● चोरकर्तृकधनहरणादिकम्। व्यञ्जनानलौकिकमर्थं शब्दार्थसम्बन्धं वानुसरति अपि तु सामाजिकानां वासनामितिज्ञापयितुं सहृदयहृदयेत्याद्युक्तम्। **अस्माद्** व्यञ्जनारूपाद्। अन्यत्रापि यौगिकरूढिस्थलेऽपि **योगरूढस्य** ● योगशक्तौ रुढिशक्त्या स्वार्थान्वित तदर्थमात्रबोधकतया संकुचितायां या वृत्तिर्योगार्थमात्रस्य बोधं जनयति सा व्यञ्जना। **एवं स्थिते** ● व्यञ्जनाङ्गीकारेऽवश्यं पतिते। **अवश्यं वाच्यया** ● अभिधाविषयीभूतस्याप्राकरणिकार्थस्य व्यञ्जनाप्रतिपाद्यत्वे विवादेऽपि अवाच्यायाया उपमायाः प्रतीतयेऽवश्यं व्यञ्जनाया उपासनीयत्वे आहूतायां व्यञ्जनायामप्राकरणिकार्थोऽपि तयैव कवलीक्रियेतेत्यभिप्रायेणैव प्राचीनैरप्राकरणिकार्थस्य व्यङ्ग्यत्वमुदाहृतं न तु व्यञ्जनाया असाधारणफलत्वेन। नियन्त्रितशक्तेः पुनरुल्लासे क्लिष्टकल्पना व्यञ्जना तूपस्थितैव।

अभिधानियामकसंयोगादिव्याख्यानम्

तत्र नानार्थशक्तिनियमनाय तैः संयोगादयो निरूपिताः—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥' इति ।

तत्र

संयोगो नानार्थशब्दशक्यान्तरवृत्तितया अप्रसिद्धत्वे सति तच्छक्यवृत्तितया प्रसिद्धः संबन्धः ।

यथा—'सशङ्खचक्रो हरिः' इत्यत्र शङ्खचक्रयोः संयोगो भगवन्मात्र-

अभिधानियामकसंयोगादिव्याख्यानम्

नानार्थशक्ति ० ननु नानाशक्त्याश्रयत्वमेव नानार्थत्वम् नानार्थकशब्देषु नानाशक्तयः एकार्थकशब्देष्विव शक्तिग्राहकत्वेन प्रसिद्धैः कोशव्यवहारादिभिरेव नियमिता-गृहीताः किमिदम् सयोगादीनां शक्तिनियामकत्वम् ? न चार्थान्तरविषयकबोधप्रतिबन्धकत्वम् प्रकरणान्तरेऽर्थान्तरबोधस्येष्टत्वात्, प्रकृतेऽपि व्यञ्जनयाऽर्थान्तरबोधस्यालङ्कारिकसमीहितत्वाच्च । नाप्यर्थान्तरोपस्थितिप्रतिबन्धकत्वमनुभवविरोधात् । नानार्थोपस्थितिमन्तरा सशयस्यैवाभावात् संशयार्थकानवच्छेदशब्दघटितस्य शब्दार्थस्यानवच्छेद इत्यस्यासङ्गत्यापत्तेश्च । अत्र केचिदेवं व्याचक्षते—सयोगादिज्ञानं स्वविषयकशक्त्यन्यशक्तिप्रयोज्यम् बोधम्प्रतिबध्नाति तथा च नियामकत्वम् शक्त्यन्तरप्रयोज्यबोधप्रतिबन्धकत्वम् इति । वस्तुतो नानाशक्तिवशान्नानार्थोपस्थितौ कस्मिन्नर्थे वक्तुस्तात्पर्यमिति तात्पर्यसंशयो जायते । संयोगादिभिश्च विशेषार्थविषयकं तात्पर्यन्निर्णीयते । तथा च शक्यार्थविषयकतात्पर्यनियामकत्वमेव शक्तिनियामकत्वं फलितम् । तदनुसृत्य शब्दार्थस्यानवच्छेदेति चतुर्थांशस्य शब्दार्थविशेषविषयकतात्पर्यस्यानिर्णये विशेषविषयकतात्पर्यनिर्णयहेतव इत्यर्थः । स्मृतिपदम् निर्णयपरम् । स्मृतित्वस्यानुपयोगात् । क्वचित्तात्पर्यस्यानवच्छेद इत्यपि पाठ उपलभ्यते । इत्यलमति विस्तरेण ।

सयोगो ० नानार्थकशब्दस्यैकस्मिन्नर्थे वर्तते इति रूपेण प्रसिद्धस्तथान्यस्मिन्नर्थे न वर्तते एवमपि प्रसिद्धो यः सम्बन्ध इति सरलार्थः ।

स शङ्खचक्र ० नानार्थकहरिशब्दादनेकार्थोपस्थितौ शङ्खचक्रसम्बन्धोऽन्यत्रेन्द्रादाव

निष्ठतया प्रसिद्धो भगवति हरिशब्दस्याभिधाया नियमेनावस्थापकः। न त्वायुधत्वेनायुधसामान्यसंयोगः, पाशाङ्कुशादिसंयोगो वा। दलद्वयाभावात्। न चासौ लिङ्गान्तर्गत इति मन्तव्यम्। शक्यान्तरे नियमेनावृत्तेरेव प्रकृते लिङ्गत्वात्। शङ्खचक्रयोस्त्विन्द्रादिनापि कदाचिद्धारणसंभवात्।

विप्रयोगो विश्लेषः ॥

यथा—'अशङ्खचक्रो हरिः' इत्यत्र तयोरेव विश्लेषस्तथा। अत्र हि विश्लेषनियतपूर्ववर्तिनः संश्लेषस्य प्रागुक्तदलद्वयाक्रान्तत्वमपेक्ष्यते। तेनायुधसामान्यविभागः, पाशाङ्कुशादिविभागो वा न तथा। यद्यप्यत्र गुणतया वर्तमानस्तादृशसंयोग एवाभिधानि-

---

प्रसिद्धो भगवति विष्णावेव प्रसिद्धो अतो हरिपदस्य विष्णौ तात्पर्यं निर्णीयते। **मात्रनिष्ठतया** ● मात्रशब्देनेन्द्रादीनां व्यावृत्तिः। कदाचनेन्द्रादिभिर्धारणसम्भवेऽपि प्रसिद्धिर्विष्णावेव। अत्र शङ्खत्वेन चक्रत्वेन च यः शङ्खचक्रयोः सम्बन्धः स एव विशेषणद्वयबलान्मिलिष्यति नतु आयुधत्वेनायुधसामान्यसम्बन्धः—पाशाङ्कुशत्वेन वा विशेषायुधसम्बन्ध इत्याह—**न त्वायुधत्वे** ●। **दलद्वयाभावात्** ● प्रसिद्धसम्बन्धविशेषणद्वयस्याभावात्। आयुधसामान्यसम्बन्धः शक्यान्तरशक्रादिष्ववृत्तितया न प्रसिद्धः। पाशांकुशसम्बन्धे तु विष्णुवृत्तितया शक्राद्यवृत्तितया च प्रसिद्धिर्नास्ति।

लिङ्गत्वात् ● लिङ्गपदार्थे नियमांशस्य प्रवेशोऽत्र तु प्रसिद्धिमात्रस्येति भावः। अनियमं दर्शयति **शङ्खचक्र** ● वस्तुतोऽस्यापि लिङ्गतेति वक्ष्यत्येव। प्राचामनुरोधेनेत्थं स्थितस्य गतिश्चिन्तनीयेति न्यायेन व्याचष्टे इति ध्येयम्।

तयोरेव ● शङ्खचक्रयोरेव। तथाभिधानियामकः। **नियतपूर्व** ● विभागस्य संयोगपूर्वकत्वनियमात् हिमवद्विन्ध्ययोर्विभागाव्यवहारात्। तथा च शक्यान्तरावृत्तितया तच्छक्यवृत्तितया च प्रसिद्धो यः सम्बन्धस्तस्य विश्लेषो अभिधानियामक इति फलितम्। पूर्ववदव्यावृत्तिमपि दर्शयति **तेनायुध** ● तादृशसंयोगस्य पूर्ववद्व्यावृत्त्या तादृशविभागस्यापि व्यावृत्तिः। **गुणतया** ● तादृशसंयोगपूर्वकविभागे संयोगस्य प्रकारतया भासमानात्। अयं भावः संयोग ज्ञानमेवाभिधानियामकं न संयोगो भ्रमादपि शक्तिनियमनस्यानुभवात् तच्च संयोगज्ञानम् विश्लेषज्ञानेऽपि प्रकारत्वेन जातमेवेति

थमनायालम्, तथापि गुणप्रधानयोः संनिपाते प्रधानानुरोध एव न्याय्य इत्याशयेन विप्रयोगस्य नियामकत्वमुक्तम्। यद्वा संयोगस्यैव केवलत्वेन, विश्लेषगुणीभूतत्वेन च द्वैविध्यप्रदर्शनाय तथोक्तम्।

साहचर्यमेकस्मिन्कार्ये परस्परापेक्षित्वम् ॥

यथा—'रामलक्ष्मणौ' इत्यत्र रामे लक्ष्मणसाहचर्यं रामशब्दस्य। अथ किमिदं परस्परापेक्षित्वं यत्किंचित्कार्ये, सर्वेषु कार्येषु वा। नाद्यः। घटाद्यव्यावर्तनाद्घटसाहचर्यस्यापि रामपदशक्तिनियामकतापत्तेः। न द्वितीयः। लक्ष्मणसाहचर्यस्यापि निवारणापत्तेः। पक्षद्वयेऽपि रामायोध्ये रघुरामावित्यत्रानियमापत्तेश्च। न च नानार्थपदसमभिव्याहृतपदान्तरार्थस्य प्रसिद्धः संबन्धस्तत्। स चैकजन्यत्वदांपत्यजन्यजनकभावस्वामिभृत्यभावस्वस्वामिभावादिरनेकविधः। तेन रामलक्ष्मणौ, सीतारामौ, रामदशरथौ, रामहनूमन्तौ, रामायोध्ये, इत्यादौ साहचर्यनियामकमिति वाच्यम्। लक्ष्मणादि-

---

तस्यैव कथन्नाभिधानियामकत्वमित्याशङ्कते। अलं समर्थः। संयोगविश्लेषयोरुभयोरपि विश्लेषस्थलेऽभिधानियामकत्वे प्रसक्ते प्राधान्यविनिगमकस्य सत्त्वाद् विश्लेषस्यैव तथात्वमित्याशयेन समाधत्ते **तथापि॰**। नियामकान्तराङ्गीकरणे गौरवभियाऽऽह **यद्वा॰**। **परस्परा॰** समभिव्याहृतपदार्थयोरित्यर्थः। **रामशब्दस्य॰** परशुरामबलरामदाशरथिभेदेन रामशब्दो नानार्थकः। दाशरथिदौर्योधनिभेदेन लक्ष्मणशब्दार्थौ द्विधा। परं लक्ष्मणसाहचर्यं रामचन्द्रे एव प्रसिद्धमिति प्रसिद्धिमन्तर्भाव्य व्यवस्थापनीयम्। **घटाद्यव्या॰** जलाहरणे कार्ये रामघटयोः परस्परापेक्षित्वात्।

निवारणापत्तेः॰ क्वचित्कार्ये रामलक्ष्मणयोरपि परस्परापेक्षित्वाऽभावात्। **नियमापत्ते॰** आद्येऽयोध्याया अचेतनत्वेनाकार्यकारित्वेनापेक्षाया असम्भवात्, द्वितीये तु रघुरामयोः समानकालिकत्वाऽभावेनापेक्षाया असम्भवादभिधायाः नियमनन्न स्यात्। **सम्बन्धस्तत्॰** तादृशप्रसिद्धसम्बन्धमात्रं साहचर्यम् न तु पारस्परिककार्ये परस्परापेक्षित्वमिति भावः। **स चैक॰** एषां सम्बन्धानां क्रमश उदाहरणानि रामलक्ष्मणावित्यादीनि। एतावतां सम्बन्धानां साहचर्येण संग्रहे संयोगस्याऽपि साहचर्येण तुल्यप्रयुक्त्या संग्रह आपतेदित्यभिप्रायेण समाधत्ते **लक्ष्मणादि॰** अविशिष्टतया तुल्यतया।

संबन्धापेक्षया चक्रादिसंबन्धस्याविशिष्टतया सशङ्खचक्र इत्यत्रापि साहचर्यस्यैव नियामकतापत्तेः। न च सशङ्खचक्र इत्यादौ यत्र संबन्धः संयोगरूपस्तत्राद्यस्य, यत्र च संबन्धान्तरं तत्र तृतीयस्यावकाश इति वाच्यम्। संयोगस्यैव पृथक्कारे बीजाभावात्। न च यत्र संयोगः शब्दोपात्तस्तत्र स एव नियामकः, यत्र तु संबन्धिमात्रं न तु संबन्धस्तत्र साहचर्यम्, अत एव सशङ्खचक्र इति संयोगस्य, रामलक्ष्मणाविति च साहचर्यस्योदाहरणमिति वाच्यम्। सलक्ष्मणो रामो विलक्ष्मणो राम इत्यत्र संयोगविभागयोर्गुणयोरप्रतीत्या साहचर्योदाहरणतायां प्रसक्तायां सशङ्खचक्र इत्यादेरपि तदुदाहरणताया एवौचित्यादिति चेत्। उच्यते—संयोगशब्दस्य संबन्धसामान्यपरतया यत्र शब्दोपात्तं प्रसिद्धं संबन्धसामान्यं शक्तिनियामकं तदाद्यस्य, यत्र तु द्वन्द्वादिगतः संबन्ध्येव केवलस्तथा तत्साहचर्यस्योदाहरणमिति प्राचामाशयात्। इत्थं च सगाण्डिवोऽर्जुनः इति संयोगस्य, गाण्डिवार्जुनाविति साहचर्यस्योदाहरणम्।

विरोधिता प्रसिद्धं वैरम्। सहानवस्थानं च ॥

तत्राद्यस्य 'रामार्जुनौ' इत्युदाहरणं प्राञ्चो वदन्ति। यत्त्वप्पय्यदीक्षितो वृत्तिवार्तिके प्राचामुदाहरणं निराकुर्वन्नाह—'रामार्जुनपद-

---

बीजाभावात् ● अन्ये संगृह्यन्ते संयोगो नेत्यत्र विनिगमकाऽभावात्। संयोगस्याभिधानियामकत्वे सम्बन्धत्वेन सम्बन्धस्योपादानं साहचर्यस्य तत्त्वे तु सम्बन्धिमात्रोपादाने सम्बन्धस्याक्षिप्तत्वमिति विनिगमकं भेदकमाशङ्कते न च यत्र ●। सशङ्ख ● शङ्खसहितत्वम् शङ्खसम्बन्धित्वमित्यभिप्रायेण। द्वन्द्वे तु सम्बन्धिमात्रस्योपादानं स्फुटमेव। सहितत्वं साहचर्यमेवेत्यभिप्रायेणाह रप्रतीत्या ●। इत्यादेः ● सपदघटितस्यापि इत्यर्थः। वस्तुतो नाऽस्मिन् संयोगस्य साहचर्यपृथक्त्वसंभावनेत्याशयेनाह प्राचामाशयात्● तथा च सलक्ष्मण इत्यादिः संयोगस्यैवोदाहरणन्तेषां मते सगाण्डीवम् इत्यादिवत्।

निराकुर्वन् ● खण्डयन्। रामार्जुनावित्यत्र द्वयोरपि नानार्थकता। रामशब्दस्य पूर्वमुक्तैव अर्जुनपदस्याऽपि कार्तवीर्य-पाण्डव-धवलवृक्षादिभेदेन प्रसिद्धः। भृगुपुत्र-

योर्वध्यघातकभावविरोधाद्भार्गवकार्तवीर्ययोरभिधा नियम्यत इत्येतदयुक्तम्। रामपदस्याभिधानियमने सति तद्विरोधप्रतिसंधानेनार्जुनपदस्य कार्तवीर्येऽभिधानियमनम्, तस्मिंश्च सति तद्विरोधप्रतिसंधानेन रामपदस्येत्यन्योन्याश्रयापत्तेः। तस्मादन्यतरपदस्य व्यवस्थितार्थत्व एव स्मृततद्विरोधप्रतिसंधानान्नानार्थपदस्याभिधानियमनमिति रामरावणयोरित्युदाहरणं भवितुमर्हति' इति। तत्र तावद्रामरावणयोरिति व्यवस्थितार्थान्यतरपदकमुदाहरणं विरोधिताया नियामकत्वस्य न युक्तम्। रामलक्ष्मणयोरित्यत्रेवात्रापि साहचर्यस्यैव नियामकत्वात्। न च लक्ष्मणसाहचर्यं रामस्य प्रसिद्धम्, न तु रावणसाहचर्यमिति वाच्यम्। प्रसिद्धतत्संबन्धकस्यैव तत्साहचर्यपदार्थत्वात्। पितृभ्रातृजायापत्यभृत्यनगरीणां संबन्धस्येव रिपोः संबन्धस्यापि लोकप्रसिद्धत्वात्। एवं स्थितेऽपि विरोधितायाः पृथग्गणने मित्रत्वादेरपि तथागणनापत्तेः। तस्मात्प्राचीनोदाहरणमिव त्वदुक्तमुदाहरणमप्यशुद्धमेव। 'अन्यतरपदस्य व्यवस्थितार्थत्व एव' इत्याद्यप्यसंगतमेव। हरिनागस्येत्यादावुभयोरव्यवस्थितार्थत्वेऽप्ये-

---

कार्तवीर्ययोरुभयोः शक्तिर्नियम्या। एकपदस्याभिधानियमने एव तद्विरोधज्ञानादन्यस्याभिधानियमनमिति परस्परनियमितशक्तिज्ञानस्यापेक्षणादन्योन्याश्रयादेकस्यापि निर्णयो न स्यात्। तथाहि रामपदस्य परशुरामेऽर्थे निर्णीते एव तद्विरोधी कार्तवीर्योऽर्जुनपदस्यार्थ इति कल्पयितुं शक्यते, एवमर्जुनपदस्य सहस्रबाहुनृपेऽर्थे निर्णीते एव परशुरामो रामपदेन ग्रहीतुं प्रभूयते। वध्यघातकभावज्ञानाद्विरोधस्मृतिर्जायते। व्यवस्थितत्वे • एकार्थत्वेन निर्णीत एवेत्यर्थः। उदाहरणमित्यत्रान्वेति। यथा रावणस्य रावणपदार्थतया रामपदस्य वध्यघातकविरोधज्ञानेन दाशरथौ शक्तिः स्फुटं निर्णीयत्ते प्रसिद्धतत्सम्बन्धक• साहचर्यं न सहचरणमपि तु प्रसिद्धः सम्बन्धः। सम्बन्धस्यापि• विरोधात्मकस्येत्यर्थः। एवं स्थिते • संयोगस्येव. विरोधिताया अपि साहचर्यपार्थक्यवर्णने प्राचामभिप्राय वर्णने। नापत्तेः • अन्यथा मित्रत्वादेः कुत्रान्तर्भावः स्यात्। संयोगस्य साहचर्यभेदस्तु प्रदर्शित एव। त्वदुक्त • अप्पयदीक्षितोक्तम्। हरिनागस्य • हरिनागयोर्द्वन्द्वे कृते विरोधार्थमनुसृत्य 'येषां च विरोधः शाश्वतिकः' इत्यनेन समाहारैकवद्भावः। द्वन्द्वे एक-

कवद्भावाभिव्यक्तेन विरोधेन धर्मिविशेषाविशेषितेनापि युगपद्धर्मि-विशेषद्वयेऽभिधाया नियन्तुं शक्यत्वात्। यदपि 'रामार्जुनगतिस्त-योरिति शब्दान्तरसंनिधेरुदाहरणम्' इति स एवाह। तदप्यसत्। त्वया निरूपिते शब्दान्तरसंनिधेरुदाहरणे 'निषधं पश्य भूभृतम्', 'नागो दानेन राजते', इत्यत्र चाभिधाया नियतविषयतां विनान्व-यस्यैवानुपपत्त्या, प्रकृते च रामार्जुनगतिस्तयोरित्यत्रार्थान्तरविष-यत्वेऽप्यन्वयानुपपत्तेरभावान्महति वैलक्षण्ये शब्दान्तरसंनिध्युदा-हरणत्वायोगात्। एवमपि काव्यप्रकाशगतस्य रामार्जुनगतिस्त-योरिति विरोधितोदाहरणस्यासंगतिः स्थितैवेति चेत्। न।

वद्भावं दृष्ट्वा विरोधार्थं ज्ञात्वा ययोः पदार्थयोर्गृहीतयोर्विरोधः समन्वयमेति तत्रैवानयोः शक्तिर्नियम्यत्ते। न च क्रमिकः शक्तिनियमः विरोधिनोरुभयोर्युगपदुपस्थितौ युगपच्छक्ति-नियमनोपपत्तौ च क्रमिककल्पने मानाभावात्। हरिपदस्य सिंहार्थमन्तरा नहि नाग-पदार्थेन विरोधः स्फुरति। नाऽपि नागपदेन हस्तिनमर्थं वर्जयित्वा हरिपदार्थस्य विरोधः स्फुरति। तस्माद् हरिपदस्य सिंहोऽर्थो न मर्कटादिरेवं नागपदस्य गजोऽर्थो न सर्प इति। **धर्मिविशेष** ॰ क्रमवारणार्थमिदम्प्रतिभाति।

पूर्वं हरिपदस्य सिंहोऽर्थस्तदनन्तरं नागपदस्य गजोऽर्थ इत्येवं धर्मविशेषं गृहीत्वा शक्तिनियमो न जायते किन्तु युगपदेव हरिनागपदे सिंहहस्तितात्पर्येणोच्चरित इत्येवं-रूपेण धर्मिद्वये शक्तिनिर्णयो जायते। **न गतिस्त** ॰ तयोः प्रकृतयोः परशुरामसहस्रबाहु-सदृशः पारस्परिको व्यवहारः। वैरमित्यर्थः। **निषधम्** ॰ निषधपदसान्निध्याद्भूभृत्पदस्य पर्वते तात्पर्यं परित्यज्य नलनृपे तात्पर्यनिर्णयः। एवं मदवाचिदानपदसमभिहारेण नागपदस्य हस्त्यर्थो न सर्पः। **अनुपपत्त्या** ॰ पर्वतार्थकत्वे निषध पदार्थान्वयस्य सर्पार्थकत्वे दानपदार्थान्वयस्य चानुपपत्तिः। **अभावात्** ॰ रामार्जुनवत्पराक्रमशालित्वविषयक-बोधस्योपपत्त्या। रामपदस्य पार्थस्य च पराक्रमितायाः प्रसिद्धेः। **महति** ॰ त्वदीयो-दाहरणवैलक्षण्यादपि तव खण्डनम्। वैलक्षण्ये विपरीतत्वं तेन समानोदाहरणत्वाऽ-सम्भवः। काव्यप्रकाशस्थं विरोधिताया उदाहरणं सम्यगेव परमेवमुपपादनेनेत्युप-पादयति **एवमपि** ॰ यथा हरिनागस्येत्यत्रैकवद्भावेन द्वयोः पदार्थयोर्विरोधभानं तथा प्रकरणवशाद् रामार्जुनपदार्थयोर्विरोधावगतिस्तत्र तत्रैव धर्मिद्वये पूर्ववद्युग-पच्छक्तिद्वयनियमनं न चान्योऽन्याश्रय इत्यभिप्रायेण समाधित्सुः प्रकरणमुपपादयति

तयोः कयोश्चित्प्रसिद्धविरोधयो रामार्जुनगती रामार्जुनसदृशी गतिराचरणमिति तदर्थवर्णने विरोधेन प्रस्तावत्रशात्प्रतीतेन युगपद्भार्गवकार्तवीर्ययो रामार्जुनशब्दाभिधाया निगमनस्योपपत्तेः। न च प्रकरणादविशेषः। विरोधस्य प्रक्रान्तत्वेऽपि भार्गवकार्तवीर्ययोः शक्तिनियमाधिकरणयोरप्रक्रान्तत्वात्। सहानवस्थानलक्षणा विरोधिता तु छायातपावित्यादौ बोध्या।

अर्थः प्रयोजनं चतुर्थ्याद्यभिधेयम्॥

यथा—'स्थाणुं भज भवच्छिदे' इत्यादौ भवच्छेदनादि स्थाणुपदस्य भवे। नन्वर्थस्य लिङ्गात्को भेदः। न च लिङ्गमनन्यसाधारणस्तद्धर्मः, अर्थस्तु तद्भजनादेः कार्यम्, न तु तद्गतो धर्म इति स्फुट एव भेद इति वाच्यम्। भवच्छेदजनकभजनकर्मत्वस्य काष्ठावृत्तिभवधर्मत्वादिति चेत्। अत्राहुः—उक्तस्य विशिष्टधर्मस्य

तयोः कयोः● प्रस्तावत्रशात् प्रतीतेन विरोधेनेत्यन्वयः। दविशेषः● प्रकरणोदाहरणादभेद इत्यर्थः। प्रकरणालम्बने प्रकरणेनैवात्र शक्तिनियमनं संभवतीतियावत्। धिकरण● विरोधस्य प्रकरणविषयत्वेऽपि परशुरामकार्तवीर्ययोः प्रकरणविषयत्वाऽभावात्। सर्वं जानाति देव इति राज्ञः प्रकरणविषयत्वमस्त्येव। वैरविरोधिताया एवमुदाहरणं परिसमाप्य सहानवस्थानमुदाहरति सहानव● समानेदेशे समाने काले चावर्तमानत्वम्।

चतुर्थ्या● आदिना तुमुनादेर्हिताद्यर्थकतद्धितादेश्च संग्रहः। अभिधेयपदं ङन्त्यादिसाधारणपरम्। स्थाणुं भज● स्थाणुकर्मकं भजनम् संसारपरम्परोच्छेदफलकमिति बोधः। भवोच्छेदफलन्तु शिवभजनादेव सिध्यति न तु काष्ठभजनादिति स्थाणुपदस्य भवे शक्तिर्नियम्यते। भवच्छेदादिप्रयोजनम् भवे शक्तिनियामकमिति मूलयोजना। मनन्य● शक्त्यान्तरावृत्तिस्तच्छक्यार्थमात्रवृत्तिरित्यर्थः। यथा शिवगतो महेश्वरत्वादिकम्। तद्गतो महेश्वरगतः। शिवभजन फलं न शिवस्यासाधारणो धर्मः। भवच्छेदफलकभजनकर्मत्वस्यास्माद्वाक्यात् प्रतीतस्य शक्यान्तरकाष्ठाद्यवृत्तित्वे सति शिवरूपशक्यवृत्तित्वाल्लिङ्गत्वमित्याह भवच्छेद●। अत्राहुः● अर्थस्यापिलिङ्गान्तर्गतत्वे सम्भवति किमनुरुध्य लिङ्गात्पृथगर्थस्य प्राचीनैः परिगणना कृतेत्यत्र तदनुरोधिव्याख्यां विदधत आहुः प्रथमे। तच्छक्यमात्रवृत्तितया प्रकृतशाब्दबोधविषयो

शाब्दबोधोत्तरभाविमानसबोधविषयत्वेन प्रकृतशाब्दबोधाविषयत्वा-च्छिङ्गतो वैलक्षण्योपपत्तिरिति। लिङ्गं त्वेकपदार्थः कोशादिः। अनन्वित एव यः पदार्थान्तरेण प्रकृतशक्यधर्मतां शक्यान्तरव्यावृत्ततां च भजते। उक्तधर्मस्तु न तथेत्यपि केचित्।

प्रकरणं वक्तृश्रोतृबुद्धिस्थता॥

यथा—राजानं संबोध्य केनचिद्भृत्येनोक्ते 'सर्वं जानाति देवः' इति वाक्ये देवपदस्य युष्मदर्थे।

लिङ्गं नानार्थपदशक्यान्तराव्रत्तिरेकशक्यगतः साक्षाच्छब्दवेद्यो धर्मः॥

यथा—'कुपितो मकरध्वजः' इत्यत्र कोपो मकरध्वजपदस्य।

शब्दस्यान्यस्य संनिधिर्नानार्थपदैकार्थमात्रसंसर्ग्यर्थान्तरवाचक-पदसमभिव्याहारः॥

यथा—'करेण राजते नागः' इत्यत्र करपदस्य नागपदमादाय, नागपदस्य च करपदमादाय शुण्डायां गजे च। न चात्रैकशब्दशक्ति-

---

धर्मो लिङ्गम्। भजनविशेष्यकशाब्दवादिनां वैयाकरणानां त्वत्कर्तृकविशेष्यकबोध-मङ्गीकुर्वाणानां नैयायिकानाञ्च नये स्थाणुगतकर्मत्वस्य शाब्दबोधविषयत्वेऽपि तादृश-फलकभजनकर्मत्वस्य प्रकृतशाब्दबोधाविषयतया मानसबोधविषयतया च न लिङ्गत्वम् मतान्तरमाह **लिङ्गत्वे** • पदमखण्डं ग्राह्यम्। तस्यैव व्याख्यानमनन्वित इति। **उक्तधर्म** • भवच्छेदफलकभजनकर्मत्वम्। तथा एकपदप्रतिपाद्यः। पूर्वमते देवस्य त्रिपुरारातेरिति सन्निध्युदाहरणस्य लिङ्गेनैव गतार्थतापत्तिरिति ग्रन्थकार एव सूचयिष्यति।

वक्तृ श्रोतृ • वक्तुः श्रोतुर्वा बुद्धौ योऽर्थः स एवानेकार्थकशब्दैरभिधेयः।

नानार्थ • नानार्थकशब्दानामनेकानि शक्यानि भवन्त्येव। तत्रैकस्मिन् शक्ये वर्तते शक्यान्तरे च न वर्तते एतादृशः साक्षाच्छब्देन बोध्यमानो धर्मो लिङ्गम्। साक्षात्पदात्पूर्वोक्तरीत्या संयोगस्य व्यावृत्तिः। मकरध्वजः समुद्रः कामश्च। कोपः समुद्रे न भवति किन्तु कामदेवस्यैव प्रसिद्धः। **नानार्थपद** • यथा करेण राजते नाग

नियमनमपरशब्दशक्तिनियमोऽपेक्षते, येनान्योन्याश्रयः स्यात्। किंतु करनागशब्दयोरर्थान्तरग्रहणेऽन्वयानुपपत्त्या युगपदेव शक्तिर्नियम्यते। देवस्य पुरारातेरिति प्राचामुदाहरणे सुरत्वभूपत्वाभ्यां देवपदान्नगरारित्वासुरविशेषारित्वाभ्यां पुरारातिपदाच्चोपस्थितेरुभयोरपि नानार्थत्वादर्थान्तरस्वीकारेऽप्यन्वयोपपत्तेश्च कथं शक्तेर्नियमः स्यात्। न च पुरारातिपदं योगरूढम्। तथा च रूढेर्योगापहारितया शिवत्वेनैव तस्य बोधकत्वाद्देवपदशक्तिनियामकतेति वाच्यम्। पुरारातिपदस्य रूढौ मानाभावात्। अथ 'देवस्य त्रिपुरारातेः' इति पाठस्तथापि पदान्तरोपस्थापितस्य त्रिपुरासुरवैरित्वस्य लिङ्गतया लिङ्गोदाहरणत्वमेवास्य स्यात्। न तु शब्दान्तरसंनिध्युदाहरणत्वमिति वदन्ति। तत्रैकपदार्थः कोपादिः पदार्थान्तरेणानन्वित एव यः प्रकृतशक्यधर्मताम्, शक्यान्तरव्यावृत्ततां च भजते स लिङ्गपदेनात्रोक्त इति प्राचामाशये तु नोक्तदोषः। यत्तु 'शब्दस्याव्यभिचरितस्य संनिधिः सामानाधिकरण्यम्' इति काव्यप्रकाश-

---

इत्यत्र नागपदं सर्पहस्तिभेदेन नानार्थकम्। शुण्डस्यार्थान्तरस्य हस्तिमात्रवृत्तेर्वाचकस्य करपदस्य समभिहारो नागपदशक्तिनियामकः। एवं करपदशक्तिनियामको हस्तिपदार्थकस्य नागपदस्य समभिहारः। **अर्थान्तरस्वीकारे** • नगरशत्रो राज्ञः इत्यर्थ विधानेऽपि अन्वय एव उपपद्यते। करेणेत्यादौ तु शक्तिनियमनं विनाऽर्थान्तरेण पदार्थान्तरस्यान्वय एव नोपपद्यते। **योगापहा** • रूढेः केवलयोगाभिप्रायेण न प्रयोगः। तेन पुरारातिपदस्य शिवे शक्तिनिर्णयेन तत्समभिव्याहाराद् देवपदस्यैवशक्तिनियमनमावश्यकम्। **त्रिपुरासुर** • पुरमात्रस्य नगरवाचित्वेऽपि त्रिपुरशब्दस्य राक्षसविशेषवाचित्वात्। **नोक्तदोषः** • त्रिपुरासुरवैरित्वस्याखण्डकपदप्रतिपाद्यत्वाऽभावाल्लिङ्गत्वासम्भवात् लिङ्गेनाग्रहणात् प्राचीनग्रन्थविरोधरूपो दोषः इति भावः। अत्र मर्मप्रकाशः। वस्तुतस्तु त्रिपुरारातिपदस्य योगरूढत्वेन रूढ्यर्थाऽन्वितत्रिपुरासुरवैरित्वस्य तत्पीड्यमानभूभृत्स्वपि सत्वेन शक्यान्तरव्यावृत्यभावाच्चेत्याह—। परं योगरूढस्य लक्षणां विना योगार्थमात्रभू भृत्सु कथं प्रवृत्तिरिति न प्रतिभाति। **शब्दस्या** • अर्थान्तरप्रति-

टीकाकारैरुक्तम्। 'तत्तु करेण राजते नागः' इत्यादावव्यापनात्तन्नियामकान्तरस्य गवेषणे गौरवात्, 'कुपितो मकरध्वजः' इति तन्मूलोक्ते लिङ्गोदाहरणेऽतिव्यापनाच्चोपेक्ष्यम्।

सामर्थ्यं कारणता ॥

यथा—'मधुना मत्तः कोकिलः' इत्यत्र कोकिलमदजनकता मधुशब्दस्य वसन्ते। अत्र कोकिलमादने मधोरेव शक्तिर्न तु मधुनः। मादकत्वं मधुन्यपीति न लिङ्गमिति वदन्ति। तत्र सामर्थ्यं लिङ्गान्तर्गतमेव कुतो न स्यात्, इति शङ्कायाः कथमेतदुत्तरं संगच्छते। न च मादनसामर्थ्यस्य सुरावृत्तितया नासाधारणधर्मतारूपं लिङ्गत्वमिति वाच्यम्। मादनसामर्थ्यस्य सुरावृत्तित्वेऽपि कोकिलमादनसमर्थस्य वसन्तासाधारणतया लिङ्गस्य दुर्वारत्वात्। न च प्राणिमात्रमादनसामर्थ्यस्य मधुनः कोकिलमादनसामर्थ्यमप्यस्तीति वाच्यम्। एवं सति सामर्थ्यस्य वाचकतानियामकत्वमसंगतं स्यात्। न तु मधुन

पादकस्य। वव्यापनात् ● अप्राप्ते ● करनागयोरर्थान्तरवाचकत्वात्। ननु नेदं सन्निधेरुदाहरणमिति शङ्कायां परिगणितानामप्राप्तेऽन्यस्याङ्गीकारे गौरवमाह न्नियामका ●। तन्मूलोक्तेः ● काव्यप्रकाशोदाहृते। अतिव्यापनमतिव्याप्तिः। कुपितस्याव्यभिचारित्वात्।

मधुना ● मधुशब्दो वसन्ते पुल्लिङ्गो मद्ये नपुंसकः वसन्ते ● शक्तिनियामक इति शेषः। मधून्यपि ● तथा शक्त्यान्तरमद्यव्यावृत्तत्वविशेषणं नास्तीतिभावः। कोकिलमदजनकतानैकपदार्थः। कथमेत ● कोकिलमादने मधोरेव शक्तिरित्यनेन लिङ्गस्यैव समर्थनात्। सुरावृत्तितया ● सुरावृत्तित्वेन शक्यान्तरावृत्तित्वाऽभावात्। मप्यस्ती ● तेन कोकिलमदजनकत्वस्य न वसन्तासाधारण्यं तेन न लिङ्गत्वम्। मसंगतं ● मद्यार्थपरित्यागे विनिगमकाऽभावात्। कोकिलमदजनकता वसन्ते एव प्रसिद्धा न मद्य इत्युच्यते तदा वसन्तासाधारण्यापत्या लिङ्गत्वमव्याहतमित्याह

इति स्वोक्तिविरोधश्च भवेत्। प्रसिद्ध्याश्रये पुनर्लिङ्गत्वमप्रच्युतम्। शाब्दत्वाशाब्दत्वाभ्यामेकानेकपदार्थत्वाभ्यां वा विशेषस्तु स्यात्।

औचिती योग्यता ॥

यथा—'पातु वो दयितामुखम्' इत्यत्र दयितामुखकर्तृकरक्षणकर्मत्वाक्षिप्तकामार्तानां संबोध्यपुरुषाणां त्राणं हि तस्याः सांमुख्येनैव भवति। न तु मुखमात्रेण। वैमुख्ये तेन त्राणायोगात्। अतस्त्राणार्हत्वं वदनसांमुख्योभयप्रत्यायकस्य मुखशब्दस्य।

देशो नगरादिः ॥

यथा—'भात्यत्र परमेश्वरः' इत्यादौ परमेश्वरादिशब्दस्य

प्रसिध्या ● स्वयम्प्राचीनमतं व्यवस्थापयति **शाब्दत्वा** ● यत्र सामर्थ्यं शाब्दविषयस्तत्रैव तस्य लिङ्गत्वम्। अशाब्दं सामर्थ्यन्तु यत्र तत्सामर्थ्यस्योदाहरणम्। प्रकृते कोकिलमदजनकता न शाब्दविषयोऽपि तु मानसबोधविषयः। शाब्दबोधस्तु मद्यजन्यमदाश्रयः कोकिलः इत्याकारकस्तत्र न कोकिलमदजनकताविषयः। तुल्यावित्तिवेद्यतया मनसा ज्ञायते इत्यन्यत्। कुपितो मकरध्वज इत्यत्र तु कोपाश्रयाभिन्नो मकरध्वज इतिबोधात् कोपाश्रयतायाः स्फुटैव शाब्दविषयता। इति प्रथमः प्रकारः। द्वितीयन्तु प्रथममुक्तमेवाह **मेकानेक** ● एकपदोपस्थापितं सामर्थ्यादिकं लिङ्गमनेकपदोपस्थापितन्तु सामर्थ्यस्योदाहरणम्। अत्र कोकिलमदजनकत्वन्नैकपदप्रतिपाद्यम् तस्मान्न लिङ्गम् प्रथमप्रकार इत्थमस्वरसो मर्मप्रकाशे प्रतिपादितः। एवं भेदस्य प्रागनुक्तत्वात्तत्राऽपि कोपसाधनोल्लेखस्य सुवचनाच्च। इति। **योग्यता** ● समभिव्याहृतपदार्थान्तरान्वयस्य योग्यता। **कर्मत्वाऽक्षिप्त** ● युष्मच्छब्दस्य सम्बोध्ये शक्तः। दयितापदसान्निध्यात् कामार्ताः सम्बोध्याः आक्षिप्यन्ते। पाधातोस्त्राणमर्थः। दयिताया आननं कर्तृ यस्य तस्य रक्षणस्य कर्मत्वं कामार्तपुरुषेषु। पुरुषाणामित्यत्र कर्मणि षष्ठी। तस्याः दयितायाः साम्मुख्येनैव न तु तस्या मुखेन। एतावताऽऽननार्थस्यान्वयायोग्यत्वं साम्मुख्यस्य चान्वययोग्यत्वम्प्रदर्शितम्। **त्राणार्हत्वम्** ● त्राणयोग्यत्वं मुखशब्दस्य शक्तिनियामकमित्यर्थः। **नगरादिः** आदिशब्देन राजधान्यादि स्थानम्। **भात्यत्र** ● अत्र स्थाने परमेश्वरः शोभते। परमेश्वरः परमात्मा राजा च। स्थानकीर्तनवशात् राजनि शक्तिर्निगम्यते। राजनि शक्तिनियमनमन्तरा स्थानकीर्तनमेव व्यर्थं स्यादिति प्रतिपादयति

राजादौ। तस्य नगरादिसंबन्धतदभावयोः संभवेनाभावव्यावृत्त्यर्थमधिकरणकीर्तनस्य सार्थक्यात्। परमात्मनस्तु सर्वगस्य व्यावर्त्याभावात्तदुक्तिवैयर्थ्यापत्तेः। एवं 'वैकुण्ठे हरिर्वसति' इत्यत्रापि बोध्यम्। एकत्रार्थान्तरोपग्रहेऽधिकरणोक्तिवैयर्थ्यम्, अपरत्र तु तदधिकरणत्वाप्रसिद्धिरिति विशेषः।

कालो दिवसादिः॥

'चित्रभानुर्दिने भाति' इत्यादौ चित्रभान्वादिपदानां सूर्यादिषु। एवं 'चातुर्मास्ये हरिः शेते'।

व्यक्तिः स्त्रीपुंनपुंसकलिङ्गानि॥

यथा—'मित्रो भाति', 'मित्रं भाति' इत्यत्र मित्रशब्दस्य पुंनपुंसके सुहृत्सूर्ययोः। एवं 'नभो भाति', 'नभा भाति' इत्यत्रापि।

स्वर उदात्तादिः॥

यथा—'इन्द्रशत्रुः' इत्यत्र समासान्तोदात्तत्वमिन्द्रशत्रुशब्दस्येन्द्रस्य शत्रौ। पूर्वपदप्रकृतिस्वरप्राप्तमाद्युदात्तत्वं त्विन्द्रशत्रुके। आदिनाभिनयादिपरिग्रहः। यथा—'एद्दहमेत्तत्थणिआ' इत्यादौ।

तस्य नगरादि॰ वैकुण्ठे॰ वैकुण्ठस्थानाद्धरिपदस्य विष्णौ शक्तिर्नियम्यते। एकत्रा॰ परमेश्वरशब्दस्य परमात्मार्थग्रहणे अत्र पदं व्यर्थं स्यात्। अपरत्र॰ हरिपदस्य सूर्याद्यर्थत्वे वैकुण्ठरूपमधिकरणमप्रसिद्धं स्यात्।

चित्रभानु॰ सूर्योऽग्निश्चार्थः। दिवसे भानं सूर्यस्यैव शेते॰ चातुर्मास्यकालसम्बन्धाद्धरिपदस्य विष्णुरर्थः।

पुंनपुंसके॰ क्रमशः सुहृत्सूर्ययोरित्यत्राऽन्वेति। नभःशब्दो गगने नपुंसकः श्रावणे पुंलिङ्गः। इन्द्रशत्रु॰ तत्पुरुषसमासे समासस्यान्त उदात्तो भवति। बहुव्रीहौ तु प्रकृत्यापूर्वपदमित्यनेन समासान्तोदात्तम् बाधित्वा समासात्प्राक् पूर्वपदस्य यादृशः स्वरः स एवावस्थाप्यते। शत्रुके॰ बहुव्रीहित्वद्योतनाय समासान्तः कप्। एद्दहमे एद्दहमेत्थणि आ एद्दहमेत्ते हिं अच्छिवत्ते हिं। एद्दह मेतावत्थादिवसैः। एत्तह मेत्तोहिंदि अ एहिं। इति सम्पूर्णम्। तस्यच्छाया तु एतावन्मात्रस्तनिका एतावन्मात्रैरक्षिपत्रैः। एतावन्मात्राऽवस्था एतावन्मात्रैर्दिवसैः। हस्ताऽभिनयेन एतत्पदस्य विशेषोऽर्थो-

इहार्थसामर्थ्यौचितीनामुदाहरणेषु चतुर्थाद्यैस्तृतीयाद्यैरर्थसामर्थ्येन च बोध्यमानकार्यकारणभाव एव नियामकः। न तु वस्त्वन्तरम्। बोधकवैचित्र्याच्च नियामकस्य वैचित्र्येणोक्तिः प्राचाम्। वस्तुतस्तु संयोगादीनामर्थान्तरसाधारणत्वे नानार्थशब्दस्यार्थविशेषे शक्तेः संकोच एव न संभवति। नियामकानामसंकुचितत्वात्। अथ प्रसिद्धत्वादिना तेषामसाधारणता बुद्धिर्यथाकथंचिदुपपाद्यते, तदा प्रायशो लिङ्गभेद एव एते, न तु सर्वथैव ततः स्वतन्त्र इति बोध्यम्।

ऽवगम्यते। त्रयाणामुदाहरणेषु कार्यकारणभाव एव नियामकः इत्याह **इहार्थं** ●। **बोधकवै** ● कार्यकारणभावस्य बोधकानां वैचित्र्यात् भेदेनोक्तिः। इदं मया प्राचीनप्रथां यथाशक्ति परीक्षितुं व्याख्यातं वस्तुतो लिङ्गभेद एवेत्याशयं प्रकाशयति **वस्तुतः** ● **साधारणत्वे** ● शङ्खचक्रयोरिन्द्रादिसाधारणत्वे कथं हरिपदेन इन्द्रो न गृह्यते। यदि प्रसिद्धशङ्खादिसम्बन्धोऽभिधानियामक इत्युच्यते; तदा विष्णोरसाधारणतया लिङ्गत्वमेव, प्रसिद्धतादृशसम्बन्धस्येन्द्रादावर्तमानत्वात्। एवं विप्रयोगस्य संयोगप्रसिद्ध्यधीनत्वात्तस्यापि लिङ्गत्वम्। साहचर्यमपि प्रसिद्धं लक्ष्मणस्य दाशरथे रामस्यासाधारणम्। रामापोध्येत्यत्राऽपि प्रसिद्धः स्वस्वामिभावो दाशरथेरेवासाधारणो न तु परशुरामादेः। प्रसिद्धं वैरं परशुराम एवार्जुनस्य न तु रामचन्द्रादौ। अथ आपादितमेव लिङ्गत्वं मूले। वारकविशेषणानि तु लिङ्गावान्तरभेदसाधकानि। प्रकरणेऽपि प्रसिद्धो वक्तृबुद्धिस्थः कश्चिद्धर्मो राजन्येव। सामर्थ्ये शङ्कितमेव। औचिती अपि कामुकत्राणयोग्यता दयितासांमुख्यमात्रवृत्तिः राजधानी सम्बन्धस्य राजनि प्रसिद्धत्वात् पूर्ववद्देशस्य, दिवा सम्बन्धस्य सूर्ये प्रसिद्धत्वात् कालस्य लिङ्गान्तर्भावः स्वयमूह्यः। व्यक्तिः पुंनपुंसकादि येषां मते अर्थधर्मस्तेषां मते लिङ्गान्तर्गता। येषां शब्दधर्मस्तेषां मते भवतु नाम लिङ्गवहिर्भूतम्। अभिनयोऽपि यस्यार्थस्यासाधारणत्वेन यैर्ज्ञायते तस्यैवाभिव्यक्तिर्नान्यस्य। तथा च तस्याप्यन्तर्भावः सम्भवति। एवञ्च शब्दगतसमभिहाररूपायाः सन्निधेः शब्दगतस्य स्वरस्य चानन्तर्भावाऽभिप्रायेण प्रायश इत्युक्तमिति प्रतिभाति।

अन्ये तु द्वित्राणामन्येषामपि अनन्तर्भावाभिप्रायं वर्णयन्ति। मर्मप्रकाशादपि सर्वेषामन्तर्भाव आयाति। शब्दगतस्याऽपि परम्परया आरोप्यान्तर्भावे तत्तात्पर्यं प्रतिभाति।

संयोगादिषु कतिपयेषु परस्परं भेदः स्फुटं प्रतीयते परं स भेदो लिङ्गत्वान्तरभेदस्यैव साधकोऽस्तु। तेषाम्परस्परभेदबाधकत्वेऽपि लिङ्गाद्वहिर्भूतत्वसाधकत्वे मानाऽभावात्। लिङ्गसामान्यलक्षणस्यासाधारण्यस्य तेषु प्रतीतेरित्यभिप्रायेण सर्वथेत्युक्तम्। ततः ● लिङ्गात्। इत्यभिधानियामकप्रकरणम्।

अथ शब्दशक्तिमूलकध्वनिनिरूपणम्

तत्र शब्दशक्तिमूलालंकारस्य ध्वनिर्यथा—

'करतलनिर्गलदविरलदानजलोल्लासितावनीवलयः।
धनदाग्रमहितमूर्तिर्जयतितरां सार्वभौमोऽयम् ॥

अत्र राजप्रकरणे करदानधनदसार्वभौमशब्दानां शक्तौ संकोचितायामपि तन्मूलकेन ध्वननेन प्रतीयमानस्यार्थान्तरस्याप्रस्तुतस्याभिधानं मा भूदिति प्रकृताप्रकृतयोरुपमानोपमेयभावः प्रधानवाक्यार्थतया कल्प्यत इत्युपमालंकारध्वनिः। अथ श्लिष्टविशेषणायां समासोक्तौ व्यङ्ग्यस्याप्यप्रकृतव्यवहारस्य प्रकृतधर्मिण्यारोप्य-

---

अथ शब्दशक्तिध्वनिप्रकरणम्

यत्र नानार्थकाः शब्दा उपात्तास्तेभ्यः प्रकृतस्येवाकृतस्याप्युपस्थितिर्भवितुमर्हति। परं संयोगादिभिः प्रकृतविषये शक्तौ निर्णीतायामप्रकृतस्य नाऽभिधया भानं तस्यानियन्त्रितत्वात्। नाऽपि लक्षणया मुख्यार्थबाधाद्यभावात्। प्रतीतिश्च वृत्तिमन्तरा न संभवतीति व्यञ्जनैव वृत्तिरवसीयते तथा चाप्रकृतार्थस्य व्यञ्जनया भानमिति तस्य व्यङ्ग्यत्वम्। व्यञ्जनायाश्च शब्दशक्तिरुल्लासिकेति शब्दशक्तिमूलकत्वम्। व्यङ्ग्यस्य च प्राधान्ये ध्वनित्वव्यवहारः। तत्राऽपि विशेषणानामेव श्लिष्टत्वे श्लेषाऽलंकारस्य प्रसक्तिः। विशेष्यस्याऽपि श्लिष्टत्वे एषः पन्थाः समायातीति पूर्वतोऽभिसन्धिः। **करतल** • अयं सर्वभूमेरीश्वरो जयतितराम्। करतलाद् निर्गच्छन्ति यानि निरन्तराणां दानानां जलानि तैरुल्लासितं भूमण्डलं येन सः। धनदातॄणां धनिकानामग्रेऽधिकधनवत्वात् पूजिता मूर्तिर्यस्य सः। इति प्रकृतराजविषयकोऽभिधया बोधः। अप्रकृतविषयको व्यञ्जनया जायमानो बोधस्तु सार्वभौमनामा दिग्गजो जयतितराम्। शुण्डदण्डान्निःसरता सततप्रवाहिमदजलेन सुरभितं भूमण्डलं येन सः। कुबेरेण प्रथमं पूजिता मूर्तिर्यस्य सः। शक्तौ हस्तवितरणदातृजनभूपविषयेषु इत्यादिः शेषः। **अर्थान्तरस्य** • दिग्गजवृत्तान्तस्य शुण्डमदकुबेरदिग्गजघटितस्य। अप्रस्तुतस्य अनन्वितस्य प्रधानशब्देन ध्वनितत्वयेग्यता सूचिता। समासोक्तेरिवास्याऽपि गुणीभूतव्यङ्ग्यत्वम्। अस्या उपमाया इव वा समासोक्तेरपि ध्वनित्वमिति प्रतिपादयितुमुपक्रमते **अथ श्लिष्ट** • प्रस्तुतव्यवहारो यत्र गम्यमानाप्रस्तुतव्यवहाराभेदेन भासते सा समासोक्तिरिति ग्रन्थकृता वक्ष्यते। यथा—अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः। पूर्वदिशि चन्द्रोदयो

माणस्य प्रकृतोपस्कारकतया यथा गुणीभूतव्यङ्ग्यत्वमेवमिहाप्युचितम्। न चोपमा प्रकृतार्थोपस्कारिका न भवतीति शक्यं वदितुम्। उल्लास्यकालकरवालमहाम्बुवाहम्', 'भद्रात्मनो दुरधिरोहतनोः' इत्यादौ प्राचीनानां पद्ये 'करतल–' इत्यादि प्रागुदाहृतपद्ये च व्यङ्ग्योपमया प्रकृतस्य राज्ञः प्रकर्षस्य सकलानुभवसिद्धत्वात्। अनुभवापलापे तु समासोक्तावप्यप्रकृतव्यवहारस्य प्रकृतोपस्कारकत्वं नेति सुवचत्वात्। ननु समासोक्तावत्र चास्ति विशेषः। यत्तत्र व्यवहारिणो नानार्थशब्दानुपस्थाप्यत्वम्, इह तु तदुपस्थाप्यत्वम्,

---

वर्ण्यते। तत्र पूर्वदिशा सह रक्तस्य चन्द्रस्य सम्बन्धः प्रकृतव्यवहारः। ऐन्द्रीचन्द्रमसोः पुल्लिङ्गस्त्रीलिङ्गाभ्यां मुखचुम्बतिभ्याञ्च अनुरागिपुरुषनिष्ठो नायिकामुखचुम्बन व्यवहारो गम्यते तयोश्च व्यवहारयोरभेदः। तत्र यथा व्यङ्ग्यस्य प्रकृत आरोपात्प्रकृतोपस्कारकतया न ध्वनित्वम् तथा प्रकृत उपमाया व्यङ्ग्यायाः प्रकृतराज प्रकर्षपोषकतया न ध्वनित्वमिति भावः उल्लास्य ● उल्लास्यकालकरवालमहाम्बुवाहं देवेन येन जरठोर्जितगर्जितेन। निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः॥ इति काव्यप्रकाशे चतुर्थोल्लासे उदाहृतम्। प्रकृतराजपक्षेऽस्यार्थः येन राज्ञा जरठं कठोरं वलवद् गर्जितम् यस्य तेन काल इव यः करालः खड्गः स एवाम्बुवाहस्तम् उल्लास्य धाराजलैः तीक्ष्णधाराकान्तिभिर्लोकेपानीनाम्ना प्रसिद्धैः त्रिभुवने शत्रूणां प्रसिद्धिं प्राप्तः प्रतापः शौर्ययशः शान्तिं प्रापित इति। अप्रकृते तु येन इन्द्रेण तादृशगर्जनद्वारा कालत्ववर्णं मेघाभिन्नं खड्गमुत्थाप्य रणे परस्परं मेघानां घर्षणकोलाहले सति शत्रूणामुष्णानां सम्पूर्णो दाहकारणप्रतापः शान्तिं प्रापितः। कियत्यंशे अस्य व्याख्यातभेदोऽपि वर्तते अम्बुवाहशब्दस्य कालकरवाले यन्महदम्बु तस्य वाहं प्रसरणम्, यद्वा मह उत्सव एवाम्बु तद्वाहकमित्यादि व्याख्यानाय कतिपय काव्यप्रकाश टीकाकृतः क्लिश्यन्ति तत्र कारणम् अम्बुवाहस्य विशेष्यतया तत्र राजसम्बन्धिनः करवालस्य रूपकाङ्गीकारे इन्द्र एव राजरूपकं सिध्येन्नतु राज्ञि इन्द्ररूपकम्। नचरूपकमिष्टंनाऽपि महेन्द्ररूपकम् इति परं न तद् रसगङ्गाधराऽनुसारिभिरनु सरणीयम्। ग्रन्थ कृता रूपकस्य प्रतिपादनात् नाऽपि परप्रयोगमात्रेण मेघे करवालरूपकस्य इन्द्रे च राजरूपकस्य सिद्धीरूपक प्रकरणे सुविमलमौक्तिकतारे इत्यादिपद्येषु वक्ष्यमाणरीत्या उत्तरपदार्थरूपकस्याऽपि पूर्वपदार्थे सोपपादनं निरुपयिष्यमाणत्वात्। भद्रात्मनः इत्यादि पद्यं सव्याख्यानं श्लेषप्रकरणे द्रष्टव्यम्। नपस्थाप्यत्वम् ● अयमैन्द्रीमुखमित्यादिपद्ये व्यवहारिणश्चन्द्रमसः पुरुषस्य च

इति चेत्, किं चातो नहि व्यवहारिणो नानार्थशब्दोपस्थाप्यतामात्रेणाप्रकृतधर्मिनिरूपिताया उपमायाः प्रकृतधर्म्युपस्कारकत्वं वार्यते। येन गुणीभूतव्यङ्ग्यत्वं न स्यात्। न चात्रोपमादीनामलंकाराणां स्वभावतः सुन्दरत्वात्काव्यप्रवृत्त्युद्देश्यतया च वस्तुमात्रे गुणीभावो न संभवति। यथा वस्तुमात्रेणाभिव्यक्तानामलंकाराणाम्। तुल्यन्यायत्वात्। अप्रकृतव्यवहारस्य तु समासोक्त्यवयवस्य निरलंकारतया वस्तुन्युपस्कारकत्वं समासोक्तावविरुद्धमिति वाच्यम्। एवमपि 'बाधेऽदृढेऽन्यसाम्यात्किं दृढेऽन्यदपि बाध्यताम्' इति न्यायेनोक्तयुक्तेः शिथिलत्वात्, अपराङ्गताया दुरपह्नवत्वात्। अथोच्यते—उपमानमुपमेयं साधारणो धर्म इति ह्युपमाशरीरघटकम्।

नानेकार्थकपदैरूपस्थितिः। अपि तु मुख चुम्बनादि व्यवहारस्यैव। अत्र तु विशेष्यभूतयोः राजदिग्गजयोरुभयोर्नानार्थकपदैरुपस्थितिः।

किञ्चातो ● भवतु नामायं विशेषः किमेतेन विशेषेणः प्रकृत धर्मिण उपस्कारकत्वेन हि उपमायाः गुणीभूतत्वं प्रसक्तम्। न चैतेन विशेषेण उपस्कारकत्वं वार्यते। तथा चायं विशेषो न गुणीभूतत्वं वारयति। **स्वभावतः** ● ननु वस्तूपस्कारकतयैव। **काव्यप्रवृ** ● अलङ्कार कृतचमत्कृतिमनुरुध्यैव कवयः काव्यरचनायां प्रवर्तन्ते ननु तदुपस्कृतमर्थमप्यनुरुन्धते। वक्ष्यतेच स सिद्धान्तः 'व्यज्यन्ते वस्तु मात्रेण' इत्यादिना ग्रन्थकृतैवाग्रे। **व्यक्तानाम** ● अग्रे उदाहरिण्यमाणेषु मृद्वीका रसितेत्यादि। नमनागपीत्यादिषु। **न्यायत्वात्** ● यथा तेषु अलङ्काराणामुपस्कारकस्वभावानां प्राधान्यं तथाऽत्रोपमाया अपि। स्वभावतो वस्तूपस्कारकत्वेऽपि स्वभावतः प्राधान्यमलङ्कारस्वभाव एव। ननु वस्तुनः स्वभावः। समासोक्त्यवयवस्त्व प्रकृत व्यवहारोनालङ्कार इति तस्य गुणीभूतत्वमेव। **बाधेऽदृढेऽन्य** ● बाधः प्रकृताऽभिमतसिद्धि प्रतिबन्धकः। स यदि नदृढो दुर्बलस्तदा अभिमतं सेत्स्यत्येव। साम्य प्रदर्शनेन किम्? साम्यप्रदर्शनमपि द्रष्टान्त विधया साधकान्तरप्रदर्शनमेव। तच्च व्यर्थमेव अभियत सिद्धेः स्वमानेनोपस्थितेः। यदि बाधको दृढस्तदाऽपि साम्यप्रदर्शनम् वृथा। नहि साम्य प्रदर्शनं दृढं बाधकमपोहितुं प्रभवति। दृढो बाधकस्तु प्रकृतं बाधमानः साम्यस्थलमपि बाधेत। अत्र प्रकृत धर्मिणः उपस्कारकत्वं ध्वनित्वस्यबाधकम्।

न तु ततः पृथग्भूतम्। तैर्विना तस्या अनिष्पत्तेः। इत्थं चोपमेयस्य सादृश्यांशेनोपस्कारेऽप्युपमाया नापराङ्गत्वम्। उपमेयस्यापरत्वाभावात्। यथा समासोक्तावप्रकृतव्यवहारेण प्रकृतस्योपस्करणेऽपि न समासोक्तेरपराङ्गत्वम्। प्रकृताप्रकृतघटितत्वात्। एवमिहापि स्यादिति। तथापि समासोक्तेरिवास्यापि प्रभेदस्य गुणीभूतव्यङ्ग्य-

---

नच तद्वस्तुमात्रेणभिव्यक्तालङ्कारोदाहरणमात्रेणापसरति उदाहरणेऽपि यदि प्रकृतो पस्कारकत्वम् तदा तत्राऽपि तद्बाधकं गुणीभूतत्वमापादयेदेवेतिभावः। **तस्याः** • **उपमायाः** •। **नापराङ्गत्वम्** • अपितु स्वस्यैव स्वाङ्गत्वम् स्वघटकस्योपमेयस्य स्वेनोपस्कारकत्वात्।

प्रकृता प्रकृत • प्रकृताप्रकृतव्यवहारशरीरत्वात्। स्वाङ्गस्यैव स्वेनोपस्करणम्। अथोच्येतेत्यत्राथशब्दस्य यद्यपि शब्दसमानार्थकतया तथापीत्यादिना प्रकृतोपमा समासोक्त्योस्तुल्ययोगक्षेमौ दर्शयति। **तथाऽपि** • समासोक्तेरिवोपस्कार्योपस्कारकयोः उपमावहिर्भूतत्वाऽभावे। **समासोक्तेरिव** • तुल्ययुक्त्या तत्र गुणीभूत व्यङ्ग्यत्वस्य सर्वैः समादृतत्वात्। व्यज्यमानोपमा वाच्यस्यैवोपमेयस्योपस्कारिका। उपमेयो राजा वाच्य एव।

तथा च वाच्याद् व्यङ्ग्यस्यातिशायित्वाऽभावात् गुणीभूत व्यङ्ग्यत्वमितिभावः। तथा च नैतेषांध्वनित्वमिति पण्डित राजाऽभिप्रायः प्रतिभाति। यत्रोदाहरणे न गुणीभूतता तस्यैवालङ्कारध्वने रुदाहरणत्वम्। अग्रे उदाहरणानि प्राचीन परम्परामनुरुन्धानेन दत्तानि नास्त्यलङ्कारध्वनित्वमित्यपि वदन्ति।

काव्य प्रकाश प्रभाकृतस्तु समासोक्तावप्रस्तुतव्यवहारस्य प्राधान्याङ्गीकारे चमत्कृतिस्तादृशी नोदेति ततस्तस्य गुणीभूत व्यङ्ग्यत्वम्। उपमायाः प्राधान्याङ्गीकारेऽपि चमत्कृतेर्ध्वनित्वम् निर्बाधमिति ब्रुवते। अत्रत्य मर्म प्रकाशस्तु अत्र वदन्ति— अलङ्काराणामुद्दीपनविधयारसाद्युपयोगित्वेनालम्बनापेक्षयोद्दीपन स्याधिक चमत्कारित्वस्य सर्वानुभवसिद्धतयाकरतलेति पदवाच्यालम्बन विभावापेक्षयाऽतिशायित्वाद्ध्वनित्व मव्याहतमेव। रसाद्यपेक्षया गुणीभूतत्वन्तु इष्टमेव। समासोक्तौ तु आगत्य सम्प्रतिवियोग विसंष्ठुलाङ्गीमित्यादौ सखीशिक्षितवाक्येऽप्रकृतनायकवृत्तान्ताध्यारोपं विना तदनुपपत्तेर्गुणीभूत व्यङ्ग्यत्वं स्पष्टमेव। यत्रतु तस्या अपि रत्याद्युपस्कारकतया वाच्यादतिशायित्वमुक्तरीत्या तत्रास्तु नामध्वनित्वं तस्या अपि। न चैवमुपमा कृतमुत्कर्षमादाय वस्तुध्वनित्व मेवाऽस्तु ननु अलङ्कार ध्वनित्वमेवेतिवाच्यम् अलङ्कारकृतोत्कर्षध्वनेरेव अलङ्कार ध्वनिरिति व्यपदेशादित्याह।

त्वापत्तेः, अस्त्येव वा समासोक्तेरपि ध्वनिव्यपदेश्यत्वापत्तेः। अन्यच्च—श्लेषे हि श्लेषभित्तिकमभेदाध्यवसानं द्वयोरर्थयोरिति सकलालंकारिकनिबद्धम्, अनुभवसिद्धं च। तत्र मूलान्वेषणे विधीयमाने एकपदोपात्तत्वान्न शक्यते मूलमन्यन्निर्वक्तुम्। एकपदोपात्तौ ह्यनेकोऽप्यर्थोऽभिन्नतयैव भासते। इत्थं च 'उल्लास्य कालकरवाल—' इत्यादावप्येकपदोपात्ततया द्वयोरर्थयोरभेदाध्यवसानस्य युक्तत्वेनाभेदस्यैव व्यङ्ग्यत्वमुचितम्, नोपमायाः। श्लेषे द्वयोरर्थयोर्वाच्यत्वम्, एककालत्वं च। इह त्वेकस्य वाच्यत्वम्, अपरस्य व्यङ्ग्यत्वम्, भिन्नकालत्वं चेति। एतावन्मात्रेणैवैकपदोपात्तत्वप्रयुक्तमभेदाध्यवसानं न शक्यं त्यक्तुम्। व्यङ्ग्यताया भिन्नकालत्वस्य चाभेदप्रतिपत्तावबाधकत्वात्। एतेन 'रूपकस्योपमाज्ञानाधीनज्ञानत्वेन प्रथमोपस्थिततया तस्या एव संबन्धत्वं

करतलविगलदित्यादिपद्येषु रूपकमेव युज्यते नोपमेत्युपादत्ते अन्यच्च • श्लेषः एकवृन्तफलद्वयन्यायेन अभिन्नशब्देनार्थद्वयोपस्थितिः। सः भित्तिः सहायो यस्यैवंभूत उपस्थितयो रर्थयोः परस्परमभेदस्यारोपः। तत्र अभेदाध्यवसाने अभेदस्यैव • तेन रूपकध्वनि रुक्तः। एककालत्वम् • तत्वञ्च समानकालोपथितित्वेन। भिन्नकालत्वञ्च • तदपि वाच्योपस्थितेरनन्तरं व्यङ्ग्योपथितेः। एतावन्मात्रेण • वाच्यत्व व्यङ्ग्यत्वाभ्यां भिन्न कालत्वेन च। अन्यथा तुल्ययुक्त्या लक्ष्यार्थेनाप्यभेदाध्यवसानं न स्यात्। यदपि प्रदीपोद्योते प्रतिपादितम्। असम्बद्धाभिधानप्रसक्तिभियैवोपमा व्यज्यत इति तु निर्विवादम्। न च रूपकाङ्गीकारे साभीतिरपसरति अम्बुवाहस्य विशेष्यतया देवेन्द्रस्याऽपि विशेष्यत्वापत्त्या महेन्द्रगतरत्युत्कर्षतयैव रूपकस्योपयोगः स्यात्प्रकृतस्तु राजाऽसम्बद्ध एव स्यात्तेनोत्कर्षेण। उपमाङ्गीकारे तु राज्ञो विशेष्यता तद्गतरत्युत्कर्षः सम्यक् सिध्यति। तदपि प्राक् समाहितमुल्लास्येत्यस्य व्याख्याऽवसरे। रसगङ्गाधरे रूपकप्रकरणे सुविमलमौलिकेत्यादि व्याख्यानाऽवसरे उत्तरपदार्थरूपक स्याऽपि पूर्वपदार्थे सम्यक् समन्वय उपलप्स्यते। धीनज्ञान • प्राचीनमत समर्थनाऽवसरेऽभेदात्मकस्याऽपि रूपकस्य सादृश्यज्ञानमूलकत्वं व्यवस्थापयिष्यते मूलकृता लक्षणा प्रकरणे

कल्प्यम्' इति काव्यप्रकाशटीकाकारैरुक्तं नातीव श्रद्धेयमिति। प्रकृतमनुसरामः।

एवमलंकारान्तरमपि शब्दशक्तिमूलानुरणनस्य विषयः। यथा यमुनावर्णने—'रविकुलप्रीतिमावहन्ती नरविकुलप्रीतिमावहति। अवारितप्रवाहा सुवारितप्रवाहा।' इह नराणां वीनां च कुलस्य प्रीतिमावहतीति प्रकृतेऽर्थे सिद्धे रविकुलप्रीतिं नावहतीति द्वितीयोऽप्रकृतोऽर्थः, विरोधश्च। एवमन्यत्रापि। यदि तु रविकुलप्रीतिमावहन्त्यपि न रविकुलप्रीतिमावहति। अवारितप्रवाहापि सुवारितप्रवाहा इत्यपिरन्तर्भाव्यते तदा विरोधांशस्यापिनोक्तत्वाद्द्वितीयार्थस्य च तदाक्षिप्तत्वान्न ध्वनित्वम्। निपातानां द्योतकतानयेऽपि स्फुटद्योतितस्य तदाक्षिप्तस्य च वाच्यकल्पत्वान्न तथात्वम्। ननु 'मृणालवलयादि दवदहनराशिः' इत्यत्र विरोधा-

---

नातीव॰ सादृश्यज्ञानाधीनत्वप्रतिपादनमात्रे श्रद्धा; उपस्थिताभेदाध्यवसानस्यानादरेऽश्रद्धाऽन्यथा सर्वत्रैव सादृश्यज्ञानस्य प्रथममुपस्थित्या श्लेषस्थले कुत्राऽपि रूपकं नोल्लसेत्। विरोधध्वनेरुदाहरणमारचयति **एवमलङ्का॰** अनुरणनं ध्वनिः। **रविकुल॰** उत्तरत्र वाक्ये नकारेण निषेधसमर्पकेण पूर्ववाक्यार्थविरोधाद्यथाश्रुतो विरोधः। विरोधपरिहारस्तु सूर्यवंशप्रसूततया सूर्यकुले प्रीतिमादधती सती यमुना नराणां वीनां पक्षिणाञ्च कुले स्वादुजलतया प्रीतिं विदधाति।

अवारित॰ अकारस्य निषेधार्थकतया उत्तरवाक्यार्थेन सह विरोधो यथाश्रुत एव। तत्परिहारस्तु अनवरुद्धो जलप्रवाहो यस्याः सा। सुवात्वं संजातमस्य तदस्य संजातं तारकादिभ्य इतजित्यनेनेतच् प्रत्ययः। सुवारितः प्रवाहो यस्याः सा। **विरोधश्च॰** अप्रकृतोऽर्थो व्यज्यते तेन विरोधालङ्कारो ध्वन्यत इत्यर्थः। **द्वितीयार्थस्य॰** विरुद्धार्थस्य विरोधेनाक्षिप्तत्वात्। ननु अपिना द्योतकेन निपातेन विरोधो न वाच्योऽपि तु द्योत्य एवेत्याशङ्क्य वाच्यत्वाऽभावेऽपि वाच्यकल्पत्वात् न ध्वनित्वमिति समाधत्ते **निपातानाम्॰** द्योतितस्य विरोधस्य तदाक्षिप्तस्य विरोधाक्षिप्तस्याप्रकृतार्थस्य। तथात्वं ध्वनित्वम्।

काव्यप्रकाशेऽपि शब्दं विनाऽपि वाच्यविरोधोदाहरणेन स्वग्रन्थविरोधमाशङ्कते **ननु मृणाल॰** अभिनवनलिनी किसलयमृणालवलयादि दवदहनराशिः। सुभग-

१८

भासस्य कथं वाच्यालंकारत्वम्। विरोधांशस्य शब्दवाच्यताविरहेण व्यङ्ग्यताया एवाभ्युपगन्तव्यत्वात्। न च विरोधविशिष्टाभेदस्य संसर्गत्वाद्वाच्यार्थबोधविषयतया विरोधस्य वाच्यत्वमिति वाच्यम्। विरोधाभेदयोः परस्परविरुद्धत्वेनैककालावच्छेदेनैकसंसर्गत्वस्यानुपपत्तेः। नानार्थयोरभेदस्यैव संसर्गतया विरोधस्यापि संसर्गत्वे मानाभावाच्च। पर्यन्ते दवदहनराशिपदस्य सदृशलाक्षणिकतया विरोधांशस्य तिरोधानाच्च। मैवम्। उक्तपद्यस्य विरोधोदाहरणतामात्रे तात्पर्यात्। व्यङ्ग्यत्वेऽपि तथात्वस्यानपायात्। वाच्यविरोधोदाहरणतायां त्वपिरन्तर्भाव्यः।

कुरङ्गदृशोऽस्याविविवशतस्त्वद्वियोगनिपाते। दूती वियुक्तायाः वियोगावस्थां नायकं प्रतिवक्ति। तव वियोगविपत्तावागतायां शीतलान्यमूनि उद्दीपकतया वनाग्निराशयो भवन्ति। **विरहेण** • अपि शब्दाऽभावेन। मृणालवलयादिना सह दवदहनादेर्न केवलमभेदः ससर्गो योग्यताविरहात्। अपि तु विरोधविशिष्टः संसर्गः। यद्यपि पदार्थयोः संसर्गो वाच्यो न भवति यथा नीलो घटः इत्यादौ नीलघटयोरभेदेनाऽभिधा तथाऽन्यत्राऽपि पदार्थयोः संसर्गेनाभिधा स्वीक्रियते किन्तु आकाङ्क्षावशाच्छाब्दबोधे भासते। आकाङ्क्षाभास्यशब्देन व्यवहारः। वृत्त्या पदैरनुपस्थितोऽपि संसर्गः आकाङ्क्षामहिम्ना शाब्दबोधे भासते, संसर्गः स आकाङ्क्षाभास्य उच्यते। तथा च संसर्गघटकत्वेऽपि विरोधस्य कथं वाच्यत्वमित्याशङ्क्याह **वाच्यार्थः** • अयं भावः। यस्मिन्नर्थेऽभिधा स एव वाच्य इति तु नात्राश्रीयते तथा सति पदार्थसंसर्गस्य कुत्राऽपि वाच्यता न स्यादपितु यत्पदेन वाच्यार्थविषयकः शाब्दबोधस्तद्विषयः संसर्गोऽपि तस्य पदस्य वाच्य इति प्रयोजनवशादङ्गीक्रियते। तथा च पदार्थद्वयसंसर्गघटकतया विरोधस्य वाच्यत्वमायातीति भावः। अत्रत्ये हिन्दी सरले न मर्म स्पृशत इति ध्येयम्।

स्यानुपपत्तेः • भेदाभावे त्वभेदो व्यवह्रियते विरोधश्च सर्वथा भेदे सत्येव सम्भवति अतोऽभेदविरोधयोः परस्परं विरोधः। यस्मिन् कालेऽभेदः संसर्गो न तदानीं विरोधः। अत्र तु नामार्थतयाऽभेद एव संसर्गो न विरोधः। विरुद्धविभक्तिसत्वे तु विरोध एव नाभेद इति नैककालाऽवच्छेदेनैकसंसर्गताऽनयोः। **मानाऽभावाच्च** • अन्यथाऽन्यत्रापि नामार्थतया पदार्थयोः संसर्गो विरोध उल्लसेत्। **पर्यन्ते** • पर्यवसाने मृणालादीनां दवदहनत्वाऽनुपपत्तेर्दवदहनकार्यपीडाकारितया तत्सदृशे लक्षणा। **तामात्रे** • विरोधोदाहरणन्न तु वाच्यविरोधोदाहरणम्। तथात्वस्य विरोधोदाहरणत्वस्य। **त्वपिर**• मृणालवलयादिरपि इत्यादिरूपेण। वाच्यकल्पेऽपि वाच्यताव्यपदेशः। विरुद्धपदार्थयो-

केचित्—'विरोधांशस्य व्यङ्ग्यत्वेऽपि विरोधिद्वयस्य वाच्यतामात्रेण विरोधाभासस्य वाच्यालंकारव्यपदेशोपपत्तिः। इत्थमेव चांशान्तरस्य व्यङ्ग्यत्वेऽप्येकांशमादाय समासोक्त्यादीनामपि वाच्यालंकारव्यपदेशः' इत्याहुः।

यथा वा—

'कृष्णपक्षाधिकरुचिः सदासंपूर्णमण्डलः।
भूयोऽयं निष्कलङ्कात्मा मोदते वसुधातले'॥

अत्र भगवत्पक्षाधिकप्रीत्यादिलक्षणे प्रकृतभूपोपयोगित्वात्प्रकृतेऽर्थे शक्त्या प्रतीतिपथमवतीर्णे द्वितीयोऽर्थोऽप्रकृतो वैधर्म्यात्मा तत्प्रयुक्तो व्यतिरेकश्च। न चात्र व्यतिरेकस्य कविगतराजविषयकरतिभावोत्कर्षकतया गुणीभूतस्य कथं ध्वनिव्यपदेशहेतुत्वम्, प्रधानस्यैव ध्वनिव्यपदेशहेतुत्वादिति वाच्यम्। उदासीने वक्तरि तत्त्वार्थकथनपरस्यास्य पद्यस्य

रुपस्थितौ विरोधस्य प्रागेवोपस्थितौ विरोधस्य वाच्यत्वाऽभावेऽपि वाच्यकल्पत्वम्। तथा चात्राऽपि वाच्यविरोधव्यपदेशो न विरुध्यत इति समाधानान्तरमाह **केचित्तु॰**। **समासोक्त्यादीनामपि॰** तत्राऽपि प्रकृतव्यवहारस्य वाच्यतया अप्रकृतव्यवहारस्य व्यङ्ग्यस्याऽपि स्फुटं प्रतीयमानत्वेन वाच्यकल्पतया व्यवहारद्वयात्मिकायाः समासोक्तेर्वाच्यत्वव्यपदेशः।

अथवा केचित्तु मतस्यायं निष्कर्षः। विरोधमात्रं न विरोधालंकारशरीरमपितु विरुद्धपदार्थोऽपि विरोधालङ्कारशरीरघटकः। तथाचैकस्यांशस्य वाच्यत्वेऽलङ्कारस्य सम्पूर्णस्याऽपि वाच्यत्वम्। व्यतिरेकध्वनिमुदाहरति **कृष्णपक्षा॰** वासुदेवस्य पक्षेऽधिका प्रीतिर्यस्य सः, कलङ्केन दोषेण रहितः आत्माऽन्तःकरणं यस्य एवंविधोऽयं भूपो वसुधातले मोदते इति प्रकृतराजविषयकप्रकरणनियन्त्रितशक्तिको बोधः। द्वितीयार्थनिरूपितशक्त्युल्लसितव्यञ्जनया चन्द्रविरुद्धधर्मविषयकस्तु कृष्णे पक्षेऽधिकान्तिर्यस्य सः; सदा सर्वतिथौ सम्पूर्णः कलासमूहो यस्य सः; कलङ्करहितः। मर्मप्रकाश एवमप्युपलभ्यते—पापकर्मण्यधिकरुचिः सदासं (सम्यक्) यथा तथा पूर्णं मण्डलं यस्य; अत्यन्तकलङ्क आत्मा यस्य सोऽयमित्यप्रकृतोऽर्थः। **भूपोप॰** भूपरतिव्यञ्जकतयोपयोगः। **व्यतिरेकश्च॰** ध्वन्यते इति शेषः। उपमानचन्द्रापेक्षयाऽधिकोत्कर्षवर्णनात्मको व्यतिरेकः। **उदासीने॰** राजानमतुष्टूषौ। वस्तुस्थितिवर्णनतत्परे। तथा च रतिरेव नास्ति

वक्तृगतरतिव्यञ्जकत्वासंगतेः, गुणीभूतस्यार्थस्य वाच्यार्थापेक्षया प्रधानतया ध्वनिव्यपदेशहेतुतायाः प्राचीनैः स्वीकाराच्च । अन्यथा—

'निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥'

इत्यत्र व्यतिरेकध्वनित्वं तैरुक्तमसंगतं स्यात् । व्यतिरेकस्य भगवद्विषयकरतिभावाङ्गताया अनुभवसिद्धत्वात् ।

शब्दशक्तिमूलवस्तुध्वनिर्यथा—

'राज्ञो मत्प्रतिकूलान्मे महद्भयमुपस्थितम् ।
बाले वारय पान्थस्य वासदानविधानतः ॥'

अत्रोपभोगं देहीति वस्तु राजपदशक्तिमूलानुरणनविषयः । राजपदाच्चन्द्रोपस्थितावेव चन्द्रजनितभयवारणकारणत्वेनोपभोगस्याभिव्यक्तेः । न चात्र नृपचन्द्रयोरुपमानोपमेयभावः, भेदापोहरूपं रूपकं वा तथास्त्विति वाच्यम् । इह नृपरूपस्यार्थस्य चन्द्ररूपार्थगोपनमात्रार्थमुपात्तत्वेन युगपदुल्लसितोपमानोपमेयकयोरुपमारूपकयोस्तात्पर्यविषय-

---

तदा तदुत्कर्षं कथं साधयेत् । **वाच्यार्थापेक्षया** ● तथा च व्यङ्ग्यस्य रत्युत्कर्षस्य यद्यप्यङ्गं व्यतिरेकस्तथाऽपि वाच्यार्थमपेक्ष्य प्राधान्यमस्त्येव । वाच्यादतिशायि व्यङ्ग्यञ्चेद् ध्वनिरेतावन्मात्रं तेषां मतम् । पण्डितराजमते तु सर्वथैव प्राधान्यं व्यङ्ग्यस्य ध्वनित्वे प्रयोजकम् । **निरुपादानम्** ● अस्य व्याख्यानंविभावनाप्रकरणे दृष्टव्यम् । अत्रत्यो व्यतिरेकः शङ्करविषयकरतेर्भावस्याङ्गम् । उदाहृतञ्च काव्यप्रकाशकृता ।

राज्ञो मत् ● संभोगसमीहया निवासस्थानयाच्ञाव्याजेन कश्चित्पान्थो नायिकां संभोगं याचते । हे बाले ! मम प्रतिकूलात् नृपात् मे पथिकस्य महद्भयमुपस्थितम् । तद्भयं निवासस्थानकरणात् निवारय इति अभिधया संभोगेच्छाद्योतिका प्रतीतिः । शक्तिमूलया व्यञ्जनया तु विरहिणो मे उद्दीपकत्वेन प्रतिकूलाच् चन्द्रात् महद्भयमुपस्थितम् । तत्संभोगदानविधानेन निवारयेति आद्यार्थप्रतीतिः । व्यञ्जनायां राजपदशक्तिमूलकत्वं दर्शयति—**राजपदाच्च** ● । **भेदापोह** ● भेदस्यापोहो व्यावृत्तिरभेदारोपः एकपदोपस्थितयोः शब्दैकमूलकाऽभेदाध्यवसानात् सादृश्यस्य च भेदे सत्युल्लासात् आह **रूपकं वा** ● तथा

ताया अयोगात्। न चासंसृष्टार्थद्वयबोधने वाक्यभेद इति वाच्यम्। तुल्यकक्षतया द्वयोरसंसृष्टयोरर्थयोः प्रतिपिपादयिषितत्व एव तस्याभ्यु-पगमात्। इह त्वाच्छादकप्रतीतिसमये आच्छाद्याप्रतीतिः, आच्छाद्य-प्रतीतौ चाच्छादकन्यग्भाव एवेति नास्ति तुल्यकक्षता।

काव्यप्रकाशे तु—'शनिरशनिश्च तमुच्चैः' इत्यादिकमुदाहृत्य 'अत्र विरुद्धौ द्वावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते' इत्युक्तम्। तच्च 'द्वौ शन्यशनी उदारानुदारौ चैकं कार्यं हननं भानं च' इति व्याख्यातृभिर्व्याख्यातम्। तत्र शन्यशन्योर्हननक्रियाकर्तृत्वान्वयेऽभ्यु-

---

ध्वन्यमानम्। **अयोगात्** ● रूपके उपमायां वा कवेस्तात्पर्यं नास्ति उपमानोपमेययोर्युग-पत्प्रतीतावेव तयोरुल्लासात्। अत्र तु उपमानोपमेययोर्वाच्यव्यङ्ग्ययोर्युगपत्प्रतीतिर्नास्ति। किञ्च राजपदान् नृपोपस्थितिर्नोपमानिर्वाहायापि तु व्यङ्ग्यचन्द्ररूपार्थस्य प्रतीतेः स्थगनाय। **तस्याभ्यु** ● तस्य वाक्यभेदस्य। अत्र मर्मप्रकाशः—अत्र बाले इति पदेन व्यङ्ग्यस्य वाच्यमानता कारणादयोग्यमेतदित्याह। परं बाले इति पदं न तादृङ्मम मते प्रतिभातीति सहृदयैरवधारणीयम्। अवस्थापरत्वेऽयोग्या, मुग्धतायां व्यङ्ग्यावबोधाशक्तिरिति।

शनिरशनिश्च ● शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्। यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च। चतुर्थोल्लासे शब्दशक्तिमूलकवस्तुध्वनेरुदाहरणम्। पुनस्त्वर्थे। अशनिरित्यत्र नञोऽसुरादाविव न विरोध्यर्थकतया शनिशनिविरोधिनौ तमुच्चै-र्निहतो यस्मै हे नरेन्द्र? त्वं कुप्यसि। यदि शनिर्नृपस्य मित्रं तदा शनिविरोधिनो नृपस्यापि विरुद्धत्वात् कथं नृपकार्यं कुर्वीत। शनिविरोधी स यदि करोति तदा शनिः कथं कुर्वीतेति विरोधः। तद्द्वारैव काव्यप्रकाशोक्तं वस्तु व्यज्यते। विरोधस्वरूपञ्चैक-कर्मकहननं प्रति विरोधिद्वयकर्तृकत्वम्। विरोधिनौ द्वावपि राज्ञोऽनुनयं कर्तुं वाञ्छत इति भावः। तदेवोक्तं तदनुवर्तनार्थमिति प्रकाशशब्देन। काव्यप्रदीपे शनित्वाशनित्वयो-रेकस्मिन् धर्मिण्यवर्णनान्न विरोध इत्युक्तम्। पण्डितराजस्तु यत्र शनिकर्तृकहननकर्मता न शनिविरोधिकर्तृकहननकर्मतेति रीत्याविरोधं संयोजयतीति ध्येयम्, विरोधपरिहारस्तु राज्ञोऽप्रतिहताज्ञत्वं कोषातिशयवत्त्वम् अशनिशब्दस्य वाच्यार्थतां वाऽऽदाय विधेयः। यस्मै त्वं प्रसीदसि स उदारोऽनुदार उदारादन्यश्च भवतीत्यैकस्मिन् धर्मिणि उदारत्वानुदार-त्वयोश्च वर्णनात्समन्वेति विरोधः। तत्परिहारस्तु उदार उद्भट्टः अनुदारोऽनुगतदाराः यस्य स राज्ञैश्वर्यस्य प्रदानात् प्रवासाऽभावात्। नास्त्युदारो यस्मादिति वा दारामनुगतो वा अस्मिन्नंशे विरोधं मूलोक्तव्यङ्ग्याऽव्यञ्जकत्वञ्च काव्यप्रदीपोऽपि मन्यते इति ध्येयम्। **भानञ्च** ●

दारानुदारयोर्भानकर्तृ तत्पदार्थविशेषणयोस्तत्प्रकारविशेषणयोर्वा साक्षाद्भानकर्तृत्वान्वयाभावात्कथमेककार्यकारित्वं संगतं स्यात्। अतो विरुद्धौ द्वावित्यादि प्रथमार्धविषयम्। द्वितीयार्धे तु विरोधाभास एव। कर्तर्यभेदेनान्वयमात्रेण कुरुत इत्यस्योपपत्तिश्चेत्, अस्तु। द्वितीयार्धेऽपि विरुद्धौ द्वावित्यादि वस्तु व्यङ्ग्यम्। परं त्वर्धद्वयेऽपि विरोधाभासालंकारशबलितमेव। शत्रुविरुद्धस्य शत्रुत्वासंभवादेकस्य शन्यशनिकर्तृकहननकर्मत्वायोगेनाद्यार्धे, उदारत्वानुदारत्वयोरेकाधिकरणवृत्तित्वायोगाद्द्वितीयार्धे च विरोधस्य स्फुटत्वात्।

अथ अर्थशक्तिमूलकध्वनिनिरूपणम्

अर्थशक्तिमूलानुरणनं यथा--

'गुञ्जन्ति मञ्जु परितो गत्वा धावन्ति संमुखम्।
आवर्तन्ते निवर्तन्ते सरसीषु मधुव्रताः॥'

भातीत्यस्य पद्यस्थस्यार्थः। **तत्पदार्थ** • भातीत्यस्य कर्ता स इति तस्य विशेषणम् उदारोऽनुदारश्च। अथवा उदारोऽनुदारश्च स भातीत्यन्वयात् तत्पदार्थस्य यः प्रकारस्तद्विशेषणम्। **कारित्वम्** • क्रियया सहान्वये एव कार्यकारित्वं स्यात्। क्रियान्वयश्च नास्ति। **कर्तर्यभे** • भानक्रियाकर्ता यस्तत्राभेदेन परम्परान्वये तात्पर्यमिति वर्णने आग्रहश्चेत्। **शबलितमेव** • मिश्रितमेव। विरुद्धाविति प्रकाशशब्देनाऽपि शबलिते तात्पर्यमुन्नीयते। **शत्रुविरुद्धस्य** • यदा शनिः शत्रुस्तदा तद्विरोधी अशनिर्न शत्रुः। यद्यशनिः शत्रुस्तदा तद्विरोधी शनिर्न शत्रुः। यत्तु विरोधिनोऽप्येकशत्रुसम्भवात् न तादृशहननकर्मत्वयोर्विरोध इत्याहुस्तत्समाधानायाह **स्फुटत्वात्** • प्रथमं शब्दात्प्रतीपत्तेरेव विरोधः स्फुटतया पश्चात् मित्रत्वाऽनुसन्धानेन निवर्ततां नाम तथा च शब्दतो विरोधमादाय विरोधाऽऽभासो युज्यते।

अत्र मर्मप्रकाशः। ननु अशनिरित्यत्र नञो विरोध्यर्थतया विरोधस्य वाच्यतया कथं व्यङ्ग्यतेति चेन्न, तन्मूलकहननकर्मत्वयोर्विरोधस्यावाच्यस्य व्यङ्ग्यत्वे बाधकाऽभावात्। मूले तस्यैव समर्थनायाह इतिदिक्।

अथ अर्थशक्तिमूलकध्वनिनिरूपणम्

अनुरणनं ध्वननम्। स्वतः सम्भविवस्तुना वस्तुनो ध्वनिमुदाहरति **गुञ्जन्ति** • मधुव्रताः समन्ताद् मधुरं गुञ्जन्ति, अन्यत्र गत्वा पुनः सरसी आगत्य धावन्ति।

अत्र मधुव्रतकर्तृकमञ्जुगुञ्जनाद्यैर्वस्तुभिः कविकल्पितत्वविरहेण स्वतः संभविभिरासन्नसरसिजोत्पत्तिध्वननद्वारा शरदागमनैकट्यरूपं वस्तु व्यज्यते। काव्यप्रकाशे तु —'अरससिरोमणि धुत्ताणं अग्गिम—' इत्याद्युदाहृत्य 'ममैवोपभोग्य इति वस्तु व्यज्यते' इत्युक्तम्। तत्र केन वस्तुनेदं वस्तु व्यज्यते। न तावदलसशिरोमणित्वादिकान्तविशेषणैः। तेषां धात्र्यादिवृद्धस्त्रीनिरूपितत्वेन तवैवोपभोग्य इत्यादिरूपेणैव व्यङ्ग्यस्य वक्तव्यतापत्तेः। विशेषणानां कामिनीनिरूपितत्वे तु ममैवेत्यादि व्यङ्ग्याकारः स्यात्। नापि परिफुल्लविलोचनत्वेन। तस्य

आगच्छन्ति निवर्तन्ते च। तटाकेषु एतादृशो भ्रमरव्यापारो व्यञ्जकः। तत्र स्वतः सम्भवितत्वं कविकल्पितत्वाभाववत्त्वमिति दर्शयति कविकल्पि • प्रथमम् आसन्नभाविनी कमलोत्पत्तिस्तदनन्तरं शरदो निकटतरमागमनं व्यज्यते।

अलसशिरोमणिर्धूर्तानामग्रणीः पुत्रि ! धनसमृद्धिमयः। इति जल्पितेन नताङ्गी प्रफुल्लविलोचना जाता। इति सम्पूर्णस्य संस्कृतम्।

काव्यप्रकाशस्य चतुर्थोल्लासे प्राकृतेनोदाहृतम्। अस्य प्रदीपोद्योतमर्मप्रकाशयोरेवं व्याख्यानम्। पतिंवरां प्रति धात्र्याः प्ररोचनोक्तिः पूर्वार्धम्। उत्तरार्धन्तु कविवाक्यम्। हे पुत्रि अयं वरः निरुद्योगिश्रेष्ठो धूर्तश्रेष्ठः प्रचुरधनसमृद्धिः। इति भाषितेन लज्जया नताङ्गी काचित्कन्या हर्षविकसितलोचना जातेत्यर्थः। अत्रालसत्वेन नायिकान्तरागमनं सूच्यते। धूर्तत्वेन रतेष्वनादृतगुणत्वम्, धनिकत्वेन कृपणतयाऽदातृत्वञ्च सूचितं सत् अन्यासामनाकर्षणीयत्वं मदुपभोग्यत्वञ्च व्यनक्ति। तद्विषयकञ्च कुमार्या ज्ञानं प्रफुल्लनयनत्वेन वस्तुना स्वहेतुहर्षव्यञ्जनद्वारेण तत्कारणीभूतं सामजिकेषु व्यज्यते।

केचित्तु अलसत्वेन धनिकत्वेन च अप्रवासित्वम्, धनिकत्वेन नानाधनदातृत्वमपि, नताङ्गीत्वेन नमस्कारः, तेन स्वस्याप्यमानिनीत्वम्, प्रफुल्लनयनत्वेन हर्षः, तेन ममैवोपभोग्यो नाविदग्धाया इति वस्तुव्यञ्जनम् इत्याहुः। इति। काव्यप्रकाशसुधासागरस्तु विवाहप्रसङ्गे यौवनाक्रान्तकुमारीं प्रति उपमात्रा सम्भावितवरगुणवर्णने सा प्रसन्नाऽप्रसन्ना वेति कुमारीप्रसूप्रश्ने काचिदुत्तरयतीति पद्यमिदमवतारयति।

धात्र्यादि • अत एव पुत्रि इति सम्बोधनमुपपद्यते। निरूपितत्वमत्र कथितत्वम्। रूपेणैव • यत एवं विशेषणविशिष्टोऽतस्तवैवोपभोग्य इत्याकारः स्यान्न तु ममघटिताकारः। निरूपितत्वे तु • तुनाऽव्यवच्छिद्यते। नहि कामिनीकथितानि विशेषणानीति

हर्षभावानुभावत्वेन हर्षव्यञ्जकताया एव क्लृप्तत्वात्। मदुपभोग्यत्वं हि हर्षभावस्य विभावः। नह्यनुभावैर्भावो व्यज्यत इति तद्विभावव्यञ्जनं शक्यं वक्तुम्। केवलस्य परिफुल्लविलोचनत्वस्य ममैवेत्यादि-व्यङ्ग्यव्यञ्जने सामर्थ्याभावात्। पुत्रागमनधनप्राप्त्यादिविभावकेऽपि हर्षभावे परिफुल्लविलोचनताया अनैकान्तिकत्वादिति। सत्यम्। 'इय-भणिम्मि' इत्याद्यर्थवशप्रापितालसशिरोमणित्वादि विशेषणश्रवण-विशिष्टप्रफुल्लविलोचनत्वेन मदुपभोग्यत्वलक्षणविभावाभिव्यक्तिद्वारा

भावः। नुभावत्वेन० हर्षादनु प्रफुल्लविलोचनत्वं भवतीति प्रफुल्लविलोचनत्वं हर्ष-जाततया हर्षस्यानुभावो हर्षमेवाभिव्यञ्जयेत् न तु हर्षस्य विभावम्। **विभावः**० विभावयति उत्पादयतीति विभावः कारणम्। हर्षः सुखम्, सुखे चेष्टसाधनताज्ञानं कारणम्, इष्टश्चात्र ममैवोपभोगः। तथा च तत्साधनतायाः नायकनिष्ठाया ज्ञानान्नायिकायाः हर्षो जायते। तेन हर्षकार्यविलोचनविकाशो हर्षं गमयेन्नतु हर्षकारणम्। **न ह्यनु**० अनुभावैर्भावो व्यज्यते एतावता अनुभावैर्भावस्य विभावोऽपि व्यज्यते इति वक्तुं नहि शक्यमिति योजना। कुत्रचित्कथञ्चिद्वक्तुं शक्यत्वेऽपि अत्र वक्तुं न शक्यते। **केवलस्य**० विशिष्टस्याग्रे इष्य-माणत्वात्। सामर्थ्यं व्यभिचाराभावः। व्यभिचारं दर्शयति **पुत्रागमन**० यद्यपि व्यञ्जनायाः व्यञ्जकत्वे व्यभिचाराभावो नावश्यकोऽन्यथाऽनुमानेन गतार्थतापत्तेस्तथापि एतादृशभावानुभावादिस्थलेऽनेनास्यैव व्यङ्ग्यत्वमिति क्लृप्तम् तदनुरोधेनैवैषा शङ्का। अत एव मूलेऽपि क्लृप्तत्वादित्येवोक्तम्। व्यञ्जनोल्लासकतयाऽपि व्यभिचाराऽदर्शनस्यावश्यम-पेक्षितत्वाच्च। अथवा व्यभिचरितस्थले सहृदयहृदयवासनावशादनियता व्यक्तिरुल्लसति अत्रैवं विषये नियताया सा व्यभिचारवशान्नोल्लसेदिति भावः।

इअ भणिम्मि० इति भणितेनेत्युक्त्या पूर्वार्धोक्तानां विशेषणानां श्रवणोत्तरं नताङ्गीत्वं प्रफुल्लविलोचनत्वञ्च जातमिति पद्य एव प्रतिपादितम्। तथा च न केवलस्य प्रफुल्लविलोचनत्वस्य व्यञ्जकत्वं काव्यप्रकाशकृतामभिप्रेतमपितु अलसशिरोमणित्वादि-विशेषणश्रवणविशिष्टस्य। इत्याद्युत्तरार्धस्य योऽर्थो नताङ्गीत्वं प्रफुल्लविलोचनत्वञ्च तदुद्देशेन तत्सम्पादकतयैव अलसशिरोमणित्वादिविशेषणानामुपादानम् इतिशब्दार्थेन प्रापितम् इत्यर्थवशेन प्रापितम्। विशिष्टं व्यञ्जकं नैकपदप्रापितमपि तु कतिपयपदेनेत्यत उक्तमर्थवशप्रापितमिति। व्यङ्ग्यमाह **मदुपभो**० अलसशिरोमणित्वादिविशेषणांशेन हर्षस्य विभावो हर्षकारणीभूतं ममैवोपभोग्योऽयमित्याकारकं ज्ञानमपि व्यज्यते। प्रफुल्लविलोचनत्वां-शेन हर्षो भावो व्यज्यते विशिष्टेन पूर्वव्यङ्ग्य-व्यञ्जनद्वारा हर्षोऽभिव्यज्यते। **विभावाभि**०

हर्षभावोऽभिव्यंज्यते। तत्र द्वारीभूतविभावाभिव्यक्तिमादाय काव्यप्रकाशग्रन्थसंगतिः। न च भावध्वनेः संलक्ष्यक्रमत्वापत्तिः, द्वारस्य संलक्ष्यक्रमत्वादिति वाच्यम्। इष्टापत्तेः। न चापसिद्धान्तः। तस्य प्रागेवोद्धारात्।

'मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः।
तत्त्वं ब्रूहि मदीय जीव भवता भूयो भवे भ्राम्यता
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः॥'

अत्र निष्कृष्टजीवसंबोध्यकपरिदृश्यमानस्थूलदेहेन्द्रियादिचेतनाचेतनसंघातात्मकास्मत्पदबोध्यकर्तृकप्रश्नविषयेणार्थेन वस्तुना तथा-

---

ममैवोपभोग इति ज्ञानस्य विभावस्येत्यर्थः। तादृशविभावरूपज्ञानस्य हर्षभावस्य चाभिव्यक्तिस्तादृशश्रवणविशिष्टप्रफुल्लविलोचनत्वज्ञानवतां सामाजिकानां हृदीति ध्येयम्। मर्मप्रकाशे तु तादृशविलोचनत्वेन वस्तुना स्वहेतुहर्षव्यञ्जनद्वारेण हर्षकारणीभूतं विभावरूपं ज्ञानं सामजिकेषु व्यज्यते इत्युक्तम्। तत्र क्रममात्रे मूलविरोधः। तन्मते हर्षेण विभावो व्यज्यते इत्यागाति हर्षश्च नोपात्तः। उपात्तेनाऽपि तादृशविलोचनत्वेन साक्षाद्विभावो न व्यज्यतेऽपि तु हर्षद्वारा। पण्डितराजमते उपात्तेन साक्षादेव विभावो व्यज्यते इति काव्यप्रकाशस्य साक्षाद्व्यङ्ग्यप्रतिपादनेन सम्यक् सङ्गतिर्न तथा मर्मप्रकाशमते। तादृशविलोचनमात्रस्य व्यभिचारित्वेऽपि विशिष्टस्याव्यभिचारित्वेनासम्भवोऽपि न। इयाँस्तु विशेषः। ममैवोपभोग्य इत्यस्य प्रधानत्वं मर्मप्रकाशमते ग्रन्थकारमते तु प्राचीनमतेन ध्वनित्वमिति विवेकः। प्रागेव • प्रथमामनस्यान्ते ध्वन्यालोकलोचनादिसम्वादेन।

मृद्वीका • हे मदीयजीव त्वया द्राक्षा आस्वादिता, भाषायां मिश्रीति प्रसिद्धा शर्करा भुक्ता। अश् भोजने धातोरशितेति। स्वच्छदुग्धमपि पीतम्। स्वर्गंगतेन त्वया अमृतमप्यपायि। अपिना असकृत् स्वर्नायिकाया रम्भाया अधरो दन्तच्छदः खण्डितः। तस्माद्विविधपदार्थानुभववशात् त्वं ब्रूहि। यत् पुनः संसारे जन्मान्तरे वा भ्रमता भवता कृष्णेति द्वयोरक्षरयोर्माधुर्यस्योद्भवः क्वचिदपि दृष्टः। अत्र प्रष्टव्यता प्रश्नकर्तृत्वञ्चैकस्यैवांशभेदेन। चेतनशरीरेन्द्रियादिसङ्घातो जीवः, तत्र चेतनमात्रं शरीरेन्द्रियादिभ्यो निष्कृष्य पृथक्कृत्य अत्र जीवपदेन व्यपदेश्यं लोकान्तरगामिसम्बोध्यं पृच्छ्यते। चेतनसहितः शरीरेन्द्रियादिसङ्घातः प्रष्टा। तथाभूतेन कविकल्पनामात्राऽप्रसिद्धेन स्वतः सम्भ-

भूतेन भगवन्नाम्नोऽनेकजन्मवृत्तान्ताध्यक्षीकरणकारणयोगसिद्धि-विशेषतादात्म्याध्यवसायरूपातिशयोक्तिर्व्यज्यते । अथ प्रश्नविषय-स्यात्र नानाजन्मगतवृत्तान्तरूपतया तज्ज्ञं प्रत्येव प्रष्टुमौचित्येनान-भिज्ञं स्वजीवं प्रति प्रष्टुमयोग्यत्वात्प्रश्नान्यथानुपपत्त्या आक्षिप्ता वाच्यसिद्ध्यङ्गत्वेन गुणीभूतव्यङ्ग्यरूपा वा प्रागुक्तातिशयोक्तिरिह कथं ध्वनिव्यपदेशहेतुः स्यात् । इत्थमेव च 'तदप्राप्तिमहादुःख–'

विना । भगवन्ना ● अनेकजन्मवृत्तान्तस्याध्यक्षीकरणे कारणं योगसिद्धिविशेषस्तत्ता-दात्म्यस्य भगवन्नामनि अध्यासरूपा अतिशयोक्तिर्व्यज्यते । तथा च स्वतः सम्भवि-वस्तुना अलङ्कारध्वनेरिदमुदाहरणम् । अत्र विषयिणा विषयस्य निगरणमतिशयोक्तिघट-कमत्र तु विषयेणोपात्तेन नाम्ना विषयिण्याः सिद्धेर्निगरणमिति कथमतिशयोक्तिरिति भाषानुवादकर्ता आक्षिपति । अत्र केचित् भगवन्नामनि योगसिद्धितादात्म्यसम्बन्धेऽपि सम्बन्धरूपातिशयोक्तिरिति वर्णयन्ति । अन्ये तु जन्मान्तरवृत्तान्तवर्णने प्रस्तुते योग-सिद्धेरेव विषयत्वं नाम्नश्च विषयित्वमिति ब्रुवते । अपरे च प्राहुः । यन्निगीर्णस्य लक्ष्यत्व-मेव का तस्य व्यङ्ग्यत्वचर्चेति सम्पूर्णातिशयोक्तिर्व्यज्यते नांशेन । तथा च प्रष्टव्यो हे योगसिद्धमदीय जीवेत्यादिरीत्या व्यज्यते । तत्र च नामजपस्य योगसिद्ध्या निगरण-मस्त्येव । इति । अस्य गुणीभूतव्यङ्ग्यत्वं शङ्कते अथ ● अनेकजन्मवृत्तान्तविषयकः प्रश्नः । तादृशवृत्तान्तस्य ज्ञातारं प्रत्येव प्रश्नो युज्यते । तादृशवृत्तान्तज्ञानञ्च योगिसिद्धि-मन्तरा अर्वाग्दृशामशक्यमिति श्रुतप्रश्नान्यथानुपपत्तिरूपया अर्थापत्त्यैव योगसिद्धिता-दात्म्यं भगवन्नामनि कल्प्येतेति न व्यञ्जनाज्ञापितम् । अर्थापत्तिकार्यमपि व्यञ्जनयैव साध्यत इति आलङ्कारिकाणां सिद्धान्तोऽङ्गीक्रियेत तथापि भवतु तद्व्यङ्ग्यं परं न तद्ध्वनि-व्यपदेशहेतुं प्राधान्यमावहति वाच्यस्य प्रश्नस्योपपादकतया गुणीभूतत्वात् तदप्राप्ति● पद्यद्वयं विष्णुपुराणस्य पञ्चमांशे त्रयोदशाध्याये उपलभ्यते काव्यप्रकाशे चतुर्थोल्लासे उदाहृतञ्च । रासक्रीडासमये कृष्णान्तिकं जिगमिषन्त्या बलात्पत्याऽवरूद्धाया वृत्तवर्णन-विषयकम् । अस्य सम्पूर्णं स्वरूपं व्याख्यानञ्च अतिशयोक्तिप्रकरणान्ते टीकायां द्रष्टव्यम् । अत्र श्रीकृष्णाऽप्राप्तिदुःखेन अनेकजन्मोपभोग्यानां सम्पूर्णपापानां विनाशोऽभिहितः । एवं श्रीकृष्णचिन्तनसुखेन अनेकजन्मोपभोग्यपुण्यानाम, तत्र च अप्राप्तिदुःखेन अशेषपापफल-दुःखस्य, एवं चिन्तासुखेन पुण्यपुञ्जसुखस्य निगरणं ध्वन्यत इति काव्यप्रकाशाभिप्रेतम् । तच्च ध्वननं नोपपद्यते व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गतया गुणीभूतत्वात् । तथाहि स्वफलेनैव पापस्य पुण्यस्य च विनाशः फलम् । अप्राप्तिजनकपापस्यैव अप्राप्तिदुःखेन, एवं कृष्ण-

इत्यत्राप्यतिशयोक्तेरर्थापत्तिविषयत्वं गुणीभूतव्यङ्ग्यत्वं वा युक्तम्। अनेकजन्मोपभोग्यदुःखसुखराशिभ्यां तदप्राप्तिमहादुःखतच्चिन्ता-विपुलाह्लादयोरनिगरणेऽशेषपापपुण्यपुञ्जनाशकताया अनुपपत्तेः। तत्तद्दुःखसुखानां स्वस्वफलोपहितपापपुण्यनाशकताया एवान्यत्र क्लृप्तत्वात्। निगरणे तु तयोस्तन्नाशकताबुद्ध्युपपत्तिः। न च वस्तुमात्राभिव्यक्तस्यालंकारस्य न गुणीभूतव्यङ्ग्यत्वम्।

'व्यज्यन्ते वस्तुमात्रेण यदालंकृतयस्तया।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात्॥'

इति सिद्धान्तादिति वाच्यम्। बाधके दृढे सिद्धान्तमात्रेणात्र ध्वनित्वस्य स्थापयितुमशक्यत्वादिति चेत्। सत्यम्। यादृशव्यङ्ग्य-प्रतिपत्तिं विना यत्र वाच्यस्य सर्वथाप्यनुपपत्तिस्तत्र तद्वाच्यसिद्ध्यङ्गम्। यत्र च प्रकारान्तरेणापि तस्योपपत्तिः शक्या कर्तुं न तत्र तथा। अन्यथा हि 'निःशेषच्युतचन्दनं स्तनतटम्' इत्यत्राधमत्वसिद्ध्य-

चिन्ताजनकपुण्यस्यैव चिन्तासुखेन विनाशः सम्भवति न त्वनेकजन्मोपभोग्यफलानां सम्पूर्णपापपुण्यानाम्। तेषाम् अनेकजन्मोपभोग्यैर्दुःखैः सुखैश्चैव विनाशः। स चोपात्तो विनाशोऽप्राप्तिदुःखमनेकजन्मोपभोग्यं दुःखम्, चिन्तासुखमप्यनेकजन्मोपभोग्यं सुखमिति व्यञ्जने एवोपपद्यते। दुःखसुख • यथाक्रमं पापपुण्याभ्यामन्वयि। रनिगरणे • षष्ठ्यन्तार्थतादात्म्यस्य तृतीयान्तार्थेऽध्यासाभावे। स्वस्व • स्वं स्वं फलं तेनोपहितं स्वाव्यवहितप्राक्क्षणवृत्तित्वसम्बन्धेन तत्तत्फलविशिष्टम्। निगरणे • पूर्वोक्तरीत्याऽध्यासे। निगरणन्तु विषयिवाचकपदेन विषयस्य प्रदिपादनमेव परं तेनाऽध्यासः सिद्ध्यति। ध्रुवम् • वाच्योपपादकत्वेऽपि। काव्यवृत्ते • काव्यव्यवहारस्य तदधीनत्वात् मशक्यत्वा • वस्तुवृत्तस्य गुणीभूतत्वस्य वस्तुस्वरूपपरिवर्तनमन्तरा सिद्धान्तमात्रेण निर्वर्तयितुमशक्यत्वादित्यर्थः। गुणीभूतत्वमूलं वाच्यार्थप्रतिपादकत्वमेव नास्ति अन्येन सिद्धत्वादित्याशयेन समाधत्ते यादृशव्यङ्ग्य •। अन्यथा • वाच्यस्य प्रकारान्तरेणोपपत्तावपि वाच्यसिद्ध्यङ्गत्वाङ्गीकारे सर्वसम्मतध्वन्युदाहरणस्यापि विलयः स्यादित्यभिप्रायः। अधमत्व • अधमत्वस्य तत्पद्यस्य दीक्षितव्याख्यानसमालोचनावसरे प्रकारान्तरेण दुःखदातृतयाऽपि उपपत्तेर्दूतिरमणस्य व्यङ्ग्यस्य तदुपपादकत्वाभावाद्

ङ्गत्वाद्दूतीरमणस्य वाच्यसिद्ध्यङ्गगुणीभूतव्यङ्ग्यत्वापत्तेः। प्रकृते च भगवन्नाम्नि योगसिद्धितादात्म्याध्यवसायरूपामतिशयोक्तिं विनापि भगवन्नामोच्चारणमाहात्म्यप्राप्तसार्वज्ञ्यबुद्ध्यापि प्रश्नोपपत्तेर्न गुणीभूतव्यङ्ग्यत्वम्। एतेनासंबन्धे संबन्धरूपातिशयोक्तिर्नामोच्चारणमाहात्म्यप्रभवसार्वज्ञ्याध्यवसायेऽपि स्थितेति स दोषस्तदवस्थ इति परास्तम्। भगवन्नामोच्चारणस्याचिन्त्यमाहात्म्यतायाः पुराणप्रसिद्धत्वात्। अथ वा मास्तु प्रागुक्तमुदाहरणं वस्तुनोऽलंकारव्यञ्जकतायाः, इदं तु भविष्यति—

'न मनागपि राहुरोषशङ्का न कलङ्कानुगमो न पाण्डुभावः।
उपचीयत एव कापि शोभा परितो भामिनि ते मुखस्य नित्यम्॥'

अत्र राहुरोषशङ्काभावादिभिर्निरपेक्षैर्वस्तुभिर्व्यतिरेकालंकारो व्यज्यते।

'नदन्ति मददन्तिनः परिलसन्ति वाजिव्रजाः
पठन्ति विरुदावलीमहितमन्दिरे वन्दिनः।
इदं तदवधि प्रभो यदवधि प्रवृद्धा न ते
युगान्तदहनोपमा नयनकोणशोणद्युतिः॥'

ध्वनित्वं यथा निर्वाहितं तथा प्रकृतेऽपीति भावः। एतेना • प्रकारान्तरेणापि ध्वनित्वनिर्वाहेण। प्रसिद्धत्वात् • तथा च भगवन्नामोच्चारयितुर्न सार्वज्ञ्यासम्बन्धोऽपीतिभावः। तुष्यतु दुर्जन इति न्यायेनाहवा मास्तु • न मनागपि • उपमाने राहुग्रहणशङ्का, कलङ्कसम्बन्धः कृष्णपक्षेऽपचयश्च। उपमेये मुखे तु पूर्वौ दोषौ न स्तः, शोभावृद्धिरेव नापचय इति उपमानापेक्षया उपमेयस्योत्कर्षात्मको व्यतिरेको व्यज्यते। गुणीभूतत्वशङ्कास्पर्शाभावद्योतनाय निरपेक्षैरित्युक्तम्। स्वतः सम्भव्यलङ्कारेण वस्तुनो ध्वनिमुदाहरति नन्दति • मदशब्दे अर्शाद्यच् युक्तादिमध्यमपदस्य लोपो वा। तावत्पर्यन्तं ते शत्रुगृहे मतङ्गजा नदन्ति, अश्वसमूहाः परितः शोभन्ते, स्तुतिपाठकाश्च स्तोत्रावलिं

अत्र युगान्तदहनोपमया यदैव तव कोपोदयस्तदैव रिपूणां संपदो भस्मसाद्भविष्यन्तीति वस्तु व्यज्यमानं राजविषयकरतिभावेऽङ्गमपि वाच्यापेक्षया सुन्दरत्वाद्ध्वनिव्यपदेशहेतुः। न च भस्मीकरणपटुत्वरूपस्य साधारणधर्मस्योपमानिष्पादकत्वाद्व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गत्वं शङ्क्यम्। उपात्तशोणत्वरूपसाधारणधर्मेणापि तन्निष्पत्तेः संभवात्। उपमेयीभूतशोणद्युतिगतस्य भस्मीकरणपटुत्वरूपसाधारणधर्मस्योपमानिष्पादकत्वेऽप्युपमेयव्यङ्ग्यकोपगतभस्मीकरणपटुत्वस्यातथात्वाच्च।

यथा वा—

'निर्भिद्य क्ष्मारुहाणामतिघनमुदरं येषु गोत्रां गतेषु
द्राघिष्ठस्वर्णदण्डभ्रमभृतमनसो हन्त धित्सन्ति पादान्।
यैः संभिन्ने दलाग्रप्रचलहिमकणै र्दाडिमीबीजबुद्ध्या
चञ्चूचाञ्चल्यमञ्चन्ति च शुकशिशवस्तेंऽशवः पान्तु भानोः॥'

पठन्ति, यावद् हे प्रभो ते प्रलयकालानलसदृशी क्रोधेन नयनकोणयोरक्तकान्तिर्न प्रवृद्धा। व्यज्यमानम् • वाच्योपमयेत्यादिः शेषः।

वाच्यापेक्षया • गुणीभूतावित्यादिध्वनिरूपोत्तमोत्तमकाव्यलक्षणे व्यङ्ग्यापेक्षया वाच्यार्थस्यैव गुणीभूतत्वमभिप्रेतं न तु व्यङ्ग्यार्थस्यापि, नवा सर्वथैव ध्वनिव्यपदेशहेतोर्व्यङ्ग्यार्थस्य प्राधान्यमपि तु वाच्यार्थापेक्षयैव। तथा चात्र राजविषयकरत्युपस्कारकस्यापि व्यङ्ग्यवस्तुनो वाच्यार्थापेक्षया प्राधान्याद्ध्वनित्वाक्षतिः। केचन तु प्राचीनमतेनापि समादधते। युगान्तदहन-उपमानं नयनशोणद्युतिरुपमेया। भस्मीकरणपटुत्वं साधारणम्, तच्च व्यङ्ग्यमिति व्यङ्ग्यस्य साधारण्यसम्पत्तिद्वारा वाच्योपमासाधकत्वमेवेत्याशङ्क्ते न च भस्मी • द्विधा समाधत्ते उपात्त • व्यङ्ग्यभस्मीकरणपटुत्वस्यापि कथन्नोपमासम्पादकत्वमित्यत्र विनिगमकाभावमाशङ्क्य वाच्यार्थोपमासम्पादनसमकालं शोणिम्न एवोपस्थितेः, तादृशपटुत्वस्यानुपस्थितेः वाच्योपमाया वाच्योपमेयगतस्य साधारणधर्मस्य प्रयोजकत्वेन उपमाया अपि व्यङ्ग्यत्वापत्त्या व्यङ्ग्योपमेये कोपे वर्तमानस्य व्यङ्ग्यस्य तादृशपटुत्वस्य न कथमपि वाच्योपमानिर्वाहकत्वमित्याशयेन समाधत्ते उपमेयीभूत • सर्वथा प्रधानस्यैव व्यङ्ग्यस्य ध्वनिव्यपदेशहेतुत्वमित्यभ्युपगम्यापि उदाहरति निर्भिद्य • वृक्षाणां गहनं निविडं पल्लवादिमध्यं प्रविश्य पृथिवीमागतेषु

अत्र भ्रान्तिभृतां तिरश्चामप्येवमानन्दं जनयतीति जगदानन्द-हेतुर्भगवानिति व्यज्यते। एवंरूपाया भ्रान्तेर्लोकेऽपि संभवात्स्वतः संभवित्वम्।

'उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण।
मुदितं च सकलललनाचूडामणिशासनेन मदनेन॥'

अत्र समुच्चयेन क्रियायौगपद्यात्मना कार्यकारणपौर्वापर्य-विपर्ययात्मिकातिशयोक्तिः। एषु स्वतः संभवी व्यञ्जकः।

'तदवधि कुशली पुराणशास्त्रस्मृतिशतचारुविचारजो विवेकः।
यदवधि न पदं दधाति चित्ते हरिणकिशोरदृशो दृशोर्विलासः॥'

येषु सूर्यकिरणेषु अतिशयेन दीर्घस्य सुवर्णदण्डस्य भ्रमेण पूर्णमनसो जनाः किरणान् धर्तुं समीहन्ते। यैः किरणैः मिश्रिते पत्राग्रे चञ्चले हिमबिन्दौ दाडिमबीजस्य भ्रमेण शुक-शावकाः रसास्वादौत्सुक्येन चञ्चुपुटं गृहीतुं चालयन्ति। ते प्रसिद्धाः सूर्यस्य किरणाः युष्मान् सर्वान् पान्तु। हन्तेत्याश्चर्ये। द्राघिष्ठेति प्रियस्थिरेत्यादिसूत्रेण निपातनादिना सिद्धम। धा धातोः सन्नन्तादभ्यासलोपे इत्वे धित्सतीति जायते। व्याख्यानमिदं प्रायो मर्मप्रकाशमनुसरति। अत्र **सरला**—पूर्वार्धेनापि शुकशिशूनामेव भ्रमो वर्णितः। शुकशिशवो हि तिर्यक् प्रसृतासु शाखासु स्थित्यभ्यासिनो भवन्ति। पादान् चरणान्, धित्सन्ति स्थापयितुमिच्छन्ति। तिरश्चामपीति मूलस्थापि शब्दस्वारस्यात्, अञ्चन्ति च चपदोक्त्या, शिशुपदेन भ्रान्तिपात्रतासंघटनौचित्येन च तिरश्चामेवानन्दः स्पष्टमुपनिबद्धः कविना। इति व्याख्याति। धाधातोर्ग्रहणे न क्वचित्प्रयोग इत्यादिना नागेशमहोदयस्य वैय्याकरणत्व-मप्युपहसति च। परं सा स्थूलदृक् प्रतीयते। यतो हि कविनिबद्धेद्राधिष्ठस्वर्णपदे दृष्टि-स्तस्या न प्रसरति। जनानां भ्रमाभावे क उपयोगः स्वर्णपदस्य? तिरश्चामिति मूलस्थापि शब्देन अतिरश्चामपि भ्रमं कविः कथन्न समीहेत?। धृ धातोर्यदि ग्रहणे न शक्तिस्तदा धारणे धातोर्वृत्तिरानुशासनिक्येव। बहुशः कविप्रयोगेषु एतादृशेऽर्थे धा धातोः प्रयोगान् मुधैव सापलपति। इत्यलमसदावेशेन। **तिरश्चामपि** • अपिना अतिरश्चाम्। **व्यज्यते** • स्वतः सम्भविना भ्रान्त्यलङ्कारेण वस्तु इत्यादि शेषः। तादृशमेवालङ्कारेण अलङ्कारान्तरध्वनिमुदाहरति **उदितम्** • चन्द्रोदयवर्णनमिदम्। चन्द्रोदयसमकालमेव कार्यभूतयोर्वियोगिवर्गरोदनस्य श्रेष्ठकामिनीशासककाममोदस्य च वर्णनम्। **क्रिया** • उदयरोदनमोदरूपा। **व्यञ्जक** • अग्रे च कविप्रौढोक्तिसिद्ध इति सूचितम्।

तदवधि • यावन्मृगशावकनयनाया नेत्रविलासो हृदये स्थानं न करोति तावदेव

अत्र कामिनीदृग्विलासे चेतसि पदमर्पितवति विवेकस्य नास्ति कुशलमिति वस्तुना दृग्विलासकर्तृकपदार्पणस्य लोकसिद्धत्वाभावात्कविप्रौढोक्तिनिष्पन्नत्वेन सुनिषण्णे तस्मिन्का कुशलचर्चा विवेकस्येति वस्तु व्यज्यते ।

'कस्मै हन्त फलाय सज्जन गुणग्रामार्जने मज्जसि
स्वात्मोपस्करणाय चेन्मम वचः पथ्यं समाकर्णय ।
ये भावा हृदयं हरन्ति नितरां शोभाभरैः संभृता-
स्तैरेवास्य कलेः कलेवरपुषो दैनंदिनं वर्तनम् ॥'

इह यद्यपि रमणीयाः पदार्थाः कलेर्नित्यमदनीया इति वस्तुना प्रौढोक्तिसिद्धेन मतुं कामयसे चेद् गुणप्राप्तौ यतस्वेति वस्तु व्यज्यते, तथापि तस्य पर्यायोक्तात्मनो वाच्यापेक्षया सुन्दरताविरहाद्गुणीभूतत्वमेव । अलंकारा हि वाच्यसौन्दर्यसाराः प्रायशः स्वान्तर्गतं प्रतीयमानं पृष्ठतः कुर्वन्ति ।

बहूनां पुराणशास्त्रादीनां विचाराज्जायमानो विवेकस्तिष्ठति पश्चात्तु विनश्यत्येव । **वस्तुना** • व्यज्यते इत्यस्य कर्तृपदम् । सुनिषण्णे सुस्थिते । निष्पन्नत्वेनेत्यपि पाठ उपलभ्यते । मर्मप्रकाशमनुरुध्य निष्पन्नेनेति धृतम् । प्रत्युदाहरणमपि व्युत्पत्तये प्रदर्शयति **कस्मै हन्त** • हे सज्जन ! हन्तेति खेदे आश्चर्ये वा । कस्मै फलाय गुणसमूहस्य अर्जने आसक्तोऽसि ? । स्वस्य आत्मनो भूषणायेतिच्चेन्न तत्सम्यक्, मार्गप्रदर्शकं मम वचः सम्यग् आकर्णय । शोभाभारैर्युता ये भावा अत्यन्तं मनोहरास्तैरेव पदार्थैरस्य शरीरपोषकस्य भोजनभट्टस्य कलियुगस्य दिनेदिने भवं भोजनविधया जीवनधारणम् । तानेव प्रतिदिनं भुक्त्वा जीवतीत्यर्थः । वक्तव्यस्य भङ्ग्यन्तरेण प्रतिपादनं पर्यायोक्तम् । यद्व्यङ्ग्यं तदेव वक्तव्यं वर्तते परं तथाऽनुक्त्वा व्यञ्जकविधया प्रतिपादनात्पर्यायोक्तप्रायं व्यङ्ग्यम् । **सिद्धेन** • वस्तुनेत्यस्य विशेषणम् । **तथापि** • यद्यपि वस्तुनोर्व्यङ्ग्यव्यञ्जकभावस्तथापि न ध्वनित्वमित्यर्थः । **वाच्यसौन्दर्य** • वाच्यस्य सौन्दर्यमेव सारो मुख्यमुद्देश्यं येषान्ते । **स्वान्तर्गतम्** • अलङ्कारघटकमलङ्कारभूतं वा व्यञ्जनया प्रतिपाद्यमानमपि अलङ्काराः पृष्ठतो वाच्यसमकक्षताम् प्रापयन्तीत्यर्थः । तथा च वाच्यापेक्षया सौन्दर्यविरहः । कवि-

'देवाः के पूर्वदेवा समिति मम नरः सन्ति के वा पुरस्ता-
देवं जल्पन्ति तावत्प्रतिभटपृतनावर्तिनः क्षत्रवीराः ।
यावन्नायाति राजन्नयनविषयतामन्तकत्रासिमूर्तें
मुग्धारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणो भुजंगः ॥'

अत्र कविप्रौढोक्तिसिद्धेन रूपकेण त्वय्युद्यतकरवाले सति का परेषां जीवनस्याशेति वस्तु व्यज्यते ।

'साहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वकषाः ।
तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभूषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः ॥'

अत्र कीर्तेः सानन्दालोकनेन वस्तुना कविकल्पितेन दुग्धभ्रान्तिस्तापसगता व्यज्यते । न च सानन्दालोकनस्यैव चाक्षुषभ्रान्तिरूपतया व्यङ्ग्यव्यञ्जकयोरविवेको व्यङ्ग्यत्वानुपपत्तिश्चेति वाच्यम् । वस्तुन एकत्वेऽपि कीर्तिरूपविशेष्यावृत्तिदुग्धप्रकारकत्वात्मकभ्रान्तित्वेन

प्रौढोक्तिसिद्धेनालङ्काररूपेण रूपकेण वस्तुनो ध्वनिमुदाहरति देवाः के ० रूपके व्याख्यास्यमानमिदम् । रूपकेण ० कृपाणभुजङ्गयोररिप्राणदुग्धयोश्च परम्परितेन ।

कविप्रौढोक्तिसिद्धेन वस्तुना भ्रान्त्यलङ्कारस्य ध्वनिमुदाहरति साहङ्कार ० हे भूमीभूषण । भवतः कीर्तयो भुवनस्य मण्डलं विस्तारं वा भूषयन्ति । कीदृशाः कीर्तयः साभिमाना या सुराणामसुराणाञ्चावलिस्तस्याः करैराकृष्टो भ्रमन् यो मन्दराचलस्तेन क्षुभ्यतः क्षीरनिधेः सुन्दरविचीनां वलयस्य या श्रीस्तस्या गर्वस्य सर्वस्वहारिण्यस्तादृशशोभाविजयिन्य इति यावत् । तथा पिपासया व्याकुलीभवताममन्दानां तापसानां समूहैः स्वच्छतया दुग्धभ्रमेण जलभ्रमेण वा सहर्षमालोकिता । कविकल्पितेन ० कीर्तेरूपाभावाद्वस्तुतो दर्शनाभावेन । ननु व्यञ्जकत्वेनाभिमतं कीर्तेश्चाक्षुषप्रत्यक्षरूपमवलोकनमपि भ्रान्तिरेव कीर्तेश्चाक्षुषप्रत्यक्षासम्भवात् । तथा च भ्रान्तेर्वाच्यतया व्यङ्ग्यत्वस्यैवाभावात् कुतो ध्वनित्वम्, किञ्च व्यञ्जकत्वमपि न सम्भवति भिन्नयोरेव व्यङ्ग्यव्यञ्जकभावादत्र तु उभयोरपि भ्रान्तित्वादित्याशङ्कते न च सानन्द ० भेदप्रदर्शनेन समाधत्ते वस्तु न ०

सानन्दावलोकनत्वेन च व्यङ्ग्यव्यञ्जकविवेकस्य व्यङ्ग्यतावच्छेदकरूपेण वाच्यताया अभावाद्व्यङ्ग्यत्वस्य चोपपत्तेः। तथा चाहुः—'यदेवोच्यते तदेव व्यङ्ग्यम्। यथा तु व्यङ्ग्यं न तथोच्यते' इति।

'दयिते रदनत्विषां मिषादयि तेऽमी विलसन्ति केसराः।
अपि चालकवेषधारिणो मकरन्दस्पृहयालवोऽलयः॥'

अत्र पूर्वोत्तरार्धवर्तिनीभ्यामपह्नुतिभ्यां न त्वं नारी किंतु नलिनीति तृतीयापह्नुतिर्व्यज्यते। एषु प्रौढोक्तिनिष्पन्नो व्यञ्जकः।

यद्यपि शब्दशक्तिमूलकत्वमर्थशक्तिमूलकत्वं चेत्युभयमपि सकलव्यङ्ग्यसाधारणम्, शब्दार्थयोरनुसंधानं विना व्यङ्ग्यस्यैवानुल्लासात्,

---

केनचिद् रूपेण व्यञ्जकता अन्येन च व्यङ्ग्यता। विशेष्यावृत्तिप्रकारकं ज्ञानं भ्रमलक्षणम्। यथा इदमर्थशुक्तिरूपे विशेष्येऽवृत्ति रजतत्वप्रकारकमिदं रजतमिति ज्ञानं भ्रमः। प्रकृते कीर्तौ दुग्धभ्रान्तिर्व्यङ्ग्यत्वेनाभिमता। तत्र कीर्तिरूपे विशेष्येऽवृत्ति दुग्धत्वप्रकारकत्वं धर्मस्तेन रूपेण व्यङ्ग्यता। यद्यपि दुग्धप्रकारकेत्यादि-पाठ उपलभ्यते तथापि दुग्धत्वप्रकारकेत्यादिरेव सम्यक्। तादात्म्येन दुग्धस्य भ्रममादाय वा कथञ्चित्सङ्गमनीयम्। **लोकनत्वेन** ० इदं दुग्धमित्याकारकभ्रमनिष्ठेन कीर्तिविशेष्यकचाक्षुषप्रत्यक्षत्वेन व्यञ्जकता। **रूपेण** ० कीर्तिविशेष्यावृत्ति दुग्धत्वप्रकारकत्वेन। **यथा तु** ० येन रूपेण। अत्र शयिता-सविधे इति पद्यस्थमूलग्रन्थेन विरोधः, मनोरथपदेन मनोरथत्वाकारेणेच्छाया-उक्ततया चुम्बनेच्छात्वेनापि व्यङ्ग्यतायाः खण्डनादित्याशङ्क्येत्थं समाधत्ते—तत्रत्यग्रन्थे 'मनोरथपदेन सामान्याकारेण तादृशेच्छायाः' इत्यस्य स्थाने 'मनोरथपदेन व्यङ्ग्यतावच्छेदकेच्छात्वजातिरूपेण तादृशेच्छायाः' इत्येव पाठस्तेन च न विरोधः। मनोरथत्वेच्छात्वयोर्घटत्वकलशत्ववदेकत्वात्। इह तु भ्रान्तित्वसानन्दावलोकनत्वयोर्व्याप्यव्यापकभावेन भेदात्। इति। एतद्ग्रन्थविरोधास्वरसेन शयितेत्यादिपद्ये समाधानान्तरमवतारितं मर्मप्रकाशेन। मम तु इत्थमपि प्रतिभाति। सामान्याकारेण विशेषालिङ्गितस्यैव भानात्, सामान्याकारेण विशेषस्यापि वाच्यवृत्तिता जायते। अत्र तु अवलोकनत्वं न भ्रान्तेः सामान्यं शब्दादि भ्रान्तावभावात्। नापि भ्रान्तित्वमवलोकनस्य सामान्यं चाक्षुषप्रमायामसम्भवात्। मर्मप्रकाशे तु चाक्षुषभ्रमत्वेन व्याप्यव्यापकभावोऽङ्गीकृतः। तथा च न व्यङ्ग्यस्य वाच्यवृत्तितेति। कविप्रौढोक्तिसिद्धेनालङ्कारेणालङ्कारध्वनिमुदाहरति} **दयिते रदन** ० अस्य व्याख्यानमपह्नुतिप्रकरणे द्रष्टव्यम्।

तथापि परिवृत्त्यसहिष्णूनां शब्दानां प्राचुर्ये तत्प्रयुक्तात्प्राधान्या-त्सत्या अप्यर्थशक्तेरप्राधान्याच्च व्यङ्ग्यस्य शब्दशक्तिमूलकत्वे-नैव व्यपदेशः। परिवृत्तिसहिष्णूनां तु प्राचुर्येऽर्थशक्तेरेव प्राधान्यात् सत्या अपि शब्दशक्तेः प्रधानानुगुणयार्थतया मल्लग्रामादिवत्प्रधाने-नैव व्यपदेशः। यत्र तु काव्ये परिवृत्तिं सहमानानामसहमानानां च शब्दानां नैकजातीयप्राचुर्यम्, अपि तु साम्यमेव। तत्र शब्दार्थो-भयशक्तिमूलकस्य व्यङ्ग्यस्य स्थितिरिति द्व्युत्थो ध्वनिः। न चायं शब्दशक्तिमूलकतयैवार्थशक्तिमूलकतयैव वा व्यपदेष्टुं शक्यः। विनिगमकाभावात्। नापि शब्दशक्तिमूलकार्थशक्तिमूल-कयोः संकरेषु गतार्थयितुम्। व्यङ्ग्यभेद एव संकरस्येष्टेः। इह तु व्यङ्ग्यस्यैक्येन तस्यानुत्थानात्।

उदाहरणम्—

'रम्यहासा रसोल्लासा रसिकालिनिषेविता।
सर्वाङ्गशोभासंभारा पद्मिनी कस्य न प्रिया॥'

सर्वत्रापि व्यञ्जनाया उल्लासे शब्दार्थयोरनुसन्धानस्य साम्येऽपि किमनुरुध्य शब्द-शक्तिमूलकत्वादि व्यवस्थापनमिति विवेचयति यद्यपीत्यतो व्यपदेशान्तेन। **परिवृत्त्य॰** परिवृत्तिः परिवर्तनं पर्यायान्तरोपादानं तदसहिष्णूनां शब्दानाम्। तत्समानार्थकपदान्तरो-पादाने व्यङ्ग्यानुल्लासे तत्पदोपादाने च व्यङ्ग्योल्लासे तादृशशब्देन सह व्यङ्ग्यस्य अन्वयव्यतिरेकानुविधायित्वेन शब्दस्य प्राधान्यम्। **प्राधान्यात्॰** शब्दपरिवर्तनेऽपि तादृशार्थसद्भावे व्यङ्ग्योल्लासाद् व्यङ्ग्योल्लासोऽर्थशक्तेरेवान्वयव्यतिरेकावनुविधत्ते इति तत्रार्थस्यैव प्राधान्यम्। शब्दस्य प्राधान्ये शब्दशक्तिमूलकत्वम् अर्थस्य चार्थशक्ति-मूलकत्वं व्यङ्ग्यस्येति व्यवतिष्ठते। **प्रधानान्॰** प्रधानस्यानुगुण्यमानुकूल्यं प्रधान-सम्पादनीये कार्ये नान्तरीयकतया सहायसम्पादनमिति यावत्। प्रधानेन व्यपदेशा भवन्ती-त्यत्र मल्लग्रामो दृष्टान्तः। मल्लानां ग्रामे केचन दुर्बला अपि भवन्त्येव परं न ते ग्राम-व्यपदेशसम्पादिनो जायन्ते इत्यर्थः। **विनिगमका॰** यत उभयोः साम्यन्तत एकतरेण व्यपदेशे विनिगमकं नास्ति। **स्येष्टेः॰** द्वयोर्व्यङ्ग्ययोरेकत्रावस्थाने संकरो न तु एकस्मिन् काव्ये द्विविधव्यञ्जकसमावेशमात्रेण, प्रायः सर्वत्रैवापत्तेः। **तस्या॰** तस्य सङ्करस्य। यत्र शब्दार्थयोः पूर्वोक्तरीत्या समं प्राधान्यं तादृशं द्व्युत्थं ध्वनिमुदाहरति **रम्यहासाः॰**

अयं च वाक्यगात्रे। पदसमूहश्च वाक्यम्। तेनास्य नानार्था-नानार्थघटितसमासविषयत्वेऽपि न विरोधः। न तु शुद्धैकपदे तस्मिन्नानार्थानानार्थयोरसमावेशात्। अन्ये तु—'अर्थशक्तिमूलकत्वव्यपदेशे नानार्थप्रकाशकशब्दशक्त्युल्लास्यत्वसामान्यशून्यत्वं तन्त्रम्। विषयप्राचुर्यात्। शब्दशक्तिमूलकत्वव्यपदेशे तु नार्थ-शक्त्युल्लास्यत्वसामान्यशून्यत्वं तथा। विषयदौर्लभ्यापत्तेः। नहि नानार्थशब्दमात्रघटितं पद्यं प्रचुरविषयम्। अतः शब्दशक्तिमूल-कत्वेनैवायं शक्यव्यपदेशो ध्वनिः' इत्यप्याहुः। इत्थमभिधामूल-स्त्रिविधोऽपि संक्षेपेण निरूपितो ध्वनिः। निरूपयिष्यते चांशतो यथावसरम्।

लक्षणामूलस्तु निरूप्यते—

तत्र वक्ष्यमाणलक्षणायां लक्षणायां प्रयोजनवत्याः षड्विधायाः सारोपसाध्यवसानाभ्यां गौणीशुद्धाभ्यां च विभक्तानां भेदानां चतुर्णा-

---

रम्यो ह्रासः स्मितं विकाशश्च यस्याः रसेन शृङ्गारादिना जलेन चोल्लासो यस्याः; रसिकानां समूहैः पुष्पगन्धलोलुपैर्भ्रमरैर्वा निषेविता, सर्वेषु अङ्गेषु शोभानां संभारो यस्यास्तादृशी पद्मिनीलक्षणलक्षिता नायिका सरोजिनी च कस्य प्रिया न अपि तु सर्वेषामेव।

अयञ्च ● द्व्युत्थो ध्वनिः। **वाक्यमात्रे** ● मात्रशब्देन पदस्य व्यवच्छेदः। नानार्थकैकार्थकशब्दानां वाक्य एव सम्भवात्। समासः समूहः। अस्य शब्दशक्तिमूलकत्वेन व्यपदेशिनां मतमाह **अन्ये तु** ● अर्थशक्तिमूलकध्वनिव्यवहारे नानार्थकशब्दशक्तिमूलकत्वस्य सर्वथाऽभावः कारणमित्यत्र हेतुमाह **विषयप्रा** ● तादृशाङ्गीकारेऽपि अर्थशक्तिमूलकध्वनिलक्ष्यभूतानां प्रचुराणां सम्भवात्। **दौर्लभ्य** ● तथास्वीकारे शब्दशक्तिमूलकध्वनेरुदाहरणस्य विरलत्वापत्तेः। **नैवायम्** ● अयं रम्यहासेत्यादिश्लोकः।

लक्षणायां ● शक्यसम्बन्धरूपायामित्यर्थः। गौणी द्विविधा सारोपा साध्यवासना च। प्रथमा रूपकम्, द्वितीया अतिशयोक्तिः। द्वितीयापि शुद्धा तथैव द्विविधा। तत्र साहित्यदर्पणादिरीत्या कार्यकारणयोरभेदेन प्रतिपादने निगरणे वा हेत्वलङ्कारः। ग्रन्थे तु हेत्वलङ्कारस्यानिरूपणाद् असम्बन्धे सम्बन्धभेदातिशयोक्तौ तात्पर्यमुन्नेयं प्रतिपादितञ्च तथैवा-

मलंकारात्मना परिणतत्वाद्धौ भेदौ ध्वन्याश्रयतया स्थितौ, जहत्स्वार्था अजहत्स्वार्था चेति। तन्मूलौ च द्वौ ध्वनेः प्रभेदौ।

तयोर्जहत्स्वार्थामूलो यथा—

'कृतं त्वयोन्नतं कृत्यमर्जितं चामलं यशः।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः॥'

इयं कस्यचिदपकारिणं प्रत्युक्तिः। त्वया कृतेऽप्यपकारे परमखेद हेतौ मधुरमेव यो भाषे, न परुषं तस्मिन्नेवंजातीयके मयि पापमाचरतस्तव पापिष्ठत्वं कथं शक्यते वक्तुमिति व्यङ्ग्यम्।

अपरामूलो यथा—

'बधान द्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः।
न कुर्यास्त्वं हेलामितरजनसाधारणधिया
जगन्नाथस्यायं सुरधुनि समुद्धारसमयः॥'

लङ्कारकौस्तुभे। प्रभेदौ॰ एतावेव प्रकाशे उपादानलक्षणलक्षितलक्षणाशब्दाभ्यां प्रतिपादितौ। कृतं त्वयो॰ अत्रोन्नतपदस्याधमे, अमलं यश इत्यस्य मलिनापकीर्तौ, विपरीतार्थे सर्वथा वाच्यार्थत्यागाज्जहत्स्वार्था लक्षणा। कथं शक्यते॰ केन प्रकारेण वक्तुं शक्यते इत्यर्थकस्य कथंपदार्थस्य क्रियायामेवान्वये कथनप्रकारदौर्लभ्यात्कथन एव काठिन्यं प्रतीयतेऽतः कथमित्यस्य पापिष्ठत्ववैलक्षण्यद्योति पापिष्ठत्वविशेषणं कीदृशमित्यर्थ इति मर्मप्रकाशाभिप्रायः प्रतिभाति। सरला तु कथं कीदृशमित्येतावन्मात्रलेखकं मर्मप्रकाशमुपहसत्येव।

अपरा मूलो॰ अजहत्स्वार्थमूलः। बधान॰ पण्डितराजो जगन्नाथो गङ्गां प्रार्थयते। हे गङ्गे अद्यावधि त्वया साधारणपापानामुद्धरणं कृतम्। अहन्त्वनेकपापविशिष्टो नाल्पायासेन तवोद्धरणीयोऽतः सम्यक् सज्जीभाव्यम्। शीघ्रमेव दृढतया रमणीयं परिकरं बधान कटिबद्धा भवेत्यर्थः। कपाले चन्द्रकलां सर्पैः पुनः संयतां कुरु अन्यथा संरम्भेण कदाचन पतेत्। अयं जगन्नाथोऽपि अन्यपापिसमान एव कोऽस्योद्धरणे परिकर इति हेलामुपेक्षां न कुर्याः। हे सुरनदि गङ्गे अयमनिर्वचनीयपापसमुल्लसितस्य जगन्नाथस्य सम्यगुद्धरणस्य समयः। जगन्नाथपदस्यानेकविधपापविशिष्टे लक्षणा। तत्र

अत्र जगन्नाथस्येत्यनेन शक्य एवानेकपापविशिष्टत्वेन लक्ष्यते। पापानां पदान्तरेणानिर्वाच्यत्वं व्यङ्ग्यम्। कुन्ताः प्रविशन्तीत्यादौ तु वाच्यगततैक्ष्ण्यादिलक्ष्यम्। तदेवमेते प्रागुक्ता द्व्यु त्थातिरिक्ताः सर्वेऽपि ध्वनय एकस्मिन्वाक्ये यद्येकपदमात्रगतास्तदा पदध्वनितया व्यपदिश्यन्ते। नानापदगततायां तु वाक्यध्वनितयेति।

अथाऽभिधानिरूपणम्

अथ केयमभिधा नाम। यन्मूलः प्रथमं निरूपितोऽयं ध्वनिप्रपञ्चः उच्यते—

शक्त्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगतो वा संबन्धविशेषोऽभिधा ॥

शक्यार्थस्य जगन्नाथस्य लक्ष्यार्थेऽत्यागादजहत्स्वार्था लक्षणा तदेवाह अत्र जग०। कुन्ताः प्रविश० भोजनप्रकरणे कुन्तनामकास्त्रविशेषाणां प्रवेशस्य तात्पर्यबाधिततया कुन्तपदानां कुन्तधरपुरुषेषु लक्षणा। यथा कुन्तास्तीक्ष्णास्तथा पुरुषाः इति व्यङ्ग्यव्यञ्जनं प्रयोजनम्।

पदवाक्यध्वनी व्यवस्थापयति तदेवमेते ०।

अथाऽभिधानिरूपणम्।

शक्त्याख्यो ० दाहस्य शक्तिर्यादृशी वह्नौ तादृशी अर्थप्रकाशस्य शक्तिः शब्दे, तस्याः शक्तेरेव अभिधानाम्नाऽत्र दर्शने व्यवहारः। परं वह्नौ या शक्तिः सा स्वरूपतो निर्वक्तुं न प्रभूयते कार्याकार्यदर्शनेन कल्प्यते इति मीमांसकैर्मन्यते। नैय्यायिकैस्तु कारणताया एव नामान्तरं शक्तिरिति उच्यते, न तादृशी शक्तिरत्राभिधेतिपदेन व्यपदिश्यते अपितु शब्दार्थयोः सम्बन्धरूपैव। यतो हि शब्दज्ञानानन्तरमर्थस्मरणमर्थज्ञानानन्तरं शब्दस्मरणमिति प्रतिव्यवहारमनुभूयते। तच्च हस्तिहस्तिपकयोरन्यतरदर्शनेन तदन्यस्मरणमिव एकसम्बन्धि ज्ञानमपरसम्बन्धिनं स्मारयतीति विधयैव। तथा च शब्दार्थयोः सम्बन्धस्य आवश्यकतया सम्बन्धरूपैव शक्तिः। स च सम्बन्धः परस्परं शब्दस्य शक्योऽर्थः, अर्थस्य च शक्तं पदमिति परस्परं शक्तिव्यवहारात् सम्बन्धस्य द्विष्ठप्रायत्वाच्च। स च सम्बन्धस्तादात्म्यमिति कतिपयवैय्याकरणाः, वृद्धिरादैच्, रामेति द्व्यक्षरं नाम मानभङ्गः, घट एव शब्दो घट एवार्थः इत्यादिषु अभिधायकाभिधेययोः

सा च पदार्थान्तरमिति केचित्। 'अस्माच्छब्दादयमर्थोऽव-गन्तव्य इत्याकारेश्वरेच्छैवाभिधा। तस्याश्च विषयतया सर्वत्र सत्त्वात्पटादीनामपि घटादिपदवाच्यता स्यात्। अतो व्यक्तिविशेषोप-

---

सामानाधिकरण्यनिर्देशेन तादात्म्यस्य प्रायो व्यवहारात्। तस्य तादात्म्यस्य वस्तुत्वे अग्निशब्दोच्चारणानन्तरं दाहाद्यापत्तेराध्यासिकं तादात्म्यं सम्बन्धस्तस्यैव नामान्तरं वाच्य-वाचकभाव इति ब्रुवते। अन्ये तु तादात्म्यमनङ्गीकुर्वाणा–अपि वाच्यवाचकभावं सम्बन्धं वर्णयन्ति। शक्तिविषये मीमांसकमतमाह **सा च** ● परिमितद्रव्यादिपदार्थेभ्यो भिन्ना इत्यर्थः। यथा वह्नौ दाहानुकूला शक्तिर्न वह्नितद्गुणादिरूपा वह्न्यादीनां समवधानेऽपि प्रतिबन्धकसत्वे दाहानुत्पत्तेः, तथैवार्थप्रकाशिका शब्दनिष्ठा शक्तिर्न शब्दस्वरूपा शब्द-ज्ञानेऽपि अर्थबोधाऽनुदयात्। नापि अर्थस्वरूपा अर्थस्य सर्वदा प्रकाशापत्तेः। अतोऽति-रिक्ता। अत्रारुचिबीजन्तु भवतु नाम वाच्यवाचकभावापरपर्यायरूपः सम्बन्धो नैय्यायि-कानां समवाय इव पदार्थान्तरं परं तादृशसमवाय इवास्य सम्बन्धत्वेन सिद्धिर्नतु वह्नि-निष्ठदाहशक्तिरिव विलक्षणत्वेनेति।

नैय्यायिकास्तु प्रतिबन्धकसमवहितवह्निना दाहवारणं प्रतिबन्धकाभावस्यापि कारणत्वाङ्गीकारेण विदधतो वह्नावप्यतिरिक्तां शक्तिमनङ्गीकुर्वाणाः शब्दार्थसम्बन्ध-मीश्वरेच्छारूपमामनन्ति तदाह **अस्माच्छ** ● पञ्चम्यर्थो जन्यत्वम्, अवगमे बोधोऽर्थः, कर्मार्थकतव्यतो विषयत्वमर्थः। तथा च एतत्पदजन्यबोधविषयोऽर्थो भवतु इत्याकारिकेच्छा फलिता सा चैतत्पदजन्यबोधविषयत्वप्रकारिका एतदर्थविशेष्यिका। तादृशेच्छाविषयत्वं वाच्यत्वम्। तादृशी चेश्वरेच्छा लाघवात्सर्वविषयिणी एका। तथा च विषयतया तादृशेच्छायाः पटेऽपि सत्त्वेन पटादेरपि घटपदवाच्यत्वापत्तिः। तदाह **तस्याश्च** ●। **व्यक्ति-विशेषोप** ● तथा च घटपदजन्यबोधविषयो घटार्थो भवतु इत्याकारकेच्छाविषयत्वं घटादिपदाभिधात्वमिति प्रातिस्विकरूपेणादाय प्रतिपदपदार्थं भिन्नैव शक्तिः। यद्यपि साधारणत ईश्वरेच्छाविषयत्वं सर्वस्मिन् पदार्थे वर्तते परं घटपदजन्यबोधस्य विषयता न सर्वत्र किन्तु घट एव। तथा च घटपदजन्यबोधविषयता यत्र वर्तते तत्रैव वर्तमाना तादृशेच्छीयविषयता घटपदशक्तिः। एवञ्च घटपदजन्यत्वविशिष्टो यो बोधस्तादृशबोधीय-विषयत्वप्रकारता निरूपिता या ईश्वरेच्छीयविशेष्यता नाम्नी विषयता सा घटपदशक्ति-रिति कृतमधिकेन। विस्तरस्तु शक्तिवादटीकादौ द्रष्टव्यः। इच्छाया ऐक्येऽपि प्रतिविषयं भिन्नाया विषयताया भेदात्, एवमीश्वरेच्छीयविषयतात्वेन विषयतायाः सर्वत्र समान-त्वेऽपि घटपदजन्यत्वविशिष्टबोधविषयत्वविशिष्टत्वेन रूपेणेश्वरेच्छीयविषयताया न सर्वत्र समानता। एवञ्चेच्छीयविषयतायाः शक्तित्वाङ्गीकारः। संसर्गविशेषवर्णनेन इच्छायाः

धानेन घटादिपदाभिधात्वं वाच्यम्' इत्यपरे । 'एवमपीश्वरज्ञानादिना विनिगमनाविरहः स्यात् अतः प्रथममतमेव ज्यायः' इत्यपि वदन्ति। यत्तु वृत्तिवार्तिके—'शक्त्या प्रतिपादकत्वमभिधा' इत्यप्पय्यदीक्षितैरुक्तं तत्तुच्छम् । उपपत्तिविरोधात् तथाहि—इह शब्दाज्जायमानायामर्थोपस्थितौ कारणीभूतं यदीयज्ञानं सा शब्दवृत्तिरभिधाख्या । लक्ष्यतया च प्रस्तुतप्रतिपादकत्वस्य प्रतिपत्तिहेतुत्वरूपस्य शब्दगतस्य न ज्ञानं प्रतिपत्तौ कारणम् । अतः कथं नाम प्रतिपादकत्वमभिधेत्युच्यते । अथ प्रतिपादकत्वं प्रतिपत्त्यनुकूलव्यापाररूपं ज्ञातं सदेवोपयुज्यते प्रतिपत्तौ, इत्युच्येत, एवमपि शक्त्येत्यनेन शब्दगतार्थगता वा काचिच्छक्तिः प्रतिपत्तिहेतुतया विवक्षिता । सैवाभिधेति 'अभिधया प्रतिपादकत्वमभिधा' इति लक्षणं पर्यवसन्नम् । तथा च स्फुटैवासंगतिरात्माश्रयश्च । न चाभिधातः शक्तिरतिरिक्ता शब्दजन्यप्रतिपत्तिप्रयोजिका काचिदस्तीत्यत्र प्रमाणमस्ति ।

शक्तित्वाङ्गीकारे अपि न क्षतिर्भवति तदपि काठिन्यभयात्परित्यक्तम् । **ज्ञानादिना** ० इच्छावत् तादृशं ज्ञानं यत्नो वा ईश्वरस्य शक्तिर्भवतु इत्यत्र विनिगमकं नास्ति । आदिना इदम्पदमेतदर्थकं भवतु इति पदविशेष्यकेच्छया सहार्थविशेष्यकेच्छाया अपि विनिगमकाभावो द्रष्टव्यः । वैय्याकारणसिद्धान्तमञ्जूषायां जन्यजनकत्वघटितस्वरूपा शक्तिर्न सम्भवतीति प्रतिपादितं तच्च तत एवावबोध्यम् । **वदन्ति** ० अत्राप्यांशिकाया अरुचेर्बीजं प्रागुक्तमस्ति । **विरोधात्** ० अनुपपन्नत्वादित्यर्थः । तथाहि प्रतिपादकत्वमित्यस्य उपस्थितिरूपायाः प्रतिपत्तेर्हेतुत्वम्, उपस्थित्यनुकूलो व्यापारो वार्थः । तेन शक्त्या प्रतिपत्तिहेतुत्वम्, शक्त्या प्रतिपत्त्यनुकूलो व्यापारो वाऽभिधेत्यर्थः पर्यवस्यति । तथा च प्रथमे दूषणमुपपादयति **तथाहि** ० **यदीयज्ञानम्** ० यस्याः ज्ञानमुपस्थितिकारणं सा वृत्तिरभिधा न तूपस्थितिकारणत्वमेवाभिधा । **कारणम्** ० अभिधाया ज्ञानं प्रतिपत्तौ कारणं न स्वरूपसती अभिधेत्यनुभवसिद्धम् । प्रतिपत्तिहेतुत्वं न प्रतिपत्तौ कारणम् । न घटस्य कारणत्वं घटस्य कारणं भवति अपितु कपालादयः । ज्ञानमपि कारणत्वस्य कार्यार्थिप्रवृत्त्यादौ कारणं न तु तस्मिन् कार्ये एव । ननु अस्तु द्वितीयोऽर्थः शब्दनिष्ठस्यार्थप्रतिपत्तिहेतुत्वस्य ज्ञानं शक्तिज्ञानतया शब्दार्थप्रतिपत्तौ कारणमिति शङ्कते **अथ** ० **एवमपि** ० अर्थद्वयेऽपि अयं दोषः । **स्फुटैवा** ० अभिन्नवस्तुनोर्भेदेन प्रतिपादनात् ।

सेयमभिधा त्रिविधा—केवलसमुदायशक्तिः, केवलावयवशक्तिः, समुदायावयवशक्तिसंकरश्चेति। आद्याया डित्थादिरुदाहरणम्। तत्रावयवशक्तेरभावात्। द्वितीयायास्तु पाचकपाठकादिः। तत्र धातुप्रत्ययशक्तिबोध्ययोरर्थयोरन्वयेनोल्लसितात्पाककर्तृरूपादर्थाद्दतेऽर्थान्तरस्यानवभासेन समुदायशक्तेरभावात्। तृतीयायाः पङ्कजादिः। इह धातूपपदप्रत्ययरूपावयवशक्तिवेद्यानां पङ्कजननकर्तॄणामाकाङ्क्षादिवशादन्वये प्रकाशमानात्पङ्कजनिकर्तृरूपादर्था-

---

लक्ष्यज्ञानस्य लक्षणवाक्यार्थज्ञानाधीनतया अभिधाज्ञानस्य अभिधाज्ञानाधीनत्वापत्त्या आत्माश्रयः। इदमुपलक्षणम्। शब्दादर्थप्रतिपत्तौ अवगत शब्दगतं प्रतिपत्तिहेतुत्वं शब्दस्यार्थेन सह सम्बन्धं विनाऽनुपपन्नं सत् स्वातिरिक्तमेव शब्दार्थसम्बन्धं कल्पयेत् न तु स्वमेव। सर्वत्रानुपपत्तिस्थले अनुपपन्नस्य सिद्धये तदतिरिक्तमेव कल्प्यते। तथा चानुपपन्नस्य हेतुत्वस्य शक्तित्वासंभव इति मञ्जूषोक्तसमाधानस्य। एतेन 'प्रकृत्यादित्वाद् धान्येन धनवानित्यत्रेव तृतीयाया अभेदार्थकत्वेन न कश्चिद् दोष इति चिन्त्यमेतत्सर्वम् इति मर्मप्रकाशोक्तं चिन्तितम्। अत्र मर्मप्रकाशस्योपरि कतिपयानां पराक्रमणमित्थम्—शक्त्यभिधापदार्थयोः सर्वथाऽभिन्नयोः घटो घट इत्यत्रेवान्वयाऽसम्भव इति हिन्द्यनुवादविधाता। तदुपरि तत्प्रकाशः शक्तिरूपः शब्दनिष्ठो बोधहेतुर्व्यापारोऽभिधेत्यन्वयो घटो नीलघट इत्यत्रेव विधेयांशेऽधिकावगाहितया नव्यानां सम्मत इति। तदुपरि सरलेत्थं प्रलपति—वैय्याकरणानां कृते इदम् नागेशसमाधानं भवतु नाम किन्तु यत्र शब्दपुनरुक्तिरेव हेया तत्र साहित्ये अभिधया प्रतिपादकत्वमभिधेत्यस्येदमुत्तरं ग्राम्यतां नावहेत्। इति। तत्रेदं बोध्यम्, सकलपदार्थेषु वर्तमाना सामर्थ्यापरपर्याया शक्तिः, अभिधा च शब्दमात्रनिष्ठा बोधनशक्तिः। नाभिधापदद्वयं दीक्षितेन प्रयुक्तम् अभेदयोग्यता च वर्तत एवेति नागेशाभिप्रायः। लक्षणवाक्यार्थो लक्ष्यशब्दार्थश्च सर्वत्रैव शास्त्रेऽभिन्नो भवति न तेन कुत्रचिच्छास्त्रे पुनरुक्तिर्जायते। पुनरुक्तेर्दोषता च सर्वत्र शास्त्रे शाब्दान्वयानुपपत्त्यैव। इत्यलं प्रसक्तानुप्रसक्ततया। **पाचक०** पच्धातोः पाकोऽर्थः प्रत्ययस्य ण्वुलः कर्तार्थस्तयोरन्वयेन पाककर्ताऽर्थः उल्लसति। एवं पाठक इत्यत्रापि पठ् धातोः पठनमर्थः प्रत्ययस्य कर्तार्थः अन्वयेन पठनकर्तार्थं उल्लसति। अवयवार्थयोरन्वयमात्रं न समुदायार्थः कश्चित्। **धातूप्र०** धातुर्जन् तस्य जनिरुत्पत्तिः, उपपदं पङ्कपदं तस्य प्रसिद्धः पङ्कमर्थः, प्रत्ययः डस्तस्य कर्ताऽर्थः। तेषामन्वयेनोल्लसितोऽवयवार्थः पङ्कजनिकर्ता। न तावन्मात्रमेव पङ्कजशब्दार्थः शैवालकुमुदादिषु स्वर-

दतिरिक्तस्य पङ्कत्वविशिष्टस्य प्रत्ययेन तदर्थं समुदायशक्तेरपि कल्पनादुभयोः संकरः। एता एव त्रिधा रूढि–योग–योगरूढिशब्दैर्व्यपदिश्यन्ते। यत्तु 'अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः। अवयवशक्तिमात्रसापेक्षं पदस्यैकार्थप्रतिपादकत्वं योगः। उभयशक्तिसापेक्षमेकार्थप्रतिपादकत्वं योगरूढिः।' इति वृत्तिवार्तिकेऽप्पयदीक्षितैरुक्तम्, तन्न। अभिधालक्षणोक्तदूषणानामिहापि दुर्वारत्वात्। अथ अश्वगन्धा-अश्वकर्ण-मण्डप-निशान्त-कुवलयादिशब्देषु का शक्तिरिति। अत्र केचित् 'अश्वगन्धारसं पिबेत्' इत्यादिषु विषयविशेषे केवलसमुदायशक्तिः। अश्वगन्धा वाजिशाला, इत्यादिषु तु केवलयोगशक्तिः। समुदायावयवशक्त्योरुभयोरेकशब्दाश्रयत्वे कथं केवलत्वविशेषितयोराद्यद्वितीयभेदयोः प्रसक्तिरिति तु न शङ्क्यम्। समुदायावयवशक्तिवेद्ययोरर्थयोरनन्वयेन तादृशशक्त्योः कैवल्यस्य साम्राज्यात्। इदमेव हि केवलत्वमिह विवक्षितम्, यदन्वयायोग्यार्थबोधकत्वम्। संकरस्त्वन्वययोग्यार्थबोधकयोरेवेति न तस्यात्र

सवाहिप्रयोगप्रसङ्गादतः समुदायार्थः पङ्कत्वेन पद्मम्। तयोश्च परस्परमन्वयो जायते एकपदोपस्थितत्वेनान्तरङ्गत्वात्। अखण्ड ● केवलसमुदायशक्तिरखण्डशक्तिः, एकार्थोऽन्वितार्थः। सापेक्षं ● तत्तच्छक्तिनिरूपकार्थानां परस्परमन्वयेनोल्लसितो य एकार्थस्तस्य प्रतिपादकत्वम्। दूषणानाम् ● असङ्गतिप्रभृतिदोषाणाम्। पङ्कजादिपदेषु यत्रान्वयवार्थेन समुदायार्थोऽन्वयमेति तत्र योगरूढिशक्तिरङ्गीकृता। यत्र तु अवयवार्थसमुदायार्थयोर्न परस्परमन्वयस्तत्र का नाम शक्तिरिति मतभेदेन दर्शयति अथ ● अश्वगन्धाशब्दस्य अश्वकर्णशब्दस्य चौषधिविशेषः समुदायार्थः। अश्वगन्धवती वाजिशाला अश्वश्रोत्रञ्च क्रमशोऽवयवार्थः। मण्डपशब्दस्य वेदिमण्डपादिः समुदायार्थः, ओदननिस्सृतमण्डपानकर्ता योगार्थः। एवं निशाया अन्तस्तैदण्यं गृहविशेषः कमल पृथिवीमण्डलश्चान्ययो रूढियोगार्थौ ज्ञेयौ। अनयोर्न परस्परमन्वयोऽपि तु नानार्थकशब्द इव तात्पर्यवशात्पृथक्पृथगर्थोपस्थापकत्वम्। पङ्कजशब्दस्य तु नैकशक्तिनिरूपकार्थतात्पर्येण प्रयोगः। शक्त्योः स्वस्वनिरूपकार्थयोः परस्परमन्वयः संकरः स चात्र नास्ति। नानार्थकशब्दवच्छक्तिद्वयमिति मतमाह अत्र केचित् ●। अवयवशक्तौ कैवल्यं रूढिशक्त्यसमानाधिकरण्यम्, एवं समुदायशक्तौ कैवल्यमपि योगशक्त्यसमानाधिकरण्यमन्यथा पङ्कजशब्दस्यापि प्रथमद्वितीययोर्गतार्थता-

प्रसक्तिः' इत्याहुः। अन्ये तु—'अश्वकर्णादिशब्देषु नाभिधायाः प्रथमद्वितीययोर्विधयोः प्रसक्तिः। कैवल्यविरहात्। परंतु संकरस्य द्वौ भेदौ—योगरूढिर्यौगिकरूढिश्चेति। तत्राद्यस्योदाहरणं पङ्कजादिशब्दाः। द्वितीयस्य त्वश्वकर्णादयः' इत्याहुः। चतुर्थ एवायमधाया भेदः' इत्यप्यन्ये। 'अखण्डा एव हि शब्दाः। तत्र समासेषु पदानां कृत्तद्धिततिङन्तेषु च प्रकृतिप्रत्ययानां विभागः काल्पनिक एवेति कुत्रास्ति योगशक्तिः। विशिष्टस्य विशिष्टार्थे रूढेरेवाभ्युपगमात्' इत्यपि वदन्ति।

अथ—

'गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान्सगर्वो न।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम्॥'

इत्यादौ रूढ्यर्थमादाय पुनरुक्त्यापत्तिः। न चैवंविधपदद्वयसमभिव्याहारस्थले योगरूढपदस्यावयवार्थमात्रबोधकत्वम्। तावन्मात्रस्यैव प्रकृतोपयोग्यतिशयविशेषसमर्पकत्वात्, इति वाच्यम्।

पत्तेरितिवादिनां मतान्तरमाह **अन्ये तु** • साङ्कर्यं तादृशशक्त्योः सामानाधिकरण्यमात्रम्। द्वौ भेदौ, अन्वितस्वनिरूपकार्थकत्वम् अनन्वितस्वनिरूपकार्थकत्वञ्च। विभागस्य पुरुषायत्तत्वान्मतान्तरमप्याह **चतुर्थ** •। वस्तुतो रुढिरेव शक्तिः समुदायस्य विशिष्टार्थे विवादाभावात् काल्पनिके एव विवादात्। अत एवाखण्डपदस्फोट इति **वैयाकरणवृद्धा** इति मतमुत्थापयन्ति **अखण्डा** • **विशिष्टस्य** • प्रकृतिप्रत्ययविशिष्टस्य समुदायस्य। **वदन्ति** • अनेनास्वरसः सूचितः। अस्तु नाम वस्तुतो बोधकत्वमखण्डानामेव पदानां परं न तावता चमत्कारनिर्वाहः। यथा कल्पितानां पदार्थानां कल्पनाविशेषारूढतया चमत्कारकारिता तथा कल्पितानां प्रकृतिप्रत्ययादीनां तथाभूतानां तदर्थानाञ्च व्यञ्जनावृत्युत्थापकतया चमत्कारित्वेनालङ्कारिकाणां कृते स खण्डपक्ष एव श्रेयान् इति। **गीष्पतिर** • राजानं प्रत्युक्तिः। तव गुणगणान् गदितुं गिरां पतिर्बृहस्पतिः सगर्वो न। तेन गुणगणस्यानन्तत्वं रूपस्यातिवैलक्षण्यञ्च व्यज्यते। **रूढचर्थम्** • योगरूढेन पदेनेति शेषः। रूढपदस्य च आङ्गिरसस्य इन्द्रस्य च वैयर्थ्यमपीत्यपि वोध्यम्। **तावन्मात्रस्य** • योगरूढपदोपस्थापितावयवार्थमात्रस्य। प्रकृतोपयोग्यतिशयो गुणगणगतातिशयो रूपगतातिशयश्च पूर्वं

एवमपि योगरूढपदस्य रूढिशक्तेरनियन्त्रणेन योगार्थमात्रप्रतिपादकताया अनुपपादनादुक्तदोषस्यानुवृत्तेः। एकेनैव पदेन योगार्थरूढ्यर्थयोरुभयोरप्यावश्यकयोरर्थयोरुपस्थितिसंभवेन द्वितीयपदप्रयोगस्य नैरर्थक्यापत्तेश्च, इति चेत्, अत्राहुः—'एकपदोपात्तत्वादन्तरङ्गाकाङ्क्षावशेन प्रथमं योगार्थरूढ्यर्थयोरन्वये सति समुल्लसितस्य विशिष्टार्थस्यैव पदान्तरार्थेनान्वयः। न तु तयोरेव विशकलितयोरिति यद्यपि न्यायसिद्धोऽर्थः, तथापि शक्त्यार्थस्य प्रतिपादने स्यादेवम्। लक्षणायां तु योगरूढेन योगार्थमात्रप्रतिपादनेन न किंचिद्बाधकमस्ति। नापि द्वितीयपदप्रयोगस्य नैरर्थक्यम्। तथा सति रूढ्यर्थबोधनेन गतार्थेन योगरूढशब्देन प्रतिपाद्यमानस्य योगार्थस्य पङ्कजाक्षीत्यादाविव नान्तरीयकत्वशङ्कया कुर्वद्रूपताया अपहतौ प्रकृतोपयोग्यतिशयविशेषव्यञ्जनस्य पाक्षिकत्वापत्तेः। द्वितीयपदयोगे तु तेनैव रूढ्यर्थप्रतिपादने सिद्धे योगरूढपदप्रति-

---

प्रतिपादितः। रूढ्यर्थस्य रूढपदेनोपस्थानाच्च। अनुपपा॰ अत्र अनुपादानादितिपाठोऽशुद्धः, अनुपपादनादिति शुद्धः। ननु प्रकरणप्राप्तं तात्पर्यमेव शक्तेर्नियन्त्रणे हेतुः, अत एव विशिष्टवाचकपदानां सति विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्, तेन कीचका वेणवः स्युर्ये स्वनन्त्यनिलोद्धताः। इति कोशगृहीतशक्तिकस्य 'सकीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्' इति कालिदासपद्ये कीचकपदस्य सामान्यवेणुपरत्वमिति दिनकर्यादौ प्रतिपादितमेव तथा च तुल्ययुक्त्या रूढसमभिहारे योगरूढपदस्य योगार्थमात्रपरत्वादत्रापि न दोष इत्यत आह एकेनैव॰। एकपदो॰ एकपदोपस्थितत्वादेव द्वयोः परस्परान्वयाकाङ्क्षा अन्तरङ्गा। कलितयो॰ पदार्थान्तरेणेतिशेषः। तथा सति॰ द्वितीयरूढपदप्रयोगाभावेन रूढ्यर्थयोगार्थयोरेकेनैव पदेनोपस्थापनीयत्वे अभिधायाः साम्राज्ये प्रयोजनवत्या लक्षणायाः अनुल्लासे व्यञ्जनस्य पाक्षिकत्वापत्त्याऽन्वेति। नान्तरीयकत्व॰ पङ्कजाक्षीत्यादौ पद्मत्वेन पद्मरूपस्य रूढ्यर्थस्यैव प्रकृते उपयोगो न तु पङ्कजनिकर्तुरवयवार्थस्य। किन्तु रूढ्यर्थोपयोगतयापि पङ्कजशब्दस्य प्रयोगो योगार्थप्रतीतिमन्तरा न तत्सम्भवतीति नान्तरीयकतया तस्योपस्थितिर्न तु अतिशयव्यञ्जकतया। प्रयोजनवत्या लक्षणया योगार्थस्योपस्थानन्तु अवश्यमतिशयं व्यञ्जयेत्। कुर्वद्रूपता॰ व्यञ्जनोल्लासयोग्यता। अपहतिर्विनाशः। प्रकृतोप॰ प्रकृतं गुणगणः॰ अद्भुतरूपश्च

पाद्यस्य योगार्थस्य नान्तरीयकत्वशङ्काया अयोगात्कुर्वद्रूपत्वेन व्यङ्ग्यविशेषव्यञ्जकत्वं नियमेन सिद्ध्यति। एषा पदद्वयोपादानस्थले गतिरुक्ता। यत्र तु 'पुष्पधन्वा विजयते जगत्त्वत्करुणावशात्' इत्यादावेकेनैव पदेन रूढ्यर्थोपस्थितिर्योगार्थद्वारा निःसारत्वाद्यवगमश्च भवति, तत्र कविकृतमन्मथरूढपदान्तरानुपादानपूर्वकपुष्पधन्वपदोपादानप्रतिसंधानेन तदीययोगार्थे कुर्वद्रूपताधानं बोध्यम्। तदित्थं द्वितीयपदस्योपादानेऽनुपादाने वा न क्षतिः। एवं जात्यन्तरविशिष्टवाचकपदसमभिव्याहारेऽपि। 'दिशि दिशि जलजानि सन्ति कुमुदानि' इत्यत्रापि जलजादिपदानां लक्षणया योगार्थमात्रबोधकत्वम्। योगशक्त्युल्लासितस्य तु तादृशार्थस्य रूढ्यर्थोपश्लिष्टत्वेन स्वातन्त्र्येण कुमुदादावन्वयायोगात्। इत्थमभिधा निरूपिता।

अनया यः शब्दो यमर्थं बोधयति स तस्य वाचकः। इयं च तस्य शब्दस्य यस्मिन्नर्थेऽस्ति तस्य सोऽर्थोऽभिधेयः। स च जातिगुणक्रियायादृच्छिकात्मकः। तत्र जातिर्गोत्वादिः संस्थानविशेषा-

---

तत्रातिशयज्ञापनमुपयोगस्तदर्थोऽतिशयो लक्ष्यार्थे वाणीपतौ सहस्रनयने च तद्व्यञ्जनम्। अनुवादे सरलायाञ्च राजगतातिशयो वर्णितः स तु परम्परया बोध्यः। लक्षणोल्लसितया व्यञ्जनयाऽतिशयस्य साक्षाल्लक्ष्यार्थगतस्यैव प्रतीतिः सर्वत्र वर्णिता। **अयोगात्** ० योगार्थमात्राभिप्रायेणैव तत्प्रयोगात्। पूर्वत्र शङ्कासत्त्वेऽप्रतीत्या पाक्षिकत्वम् अत्र तु योगार्थमात्रे तात्पर्यनिश्चयेनोक्तशङ्कायाः अभावात् नियमेनेत्याह **नियमेन** ० तथा च योगार्थलक्षणाद्वारा व्यञ्जनोल्लासे रूढिपदप्रयोगस्यापेक्षेति न वैयर्थ्यम्। योगरूढपदेन योगार्थमात्रस्योपस्थित्या नानन्वय इति। यत्र रूढपदप्रयोगाभावेऽपि योगरूढमात्रप्रयोगाद् लक्षणाया अभावेऽपि व्यञ्जनोल्लासस्तादृशं स्थलमाह **पुष्पधन्वा** ० पुष्परूपं निस्सारं धनुर्यस्यैवंभूतः कामः तव दयावशात् जगत् विजयते। अवगमो व्यञ्जनम्। उपादानं प्रयोगः। **जात्यन्तर** ० शक्यताया पद्मत्वजातिस्तदन्यकुमुदत्वादि जातिविशिष्टबोधकानां कुमुदादीनां समभिहारेऽपि रूढ्यर्थस्य बाधाद् योगार्थमात्रे लक्षणा। **रूढ्यर्थोप** ० जलजशब्दादवयवशक्त्योपस्थितस्य जलजनिकर्तुः रूढ्यर्थेन पद्मत्वविशिष्टेनैवान्तरङ्गत्वेनान्वयस्य प्रागुक्तो नियमो न तु पदान्तरार्थेन कुमुदेन। तथा च शक्त्या न तत्र निर्वाहः। **इयम्** ० अभिधा। **स च** अभिधेयश्च।

भिव्यङ्ग्या प्रत्यक्षसिद्धा गवादिपदानामभिधेया। अनुमानसिद्धा च घ्राणरसनत्वादिर्घ्राणरसनादिपदानाम्। आनन्त्याद्व्यभिचाराच्च

संस्थानं सदृशावयवसन्निवेशः। **प्रत्यक्ष** • अयं गौरित्यादिसमानाकाराभिन्नव्यक्तिविषयिणी अनुगतप्रतीतिः प्रत्यक्षम्। व्यक्तिभेदोपलम्भेऽपि प्रतिव्यक्तिः अयं गौरिति समानाकारा प्रतीतिः कमपि एकं विषयं निमित्तमादायैव, विषयैक्यमन्तरा प्रतीतेः समानाकारत्वासम्भवात्, विषयैक्यमन्तरा समानाकारत्वे तु घटेऽपि गौरित्याकारतापत्तेः। तस्मात्समानप्रतीतिषु एको विषयोऽवश्यमभ्युपेयः। स च व्यक्तेरसम्भवात् गवेतरावृत्तिसकलगोवृत्तिर्जातिरेव सम्भवति। जातिन्तु पशवोऽपि प्रत्यक्षमीक्षन्त इत्यनुभवः। **अनुमान** • दृश्यमानानि इन्द्रियाणामधिष्ठानमात्राणि न तु इन्द्रियाणि तेषां स्थानानां सत्त्वेऽपि अन्धवधिरत्वादिप्रतीतेः। अतः इन्द्रियाण्यतीन्द्रियाणि। किन्तु प्रत्यक्षस्वरूपेन्द्रियकार्यदर्शनात् कल्प्यन्ते तानि। तथा च धर्मिणां तेषामनुमानादेव सिद्धेस्तज्जातयो घ्राणरसनत्वादयोऽप्यनुमानसिद्धा एव। **पदानां** • अनन्तरमभिधेय इति शेषः। ननु व्यक्तय एव कथन्नाभिधेया इत्यत आह **आनन्त्य** • अर्थभेदेन शक्तेर्भेदाद् व्यक्तीनां गवामानन्त्याच्छक्तेरानन्त्यापत्तिर्गौरवं दोषः। एकस्यामुपस्थितायामेव व्यक्तौ शक्तिग्रहे व्यक्त्यन्तरस्योपस्थितिः शाब्दबोधश्च शक्तिग्रहरूपस्य कारणस्याभावेऽप्यापद्येतेति कारणाभावे कार्योत्पत्तिरूपव्यतिरेकव्यभिचारः।

ननु सामान्यलक्षणया गोत्वसामान्येन सकलगोव्यक्तीनामलौकिकप्रत्यक्षात् सकलगोव्यक्तिषु शक्तिग्रहः सुलभः। समान्यलक्षणा तु सामान्यं लक्षणं स्वरूपं यस्याः सा। एकस्यां व्यक्तौ इन्द्रियसन्निकर्षादिलौकिकसामग्रीसत्त्वे व्यक्त्या सह तद्गतसामान्यस्यापि सुग्रहे ज्ञातं तत् सामान्यं सकलव्यक्तिषु सन्निकर्षो भूत्वा सकलव्यक्तीनामलौकिकं प्रत्यक्षम्। अन्येषां मते सामान्यज्ञानं प्रत्यासत्तिः। प्रत्यासत्तिः सन्निकर्षः। तस्यायमभिप्रायः। अनेकेषु घटवत्सु समानेषु वर्तमानस्य घटरूपस्य घटवत्त्वस्यापि सामान्यत्वम्, घटेनापि तादृशसामग्रीसत्त्वे सकलघटवतः प्रत्यक्षम्, तच्चानित्यम्, एकस्य घटवतो लौकिकप्रत्यक्षानन्तरं घटस्य विनाशेऽपि तादृशघटवर्तिवर्तमानस्य घटस्य स्मरणेन, सकलघटवतां प्रत्यक्षमनुभवसिद्धम्। तच्च पूर्वमते न सम्भवेत् घटसामान्यस्याभावात्। सामान्यज्ञानस्य प्रत्यासत्तित्वे तु घटरूपसामान्यज्ञानस्य सत्त्वात्तदुपपद्यते। तद्रीत्या चात्र गोत्वज्ञानमेव प्रत्यासत्तिः। नापि व्यक्तिशक्तिग्रहं विना निस्तारः, व्यक्तौ शक्तिग्रहं विना व्यक्तीनामुपस्थितेः, शाब्दबोधस्य वाऽसम्भवापत्तेः। यद्विषयकः शक्तिग्रहस्तद्विषयिणी एवोपस्थितिः, यद्विषयिणी उपस्थितिस्तद्विषयक एव शाब्दबोधः इति शक्तिग्रहोपस्थितिशाब्दबोधानां समानविषयकत्वेन कार्यकारणभावात्। जातिसम्बन्धितामात्रेण व्यक्तिभानोपगमे तु अन्येषामपि

व्यक्तीनामभिधेयताया अकल्पनात्। न च ज्ञातगोत्वादिरूपया गोत्वादिज्ञानरूपया वा प्रत्यासत्त्या प्रत्यक्षेण परिकलितासु सकल-तदीयव्यक्तिष्वभिधायाः कल्पने नास्ति दोष इति वाच्यम्। सामान्यप्रत्यासत्तेर्निराकरणात्। गौरवदोषस्यानुद्धाराच्च। एतेन शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकतयैव हेतुहेतु-मद्भावादगृहीतसंकेतानामपि व्यक्तिविशेषाणामन्वयबोधविषयताया उपपादनेऽपि न निस्तारः। व्यक्तीनां प्रत्ययस्त्वाक्षेपाल्लक्षणया वेत्यन्यदेतत्। अयं च जातिरूपः शब्दार्थप्राणद इत्युच्यते। प्राणं व्यवहारयोग्यतां ददाति संपादयतीति व्युत्पत्तेः। तदुक्तम्—'गौः स्वरूपेण न गौर्नाप्यगौः, गोत्वाभिसंबन्धाद्गौः' इति। अस्यार्थः—

सम्बन्धिनां भानापत्तेः। इत्याशङ्क्य समाधत्ते **न च ज्ञात०**। **निराकरणात्०** प्रमेयत्वेन रूपेण सकलप्रत्यक्षापत्तेः। सर्वज्ञत्वापत्तेः फलाभावाच्च। न च पूर्वोक्तरीत्या कथं व्यक्तीनां शक्तिविहीनानां शाब्दबोधे भानमिति चेत् शक्तिग्रहपदार्थोपस्थितिशाब्द-बोधानां समानविषयकत्वेन कार्यकारणभावस्यैवासिद्धेः। अशक्यस्य संसर्गस्यापि शाब्द-बोधविषयत्वाभ्युपगमात्। किन्तु शक्तिग्रहे य एव प्रकारः स एवोपस्थितौ प्रकारः यश्चोपस्थितौ प्रकारः स एव शाब्दबोधे प्रकार इति शक्तिग्रहोपस्थितिशाब्दबोधानां समानप्रकारकत्वस्यैव नियमो न तु समानविषयकत्वस्य। अशक्यस्यानुपस्थितस्य च विशेष्यस्य संसर्गस्य च शाब्दबोधे भानमित्यदोष इत्येवाभिप्रायोऽग्रिमस्य एतेनेत्यादेर्नि-स्तारान्तस्य। सामान्यलक्षणास्वीकारेऽपि व्यभिचारदोषस्यैवोद्धारो न तु शक्त्यानन्त्य-गौरवस्येत्याह **गौरव०**। **एतेन०** गौरवदोषस्यानुद्धारेण। सङ्केतोऽत्र शक्तिः। **न निस्तार** इत्यादेर्व्यक्तिशक्तिवाद इति शेषः **सरला** अशुद्धा। ननु व्यक्तीनां वृत्त्या उपस्थि-तेरभावात्कथं शाब्दविषयतेत्याशङ्क्य समाधत्ते **व्यक्तीनां०** आक्षेपोऽर्थापत्तिरनुमितिर्वा तद्विषयतां गतायाः अपि व्यक्तेर्वृत्तिप्रयोज्योपस्थितिविषयस्यैव शाब्दे भानमित्यभिप्राय-विशेषेणेदम्। तादृशनियमे मानाभावात् वृत्त्योपस्थितस्यैव शाब्दबोधे भानमिति नियम-सङ्कोचे मानाभावाच्चाह **लक्षणया०** तथा च लक्षणोपस्थितानां व्यक्तीनां शाब्दबोधे भानमिति तात्पर्यम्। युगपद्वृत्तिद्वयविरोधस्तु स्वातन्त्र्येणोपस्थितानां शक्यानां शाब्दस्थले जातीनान्तु व्यक्तिविशेषणतयैवोपस्थितिरिति न दोषः। **शब्दार्थ०** शब्दस्य अर्थस्य च प्राणदः। व्यवहारे शब्दार्थयोरुपयोगात्। **तदुक्तम्०** काव्यप्रकाशकृतोक्तं वाक्यपदीयम्।

गौः सास्नादिमान्धर्मी स्वरूपेण अज्ञातगोत्वकेन धर्मिस्वरूपमात्रेण न गौः। न गोव्यवहारनिर्वाहकः। नाप्यगौः नापि गोभिन्न इति व्यवहारस्य निर्वाहकः। तथा सति दूरादनभिव्यक्तसंस्थानतया गोत्वाग्रहदशायां गवि गौरिति गोभिन्न इति वा व्यवहारः स्यात्। स्वरूपस्याविशेषाद्घटे गौरिति गवि चागौरिति वा व्यवहार स्यादिति भावः। गोत्वाभिसंबन्धाद्गोत्ववत्तया ज्ञानाद्गौर्गोशब्दव्यवहार्य इति।

गुणः शुक्लादिः शुक्लादिपदानामभिधेयः। क्रिया चलनादिश्चलादिशब्दानाम्। शुक्लादीनां चलनादीनां च प्रतिव्यक्तिभेददर्शनादानन्त्यव्यभिचाराभ्यां व्यक्तिशक्तिवाददोषाभ्यामिहापि कलुषीकरणमिति चेत्, तेषां लाघवात्प्रत्यभिज्ञाबलाच्चैकताया अभ्युपगमात्। तदुक्तम्—'गुणक्रियायदृच्छानां वस्तुत एकरूपाणामाश्रयभेदाद्भेद इव लक्ष्यते' इति। तथा च भेदप्रतीतिर्भ्रम एवेति भावः। इदमुपलक्षणम्। उत्पत्तिविनाशप्रतीतिरपि तथैव। वर्णनित्यतावादे गकाराद्युत्पत्तिविनाशप्रतीतेर्भ्रमत्वस्य स्वीकारात्।

गोत्वकेन ● अज्ञातं गोत्वं यस्य गोः। व्यवहारस्य सविकल्पकबुद्ध्यायत्तत्वाद्विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वाद् अन्यथा दण्डाऽज्ञानेऽपि दण्डीति विशिष्टबुद्ध्यापत्तेः। नाप्यगौः ● गोभेदवान् अगौरित्यस्यार्थः। भेदश्चाभावः। अभावज्ञाने प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानं कारणमन्यथा घटम्[illegible]नतोऽपि घटो नास्तीति प्रतीत्यापत्तेः। गोभेदस्य प्रतियोगी गौः प्रतियोगिता गवि प्रति[illegible]तावच्छेदकं गोत्वं तत्प्रकारकं ज्ञानं गौरित्याकारकम्। तथासति ● गोत्वाऽज्ञानेऽपि ग[illegible]र्व्यवहाराङ्गीकारे। अनभिव्यक्तेत्यादि तृतीयान्तार्थो गोत्वाऽग्रहे हेतुः, गोत्वजातेरभिव्यक्तं संस्थानं विना न ग्रहः। संस्थानं शरीरावयवसन्निवेशः। स्वरूपस्या- ● गोत्वं विना विशेष्यांशमात्रस्य। घटस्यापि घटत्वं विना स्वरूपाविशेषात्। गोत्ववत्तया ● गोत्वेन रूपेण। मतुबन्तात्त्वत्तलाभ्यां मतुप्प्रकृत्यर्थमात्रपर्यवसानात्। गुणः ● न तु गुणी गुणिनामानन्त्यात्। प्रत्यभिज्ञा ● तदेव शुक्लं रूपमत्रापि शाट्यामित्याद्याकारा। सा च प्रतीतिर्व्यक्त्यंशस्यापि अभेदमवगाहते। व्यक्त्यंशाभेदाग्रहाग्रहे साजत्यावलम्बने प्रमाणाभावात्। शुक्लादीनामैक्यमते तेषु जातेरनभ्युपगमाच्च। तदुक्तं ● काव्यप्रकाशकृता। तथैव ● भ्रम एव। स्वीकारात् ● गकार

याहच्छिकस्तुवक्त्रा स्वेच्छया डित्थादिशब्दानां प्रवृत्तिनिमित्तत्वे संनिवेशितो धर्मः। स च 'परम्परया व्यक्तिगतश्चरमवर्णाभिव्यङ्ग्योऽखण्डः स्फोटः' इत्येके। 'आनुपूर्व्यवच्छिन्नो वर्णसमुदायः' इत्यपरे। 'केवला व्यक्तिरेव' इतीतरे। तत्राद्यमतद्वये विशेषणज्ञानाद्विशिष्टप्रत्ययः। तृतीयमते च निर्विकल्पकात्मकः प्रत्ययः। तदित्थं चतुष्टयी शब्दानां प्रवृत्तिरिति दर्शनं व्यवस्थितम्। सर्वेषां शब्दानां जातिरेवार्थः। गुणक्रियाशब्दानां गुणक्रियागतायाः, यदृच्छाशब्दानां च बालवृद्धशुकाद्युदीरिततत्तच्छब्दवृत्तेस्तत्तत्समयभिन्नार्थवृत्तेर्वा जातेरेवाभिधेयतासंभवात्। इति जातिशक्तिदर्शनम्।

उत्पन्न इति प्रतीतेः सोऽयं गकार इति प्रत्यभिज्ञावशाद्यथा भ्रमत्वं तथा। तदेवेदं रक्तं रूपमिति प्रत्यभिज्ञावशात् श्वेताद्युत्पत्तेर्भ्रमत्वसिद्ध्या न तथा गुणादीनां भेदस्य सिद्धिः। **याहच्छिकस्तु** ० धर्म इत्यनेनान्वेति। प्रवृत्तिनिमित्तमत्र वाच्यत्वम्। **स्फोटः** ० स्फुटत्यस्मादित्यर्थे वाचकपरः। वर्णानामाशुविनाशितया पदवाक्यज्ञानासम्भवात् पदात्मकस्य वर्णसमूहस्य न वाचकत्वमपि तु पूर्ववर्णानुभवजन्यसंस्कारेण सह चरमवर्णेन व्यज्यमान आन्तरिकः स्फोटो वाचक इति कैय्यटः तस्य। वर्णातिरिक्तो वाह्य एव श्रूयमाण इति शब्दकौस्तुभम्। स च वोध्यत्वेन अर्थव्यक्तिगतो डित्थादिपदानामभिधेयः। स्फोटानङ्गीकर्तृणां नैय्यायिकादीनां मतेनाह **आनुपूर्व्य** ० आनुपूर्व्या वर्णानामव्यवहितपूर्वापरिभावरूपया विशिष्ट इत्यर्थः। यया सामग्र्या स्फोटस्याभिव्यक्तिस्तयैव पदप्रत्यक्षमिति तेषां दर्शनम्। **व्यक्तिरेव** ० अर्थव्यक्तिरेव। शब्दोपरक्तग्रहणेऽग्रिमं निर्विकल्पकवर्णनं न सङ्गच्छेत्। **दर्शनं** ० महाभाष्योक्तमित्यर्थः। ल अन्धत्वबधिरत्वभिन्नत्वादीनामसंग्रहोऽस्मिन् पक्षे, नव्यनैय्यायिकाद्युक्तो न समीचीनस्तेषां जातिवाचकतयैव संग्रहात्। अनुगतप्रतीत्या शक्यतावच्छेदकतया च जातिसिद्धेः, साङ्कर्यं न जातिबाधकम् अपितु जात्यन्तरस्य कल्पकमिति हि तेषां दर्शनम्। मीमांसासम्मतजात्यधिकरणन्यायेनाह **सर्वेषाम्** ० गुणक्रियाणामस्मिन् मते वस्तुतो भेदोऽस्त एव तत्र जातिः। डित्थादिशब्दानां शब्दगता अर्थगता वा जातिर्वाच्या। जातिश्च व्यक्तिभेदे सम्भवेदिति वालाद्युच्चरितत्वेन शब्दभेदः, तत्तत्समयभेदेन अर्थभेद इत्याह **बालवृद्ध** ० व्यवस्थितमिति कथनेन महाभाष्यमते स्वरस इति बहवः। इत्यभिधानिरूपणम्।

अथ लक्षणानिरूपणम्

अथ केयं लक्षणा, यन्मूलश्चरमं निरूपितो ध्वनिः। उच्यते—

शक्यसंबन्धो लक्षणा ॥

अथ लक्षणानिरूपणम्।

यन्मूलश्चरमं ० चरमं निरूपणविशेषणम्। शक्यः शक्तिविषयः स च बोधविषयत्वेनेच्छाशक्तिपक्षे वाच्यवाचकभावरूपसम्बन्धस्वरूपपदार्थान्तरशक्तिपक्षे तु शक्तिप्रतियोगिशक्यम्। अर्थनिरूपिता शक्तिः पदे इत्यादिव्यवहारात् शक्त्याश्रयः शक्तं पदमुच्यते वाचकमिति यावत्। अर्थश्च शक्यो वाच्यश्चोच्यते। शक्यस्य सम्बन्धोऽनेकधा। यथा गङ्गायां घोषः इत्यादौ गङ्गापदशक्यस्य प्रवाहस्य सम्बन्धः सामीप्यं तीरे, तथा च तीरवृत्तेः प्रवाहसम्बन्धस्य लक्षणा नाम। लक्षकं लक्षणाश्रयो गङ्गापदम्। प्रवाहसम्बन्धानुयोगि तीरं लक्ष्यमिति व्यवह्रियते। तस्याः लक्षणायाः ज्ञानं प्रवाहसम्बन्धितीरमित्याकारकं लक्ष्यार्थस्य तीरस्योपस्थितौ कारणं तादृशोपस्थितिद्वारा च गङ्गापदात् तीरविषयकशाब्दबोधे कारणम्। अत्रत्या सरला तु न वस्तुतो ग्रन्थार्थमवगच्छतीति अवधेयम्। तत्र मुख्यार्थबाधः, मतभेदेन अन्वयानुपपत्तिः, तात्पर्यानुपपत्तिश्च कारणमिति ग्रन्थान्तरेषु उपलभ्यते वस्तुतस्त्रयाणां न पार्थक्यमपि तु एकरूपेणैव कारणत्वमिति पण्डितराजस्य व्याख्यानकौशलम्। तथाहि गङ्गायां घोष इत्यादौ न प्रवाहस्य जगति बाधोऽपि तु घोषेण सह प्रवाहस्य अन्वयरूपः सम्बन्धो बाधितस्तथा च अन्वयानुपपत्तिरनेनैव संगता क्रोडीकृता वा। एवं प्रवाहस्याऽन्वयोऽपि मत्स्यादिना वर्तते एवेति तस्यापि न वस्तुतो बाधः किन्तु तात्पर्यविषयो यो घोषेण सहान्वयः स बाधितस्तथा च तात्पर्याऽनुपपत्तिरपि तत्रैवान्तरभवत्। तथा च अन्वयाऽनुपपत्तिस्तात्पर्याऽनुपपत्तिर्वा लक्षणा बीजमिति कलहस्य न अवसरः। अत्राऽन्वयपदेन सम्बन्धो ग्राह्यः। स च विशेष्यविशेषणयोस्तत्तदाकाङ्क्षावशेनानेकधा। तादृशस्य सम्बन्धस्य विशेषणं प्रतियोगी विशेष्यश्चानुयोगीति व्यवह्रियते। यथा गङ्गायां घोष इत्यादौ आधाराधेयभावस्य प्रतियोगी गङ्गापदार्थः, अनुयोगित्वन्तु घोषस्य। तथा च तात्पर्यविषयान्वये मुख्यार्थस्य प्रतियोगिकत्वस्याभावः कारणमित्यायाति। मुख्यार्थः प्रतियोगी यस्य स तादृशोऽन्वयस्तत्त्वमन्वये। अथवा तात्पर्यविषयपदार्थान्तरे मुख्यार्थप्रतियोगिकान्वयानुयोगित्वाभावः। मुख्यार्थान्वयानुपपत्तेरिति वक्ष्यमाणस्यैव एवार्थः। तत्र च काकेभ्यो दधि रक्ष्यतामित्यत्र लक्षणानुपपत्तिर्दोषो वक्ष्यत एव। तत्र दधिरक्षायां काकप्रतियोगिकान्वयानुयोगित्वस्य काकसम्बन्धस्य वा बाधाभावात्। काकस्य दधिरक्षायां काकत्वेन अन्वयो नास्ति अस्ति तु दध्युपघातकत्वेन अर्थाद् दधिरक्षासम्बन्धस्य प्रतियोगिता काके वर्तते परं प्रतियोगितायाः अवच्छेदकं न काकत्वं अपितु

तस्याश्चार्थोपस्थापकत्वे मुख्यार्थतावच्छेदके तात्पर्यविषयान्वयितावच्छेदकताया अभावो न तन्त्रम्। शक्यतावच्छेदकरूपेण लक्ष्यभानस्य स्वीकारात्। किं तु तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थप्रतियोगिकताया अभावो रूढिप्रयोजनयोरन्यतरच्च तन्त्रम्। मुख्यार्थान्वयानुपपत्तेः तन्त्रत्वे तु 'काकेभ्यो दधि रक्ष्यताम्' इत्यत्र लक्षणोत्थानं न स्यात्। 'गङ्गायां घोषः' इत्यत्र सामीप्यम्,

---

काकविडालादिसाधारणं दध्युपघातकत्वम् अतो दधिरक्षासम्बन्धस्य प्रतियोगितावच्छेदकता मुख्यार्थतावच्छेदके काकत्वे नाऽस्ति अतो मुख्यार्थतावच्छेदके तात्पर्यविषयान्वयप्रतियोगितावच्छेदकतायाः ज्ञानं लक्षणाजन्यार्थोपस्थितौ कारणमिति कल्पिते काकेभ्यो दधि रक्ष्यतामित्यत्र न लक्षणानुपपत्तिः। यद्यप्यन्वयिपदेन प्रतियोग्यनुयोगिनोरुभयोरपि ग्रहणन्तथापि अग्रे प्रतियोगिकतापरतया मूले वर्णनेन तात्पर्यविषयान्वयितापदेन अन्वयप्रतियोगिताया एव ग्रहणम्। अस्मिन् कार्यकारणभावे दूषणमाह शक्यतावच्छेद ० गङ्गायां घोष इत्यादौ शक्यतावच्छेदकप्रवाहत्वेन रूपेण लक्ष्यस्य तीरस्य भानमिति आलङ्कारिकाणां सिद्धान्तः। प्रवाहत्वव्याप्यस्य शैत्यपावनत्वस्य तीरे प्रवाहत्वप्रत्ययमन्तरा तीरे प्रतीतिर्नोपपद्यते। तत्र लक्षणा न स्यात्। यतो हि तीरनिष्ठाया घोषान्वयिताया अवच्छेदकता प्रवाहत्वे वर्तते एव न तु तदाभावः। सिद्धान्तभूतं कार्यकारणभावमाह किन्तु ० तन्त्रं कारणम्। अत्रत्यलिखितप्रतियोगिपदेन संसर्गस्यैव प्रतियोगी ग्राह्यः। अभावस्य प्रतियोगी मूले न लिखित इति ध्येयम्। सम्बन्धरूपस्यान्वयस्य कश्चित्प्रतियोगी भवतीत्यवोचमेव। मुख्यार्थः प्रवाहः प्रतियोगी यस्यैवंभूतोऽन्वयो मत्स्यान्वयो न तु घोषान्वयः, घोषान्वयस्तु तटप्रतियोगिकः। मुख्यार्थतावच्छेदकरूपेण प्रवाहत्वेन प्रवाहप्रतियोगिकता मत्स्यान्वये न तु तात्पर्यविषये घोषान्वये तत्र तादृशप्रतियोगिकताया अभावान्न लक्षणानुपपत्तिः। निष्कर्षस्तु लक्षणाजन्योपस्थितिं प्रति तात्पर्यविषयान्वये मुख्यार्थतावच्छेदकावच्छिन्नमुख्यार्थनिष्ठप्रतियोगितानिरूपकत्वाभावः कारणम्, काकेभ्यो दधीत्यादौ तात्पर्यविषयोऽन्वयो रक्षायां बिडालप्रतियोगिकस्तत्र काकप्रतियोगिताकत्वाभावः। कचतस्त्रस्यतीत्यादौ त्रासे राहुत्वविशिष्टराहुप्रतियोगिकस्तत्र कचप्रतियोगिकत्वाभावः। कचत्वेन राहुत्वविशिष्टस्य बोधात् त्रासोपपत्तिः। प्रतियोगिताकत्वस्यैव प्रतियोगितानिरूपकत्वमित्यनेन विवरणं भवति न तु पदार्थान्तरम्। ज्ञानद्वारा कारणत्वं सूचयितुं कारणमित्यनुक्त्वा तन्त्रमित्युक्तम्। रूढित्वज्ञानं प्रयोजनज्ञानञ्चान्यतरदपि कारणम्। शक्यसम्बन्धानां

'मुखचन्द्रः' इत्यादौ सादृश्यं व्यतिरेकलक्षणायां विरोधः। 'आयुर्घृतम्' इत्यादौ कारणत्वादयश्च सम्बन्धा यथायोगं लक्षणाशरीराणि।

इयं तावद्द्विविधा, निरूढा प्रयोजनवती च। तत्रापि द्वितीया द्विविधा, गौणी शुद्धा च। तत्राद्या सारोपा साध्यवसाना चेति द्विविधा। अन्त्या चतुर्विधा—जहत्स्वार्था, अजहत्स्वार्था, सारोपा, साध्यवसाना चेति प्रयोजनवती षड्विधा संपद्यते। तत्र निरूढलक्षणाया अनुकूलप्रतिकूलानुलोमप्रतिलोमलावण्यादय उदाहरणम् नीलादयश्च धर्मस्य 'अयमनुकूलः' इत्यादौ मुख्यार्थस्य कूलानुगतत्वादेर्बाधात्। अनादिप्रयोगप्रवाहवशादेकवस्तुप्रवणत्वात्मना कूलानुगतादिरूपशक्यस्य सादृश्येन संबन्धेनानुकूलादिशब्दैरनुगुणादयो लक्ष्यन्ते। एवं नीलादिपदानां लाघवाद्गुणगतजातेरेव

दिक्प्रदर्शनं कुरुते लक्षणाशरीराणि ● अत्र मर्मप्रकाशः। व्यतिरेकलक्षणाया उदाहरणम्—"उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवतापरम्। विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम्"। प्राचीनमते शक्यसम्बन्धः प्रकाशे लक्ष्यश्च विशेष्यो यस्मिन् तथाभूतं गङ्गासमीपं तीरमित्याकारकं शाब्दबोधं प्रति लक्षणाज्ञानं कारणम्। तदनन्तरन्तु व्यञ्जनया गङ्गात्वेन तीरबोधः। इत्याह। तत्रापि द्वितीया ● प्रयोजनवती तत्राद्या ● प्रयोजनवती गौणी। अन्त्या ● प्रयोजनवती शुद्धा। लक्ष्यार्थस्यान्वयप्रसङ्गे स्वार्थं मुख्यार्थं जहाति सा लक्षणा जहत्स्वार्था। लक्ष्यार्थान्वयिनि पदार्थान्तरे शक्यार्थः केनापि रूपेण नान्वियादिति यावत्। यथा गङ्गायां घोष इत्यत्र तीरान्वयिनि घोषे प्रवाहस्य केनापि रूपेण नान्वयः। तद्विपरीता च अजहत्स्वार्था स्वार्थं न जहातीत्यर्थिका। अस्याः उदाहरणे लक्ष्यार्थान्वयिनि मुख्यार्थस्यापि लक्ष्यतावच्छेदकरूपेणान्वयो जायते यथा काकेभ्यो दधि रक्ष्यतामित्यत्र दधिरक्षायां काकस्यापि दध्युपघातकत्वेनान्वयो भवत्येव। कूलानुगतत्वा ● कूलसम्बन्धत्वम्। अनेन मुख्यार्थबाधो दर्शितः। लक्षणागतं निरूढत्वं दर्शयति अनादि ● तथा च प्रयोजनं विनैव अनादिप्रयोगप्रवाहवशत्वं रूढित्वं जातम्। अन्यत्र ग्रन्थे अनादितात्पर्यमूलकत्वं रूढित्वमिति वर्ण्यते कूलानुगतो मुख्यार्थः, अनुगुणो लक्ष्यार्थः, तयोः सादृश्यं सम्बन्धः। सादृश्यप्रयोजकं साधारणधर्ममाह एकवस्तु● प्रवणत्वमधीनत्वेऽप्यायाति। सक्तत्वमिति मर्मप्रकाशः। प्रवणः क्रमनिम्नोर्व्यां प्रह्वेना तु चतुष्पथे इत्यमरकोषः। गौणीमुक्त्वा शुद्धामुदाहरति एवं नीला ● गुणे शुक्लादयः पुंसि

शक्यतावच्छेदकतया गुणद्रव्ययोः 'नीलो घटः' इत्यादौ सामानाधिकरण्येनान्वयस्यानुपपत्तेः। समवायात्मना गुणरूपशक्यस्य संबन्धेन नीलादिशब्दैर्गुणिनो लक्ष्यन्ते। तत्राद्यवर्गे सादृश्यसंबन्धेन द्वितीयवर्गे च तदितरसंबन्धेन लक्षणायाः प्रवृत्तेः निरूढायामपि गौणीत्वशुद्धत्वाभ्यां द्वैविध्यमामनन्ति। विषयविषयिणोः पृथङ्निर्दिष्टयोरभेद आरोपः। अपृथङ्निर्दिष्टे विषये विषय्यभेदोऽध्यवसानम्। तत्राद्येन सहिता सारोपा। द्वितीयेन तु साध्यवसाना। उदाहरणानि च 'मुखं चन्द्रः' इत्यादीनि गौण्या सारोपायाः 'पुरेऽस्मिन्सौधशिखरे चन्द्रराजी विराजते' इत्यादीनि च तस्याः साध्यवसानायाः। अत्राद्यायां विषयिप्रतिपादकैश्चन्द्रादिशब्दैर्लक्षणयोपस्थापितानां चन्द्रादिसदृशानामभेदसंसर्गेण मुखादिशब्दोपस्थापितैर्मुखत्वादिविशिष्टैर्मुखादिभि-

---

गुणिलिङ्गास्तु तद्वति इति कोषो गुणे गुणिनि द्रव्ये च शक्ति मनुते तत्र गुणिनि शक्त्यङ्गीकारे गुणित्वं गुणस्वरूपमनन्तं शक्यतावच्छेदकं प्रसज्येत। शक्यतावच्छेदकभेदे चान्ततः शक्तिभेदः आपतति शक्तिभेदे च नानार्थकतेत्यनर्थपरम्परा। गुणे शक्तौ तु सकलगुणवृत्तिजातिस्वरूपं मुक्तावल्यादौ साधितं गुणत्वमेकं शक्यतावच्छेदकमिति न दोषः। एवं रूपत्वशुक्लत्वमधुरत्वादयोऽपि। गुणशक्तत्वे च अभेदसम्बन्धरूपं सामानाधिकरण्यं द्रव्ये नोपपद्यत इति मुख्यार्थबाधः। गुणिना द्रव्येण लक्ष्येण शक्यार्थगुणस्य समवायरूपः सम्बन्धो लक्षणा। **तत्राद्यवर्गे** ० अनुकूलादौ। सादृश्यरूपशक्यार्थसम्बन्धो गौणी लक्षणा। शक्यार्थस्य सादृश्येतरसम्बन्धरूपा लक्षणा शुद्धेति अनेन दर्शितम्। तृतीया च लक्षणया सहाभेदार्थिका। **द्वितीयवर्गे** ० नीलादिशब्दे। **पृथङ्नि** ० गौर्वाहीकः। वाहिको विषयो गौर्विषयिणी। वाहीके गोरारोपात्। प्रसिद्धेऽपि वाहीकशब्दे बहुधा विप्रतिपत्तिर्विदुषां दृश्यते। वाहीकशब्देन पञ्चनददेशीयः, वहिश्शब्दादीकक्प्रत्ययेन निष्पन्नः सदाचारादिवहिष्कृतार्थकः गोश्चारको वा ओष्ठ्यदन्त्योष्ठ्योः संकीर्णताः। **अपृथङ्** ० यथा गौरयमित्यादिना वाहीकत्वेनानुपात्तेर्वाहीके गोर्विषयिण्या अभेदारोपः। **मुखं चन्द्र** ० चन्द्रसदृशाभिन्नं मुखमित्यर्थकम्। **पुरेऽस्मिन्** ० अस्मिन् नगरे प्रसादशिखरे अनुपात्तमुखपङ्क्तिरूपा चन्द्रपङ्क्तिर्विराजत इत्यर्थः। अनुपात्ताया मुखपङ्क्तेश्चंद्रराज्यात्मना प्रतीतिः। **अत्राद्यायाम्** ० मुखं चन्द्र इत्यादौ गौण्यां सारोपायाम्। **अभेद** ० निपातातिरिक्तनामार्थयोरभेदातिरिक्तसम्बन्धानुपपत्तेः। अभेदेनेति व्यस्तोऽपि पाठः।

रन्वयः। सादृश्यरूपधर्मलक्षणायां तु तेन सह मुखादीनामन्वयो न स्यात्। नामार्थयोरभेदातिरिक्तसंसर्गेण विशेष्यविशेषणभावस्यानुपपत्तेः। नन्वेवं सति बोधावैलक्षण्याच्चन्द्रसदृशं मुखमित्युपमातो मुखं चन्द्र इति रूपकस्य कथं भेदः। न च सदृशविशेषणचन्द्रसंबन्धासंबन्धाभ्यामिति वाच्यम्। बोधस्य वैलक्षण्यमात्रेण पृथगलंकारताया

ननु लाघवाच्चन्द्रपदस्य चन्द्रसादृश्ये धर्मे एव लक्षणा कथन्नेत्यत आह सादृश्यरूप ० चन्द्रसादृश्याभेदस्य मुखे बाधात् स्वरूपसम्बन्धरूपाश्रयतात्मकेन भेदसम्बन्धेनापि अन्वयो न सम्भवति इत्याह नामार्थयो ० अभेदातिरिक्तः सर्वविधो भेदसम्बन्धः। अस्य नियमस्यानङ्गीकारे राजा पुरुष इत्यत्रापि राजपुरुषपदार्थयोरपि स्वस्वामिभावसम्बन्धापत्तेः। तथा च नामार्थयोरभेदसम्बन्धेनैव विशेष्यविशेषणभावः। इदन्त्ववधेयम्। सारोपलक्षणास्थले रूपकाङ्गीकारात् तत्र लक्षणा भवतीति प्राचीनमतम्। लक्षणां विनैव अभेद इति नवीनमतम्। तदग्रेऽनुसन्धानार्थम् इतः प्राचीनमतप्रतिपादनम्। कथं भेदः ० बोधवैलक्षण्यस्याभावे चमत्कृते र्भेदाभावादलङ्कारभेदस्याप्यभावात् बोधवैलक्षण्यं दर्शयति न च सदृश ० चन्द्रसदृशं मुखमित्युपमास्थले एवं बोधः। चन्द्रसदृशमिति पदद्वयम्। सदृशपदस्य सादृश्याश्रयोऽर्थः। यद्यपि वैय्याकरणमते विशिष्टशक्त्यङ्गीकारान्नान्वयक्लेशस्तथापि अतिरिक्तशक्त्यनङ्गीकर्तॄणां मते वक्ष्यमाणशाब्दबोधप्रकरणरीत्या पदार्थैकदेशे सादृश्यं चन्द्रपदार्थस्य निरूपितत्वसम्बन्धेन स्वप्रतियोगिकत्वसम्बन्धेन वा अन्वयः सादृश्याश्रयस्य चाभेदेन मुखपदार्थे। चन्द्रस्य सादृश्ये सम्बन्धस्तु अपदार्थतया संसर्गतया भासते एवमभेदोऽपि। एवञ्च चन्द्रनिरूपितं चन्द्रप्रतियोगिकं वा यत्सादृश्यं तदाश्रयाभिन्नं मुखमित्याकारको बोधः। तत्र चन्द्रपदार्थस्य सदृशपदार्थैकदेशे स्वनिरूपितत्वादिः संसर्गो भासते। रूपकस्थले तु न चन्द्रपदार्थस्य सादृश्ये कश्चित्तादृशः सम्बन्धो भासते यतो हि द्वयोः पदार्थयोः संसर्गो भवति आकाङ्क्षाभास्यो न तु पदार्थे पदार्थतावच्छेदकस्य। तस्य तु प्रकारतयैव भानात्। मुखं चन्द्र इत्यत्र चन्द्रसदृशमेकस्यैव चन्द्रपदस्यार्थः। तथा च चन्द्रसदृशाभिन्नं मुखमित्येव बोधः। एवमुपमायां चन्द्रपदार्थस्य सादृश्ये संसर्गः संसर्गतया भासते। रूपके तु नेति बोधयोर्वैलक्षण्यं जातमिति भावः। अभेदस्यौचित्ये तु चन्द्रप्रतियोगिके लक्षणा चन्द्रपदस्य। चन्द्रसदृशमित्युपमास्थले एकदेशान्वयमसहमानो मर्मप्रकाशः चन्द्रपदस्य चन्द्रप्रतियोगिकाश्रये लक्षणां कृत्वा सदृशपदार्थेन सहाभेदान्वयं मनुते। मया ग्रन्थकृतोपमाप्रकरणे एकदेशान्वयस्याङ्गीकारात् तथा वर्णितम्। संसर्गतया भानाभानकृतस्यैतादृशबोधवैलक्षण्यस्य अकिञ्चित्करतां दर्शयति बोधस्य ● चमत्कृतिवैलक्षण्याधायकस्यैव बोधवैलक्षण्यस्य पृथगलङ्कारताप्रयोजकत्वमिति मात्रपदेन ध्वनितम्।

असिद्धेः। अन्यथा मुखं चन्द्र इवेत्यत्र चन्द्रसदृशमित्येतद्गतात्पृथगलंकारतापत्तिरिति चेत्, अत्र केचित्—"रूपकस्योपमातः स्वरूपसंवेदनांशमादायावैलक्षण्येऽपि लक्षणाफलीभूततद्रूप्यसंवेदनमादाय वैलक्षण्यं निर्बाधम्। ताद्रूप्यसंवेदनं च विषये मुखादौ विषयिता-

---

अन्यथा • चमत्कृत्यनाधायकस्यापि बोधवैलक्षण्यस्य पृथगलङ्कारताप्रयोजकत्वे चन्द्रसदृशं मुखमित्यत्र योऽलङ्कारस्तस्मात् मुखं चन्द्र इवेत्यत्र स्थितस्य अलङ्कारस्य भिन्नत्वापत्तिः। इष्यते तु उभयत्राप्युपमैवालङ्कारः। चन्द्रसदृशं मुखमित्यत्र शाब्दबोधस्तु अनुपदमेव वर्णितः। मुखं चन्द्र इवेत्यत्र इवपदस्य निपातस्य द्योतकत्वेवेतिमते चन्द्रपदस्यैव चन्द्रसदृशोऽर्थस्तदा रूपके वर्णितबोधसमान एव बोधस्तयोर्वैलक्षण्यमपि वर्णितमेव। वाचकतानये इवपदस्य सादृश्यमर्थः नामार्थयोरभेदातिरिक्तेत्यादिनियमस्य निपातातिरिक्तत्वेन संकोचात् नामार्थयोरपि निपातार्थयोर्भेदेनान्वयस्याङ्गीकारात्। चन्द्रपदार्थस्य इवार्थसादृश्ये स्वप्रतियोगिकत्वेन निरूपितत्वेन वा भेदसम्बन्धेन अन्वयः। सादृश्यस्य च स्वरूपसम्बन्धेन मुखेऽन्वयस्तथा च चन्द्रनिरूपितसादृश्यवत्मुखमित्याकारको बोधः। अत्र पदार्थस्य सादृश्यस्य मुखे सम्बन्धोऽपदार्थतया संसर्गतया भासते। चन्द्रसदृशमित्यत्र तु सादृश्यस्य सादृश्याश्रये यः संसर्गः स तु चन्द्रपदार्थे एवेति प्रकारतयैव भासते न तु संसर्गतया। अभिधया लक्षणया वा केनचित्पदेन प्रतिपाद्यमानः संसर्गः पदार्थतया विशेषणं भवति न सम्बन्धः। पदानुपस्थितस्तु संसर्गो न प्रकारः इति ध्येयम्। तथा चास्मिन् मते सादृश्यसम्बन्धस्य संसर्गतया भानाभानाभ्यां बोधयोर्वैलक्षण्यमवसेयम्। अत्र मर्मप्रकाश एवमपि वदति इवपदस्य सदृशवाचकत्वेऽपि चंद्रस्य स्वप्रतियोगिकाश्रयत्वं संसर्गः। तत्र तु अभेदः। इति। एवञ्च रूपके लक्षणाङ्गीकारे उपमातो रूपकस्य वैलक्षण्यं न सिद्ध्यतीति पूर्वपक्षस्तदवस्थः। रूपकस्थले प्रधानतया मतद्वयम्। प्रथमं लक्षणावादिनां प्राचीनानां सरस्वतीकण्ठाभरणपञ्चाननजयरामभट्टाचार्याणाम् अल्पीयसा व्याख्यानभेदेन सम्मतम्। काव्यप्रकाशं तु मतद्वयेनापि योजयन्ति तत्तद्व्याख्यातारः। काव्यप्रदीपाप्पय्यदीक्षितादीनां द्वितीयं मतम्, एकस्य मतेऽभेदस्यारोपः कस्याचित्त्वभेद एव। रूपके सदृशलक्षणाङ्गीकारेऽपि उपमातो भेदसाधकं व्याख्यातृभेदेन प्रकारत्रयम्। तत्र प्राथमिको बोध उपमारूपकयोः समान एव। अनन्तरं व्यञ्जनया लक्षणामूलकया ताद्रूप्यसम्वेदनं रूपके, न तूपमायां लक्षणाभावादिति प्रथमः प्रकारः। रूपके लक्ष्यस्य चन्द्रसदृशस्य चन्द्रत्वेन बोधमङ्गीकृत्य प्राथमिकबोधेऽपि वैलक्षण्यसमर्थको द्वितीयः। तृतीयस्तु भेदघटितं सादृश्यमुपमायां भेदाऽघटितं रूपक इति। तत्र प्रथमं जयरामपञ्चाननादिरीत्या व्याचष्टे—केचित् • स्वरूपसंवेदनं प्राथमिकोऽभिधया लक्षणया वा जायमानो बोधः। फलीभूतत्वं

वच्छेदकस्य चन्द्रत्वादेः संप्रत्ययः। ननु लक्षणाप्रयोज्यादपि तत्सदृशावोधात्कथं नाम ताद्रूप्यप्रत्ययः स्यात्। उपायस्याभावाद्भेदज्ञानेन प्रतिबन्धाच्च। अन्यथा चन्द्रसदृशं मुखमित्यत्रापि ताद्रूप्यप्रत्ययप्रसङ्गः इति चेत्, मैवम्। श्लेषस्थल इवात्राप्येकशब्दोपादानोत्थस्य व्यञ्जनस्योपायत्वाद्वैयञ्जनिकबोधस्य बाधबुद्ध्यप्रतिबध्यत्वाच्च। अथ चन्द्रतत्सदृशयोरेवैकपदोपात्तत्वाच्चन्द्रसदृशे चन्द्रताद्रूप्यस्य प्रत्ययो यथाकथंचिदस्तु। न तु मुखत्वविशिष्टे मुखे। अनुभवसिद्धश्च सर्वेषाम् 'वक्त्रे चन्द्रमसि स्थिते किमपरः शीतांशुरुज्जृम्भते' इत्यादौ विषये विषयिताद्रूप्यस्य प्रत्यय इति। सत्यम्। स्वताद्रूप्यवदभेदबुद्ध्या स्वताद्रूप्यस्य सुबोधतया तस्मिन्नपि तस्य सिद्धेः" इत्याहुः। अन्ये तु—"चन्द्रादिपदेभ्यो लक्षणया चन्द्रसदृशत्वेनापि रूपेणोपस्थितानां मुखादीनां चन्द्रत्वेन रूपेणैव मुखादि-

---

लक्षणायाः प्रयोजनमूलकत्वात्। ताद्रूप्यस्य अभेदेपि व्यवहारात् निर्वक्ति ताद्रूप्य। प्रतिबन्धाच्च • चन्द्रत्वप्रकारकबुद्धि प्रति चन्द्रत्वाभावप्रकारकबुद्धिरिव चन्द्रभेद प्रकारकबुद्धेरपि प्रतिबन्धकत्वं बाधनिश्चयविधयैव प्रसिद्धम्। अन्यथा • चन्द्रसादृश्यप्रकारकबुद्धिमात्रस्य चन्द्रत्वप्रकारकबुद्धिजनकत्वे उक्तरीत्या प्रतिबन्धकत्वाभावे च चन्द्रसदृश • उपमायाम् श्लेष • यथा श्लेषस्थले एकशब्देनार्थद्वयोपस्थापनं शब्दरूपसाधर्म्येण द्वयोरर्थयोरभेदस्य सादृश्यस्य च व्यञ्जनया गमकन्तथा चन्द्रसदृशपदेनोपस्थापनीयस्य चन्द्रसदृशस्य चन्द्रपदेनैवोपस्थापने व्यञ्जनया चन्द्रत्वप्रतीत्यर्थम् अप्रतिबध्यत्वाच्च • बाधितार्थप्रतीतेर्व्यञ्जनाया धर्मिग्राहकमानसिद्धत्वात्। वैयञ्जनिकबोधं प्रति बाधबुद्धिर्न प्रतिबन्धिकेत्यर्थः। यथाकथञ्चित् • उक्तेन व्यञ्जनाप्रकारेण ननु • मुखस्य चन्द्रपदेनानुपस्थितत्वात्। वक्त्रे • मुखरूपे चन्द्रे स्थितेऽपरः शीतांशुश्चन्द्रः किमर्थमुज्जृम्भते। मुखे चन्द्रत्वप्रत्ययमन्तरा प्रसिद्धचन्द्रस्य कैमर्थ्यं न सिद्धयेत्। अनुभवसिद्धश्च प्रत्यय इत्यन्वयः। स्वताद्रूप्य • स्वस्य ताद्रूप्यवान् यस्तदभिन्नेऽपि स्वताद्रूप्यबोधः। यथा चन्द्रताद्रूप्यवान् चन्द्रसदृशस्तदभिन्नं मुखं मुखेऽपि चन्द्रताद्रूप्यबोधः। स्वरूपसंवेदनकृतमपि वैलक्षण्यं समर्थयतां मतमाह अन्ये तु • अपिना मुखत्वेनोपस्थितिरपि समुच्चीयते। चन्द्रपदान्मुखस्य चन्द्रसदृशत्वेनोपस्थितिर्मुखपदाच्च मुखत्वेन न तु चन्द्रत्वेन। शाब्दबोधस्तु चन्द्रसदृशस्य चन्द्रत्वेन, चन्द्रसदृशनिष्ठा प्रकारता चन्द्रत्वा-

पदोपस्थापितैः सहाभेदान्वयबोधो जायते। तत्तत्पदलक्षणाज्ञानस्य तत्तत्पदशक्यतावच्छेदकप्रकारकलक्ष्यान्वयबोधत्वावच्छिन्नं प्रति हेतुतायाः पदार्थोपस्थितिशाब्दबोधयोः समानाकारत्वस्यानुभवसाक्षिकवैलक्षण्यकलाक्षणिकबोधातिरिक्तविषयतायाश्च कल्पनात्। अत एव गङ्गायां घोष इत्यत्र तटत्वेनाप्युपस्थितस्य तटस्य गङ्गात्वेनान्वयबोधस्तत्प्रयोज्यः शैत्यपावनत्वादिप्रत्ययश्च संगच्छते। प्रकृते तु विषयिचन्द्रादिनिष्ठासाधारणगुणवत्त्वप्रत्ययः फलम्। नहि चन्द्रत्वप्रतीतिं विना मुखे चन्द्रत्वनियतगुणवत्त्वधीः शक्योपपादयितुम्।

वच्छिन्ना इति यावत्। अभेदसम्बन्धावच्छिन्ना चन्द्रत्वावच्छिन्ना चन्द्रसदृशनिष्ठप्रकारता तन्निरूपिता मुखत्वावच्छिन्ना विशेष्यता तादृशविशेष्यताको बोध इत्यभिप्रायः। उपस्थितीया चन्द्रसदृशनिष्ठा प्रकारता चन्द्रसदृशत्वावच्छिन्ना। इति उपस्थितिशाब्दबोधयोः समानप्रकारकत्वनियमस्य त्यागोऽस्मिन् मते। **हेतुतायाः** ० कल्पनादित्यत्रान्वेति। तत्तत्पदानां शक्यतावच्छेदकः प्रकारो लक्ष्यार्थश्च विशेष्यो यस्मिन् बोधे तत्त्वावच्छिन्नं प्रति। मुखं चन्द्र इत्यत्र चन्द्रपदं स्वशक्यार्थसम्बन्धिचंद्रसदृशबोधकमित्याकारकं चन्द्रपदलक्षणाज्ञानं हेतुः। चन्द्रपदशक्यतावच्छेदकचन्द्रत्वप्रकारकश्चन्द्रपदलक्ष्यार्थचन्द्रसदृशविशेष्यको बोधः कार्यम्। कार्यतावच्छेदकं तादृशबोधत्वम् तदवच्छिन्नं प्रति पूर्वोक्तलक्षणाज्ञानं कारणम्। तथा चास्मिन् मते अभेदसम्बन्धावच्छिन्नचन्द्रत्वावच्छिन्ना या चन्द्रसदृशनिष्ठा प्रकारता तादृशप्रकारतानिरूपितमुखनिष्ठविशेष्यताको बोधः। प्राथमिक एव। एषा प्रथमा कल्पना। द्वितीया तु उपस्थितिशाब्दबोधयोः समानप्रकारकत्वनियमस्य लक्षणाजन्यबोधातिरिक्तबोधे एवाङ्गीकारः। **स्यानुभव** ० अनुभवः साक्षी यस्य वैलक्षण्यस्य तादृशं वैलक्षण्यं यस्य लाक्षणिकबोधस्य तद्भिन्नविषयता उक्तनियमस्येत्यर्थः। **अत एव** ० लाक्षणिकबोधस्योपस्थितिप्रकारभिन्नप्रकारकस्याप्यङ्गीकारादेव। तटस्य गङ्गापदात् तटत्वेनोपस्थितिः गङ्गात्वेन च बोधः। **तत्प्रयोज्य** ० तटस्य गङ्गात्वेन यो बोधस्तत्प्रयोज्यः। अन्यथा गङ्गात्वनियतस्य शैत्यपावनत्वस्य तटे गङ्गात्वप्रतीतिमन्तराऽसम्भवात्। **प्रकृते** ० मुखं चन्द्र इत्यत्र रूपके चन्द्रपदेन लक्षणया चन्द्रसदृशबोधस्येति फलमित्यादि। चन्द्रत्वस्यासाधारणो नियतो वा गुणो विलक्षणाह्लादकत्वादिः। न च प्राचीनैस्ताद्रूप्यसंवेदनं फलत्वेनोक्तं भवता तु असाधारणगुणप्रतीतिः फलत्वे-

ताद्रूप्यपदेन तदसाधारणगुणवत्त्वमेव प्राचीनैरुक्तम्। इत्थं च स्वरूपसंवित्तिकृतः फलीभूतसंवित्तिकृतश्चोपमातो रूपकस्य भेदः स्फुट एव" इति वदन्ति। अपरे तु—"भेदकरम्बितं सादृश्यमुपमाजीवातुभूतम्, भेदाकरम्बितं च गौणसारोपलक्षणाया इति स्फुटे भेदे कृत फलकृतवैलक्षण्यपर्यन्तानुधावनेन। पक्षेऽस्मिन्भेदगर्भसादृश्यप्रतिपत्तेस्ताद्रूप्यप्रतीतिः कथं नाम फलं भवितुमीष्टे, इत्यनुपपत्तिं परिहर्तुमायासोऽपि नापततीत्यपरमनुकूलम्" इत्यप्याहुः। तदित्थं प्राचामाशयो मतभेदेन वर्णितः।

नव्यास्तु—"मुखं चन्द्रः, वाहीको गौः, इत्यादौ चन्द्रादीनां मुखादिभिः सह संभवति लक्षणां विनैवाभेदसंसर्गेणान्वयबोधः। बाधनिश्चयप्रतिबध्यतावच्छेदककोटावनाहार्यत्वस्येव शाब्दान्यत्वस्यापि

नोच्यते तथा च प्राचीनमतविरोध इति चेत्तत्राह **ताद्रूप्यपदेन** • तथा च असाधारण गुणप्रतीतिरेव फलं तेषां मते। **स्वरूपसंवित्ति** • प्राथमिको लाक्षणिको बोधः, अत्र फलीभूतं बोधान्तरम् उपमायान्तु लक्षणाया एवाभावात्फलीभूतबोधान्तराभावात्। **अपरे तु** • जीवातुरुपमात्वप्रयोजकम्, जीवातुर्जीवनौषधमित्यादिकोषस्वरसात्। **भेदे** • उपमारूपकयोरित्यादिः। **कृतं फल** • इदं प्राक्तनमतद्वये प्रथममस्वरसबीजम्। **कथं नाम** • भेदप्रतीतेस्तादूरूप्यप्रतीतिं प्रति बाधनिश्चयविधया विरोधित्वात्। **नापततो** • भेदाघटितस्य सादृश्यस्य रूपकस्थले भानाभ्युपगमे मुखचन्द्रयोर्भेदस्यास्फूर्तेः प्रतिबन्धकस्यैवानुत्पत्तेः। उपमास्थले तु चन्द्रभिन्नं चन्द्रसदृशाभिन्नञ्च मुखमिति बोधेन मुखे चन्द्रभेदबोधस्य प्रतिबन्धकस्योत्पत्त्या ताद्रूप्यप्रत्ययः प्रतिबध्यते।

रूपकस्थले लक्षणामनङ्गीकुर्वाणा **नव्यास्तु** • **अभेदसंसर्गे** • द्वयोर्नामार्थतया समानविभक्तिकपदोपस्थापिततया च। ननु मुखचन्द्रयोरभेदबुद्धिं प्रति मुखचन्द्रयोर्भेदज्ञानरूपबाधनिश्चयस्य प्रतिबन्धकत्वात्कथमभेदधीरित्याशङ्क्य शाब्दबोधस्य प्रतिबध्यत्वं निरस्यति **बाधनि** • बाधनिश्चयकालेऽपि इच्छाजन्यं ज्ञानमाहार्यम्। तच्च न प्रतिबध्यं प्रतिबन्धकसमवधानेऽपि जायमानत्वात्। स्वभावादनुभवसिद्धत्वाच्च न प्रतिबन्धकम्। यथा आहार्यज्ञानं न प्रतिबध्यं तथा शाब्दज्ञानमपि न प्रतिबध्यम्। गालीप्रदानादिषु असत्यार्थस्य शाब्दबोधो भवति अतएव कोपोद्रेकोऽनुभूयते। बोधाभावे तु

निवेश्यत्वात्। अत एव 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि' इति प्राचां प्रवादोऽपि संगच्छते। न च वह्निना सिञ्चति इत्यतो वाक्यादपि शाब्दबोधापत्तिः। योग्यताज्ञानविरहात्। मुखं चन्द्रः, गौर्वाहीकः, इत्यादौ त्विष्टचमत्कारप्रयोजकताज्ञानाधीनाया इच्छायाः सत्त्वादाहार्ययोग्यताज्ञानसाम्राज्यम्। अत एव शाब्दबोधे योग्यताज्ञानस्य कारणत्वोक्तिः प्राचां संगच्छते। आहार्य एव वाऽभेदान्वय-

---

द्रविडवाक्यवत् क्व कोपः प्रसज्येत शशशृङ्गादपि बोधो जायते, अतएव तदुक्ता असदर्थवादितया अधिक्षिप्यते। चमत्कारोऽपि अस्य क्षोणीपतेः परार्धपरया लक्ष्मीकृता संख्यया प्रज्ञाचक्षुरवेक्षणीयतिमिरप्रख्याः किलाकीर्तयः। गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदराद्, मूकानां प्रवरेण कूर्मरमणीदुग्धोदधे रोधसि इति नैषधीयपद्येन। शशशृङ्गादिविषये विकल्पात्मिका वृत्तिरिति योगसूत्रप्रमाणेन वैय्याकरणमञ्जूषायां वर्णितं तत्तत एवावसेयं नात्र विस्तारयामि। तथा च अनाहार्यशाब्दान्यतदभेदबुद्धिं प्रति तद्भेदनिश्चयः प्रतिबन्धक इति फलति। प्रतिबध्यता तादृशबुद्धौ प्रतिबध्यतावच्छेदकानि तादृशबुद्धिविशेषणानि अनाहार्यत्वशाब्दान्यत्वादीनि। अन्यानि च प्रतिबध्यप्रतिबन्धकविशेषणानि ग्रन्थान्तरोक्तानि विस्तरभिया त्यज्यन्ते। **अत एव** ● बाधितार्थस्यापि शाब्दबोधाङ्गीकारादेव। समभ्यर्थौ विषयित्वम्, अत्यन्ताऽसदलीकं शशशृङ्गादि। शब्दोऽलीकविषयं ज्ञानं करोत्येव। ननु शाब्दं प्रत्यपि बाधनिश्चयस्य प्रतिबन्धकत्वे सेचने वह्निकरणत्वाभावनिश्चयस्य प्रतिबन्धकत्वाच्छाब्दबोधो न जायेत। अधुना तु जायेतेत्याशङ्कते **न च वह्निः**। **योग्यता** ● तथा च न तत्र प्रतिबन्धकवशाद्बोधाऽभावोऽपि तु कारणविरहप्रयुक्तः। तत्रापि भ्रमात्मकयोग्यताज्ञानदशायां शाब्दो भ्रमो जायत एव। **साम्राज्यम्** ● मुखे चन्द्राऽभेदो योग्यता, अभेदज्ञानं च भेदज्ञानेन बाधितं तदापि इच्छावशाद् योग्यताज्ञानमहार्यं भवितुमर्हति। इच्छा च इष्टसाधनताज्ञानात्, इष्टश्च चमत्कारः। वह्निना सिञ्चतीत्यत्र तादृशेच्छासामग्र्याभावान्न तादृशयोग्यताज्ञानम्। **अत एव** ● शाब्दबोधस्य बाधनिश्चयाप्रतिबध्यत्वादेव, अन्यथा बाधनिश्चयादेवायोग्यार्थशाब्दबोधानुदयाद् योग्यताज्ञानस्य शाब्दकारणता व्यर्था स्यात्। योग्यताज्ञानस्य शाब्दकारणत्वे इदमेव फलं यदाहार्यतज्ज्ञानाद् बाधितार्थबोधः। तच्च फलं बोधस्य बाधनिश्चयाप्रतिबध्यत्व एव। अत्रैव पक्षान्तरमाह **आहार्य एव** ● पूर्वस्मिन् पक्षे आहार्यं योग्यताज्ञानं शाब्दश्चानाहार्यः। अस्मिंस्तु शाब्दबोध एव आहार्यो योग्यताज्ञानस्य नास्ति प्रयोजनम्। चमत्कारेच्छावशादेव शाब्दस्याहार्यत्वम्। पूर्वत्र प्रतिबध्य-

बोधोऽस्तु। मास्तु बाधबुद्धिप्रतिबध्यतावच्छेदककोटौ शाब्दान्यत्वम्। मा चास्तु शाब्दबुद्धौ योग्यताज्ञानस्य कारणत्वम् आहार्यं प्रात्यक्षिकमेवेति नियमश्च अवश्यं मुखचन्द्र इत्यादौ पराभिमतसारोपलक्षणोदाहरणे वाच्यार्थयोरेवाभेदान्वयोऽभ्युपगन्तव्यः। न तु वाच्यलक्ष्ययोः। अन्यथा 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्', 'पादाम्बुजं भवतु मे विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः' इत्यादौ क्रमेणोपमारूपकयोरुपमितविशेषणसमासाधीनयोर्लक्ष्मीकर्तृकालिङ्गनमञ्जुमञ्जीरशिञ्जितमनोहरत्वयोरनुपपत्तिर्निर्णायिका रूपकोपमयोः प्राचीनैस्तत्र तत्रोपनिबद्धा विरुद्धा स्यात्। आद्यपद्ये उपमाया इव

तावच्छेदककोटौ शब्दान्यत्वं निवेशनीयं भवति; अत्र तु आहार्यत्वादेव न प्रतिबध्यत्वप्रसक्तिः। पूर्वस्य समर्थनमाहार्यं ज्ञानं प्रत्यक्षमेव नानुमितिः शाब्दो वेति प्रवादमनुरुध्यासीत् तस्य च प्रवादस्य परित्यागोऽस्मिन् पक्ष इति विवेकः। प्राचामपि वाच्यार्थयोरभेदान्वयोभ्युपेयोऽन्यथा तेषां सन्दर्भाशुद्धिरित्याह अवश्यं • राजनारा • अत्र राजनारायणपदार्थे लक्ष्मीकर्तृकालिङ्गनं विधीयते। तच्चालिङ्गनं नारायणे नारायणाभिन्ने वा सम्भवति न तु नारायणसदृशेऽन्यस्मिन् राज्ञि। तथा च 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति सूत्रेणोपमितसमासमङ्गीकृत्योपमोदाहरणं मन्वीत चेत् नारायणसदृशे नारायणभिन्ने राज्ञि लक्ष्मीकर्तृकालिङ्गनं नोपपद्यत इति प्रतिसन्धाय राजा एव नारायणेत्यर्थे 'मयूरव्यंसकादयश्च' इत्यनेन विशेषणसमासोऽत एव रूपकमित्यभ्युपगच्छन्ति प्राञ्चः। यदि रूपकेऽपि लक्षणा स्यात्तदा राज्ञि नारायणसादृश्यस्य भानेऽपि नारायणाभेदस्याभानात् पूर्वोक्तालिङ्गनानुपपत्तिस्तिष्ठेदेव। एवं पादाम्बुजपदार्थे मञ्जुमञ्जीरशिञ्जितमनोहरत्वविशेषणमुपात्तम्। तच्च विशेषणं पादे अम्बुजसदृशे वा पादे सम्भवति न तु अम्बुजाभिन्ने पादे अम्बुजे मञ्जीरकशिञ्जितसम्बन्धस्यासम्भवात्। तथा च रूपके विशेषणसमासाधीने अभेदबोधापत्त्या उक्तविशेषणानुपपत्तिं प्रतिसन्धायैवोपमितसमासाधीना सदृशलक्षणामूलोपमाङ्गीकृता। रूपकेऽपि लक्षणाङ्गीकारे तु उपमासमानबोधापत्त्या तदनुपपत्तिरपि अवतिष्ठेतैव। क्रमेणो राजनारायणेत्यादौ उपमायामनुपपत्तिः सा च रूपकस्य निर्णायिका, पादाम्बुजमित्यत्र रूपकेऽनुपपत्तिरुपमाया निर्णायिका। उपमा उपमितसमासाधीना, रूपकं विशेषणसमासाधीनमिति क्रमशो ऽन्वयः

रूपकस्यापि स्वीकारे बाधकस्य तुल्यतया तन्निर्णायकताया असंगतेः। द्वितीयपक्षे रूपकस्यापि स्वीकारे बाधकाभावेन तन्निवर्तकताया अयोगात्। न च मुखचन्द्रादौ समासे क्वचिदस्तु नाम प्रागुक्तरीत्या लक्षणां विनापि बोधोपपत्तिः, व्यासे तु लक्षणाया नास्ति बाधकमिति वाच्यम्। 'कृपया सुधया सिञ्च हरे मां तापमूर्छितम्' इत्यादौ व्यासेऽप्यनुपपत्तेः। न च सिञ्चतेरपि विषयीकरणे लक्षणया नानुपपत्तिः। उत्प्रेक्षाद्यतिरिक्तातिशयोक्त्यपह्नवादिष्विवाहार्यज्ञानेनोपपत्तौ लक्षणायां बीजाभावादनुभवविरोधाच्च। अपि चोपमानवाचकस्य चन्द्रादिपदस्य रूपके उपमानसदृशे लक्षणा इति हि प्राचां समयः। तत्र च लक्ष्यतावच्छेदकं सादृश्यम्। तच्च समानधर्मरूपम्। स च लक्ष्यांशे सुन्दरत्वत्वादिना विशेषरूपेण प्रतीयते, उताहो सामान्यरूपेण। नाद्यः। सुन्दरं मुखं चन्द्र इत्यादौ पौनरुक्त्यापत्तेः। न चैवमादावुपात्तधर्मके रूपके तद्धर्मातिरिक्तो धर्म एव लक्ष्यतावच्छेदकीभूतसादृश्यरूप इति वाच्यम्। अनुभवविरोधात्।

तुल्यतया ॰ सादृश्यबोधसाम्राज्येन अभेदस्यास्पृष्टत्वात्। **तन्निर्णाय** ॰ तत्पदेन रूपकम्। **तन्निवर्तक** ॰ तत्पदार्थो रूपकम्। ननूक्तरीत्या समासे रूपके प्राचीनमते लक्षणाभावसिद्ध्याभवत्वभेदो व्यासे कथमित्याशङ्कते न च मुख ॰। **व्यासेऽप्य** ॰ कृपायां सुधायाः अभेदभानाभ्युपगमे सुधा सादृश्यभानमात्रेण सेचनकरणता नोपपद्येत। **विषयीकरणे** ॰ सुधासदृशयी कृपया मां विषयीकुरु भवत्कृपाविषयोऽहं भवेयमिति भावः अत्र सरला भ्रान्ता। **बीजाभावा** ॰ आहार्यज्ञानमालङ्कारिकाणामसम्मतश्चेत् तज्ज्ञानस्य अचमत्कारित्वम्वासम्मतश्चेत् तदा अगत्या अनाहार्यबोधाय लक्षणोपास्येत सम्मतश्चाहार्यज्ञानमतिशयोक्तिप्रभृतिषु। तदा न बीजं लक्षणोपासनायाम्। समानविभक्तिकत्वात्पदयोरनुभवश्चाभेदबोधस्य। सादृश्यस्य समानधर्मरूपत्वे दूषणमुपक्रमते **अपि चो** ॰। **स च** ॰ सादृश्यात्मा समानधर्मश्च। **पौनरुक्त्यापत्तेः** ॰ मुखं चन्द्र इत्यस्यैव चन्द्रवृत्तिसुन्दरत्ववत्मुखमित्यर्थसम्भवात् सुन्दरपदं व्यर्थं स्यात्। **तद्धर्माति** ॰ सुन्दरत्वधर्मातिरिक्तो धर्म आह्लादकत्वादिः सादृश्यात्मा। लक्ष्यश्चन्द्रसदृशो लक्ष्यतावच्छेदकीभूतं चन्द्रवृत्त्याह्लादकत्वादिरूपं चन्द्रसादृश्यम्। **अनुभव** ॰ सादृश्यसम्पत्त्यर्थमेव समानधर्मो-

'अङ्कितान्यक्षसंघातैः सरोगाणि सदैव हि।
शरीरिणां शरीराणि कमलानि न संशयः॥'

इत्यादौ श्लेषभित्तिकाभेदाध्यवसितधर्मं विना धर्मान्तरस्य सर्वथैवास्फूर्तेश्च। नान्त्यः। सादृश्यस्य शब्दोपात्तत्वेनोपमात्वापत्तेः। न च सादृश्यस्य वाच्यतायामेवोपमाव्यपदेशः। 'नलिनप्रतिपक्षमाननम्' इत्यादौ तदभावापत्तेः। किं च 'विद्वन्मानसहंस—' इत्यादौ श्लिष्टपरम्परितरूपके श्लेषनिष्पत्तौ श्लेषभित्तिकाभेदाध्यवसानेन मानसावासित्वरूपे भूपहंसयोः सादृश्ये सिद्धेसदृशलक्षणामूलस्य भूपे हंसरूपकस्य सिद्धिः। तस्यां च सत्यां सरोमनोपार्थद्वयाभिधानलक्षणस्य श्लेषस्य निष्पत्तिरिति परस्पराश्रयः। नहि रूपकास्फूर्तौ सरोरूपेऽर्थे मानसशब्दस्य तात्पर्यं वेदयितुं किंचित्प्रमाणमवतरति। स्फुरिते तु रूपके

पादानं धर्मान्तरेण सादृश्यनिष्पत्तौ निराकाङ्क्षतया समानधर्मस्यान्वय एव न स्यात्। यत्रोपात्तातिरिक्तः साधारणधर्मः सादृश्यसम्पादको नानुभूयते तादृशमुदाहरति अङ्कितान्य० रूपकप्रकरणे व्याख्यास्यमानम्। श्लेषभि० एकशब्दोपस्थितिमूलकोऽर्थयोरभेदः। तादृशमभेदमापन्नधर्मान् विहाय धर्मान्तरस्यात्रासम्भवात्। कमलशरीरयोः सादृश्यसम्पादकस्य धर्मान्तरस्यानुपलम्भाच्च। नान्त्यः ० सादृश्यं सामान्यतो भासते न सुन्दरत्वादिना विशेषरूपेणेति पक्षोऽपि न सम्भवतीत्यर्थः। पमात्वा ० उपमायां सादृश्यं शब्दोपात्तं रूपके तु गम्यमिति सिद्धान्तमनुरुध्य। यद्यपि व्यङ्ग्योपमायामपि सादृश्यं व्यङ्ग्यन्तथापि सादृश्यस्योपात्तत्वे उपमाव्यभिचाराभावः। रूपके तु न सादृश्यमुपात्तं भवति। प्रतिपक्ष ० अस्य विपरीतपक्षके शक्तिः, पक्षप्रतिपक्षश्च समानयोरेव भवतीति सदृशं लक्ष्यते। तदभावः उपमाया अभावः। परम्परितरूपकेऽन्योन्याश्रयं दर्शयति किञ्च वि ०।

विद्वन्मानसहंस कमलासङ्कोचदीप्तद्युते।
दुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानर॥
सत्यप्रीतिविधान दक्षविजयप्राग्भावभीमप्रभो।
साम्राज्यं वरवीरवत्सरशतंवैरञ्चमुच्चैः क्रियाः॥

प्राग्भारभीम इत्यपि पाठः। प्रथमं सम्बोधनान्तेन राज्ञि हंसरुपकमुच्यते। प्राचीनमते राजहंसयोः सादृश्यमपेक्ष्यते तच्च समानधर्मरूपम्, साधारणधर्मता च मानसवासित्वस्य

तद्घटकसादृश्यान्यथानुपपत्तिरूपेण प्रमाणेनार्थद्वयाभेदबोधफलकस्य तदुभयप्रतिपादनात्मनः श्लेषस्य निष्पत्तिः। अतो नामार्थयोरभेदान्वयसरणिरेव रूपकस्थले रमणीया। सदृशलक्षणायाः फलं रूपके ताद्रूप्यप्रत्यय इत्यपि न हृदयंगमम्। तत्सदृश इति शब्दात्सादृश्यप्रत्यये सत्यपि ताद्रूप्यप्रत्ययापत्तेः" इत्याहुः।

अत्रेदं विचार्यते—यत्तावदुच्यते नामार्थयोरभेदान्वयबोधेनैवोपपत्तौ रूपके नास्ति लक्षणेति तत्र चमत्कारिसाधारणधर्मानुपस्थितिदशायामुपमालंकारस्येव रूपकालंकारस्यापि नास्ति निष्पत्तिश्चमत्कारो वेति सकलहृदयसिद्धम्। कथमन्यथा 'भारतं नाकमण्डलम्', 'नगरं विधुमण्डलम्' इत्यादिवाक्यश्रवणानन्तरमनुन्मिषन्त्या रूपकप्रतिपत्तेः सुपर्वालंकृतासकलकलादिशब्दश्रवणोत्तरमेव समुन्मेषः

सम्पादनीया। तच्च श्लेषमूलकत्वेन, अन्यथा मनोवासित्वसरोवासित्वयोरैक्यं कथं स्यात्। श्लेषश्च नानार्थकस्यापि शब्दस्य नियन्त्रितशक्तिकतया रूपकसम्पादकतया अर्थद्वयस्य तात्पर्यविषयत्वावगतौ। एवञ्चान्योन्याश्रयः स्फुट एव। रूपकस्थले वाच्यार्थयोरेवाभेदाभ्युपगमे तु समानविभक्तिपदोपस्थाप्यतामात्रेणाभेदरूपकोपपत्तौ स्वनिष्पत्तये समानधर्मापेक्षाया अभावेन क्व परस्पराश्रयः। एवं कमलाया लक्ष्म्याः सङ्कोच एव पद्मानामसङ्कोचः तदर्थं चन्द्रः सूर्यो वाऽसंकोचे। पलायनाभावात् दुर्गस्थानानामनन्वेषणमेव, अम्बिकाया अन्वेषणं तेन शिवः संग्रामाणां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिः, सत्यामप्रीतिः, विजयस्य अर्जुनस्य च पूर्वभवनम्, विरञ्चेर्ब्रह्मण इदम्। **प्रत्ययापत्तेः** • लक्षणयैवोपस्थापितं सादृश्यं ताद्रूप्यं गमयति नाभिधयेत्यत्र प्रमाणाभावादित्यर्थः। नव्योक्तानां प्राचीनमते दोषाणामुद्धाराय विचारमुपक्रमते **अत्रेदम्** • लक्षणा अस्तु मावा परं उपमानोपमेययोः साधारणधर्मस्फूर्तिमन्तरा न रूपकमिति सकलसहृदयहृदयप्रसिद्धम्। **भारतम्** • भारतं स्वर्गमण्डलम्, नगरं चन्द्रमण्डलम्, इति श्रवणेऽपि रूपकं न स्फुरति, पूर्वञ्च सकलकलमिति विशेषणोपादाने च स्फुरति, ते च पदे उपमानोपमेययोः साधारणधर्ममुपस्थापयतः। तथा चान्वयव्यतिरेकाभ्यां साधारणधर्मप्रत्ययमन्तरा न रूपकप्रत्यय इत्यवसीयते। भारतं महाभारतं सभावनविराटादिभिरलङ्कृतं स्वर्गमण्डलं देवैरलङ्कृतम् देवसभयावा सकलाः षोडशकलाश्चन्द्रे कलकलध्वनिना चतुष्षष्ठिकलाभिर्वा सहितं नगरम्।

सर्वेषाम्। इत्थमेव च मुखं चन्द्र इत्यादिप्रसिद्धोदाहरणेऽपि। इयांस्तु विशेषः—यदेकत्र साधारणो धर्मः प्रसिद्धतया नियमतः स्वबोधकश्रुतिं नापेक्षते। इतरत्र त्वप्रसिद्धतया तथा। एवं स्थिते साधारणधर्मवत्त्वरूपं सादृश्यं यदि रूपकमध्यं न प्रविशेत्तदा कथमिव धर्मविशेषानुपस्थितिदशायां रूपकं न पर्यवस्येत्। चमत्कारं वा न जनयेत्। उपमानोपमेययोराहार्याभेदबुद्धेरनन्यापेक्षपर्यवसानायाः साम्राज्यात्। न चाहार्यपदार्थद्वयाभेदबुद्धौ तच्चमत्कारे वा साधारणधर्मविशेषज्ञानं प्रयोजकमिति शक्यं वक्तुम्।

> 'यद्यनुष्णो भवेद्वह्निर्यद्यशीतं भवेज्जलम्।
> मन्ये दृढव्रतो रामस्तदा स्यादप्यसत्यवाक्॥'

इत्यादौ साधारणधर्मस्याप्रत्ययेऽपि वह्न्यनुष्णादीनामभेदप्रत्ययोपगतेः। न चोपमानोपमेयस्थल एवायं नवीनो विशेष इति वाच्यम्। ईदृशविशेषकल्पने मानाभावात्। साधारणधर्मानुपस्थितिदशायामपि 'मुखं यदि चन्द्रः स्यात्तदा भूम्यवस्थितं न स्यात्' इत्यादौ तादृशप्रतीत्युपगमाच्च। ननु रूपकप्रतीतेरुपमानाभेदविषयत्वविरहे 'सिंहेन सदृशो नायं किं तु सिंहो नराधिपः' इत्यादौ

यत्र साधारणधर्मस्योपादानमन्तरा रूपकं तत्र व्यभिचारं वारयति इयाँस्तु • स्वस्य साधारणधर्मस्य बोधकं शब्दं नापेक्षते तथा • स्वबोधकश्रुतिमपेक्षते। रनन्या • नवीनमतसिद्धरूपकस्य साधारणधर्माद्यन्यापेक्षामन्तरैव पर्यवसानम्। न चाहार्य • पदार्थद्वयस्य या अभेदबुद्धिः सा आहार्यरूपा। यद्यनुष्णो • वह्निरनुष्णः, जलमशीतम्, दृढव्रतो रामोऽसत्यवागित्यादयो बुद्धयोऽभेदाहार्यरूपाः साधारणधर्मनिरपेक्षाः। मानाभावात् • साधारणधर्मरूपं सादृश्यं न स्फुरति रूपके साधारणधर्मश्चापेक्ष्यत इत्यत्र मानं नास्ति। तादृशप्रतीति • नवीनमतसिद्धरूपकजीवातुभूतचन्द्राऽभिन्नमुखप्रतीतिः। रसङ्गति • प्राचीनमते अयं नराधिपः सिंहसदृशो न किन्तु सिंहसदृश इत्यसङ्गतो बोधः। नव्यमते तु सादृश्यं निषिध्यतेऽभेदो विधीयते। प्राचीनमते तु सादृश्यस्यैव निषेधो विधानञ्च।

निषेध्यविधेययोरसंगतिरिति चेत्, न। अनुपदमेव प्राचीनमतद्वयेऽपि रूपके ताद्रूप्यप्रतिपत्तेः स्वीकारस्य प्रतिपादनात्।

अथ विधेयकोटौ प्राचां मते सादृश्यस्यापि प्रविष्टतया तन्निषेधानुपपत्तिस्तथापि स्थितैवेति चेत्, भेदघटितसादृश्यरूपाया उपमाया एव निषेध्यत्वात् तिरोभूतभेदसादृश्यलक्षणस्य रूपकस्य विधेयत्वाच्च नानुपपत्तिः। यदप्युक्तं रूपके लक्षणास्वीकारे 'राजनारायणम्' इत्यत्र 'पादाम्बुजम्' इत्यत्र चोपमारूपकयोर्बाधकतया रूपकोपमयोर्निर्णायकतया च लक्ष्मीकर्तृकालिङ्गनमञ्जुमञ्जीरशिञ्जितत्वयोरनुपपत्तिः प्राचीनैरुक्ता विरुद्धा स्यादित्यादि, तदपि न। रूपके उपमानतावच्छेदकरूपेण तत्सदृशप्रत्ययस्योपपादितत्त्वेन 'राजनारायणम्' इत्यादौ विशेषणसमासायत्तस्य रूपकस्य स्वीकारे प्रधानीभूतोत्तरपदार्थस्य नारायणसदृशस्यापि नारायणत्वेनैव प्रतीतेर्लक्ष्मीकर्तृकालिङ्गनकर्मताया अनुपपत्तेरभावात्। उपमाया उपमितसमासायत्तायाः स्वीकारे तु प्रधानीभूतपूर्वपदार्थस्य राज्ञो राजत्वेनैव प्रत्ययात्तादृशकर्मताया अनुपपत्तेः। 'पादाम्बुजम्' इत्यादावपि रूपकस्य स्वीकारे प्रधानीभूतोत्तरपदार्थस्याम्बुजसदृशस्याम्बुजत्वेनैव प्रतीतेर्मञ्जुमञ्जीरशिञ्जितमनोहरताया अनुपपत्तेः। उपमितसमासायत्तोपमायां तु प्रधानस्य पादस्य पादत्वेनैव प्रतीतस्य नास्ति तस्या अनुपपत्ति-

---

प्रतिपादनात् ० तथा च ताद्रूप्यमपि रूपकस्थलेऽङ्गीक्रियत एव। ननु भवतु नाम ताद्रूप्यप्रतीतिः परं सादृश्यस्यापि विधेयत्वात् तन्निषेधसमकालमेव तद्विधेयता अनुपपन्नैवेत्याशङ्कते अथ ० प्रागुक्तपरे तु मतेन समाधत्ते भेदघटित ० तथा चोपमाया निषेधो रूपकस्य विधानमिति भावः। तिरोभूतमप्रतीयमानं भेदस्य विशेषणम्। स्यादित्यादि ० पूर्वपक्षस्योपपादनं प्रागुक्तनव्यमतोपपादनेनावसेयम्। समाधानन्तु राजनारायणमित्यत्र रूपके सदृशलक्षणाङ्गीकारेऽपि नारायणत्वेन बोधनान्नालिङ्गनानुपपत्तिः। पादाम्बुजमित्यत्र पादस्य रूपकेऽम्बुजत्वेन बोधने मञ्जीरसम्बन्धानुपपत्तिरुपमायान्तु पादत्वेनैव बोधेनोपपत्तिः।' उपमान ० नारायणत्वेन नारायणसदृशस्य प्रत्ययः। म्बुजसदृशं ०

रिति न कोऽपि दोषः। न चोपमितसमासे पूर्वपदार्थस्योपमेयस्योपमेयतावच्छेदकरूपेणैव प्रतीतिरिति न युक्तम्। 'वक्त्रे चन्द्रमसि' इति प्रागुक्तरूपक इवोपमानताद्रूप्यवदभेदबुद्धया तत्ताद्रूप्यस्यात्रापि प्रतिपत्तुं शक्यत्वाल्लक्षणायास्तुल्यत्वादिति वाच्यम्। उपमितसमासे भेदघटितसादृश्यस्य लक्ष्यकोटिप्रविष्टतया वैलक्षण्यस्य वक्ष्यमाणत्वात्। यदप्युक्तं सादृश्यस्य शब्देनोपादानादुपमात्वापत्तिरिति, तदपि न। भेदाकरम्बितसादृश्यविशिष्टस्य रूपके लक्ष्यत्वादुपमाव्यपदेशस्याप्रसक्तेः। 'सादृश्यमुपमा भेदे' इति तत्सिद्धान्तात्। ननु यत्र भेदघटितसादृश्यवति वक्त्रा लक्षणया मुखं चन्द्र इति प्रयुक्तं तत्र तथाप्युपमालंकारापत्तिः स्थितैवेति चेत्, भेदघटितसादृश्यप्रतिपिपादयिषाकाले लक्षणया तद्वति शब्दप्रयोगस्य विरुद्धत्वात्। लक्षणायास्ताद्रूप्यप्रतिपिपादयिषाधीनत्वात्। नहि प्रयोजनमनुद्दिश्य

पादस्याम्बुजत्वेन प्रतीतिः। ननु यथा रूपके लक्षणा तथोपमितसमास लुप्तायामुपमायामपि उपमानसादृश्यस्य लक्ष्यत्वात् तत्रापि रूपक इव लक्षणाप्रयोजनत्वेन व्यञ्जनया ताद्रूप्यप्रतीतेरप्यापत्तिरित्याशङ्कते न चोपमित● तथा च नोपमारूपकभेद इति शङ्काऽभिप्रायः। प्राक्तनतृतीयमतमनुसृत्य समाधत्ते भेदघटित● तथा च तत्र भेदस्योत्थानान्न ताद्रूप्यप्रतीतिप्रसक्तिरिति भावः। रूपके तु भेदाघटितमेव सादृश्यं लक्षणघटकमिति तत्र ताद्रूप्यसाम्राज्यम्। स्याप्रसक्तेः● भेदकरम्बितसादृश्यस्योपादानमेवोपमानियतमिति भावः। भेदे● भेदे सति सादृश्यं भेदविशिष्टं सादृश्यमिति यावत्। ननु मुखं चन्द्र इत्येतादृशवाक्यस्थले रूपकमेव नोपमेति निर्विवादम्, तत्र यदि वक्तुर्भेदघटितसादृश्ये एव तात्पर्यं तत्रोपमा आपद्यते प्राचीनानाम्, नव्यानान्तु सादृश्यप्रतीतेरेवाभ्युपगमात् नोपमा शङ्कालेशः इत्यभिप्रायेणाशङ्कते ननु यत्र● उत्तराभिप्रायस्तु मुखं चन्द्र इत्येतादृशं समानविभक्तिकनामवाक्यं ताद्रूप्यप्रत्यये तात्पर्यं ग्राहयति, ताद्रूप्यप्रत्यये च भेदविषयकतात्पर्यज्ञानं विरोधि। तथा च विरुद्धविषयकतात्पर्ययोः समकालमसम्भवात् ताद्रूप्यविषयकतात्पर्येण भेदविषयकतात्पर्यस्य कल्पनायाः असम्भवान्नोपमात्वापत्तिः। तद्वति● चन्द्रसदृशे चन्द्रशब्दप्रयोगस्य। ताद्रूप्यतात्पर्यमन्तरा तादृशलक्षणाया अनुल्लास इत्याह

रूढिव्यतिरिक्तया लक्षणयार्थं प्रतिपादयन्त्यार्याः। भेदताद्रूप्ययोर्विप्रतिषिद्धत्वेन युगपत्प्रतिपत्तृबुद्ध्यु पारोहासंभवाच्च। अथोपमितसमासे पुरुषव्याघ्र इत्यादावुत्तरपदस्य स्वार्थसदृशे लक्षणैवोपगन्तव्या। अन्यथा बोधकाभावेन समासे सादृश्यप्रत्ययो न स्यात्। न च व्याघ्र इवेतीवशब्दस्तद्बोधक इति वाच्यम्। तस्य समासे संबन्धाभावात्। सति च संबन्धे तन्निवृत्तेरयोगात्। निवर्तकशास्त्रस्याभावात्। विग्रहवाक्यगतस्त्विवशब्दः स्वघटितवाक्यस्योपमाप्रतिपादकत्वं संपादयितुमीष्टे, न वाक्यान्तरस्य। तस्य विवरणत्वानुपपत्तेश्च। नहि विवरणीयवाक्यगतशब्दाप्रतिपाद्यस्यार्थस्य विवरणं युज्यते। इत्थं च लक्षणाया एवाभ्युपगम्यतया सत्यां च तत्प्रयोजनीभूतताद्रूप्यप्रतिपत्तौ कथमुपमा

लक्षणायास्त। • प्रतिपिपादयिषा तात्पर्यम्। पूर्वोक्तं विरोधं स्फोरयति भेदताद्रू • प्रतिपत्ता बोद्धा। उपमितसमासस्थले उपमायां रूपकत्वापत्तिं शङ्कते प्रथमं लक्षणाया अनिवार्यतां साधयति अथोप • मञ्जूषायां प्रतिपादितं खण्डनमलङ्कारप्रकरणे विवेचितम्।

पुरुषव्याघ्र • पुरुषो व्याघ्र इवेत्यर्थे 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रेण समासः। समस्तव्याघ्रपदस्य व्याघ्रसदृशे लक्षणा। अन्यथा • लक्षणाया अभावे। सम्बन्धाभावात् • प्रयोगाभावात्। रयोगात् • समस्ते सादृश्यप्रत्यय इव पदेनैव प्रयोज्यश्चेदुपमानोपमेयवाचकपदयोरिव तस्यापि श्रवणमापद्येत। लोपेन निवृत्तिरिति चेत् तत्राप्याह निर्वर्तक • ननु विग्रहे इव शब्दो युज्यते एव स च समासेऽपि उपमानोपमेययोः सादृश्यं प्रतिपादयिष्यतीत्याशङ्कामपि निराकुरुते विग्रहवाक्य • स्वघटितवाक्यं विग्रहवाक्यम्, वाक्यान्तरं समासः किञ्च व्याघ्रपदस्य व्याघ्रसदृशे लक्षणाङ्गीकारे एव इव पदघटितं विग्रहवाक्यं युज्यते अन्यथा विग्रहविगृह्यमाणयोः समानार्थकताभङ्गः। विवरणीयेन समासेन सादृश्यस्याप्रतिपादनम्, विवरणेनेव पदघटितेन सादृश्यस्य प्रतिपादनं कथं सम्भवेत्। इत्येवाह तस्य विवरण • तत्प्रयोजनी • लक्षणाप्रयोजनीभूतः। द्विलुप्ता • धर्मवाचकयोर्लोपेनोक्ता। तथावाचकपदं बोधकपरम्। अत्र चोत्तरपदस्योपमा बोधकत्वं समागतमिति भावः। मञ्जूषायां मर्मप्रकाशे च खण्डितमलङ्कार-

द्विलुप्ता तत्र प्राचीनैरुक्तेति चेत्, अत्रोच्यते—उपमितसमासस्य भेदघटितोपमानसादृश्यविशिष्टोपमेये शक्तेस्तद्घटकीभूतोपमान-शब्दस्य भेदघटितसादृश्यविशिष्टे निरूढलक्षणाया वा स्वीकारादद-दोषः। इयमेव निपातानामिवादीनां द्योतकतानये मुखं चन्द्र इवेत्यादौ वाचकलुप्तायामुपमायां च गतिरनुसरणीया। वाचकलोप-स्तूपमानाद्यकरम्बितसादृश्यतद्विशिष्टान्यतरप्रतिपादकशब्दशून्यत्वादु-

---

प्रकरणे विवेचितम्। उत्तरन्तु न तत्र प्रयोजनवती लक्षणा येन अवश्यं तादूरूप्यप्रत्ययेन रूपकमापद्येत। अस्य पूर्णव्याख्यानन्तु वक्ष्यमाणालङ्कारप्रकरणस्य व्याख्यानं संयोज्यावसेयं तत्र किञ्चिद्वितनिष्यमाणत्वात्। प्रथमं वैय्याकरणमतेन समुदायशक्तिस्वीकाराभिप्रायेणाह **उपमितसमास** ● भेदघटितं यदुपमानप्रतियोगिकं सादृश्यं तद्विशिष्टे उपमेये। पुरुष-व्याघ्रसमुदायस्य व्याघ्रसदृशे पुरुषे शक्तिरिति भावः। नैय्यायिकादीनां विशिष्टशक्त्यनङ्गी-कर्तॄणां मतेनाह **घटकीभूत** ● निरूढपदं तादूरूप्यव्यञ्जनाया अनुन्मेषाय। मतान्तराण्यपि अलङ्कारप्रकरणे प्रदर्शयिष्यामि **मुखं चन्द्र इव** ● इवपदस्य द्योतकता नाम समभि-व्याहृतचन्द्रपदस्य चन्द्रसदृशे तात्पर्यग्राहकता तेन चन्द्रपदस्येवादिसमभिव्याहृतस्य चन्द्रसदृशे निरूढा लक्षणा। **सरलोक्ता** चन्द्र इवेति समुदाये शक्तिर्न कस्यचिद्दर्शने प्रसिद्धा **वाचकलुप्ता** ● घनश्याम इत्यादौ घन इव श्याम इत्यर्थे उपमानानि सामान्य-वचनैः इत्यनेन समासे इवपदाप्रयोगात् समासस्यैव घनसादृश्यप्रयोजकश्यामत्ववति विशिष्टा शक्तिः, घनपदस्य घनसादृश्यविशिष्टे लक्षणा एकदेशे श्यामत्वेऽन्वयः। शाब्दबोध-प्रकरणस्थस्य अरविन्दसुन्दरमित्यस्येव गतिरनुसन्धेया। **सरला** तु अन्यथैव व्याख्याति। ननु वाचकलोप इत्यत्र वाचकपदं बोधकपरमन्यथा लक्षकप्रतिपन्नसमसदृशादिसमवधानेऽपि वाचकलोपापत्तेः, तथा च सदृशबोधकस्योपमानवाचकपदस्यैव सत्वेन कथं वाचकलोप-व्यवहारः? न च सादृश्यबोधकत्वं वाचकत्वन्तत्र तथापि आपत्तेरनुद्धारात्। नापि सादृश्यमात्रबोधकत्वन्तत्र, समसदृशादेरसंग्रहापत्तेः। सादृश्यमात्रबोधकत्वसदृशमात्रबोध-कत्वान्यतरवल्लोपो वाचकलोप इत्यपि न तुल्यार्थवतेरसंग्रहापत्तेः, तत्रोपमानेन सह संसर्गस्यापि वत्यर्थत्वात्। इत्यत आह **वाचकलोपस्तु** ● उपमानादिना अकरम्बितमसं-स्पृष्टं उपमानादिनिष्ठा योपस्थितीया विषयता तन्निरूपितविषयत्वाभाववदिति यावत्। यत्सादृश्यं सादृश्यविशिष्टमेतदन्यतरत् तस्य यत्प्रतिपादकमुपस्थापकं तच्छून्यत्वं वाचक-लोपः। तथा च समासे उपमानसदृशत्वेनोपमानसदृशस्योपमानवाचकशब्देनोपस्थानादुप-

पपादनीयः। यच्च 'विद्वन्मानस—' इत्यत्र दूषणमभिहितं तद्रूपक-प्रकरणे परिहरिष्यते। यद्यप्युक्तं रूपके सदृशलक्षणायाः फलं ताद्रूप्यप्रत्ययो न युज्यते। तत्सदृश इतिशब्दजबोधानन्तरमपि तथा प्रत्ययापत्तेरिति, तन्न। तत्सदृश इत्यत्र लक्षणाया अभावेन ताद्रूप्य-प्रत्ययस्यापादानायोगात्। ताद्रूप्यप्रत्ययो लक्षणायाः फलमिति प्राचां समयः। महाभाष्यादिग्रन्थानामस्मिन्नेवानुकूलत्वाच्च।

मानकरम्बितस्यैव प्रतिपादकत्वात्तदकरम्बितप्रतिपादकस्याभावात् न प्रकृते वाचकलोप-त्वानुपपत्तिः। अत्र प्रतिपादकघटकप्रतिपत्तिशब्देन शाब्दबोधोऽङ्गीक्रियेत तदा इवादिपद-घटितवाक्यादपि उपमानकरम्बितस्यैव शाब्दबोधात्तत्रापि वाचकलोपापत्तिरत उपस्थिति-परतया मया व्याख्यातम्। उपस्थापकमित्यत्रोपस्थितिजनकत्वं द्योतकादिसाधारणं ग्राह्यम्। तेनेवपदस्य द्योतकतानयेऽपि सादृश्योपस्थितिजनकत्वान्न वाचकत्वाक्षतिः। इवस्य द्योतकतयोपस्थापकत्वम् उपमानाकरम्बितस्य सादृश्यांशस्यैवेति ध्येयम्। तादृशान्यतर-निष्ठविषयता प्रयोजकत्वं प्रतिपादकत्वं वर्ण्यते चेच्छाब्दबोधीयविषयताग्रहणेऽपि न क्षति-स्तत्तत्पदप्रयोज्यविषयताया नियन्त्रितत्वात्। उपमानादीत्यत्रादिपदस्य स्फुटं न प्रतिभाति कथञ्चित्साधारणधर्ममादाय नामधात्वादौ व्यावर्त्यमूहनीयम्। इति दिक्। **परिहरिष्यते** • रूपकप्रकरणे अस्य पद्यस्य चर्चा न दृश्यते। एतत्समानयोगक्षेमम् **'कमलावासकासारः'** इत्यादिपद्यमुपलभ्यते। तत्र समर्थनीयरूपकस्य न नियमेन आरोपान्तरस्यापेक्षा तत्र प्रसिद्धेनौज्ज्वल्यादिनाऽपि सादृश्यं सिद्ध्यतीति प्रतिपादितम्। तथैवात्र हंसादिरूपकस्य सिद्धिः। अप्रसिद्धसादृश्यादिस्थले तु कविकल्पनाया निरङ्कुशतया तत्राऽन्योन्याश्रयस्याकिञ्चित्कर-त्वादित्यभिप्रायस्तत्र कल्पयितुं शक्यते। अत्र मर्मप्रकाशः। अयं भावः—उपमानोपमेययोर-भेदो रूपकमिति मते सादृश्यज्ञानमूलकाभेदप्रतीतिविषय एव सः। एवञ्च पौरुषाब्धेस्त-रङ्गः, प्रत्यर्थिवंशोल्वणकरिप्रौढदानाम्बुपहः खड्गो मालवस्य, इत्यादौ खड्गशब्दात्प्रतीय-मानाम्बुपहाभेदे प्रत्यर्थिषु वंशाभेदप्रतीतिमूलकं तज्जेतृसम्बन्धित्वरूपसाधर्म्यं मूलम्। प्रत्यर्थिषु वंशाभेदे च खड्गेनाम्बुपहाभेदप्रतीतिमूलकतद्भज्यमानत्वम्। तस्मादवश्यं रूपके लक्षणा इति। प्रतीकान्तरे च पुनरप्येतद्विषये—लक्षणाभावत्वादिनाऽपि कथमन्यो-न्याश्रयः परिहार्यः? किमर्थं वाश्लिष्टपर्यन्तानुधावनं नवीनैर्दीक्षितैः कृतमिति चिन्त्य-मिति वदति। **महाभाष्यादि** • तत्सम्बन्धिनी स्त्री इत्यर्थे तस्येदमित्यणः प्रवृत्तिमा-शङ्क्य न तस्येदमित्येवाभिसन्धिरपि तु सोऽयमित्यप्यभिसन्धिर्भवतीत्यादिना समाधाय

नव्यनये तु तेषामाकुलीभावः स्यादिति दिक्।

"साध्यवसानायां च 'चन्द्रराजीं विराजते' इत्यादौ चन्द्रादि-शब्दैर्लक्षणया मुखत्वेनोपस्थापितस्यापि मुखादेः शाब्दबोधश्चन्द्र-त्वादिना भवति, लक्षणाज्ञानस्यैव माहात्म्यात्" इत्येके। "लक्षणया मुखत्वेन मुखादेः शाब्दबोधे वृत्ते व्यञ्जनयैकशब्दोपात्तत्वप्रादुर्भूतया चन्द्रत्वेन बोधः" इत्यपरे। मतद्वयेऽप्यस्मिन्मुखादौ चन्द्रत्वभान-

---

पुंयोगादितिसूत्रे भाष्यम्। भिन्नानामभेदाभावात्कथं पुनरतस्मिन् स इत्येतद्भवति, चतुर्भिः प्रकारैस्तादूरूप्यमारोप्यते न तु मुख्यम्, तात्स्थ्यात्, ताद्धर्म्यात् तत्सामीप्यात्, तत्साहचर्यादिति। तात्स्थ्याद्यथा, मञ्चा हसन्ति। ताद्धर्म्याद्यथा जटी ब्रह्मदत्तः। ब्रह्मदत्ते यानि कार्याणि जटिन्यपि तानि क्रियन्ते। कुत्रचित्सिंहो माणवक इति पाठः। तत्सामी-प्याद्यथा गङ्गायां घोषः। तत्साहचर्याद्यथा कुन्तान्प्रवेशय इति मर्मप्रकाशानुसारमुद्धृतो भाष्ये तु कश्चित्पाठभेदोऽभिप्रायस्त्वेष एव। दिक् ● दिगर्थस्तु सत्यमनेन भाष्येण तत्त-न्निमित्तवशात्तादूरूप्यमारोप्यते इति प्रतीयते परं सदृशे लक्षणेति पक्षः कुत आगच्छेत्? तादूरूप्यञ्चाभेद एवेति अस्त्वारोपित एवाभेदः संसर्गो वाच्यार्थयो रूपकस्थले। प्राचीनमत-परिष्कारेऽपि नव्यमते कस्याश्चिदनुपपत्तेरप्रदर्शनान्नव्यमत एव निर्भरः पण्डितराजस्य। अत एवालङ्कारप्रकरणेऽपि नव्यमते न काचिदनुपपत्तिः प्रदर्शिता। रूपकोदाहरणेषु असकृदभेदमुखेनैव शाब्दबोधोऽपि प्रदर्शितः। दीक्षितैरुपपादितं नव्यमतं सर्वथैव न रोचयेत पण्डितराजस्तदा अन्यविषयखण्डनमिव साक्षेपं प्रौढ्या नव्यमतं खण्डयेत्। वैय्याकरण-मञ्जूषायां प्रदर्शितो नव्यमतविरोधोऽलङ्कारप्रकरणे नव्यमतेऽपि महाभाष्यादियोजनया दूरीकरिष्यते। इत्येके ● चन्द्रराजीपदस्य मुखपङ्क्तित्वेन मुखपङ्क्तौ लक्षणा। शाब्द बोधस्तु चन्द्रराजीत्वेन मुखपङ्क्तेः। चन्द्रराजित्वनिष्ठप्रकारतानिरूपितमुखपङ्क्तित्वाव-च्छिन्नमुखपङ्क्तिनिष्ठा विषयतेत्यादिरीत्येति यावत्। माहात्म्यञ्च अन्यत्राङ्गीकृतस्य उपस्थितिशाब्दबोधयोः समानप्रकारकत्वनियमस्य लक्षणास्थले सङ्कोचः। कार्यकारण-भावस्तु अतिशयोक्तेरारम्भे मूलकृता वक्ष्यते।

उपस्थितिशाब्दबोधयोः समानप्रकारकत्वनियममनुसरतां मतमाह लक्षणया ● प्राङ्मुखपङ्क्तिर्विराजत इति रीत्या शाब्दबोधः व्यञ्जनया च पूर्वोक्तमतप्रदर्शितरीत्या बोधः। व्यञ्जना च लक्षणायाः प्रयोजनसम्पादकतया, एकपदेनैव वृत्तिभेदेन शक्यता-

सामग्र्या मुखत्वादेः स्वधर्मस्य भानं न निवार्यते। इत्थं चैकस्मिन्धर्मिणि चन्द्रत्वादीनां मुखत्वादीनां च साक्षाद्भानमेव सारोपातोऽस्या विच्छेदकम्। अपरे तु "निवार्यत एव विरुद्धभानसामग्र्या स्वधर्मस्य भानम्। रजतत्वभानसामग्र्यां शुक्तितत्वस्याभानात्" इति वदन्ति। मतेऽस्मिन्विषयतावच्छेदका स्फूर्तिस्तथा। वस्तुतस्तु साध्यवसानायां विषयतावच्छेदकधर्मभानं यदि सहृदयहृद्यप्रमाणकं तदा तद्वारणाय कारणकल्पनानुचितैव। शुक्तिरजतभानस्थले तु शुक्तित्वेन भाते पुरोवर्तिनि रजतत्वभानस्य सर्वथैव विरुद्धत्वाद्रजतत्वभानसमये

लक्षतावच्छेदकभेदेन द्विरूपस्थितिमूलकतया चोल्लसति। **स्वधर्मस्य** ● मुखत्वस्य। **विच्छेदकम्** ● भेदकम्। सारोपायां मुखं चन्द्र इत्यत्र चन्द्रत्वावच्छिन्ना चन्द्रसदृशनिष्ठा विषयता न तु मुखनिष्ठा, अध्यवसाने तु चन्द्रत्वनिष्ठविषयतानिरूपितैव मुखनिष्ठविषयता। **विरुद्धभान** ● मुखत्वविरुद्धस्य चन्द्रत्वस्य मुखे भानसामग्रीलक्षणया चन्द्रत्वेन मुखस्योपस्थितिस्तया मुखधर्मस्य मुखत्वस्य भानं प्रतिबध्यते। मुखे मुखत्वभानं प्रति मुखे चन्द्रत्वभानसामग्रीप्रतिबन्धिकेति भावः। **दका स्फूर्ति** ● विषयतावच्छेदकस्य मुखत्वस्य अभानं तथा सारोपातो भेदकम्। क्वचित्तथैवेति पाठः परं न सम्यक् प्रतिभाति। अत्रत्यमर्मप्रकाशे विषयतावच्छेदकपदस्य लक्ष्यतावच्छेदकोऽर्थः। लक्ष्यतावच्छेकञ्च तन्मते साधारणधर्मरूपमाह्लादकत्वादिकम् इत्युपलभ्यते। तत्र मुखं चन्द्रत्ववदिति ज्ञानस्यानाहार्यस्यैतस्मिन् मतेऽसम्भवात् चन्द्रत्ववदाह्लादकमिति वोधः सम्यगिति बोध्यं; परम् अस्फूर्तिस्तु मुखत्वस्यैव। ननु कचतस्त्रस्यतिवदनमित्यादिस्थले कचत्वेन राहोर्निगरणे कचत्वेनैव राहोर्भाने राहुत्वेन राहोर्जायमानस्त्रासो नोपपद्यते वदनचन्द्रस्य कचात्त्रासानुपपत्तेः, अतस्तत्र राहुत्वविशिष्टस्यैव कचत्वेन बोधोऽङ्गीकार्यस्तथा चात्रापि विषयतावच्छेकस्य भानमङ्गीकार्यम् इत्याह **वस्तुतस्तु** ● **कारणकल्पना** ● कारणपदमुपायपरं प्रतिबन्धककल्पनेति यावत्। कारणकल्पनापि अतिशयोक्तिमूले मात्रपदनिवेशेनोपलभ्यते। प्रतिबन्धस्वरूपन्तु वर्णितमेव। **स्थले तु** ● तत्र शुक्तित्वज्ञाने प्रत्यक्षात्मकस्य रजतत्वभ्रमस्यैवानुपपत्तिः, विरुद्धज्ञानसामग्री प्रत्यक्षादिकं प्रतिबध्नाति नतु शाब्दबोधम्, लौकिकं प्रवृत्त्यादिरूपं कार्यं न तु अलौकिकं काव्यप्रयोज्यचमत्कारमिति वा। काव्ये तु मुखत्वेन मुखभाने न चमत्कारोऽपि तु मखत्वविशिष्टस्य मुखस्य चन्द्रत्वेनैव भाने। लोके तु

शुक्तित्वभाननिवारणमावश्यकम्। न चेहापि तथा। अनुभवविरुद्ध-त्वात्। यदि तु तन्न प्रामाणिकं तदा सोचितैव।

इति लक्षणानिरूपणम्

इति महामहोपाध्यायपदवाक्यपारावारपारीणश्रीपेरमभट्टस्य सूरेः सूनुना पण्डितराजजगन्नाथेन निर्मितरसगङ्गाधरे अलङ्कारातिरिक्तः प्रथमो भागः।

शुक्तित्वविशिष्टस्य रजतत्वेन भानस्याहार्यात्मकस्य न प्रवृत्त्याद्युपयोगिता इत्यादि तु शब्देन ध्वनितम्।

शीघ्रं प्रयाहि करुणापतिपाणिपद्मे
स्वल्पं प्रदर्शय शरीरमिदं प्ररूढम्।
स्वालङ्कृतिञ्च पुनराशु विकाश्य विद्या
केन्द्रे चकाद्धि सततं रसचन्द्रिक मे॥ १॥

इति सरयूपारीणकाश्यपश्रीरामगोविन्दतनुजन्मश्रीयमुनागर्भज-केदारनाथोझाप्रसारितरसचन्द्रिकाः प्रथमो भागः।

अकारादिक्रमेण श्लोकानुक्रमणी

अ

अकरुणमृषा भाषा २००
अकरुणहृदय २०५
अङ्कितान्यक्षसंघा ३१७
अक्षरं ब्रह्मपरमं ८५
अधरद्युतिरस्तपल्लवा १९२
अध्वव्यायाम १९५
अनादिनिधना २४
अपहाय सकल १०८
अनैकस्यैकधा साम्यं ६४
अनौचित्यादृते १३५
अपि बहलदहनजालम् ११७
अयि वक्ति गिरां ११७
अबलटानां श्रियं हृत्वा २५२
अमर्षप्रातिकूल्ये २१४
अयं स रसनोत्कर्षी ५४
अयाचितः सुखं १५६
अयि पवनरयाणां २०८
अयि मन्दस्मित १७२
अलकाः फणिशाव १७०
अलङ्कृतवचोऽम्बरः १
अवधौ दिवसावसान १८४
अवाप्य भङ्गं खलु २०४
अष्टावेव रसा नाट्ये ८७
अहितव्रतपापा २१५

आ

आमूलाद् रत्नसानो १६६
आत्मस्थः परसंस्थः (हास्य) १२०

आयातैव निशा निशा १७५
आलीषु केलिरभसेन १९९
आविर्भूता यदवधि १०७
आसायं सलिलभरे १७२

इ

इयमुल्लसिता मुखस्य १७२

उ

उदितं मराऽलमिन्दोः २८६
उत्क्षिप्ताः कबरीभरं १२९
उपनायकसंस्थायां २२२
उल्लासः फुल्लपङ्के ६५
उत्पत्तिर्जमदग्नितः ११४
उषसि प्रतिपक्ष २३१

ए

एभिर्विशेषविषयै १७५
एकैकशो द्वन्द्वशो वा १९८
एवं वादिनि देवर्षौ २३४

औ

ओरिणदं दोव्वल्लं ५०

क

करतलनिर्गलद २६८
कस्मै हन्त फलाय २८७
कलितकुलिशघाता १७०
कस्तूरिकातिलक १७५
कालागुरुद्रवं सा १७६
कार्याविवेको जडता २१०
किं ब्रूमस्तव वीरतां १४७
कियदिदमधिकं मे १११

कुचकलशयुगान्त १८६
कुण्डलीकृतकोदण्ड १२५
कुत्र शैवं धनुरिदं २१२
कृतं त्वयोन्नतं कृत्यं २९२
कृष्णपक्षाधिकरुचिः २७५
क्षमापणैकपदयोः २३१

ख

खण्डितानेत्र कञ्जालि १५५

ग

गणिकाजामिलमु १५६
गङ्गाधरस्याननम २४१
गाढमालिङ्ग्य सकलां २०२
गीष्पतिरप्याङ्गिरसो २९८
गुञ्जन्ति मञ्जु २६८
गुरुप्रसादाद् गति १
गुरुमध्यगतामया ४६
गुरुमध्ये कमलाक्षी १५४
ग्रामतरुणं तरुण्या ६०

च

चराचरजगज्जाल ११८
चाञ्चल्ययोगिनयनं २५२
चित्रं महानेष तवा ११९
चिन्तामीलितमानसो १६१
चिन्तौत्सुक्यमनस्ताप १९१

त

तदवधि कुशली २८६
तन्मञ्जुमन्दहसितं १८४
तपस्यतो मुनेर्वक्त्र १५६
तल्पगताऽपि च सुतनुः ४६
तां तमालतरुकान्तिलङ्घिनीं १६०
तुलामनालोक्य निजां १७१
तृष्णालोलविलोचने २१३
त्वरया याति पा १५४

द

दयितस्य गुणाननु २०६
दयिते रदनत्विषां २८९
दरानमत्कन्धर १८६
दृष्ट्वैकासनसंस्थिते १५२
देवाः के पूर्वदेवाः २८८
देवभर्तृगुरुस्वामि १८३

ध

धनुर्विदलवध्वनि ११०
ध्वन्यात्मके शृङ्गारे १७४

न

न कपोतकपोतकं ११५
न कपोतभवन्त ११४
नखैर्विदारितान्त्राणां १२२
नदन्ति मददन्मिनः २८४
न धनं न च राज्य २१७
नयनाञ्चलावमर्षं १०७
न मनागपि राहु २८४
न विद्यते यद्यपि २८
नवोच्छलितयौवन १०९
नष्टो मोहः स्मृतिर्लब्धि २०२
नान्ध्रीपयोधर इवा ४१
नारिकेलजलक्षीर २२६
न सोऽस्ति प्रत्ययो १५३
निखिलं जगदेव १९८
निखिलां रजनीं २११
नितरां हितयाऽद्य २०१
नितरां परुषा १४८
नितान्तं यौवनोन्मत्ता १३०
निपतद्बाष्प संरोध २०९
निर्माय नूतनमुदाहरणा ५

निरुध्ययान्तीं १८७
निश्शेषच्युतचन्दनं ४७
निश्वासैर्जृम्भितै १९५
निरुपादानसंभार २७६
निर्द्वेषा बहुशास्त्र १
निर्भिद्यक्ष्मारुहाणां २८५
निर्माणे यदि मार्मिको १५८
निमग्नेन क्लेशैर्मनन ४
निवसियन्तीं घृति २३२
नैसर्गिकीच प्रतिभा २८

प

पश्चादिव गतिवचिः १४९
परिष्कुर्वन्त्यर्थान् सहृदय ५
परिहरतु धरां फणि ११७
पदार्थे वाक्यरचना १५४
परिमृदितमृणाली ६६
पार्श्वमेति प्रियो १५६
पापं हन्त मया २२८
पाषाणादपि पीयूष ४
प्रत्युद्गता सविनयं १२८
प्रतिभैव श्रुताभ्यास ३४
प्रमोदभरतुन्दिल १५०
प्रतिभा कारणन्तस्य ३२
प्रसङ्गे गोपानां २०३
प्रतिपादं प्रतिश्लोकम् १४८
प्रहरविरतौ मध्ये ५८

ब

बधान द्रागेव द्रढि २९२
ब्रह्मन्नध्ययनस्य १३५
ब्राह्मणातिक्रम ४२

भ

भमधम्मिग्र वीसधो ४९
भवद्द्वारि क्रुद्धयज्जय २१६
भवनं करुणावती २२१
भास्करसूनावस्तं २०८
भुजगाहितप्रकृतयो १६७
भुजपञ्जरे गृहीता १२१
भूरेणुदिग्धान् १२७

म

मदीयदोषाङ्कितचारु १
मधुरतरं स्मयमानः १९५
मथ्नामि कौरवशतं ४२
मधुरसान्मधुरं हि १६४
मननतरितीर्णविद्यार्णवो ६
मलयानिल काल १०८
मा कुरुकशां कराग्रे २००
मित्रात्रिपुत्रनेत्राय ६३
मुञ्चसि नाद्यापिरुषं २२५
मृद्वीकारसिता सिता २८१

य

यथा यथा तामरसायते १६४
यथा बहुद्रव्ययुतै ९५
यदवधिदयितो विलो २११
यदि लक्ष्मण सा २१६
यदि सामिथिलेन्द्र २०७
युवतेरिव सर्वमङ्ग १४६
ये रसस्याङ्गिनो धर्माः १३८
यद्यनुष्णो भवेद्वह्नि ३१९
यस्यासुहृत्कृततिर ४२
यस्योद्दामदिवानिशर्थि ११२
योगरूढस्य शब्दस्य २५४
यौवनोद्गमनितान्त २२७

र

रणेदीनान् देवान् दश ११५

रतिः शोकश्च निर्वेद ९८
रतिर्देवादिविषया १२४
रम्यहासारसोल्लासा २६०
रसगङ्गाधरनामा ६
रसप्रकर्षं गुणभाव २४०
रत्यादयः स्थायिभावाः १०१
राज्ञोत्प्रतिकूलान्ते २७६
राघवविरह ज्वाला ५६
रोगविरहादिप्रभवो १९८

ल

लीलयाविहितसिन्धु २१०
लोलालकापस्मिवल १६८

व

वक्षोजाग्रं पाणिना २०३
वचने तव यत्र १७१
वाचानिर्मलया सुधा १६२
वाचो माङ्गलिकीः १०६
विद्वन्मान सहंस १७
विद्वन्महेन्द्रमहिमान १
विमानपर्यङ्कतले १२७
विधत्तां निश्शङ्कं १५३
वाणीरकुञ्जोड्डीन ४२
विधायसामद्वदनानु १९५
विरुद्धैरविरुद्धैर्वा १००
विधिवञ्चितया मया १६८
विनिर्गतं मानद ६३
विरहेण विकलहृदया १८८
विभावो यत्र दारिद्रय १९२
वीक्ष्य वक्षसि विपक्ष २२६
व्यत्यस्तं लपति क्षणं २२३
व्यज्यन्ते वस्तुना २८३
व्यानम्राश्चलिताश्चैव २२२

श

शतेनोपायानां कथमपि २१९
शयिता शैवलशयने १८६
शयिता सविधेऽप्यनीश्वरा ४३
शक्तिर्निपुणता लोक ३१
शान्तस्य शमसाध्य ८७
शीघ्रं प्रयाहि करुणा ३२७
शून्यं वासगृहं १७६
शृङ्गारहास्य ६६
शृङ्गारः करुणः ६६
श्येवमम्बरतलाद्‌ १२१
श्लेषः प्रसादः समता १४६
श्रमादि प्रयोज्यं १८७
श्रीतातपादैर्विहिते ११६
श्रीमज्ज्ञानेन्द्रभिचोः ३

स

सदासजयानुषङ्गानां १६४
सच्छिन्नमूलः १४
सन्तापयामि हृदयं १८८
संजातमिष्टविरह २०६
संयोगो विप्रयोगश्च २५५
सन्धौ सर्वस्वहरणं ४२
सपदि विलयमेतु ११६
सजातीयविजातीयै १०१
सरसिजवनबन्धु १५५
सवासनानां सभ्यानां ६९
सर्वेऽपि विस्मृतिपथं २२४
सहजोत्पाद्या च सा ३०
सशोणितैः क्रव्यभुजां १२७
सानुरागाः सानुकम्पाः १६६
साब्धिद्वीपकुलाचलां ११३
सामदागमनबृंहित १६७

साहङ्कारसुरासुरा १५०, २८८
सुरस्रोतस्विन्या १०८
सुराङ्गनाभिराश्लिष्टाः १२७
स्मृताऽपि तरुणातपं १
स्वर्गनिर्गतनिरर्गल १५१
स्वच्छन्दोच्छलदच्छ ६४
स्वेदाम्बुसान्द्रकण १४६, १६०

ह

हतकेन मया वनान्तरे १९०
हरस्तु किञ्चित् ४२
हरिः पिता हरिर्माता १५३
हरिणीप्रेक्षणा यत्र १६५
हरिमागतमाकर्ण्य २१४
हीरस्फुरद्रदनशुभ्रि १६६
हृदये कृतशैवलानुषङ्गा १९८

मूले प्रमाणत्वेनोद्धृतानां सहैव मुद्रितानां पद्यानाम् आदिमस्यैव प्रथमांशोऽत्र निविष्टः ।

शुद्धिपत्रम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२	१	मङ्गलवत्व	मङ्गलवत्त्व
,,	१३	काय	कार्य
,,	२६	अल्पीयस्थश्च	अल्पीयस्यश्च
,,	३०	पिद्युत्वेन	पिद्युस्त्वेन
३	५	इतज्या	इतज्वा
,,	१०	शृङ्गार	शृङ्गारः
,,	१४	सम्बन्धत्व	सम्बन्ध
,,	१६	दिदयथः	दित्यर्थः
,,	२०	विषयिण्या	विषयिण्यः
४	१४	वणित	वर्णित
,,	१८	मन्यते	मन्वते
,,	२४	पूवकं	पूर्वकं
,,	२८	निस्सारि	र्निस्सारि
,,	२९	दशन	दर्शन
५	२६	निमित	निर्मित
६	२१	पञ्चाङ्गाकं	पञ्चाङ्गकम्
७	२	प्रदशिता	प्रदर्शिता
,,	१७	मान	भान
,,	२०	निष्ठाविशेष्यता	निष्ठविशेष्यता
,,	२३	मानं	भानम्
८	८	तात्पयं	तात्पर्यं
९	८	पेक्षयार्थस्य	पेक्ष्याप्यर्थस्य
,,	१४	शब्दत्वस्यापि	शब्दस्यापि

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
,,	२४	तत्राभ्यथशब्देन	तत्राप्यर्थशब्देन
,,	३१	काव्यत्वस्यापि	काव्यस्यापि
१२	२०	रेफस्य न्यूवता	
१३	२८	प्रतिपादकताशब्दएव	प्रतिपादकता शब्द एव
,,	२६	स्यास्तदा	स्यात्तदा
,,	३०	चमत्कारप्रवत्	चमत्कारत्ववत्
१५	१८	जनकताऽतिरिक्त	जनकतानतिरिक्त
,,	२०	प्रसंगे	प्रसङ्गः
१७	२	निदिष्ट	निर्दिष्ट
,,	५	नुमदसनम	नुपहसनीय
१७	६	पक्षेप	प्रक्षेप
,,	७	सवत्रा	सर्वत्रा
,,	६	वीत्वघरत्वादी	वीत्वघटत्वादी
,,	१२	सुवध	सुबोध
,,	१३	गुातङ्कारा	गुणालङ्कारा
,,	१५	गणेन	गुणेन
,,	१८	कायम्	कार्यम्
,,	२०	पयन्तं	पर्यन्तं
,,	२१	निर्दोषगुणशब्दाथ	निर्दोषसगुणशब्दार्थं
,,	२४	जातिमत्व	जातिमत्त्व
,,	३१	खण्डकर्म	खण्डधर्मं
१८	२१	शब्दाथ	शब्दार्थं
१९	२८	तस्यवक्षि	तस्येवक्षि
२१	८	प्रश्यया	प्रत्ययाः
,,	६	वतमानं	वर्तमानं
,,	२०	शब्दाथ	शब्दार्थं

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
,,	२९	युक्ता	युक्तः
२३	२१	मित्यथः	मित्यर्थः
,,	२२	तीत्यथः	तीत्यर्थः
,,	२३	अथवच्छ	अर्थवच्छ
,,	२९	ममप्रकाश	मर्मप्रकाश
२५	३	रसवत्वा	रसवत्त्वा
,,	१४	नूनार्थ	नूतनार्थ
२६	१	पदाथभेदो	पदार्थभेदो
,,	१३	प्रतिमायाः	प्रतिभायाः
,,	२५	बुद्धेः	बुद्धिः
२७	१३	दुन्मेषा	दुन्मेषः
२८	१६	न्तोका	न्तोक्ता
,,	,,	नैसगक	नैसर्गिक
,,	१८	प्रदीपा	प्रदीपः
२९	१८	पूवव्याख्या	पूर्वव्याख्या
,,	२८	इति आदि	इत्यादि
३०	१६	पयवसान	पर्यवसान
३२	२७	सैवापस्थितिः	सैवोपस्थितिः
३३	५	काव्यघटना	काव्यघटना
,,	७	प्रतिमा	प्रतिभा
,,	२०	व्युत्पत्ति न	व्युत्पत्तिर्न
३५	१०	पूरक एष	पूरकमेव
,,	२७	सिद्धा	सिद्धेः
४१	२७	काक्वाक्षिप्तम्	काक्वाऽऽक्षिप्तम्
४५	१४	अनुवाद्यतमव	अनुवाद्यताव
४८	२९	सत्वादु	सत्त्वादु

पृष्ठम	पंक्तिः	अशुद्धम्	शुद्धम्
५१	२ मूल	रूाफलां	रूपफलां
५१	७ मूल	विराधि	विरोधि
५२	३ मूल	ब्यञ्जन	व्यञ्जना
५४	२ मूल	निरस्तरम्	निरस्तम्
,,	४ ,,	स्फुट	स्फुटं
,,	१२ टीका	पदकृत्य	पदकृत्यम्
५५	२०	कत्वम् । उक्तं	कत्वमुक्तं
५८	५ मूल	चमकार	चमत्कार
,,	१० टीका	हृदयासाधा	हृदयसाधा
६३	७ मूल	नाकान्त	नाक्रान्त
६४	२५ टीका	नाऽलङ्का	वाऽलङ्का
६५	१४	तवत्	तावत्
६६	१२	कराति	करोति
,,	१५	रन्तकर	रन्तःकर
,,	२०	वषयाकार	विषयाकार
,,	२५	पह्नि	वह्नि
६७	१८	अन्तकर	अन्तःकर
६८	३ मूल	विधिः	विधः
७१	९	वृत्तय	वृत्तये
७२	७	ग्रघीरा	ग्रसारा
,,	११	भावनवला	भावनाबला
,,	१७	साक्षिणऽभेदे	साक्षिणाऽभेदे
७३	१४	बादेनां	वादीनां
,,	१६	ग्रत्रामम	अत्रायम्
,,	१९	अशनना	अज्ञानना
,,	,,	वादूिवर्वणया	वादिचर्वणया

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
,,	२६	मान	भान
७४	१२	चाङ्गीकात्	चाङ्गीकारात्
७६	७	कथ	कथं
७७	२५	ज्ञानगम्या	ज्ञानमगम्या
७८	६	स्यातिष्टत्वा	स्यानिष्टत्वा
७९	२ मूल	अपहृद्य	अप्यहृद्य
७६	२ मूल	पादपानां	पदार्थानां
,,	२४	मीमांसकाना	मीमांसकानां
,,	२५	पदाथयो	पदार्थयो
८०	२७	विभावना	विभावता
,,	२८	स्वाद्यानः	स्वाद्यमानः
८१	३ मूल	गी कृ	गीकृ
,,	९	भोगीकृति	भोगीकृतिः
८२	५	माजिक	माजिकैः
,,	३१	गथेषु	ग्रन्थेषु
८४	१३	काल्पतेन	कल्पितेन
८८	२५	प्रागर्ात	प्राग्रति
८६	६	व्याख्यानामि	व्याख्यानमि
,,	१३	सन्धानह्वि	सन्धानादि ।
९०	२१	सम्यक	सम्यक्
९१	१६	अक्रात्रमा	अकृत्रिमा
,,	१७	नीयमना	नीयमाना
,,	१६	दिमत्वात्	दिमत्त्वात्
९३	२२	स्थितामेषां	स्थितानामेषां
९४	८ मूल	विषयी कृतिः	विषयीकृतिः
९५	११	तस्यान्ना	तस्मान्ना
९६	१२	प्रकानाम्	भयानकानाम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
९८	२०	दिभागो	दिभोगो
९९	४	पादलं	पादितम्
„	७	सस्कार	संस्कार
„	१९	अधिष्ठना	अधिष्ठाना
१०१	१३	वहतातो	वहतीति
१०२	१ मूल	साऽपि	सोऽपि
„	२५	च रतिः	च रतेः
१०३	१५	नायिकाहृदि	नायिकाहृदि
११३	२०	चेतसा	चेतसो
११४	१२	शौर्यं	शौर्यं
११६	२१	र्भक्ति	र्भक्ति
१२३	१३	हासाश्यस्य	हासाश्रयस्य
„	२३	स्याभावः	स्थायिभावः
„	२६	सलक्ष्य	संलक्ष्य
१२७	८	गाढ	गाढं
१३०	२१	निष्पत्ति	निष्पत्ति
„	२२	कामावस्ययो	कामावस्थयो
१३३	१६	दानस्य	दीनस्य
१३४	१३ मूल	राजादय	राजादयः
„	१८	अदिया	अविद्या
१३६	२ मूल	यौंजप्रसा	यौंजःप्रसा
„	१३	गन्थिभि	ग्रन्थिभि
१३८	२०	मित्यर्थं	मित्यर्थं
„	२९	वमनेना	वामनेना
१४३	१३	मतेनपि	मतेनापि
१४५	६	रता	रतो

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
१४६	२०	वक्तु	वक्तुं
१५२	८	द्वितीयाध	द्वितीयार्धे
,,	१५	म्परस्येति	म्परयेति
,,	१६	त्यन्वयः	त्यन्वर्थः
१५४	१४ मूल	सामिपायत्वं	साभिप्रायत्वं
१५६	१८	वासुदेव	वासुदेवे
१५९	१८	कष्टवं	कष्टत्वं
,,	१९	मूल	मूलं
१६०	२६	र्भाशुद्ध	र्भाशुद्धं
१६१	१६	पूर्वाधंऽति	पूर्वार्द्धेऽति
१६२	१ मूल	स्वरूय तदादि	सख्य इत्यादे
१६६	६	यस्यन्ताव	यस्यान्ताव
१६७	२४	न दोषः	दोषः
१६८	२ मूल	संवोगस्य	संयोगस्य
१७१	२०	पादन	पादनं
१७२	२१	कृष्णोः दृष्टः	कृष्णो दृष्टः
१७४	१४	तद कूलः	तदननुकूलः
१७६	१५	दर्शनन	दर्शनेन
१७८	१८	भावविषय	भावनाविषय
१८०	२०	वथा	तथा
,,	२९	पां	परं
१८१	१४	गुणीभत	गुणीभूत
१८२	७	व्यञ्ज्ञकाव्य	व्यङ्ग्यकाव्य
१९०	७ मूल	प्रतींपते	प्रतीयते
१९१	५ मूल	गोरवात्	गौरवात्
१९२	१६	यमनया	यमानया

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
,,	१६	वैवण्यं	वैवर्ण्यं
१६३	२३	वचनभि	वचनाभि
१६४	२१	भावक्यल	स्वभावोक्त्यल
२००	१७	वस्तुतः	वस्तुत
२०१	१७	निर्दयः	निर्दय ?
२०२	२१	सदेह	संदेह
२०६	१६	कणपि	कर्णवि
२१०	१४ मूल	तदिभावाः	तद्विभावाः
,,	१६	स पूर्वं	सा पूर्वं
२१४	१८	बहुना	बहूनां
२१५	१८	प्रह्लदा	प्रह्लादा
२१७	६ मूल	दगन्त	दृगन्त
,,	१७	निर्वदं	निर्वेदं
,,	१६	निषवन्ते	निषेवन्ते
,,	२२	रङ्गण	रङ्गेण
२१८	१४	योऽयस्मिन्	योऽप्यस्मिन्
,,	१६	संग्ररेऽपि	संग्रहेऽपि
,,	२३	निष्ठयाम	निष्ठायाम
,,	२७	प्रयोजन	प्रयोजनं
२२०	१ मूल	अत्राम्वन	अत्रालम्बन
,,	२ मूल	राजान्तपुरे	राजान्तःपुरे
,,	१८	तदायामपि	तदीयामपि
,,	२४	सम्बन्धिनी	सम्बन्धिनीं
२२१	६ मूल	से सा	सेवासा
,,	७	स्मण	स्मरण
,,	१५	सूचनयै	सूचनायै
२२२	१७	आभसत्व	आभासत्व

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
	२१	भक्ति	भक्ति
२२३	१७	सापि	सोऽपि
,,	२४	लमति	लपति
२२४	१० मूल	सर्वपि	सर्वेऽपि
,,	१५ ,,	तिपति	तिप्रति
,,	१६ ,,	विता विद्यायां	वितायां विद्यायां
,,	१७ ,,	भासत्व	भासत्वं
,,	,,	तथानु	तथाऽनु
,,	२४	नोपयाते	नोपयाति
२३४	२१	अनुनुरणव	अनुरणन
२३५	१५	क्रमता	क्रमतां
,,	१८	पत्तित्वर्थे	पत्तिस्त्वर्थे
२४१	९	मेमेनं	मेनं
२४२	१०	श्रयान्	श्रेयान्
,,	१२	याच्छशू	याच्छिशू
२४३	२२	पूर्व	पूर्वं
,,	२८	सरलेवे	सरलैवे
२४४	१२	व्यक्त जन्य	व्यक्त्यजन्य
,,	१५	अनाप्रका	नाप्रक्का
२४६	१३	इत्यदिका	इत्यादिका
२४७	२१ मूल	अनन्तर	अनन्तरं
२५१	१९	तथैव	तयैव
,,	२१	उल्लासस्ये	उल्लास्ये
२५५	१६	सशयस्यैव	संशयस्यैव
२५६	२४	वदुव्यावृ	वदव्यावृ
२६१	१९	स्थाणु	स्थाणुं

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२६३	२६	...त्तरप्रति	अन्तराप्रति
२६४	१४	अप्राप्ते	अप्राप्तेः
२६५	१२	मद्यजन्य	मधुजन्य
,,	१३	तुल्या वित्ति	तुल्यवित्ति
४६६	२०	व्याख्यात	व्याख्यान
,,	२९	नपस्था	नुपस्था
२७१	४ मू.	सोक्तोपरा	सोक्तेरपरा
,,	१६	रोयपं	रोपं
२७४	६ मू.	तिराधा	तिरोधा
,,	७ ,,	व्यङ्गयवेऽपि	व्यङ्ग्यत्वेऽपि
२७७	१७ मू.	विरोघ्य	विरोध्य
२७८	४ मू.	दितीया	द्वितीया
,,	१६	तापर्यं	तात्पर्यं
,,	२०	प्रथम	प्रथमं
२७९	१५	व्यख्यानम्	व्याख्यानम्
,,	१८	सुचित	सूचितम्
२८१	३ मू.	वाच्यम	वाच्यम्
२८३	४ मू.	तत्तदखसुखानां	तत्तद्दुःखसुखानां
,,	१३	अन्था	अन्यथा
२८६	१०	किरणषु	किरणेषु
,,	१२	दौसुक्येन	दौत्सुक्येन
२८८	२ मू.	अल्पन्ति	जल्पन्ति
,,	४ ,,	मग्धारि	मुग्धारि
,,	८ ,,	सवंकषाः	सर्वंकषाः
२९०	१७	हिष्णून	हिष्णूनां
२९२	२ मू.	तन्मूलो	तन्मूलौ
२९६	२३	कुाचिच्छा	कुत्रचिच्छा

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
२९७	२३	कमल	कमलं
३०७	१४	प्रकारा	प्रकारो
३१०	२४	कस्याचित्स्वभेद	कस्यचित्स्वभेद
३१४	८	लक्षशकृता	लक्ष्यीकृता
३१६	१६	सदृशयो	सदृश्या
३१६	२५	सादाश्यस्यैव	सादृश्यस्यैव
३२१	२०	वकतु	वक्तु
,,	२१	रेवम्युपगमात्	रेवानम्युपगमात्
३२४	२२	प्रत्यर्थिवशो	प्रत्यर्थिवंशो
,,	,,	दानाम्बुवहः	दानाम्बुपट्टः
,,	२३	पट्टाभेदे	पट्टाभेदे
,,	,,	साधम्यं	साधर्म्यं
,,	२४	पहाभेद	पट्टाभेद
३२७	१२	चन्द्रिक	चन्द्रिके
,,	१४	चन्द्रिकाः	चन्द्रिकायाः

अन्याश्च काश्चन प्रमाद् रहिता अशुद्धयः क्षन्तव्याः, प्रायो भावार्थबोधने नाधिकक्लेशकरास्ताः, अनुस्वारविसर्गरेफपरसवर्णाक्षराणां मुद्रा एव पर्याप्ता न प्राप्यन्ते मुद्रणालयेषु इति जनताराजम्यामुपेक्षितायाः सुरगिरो दुर्दशैव ।